
पितुरपि प्रपौत्रपर्य्यन्ताभावेपिन्टदौहित्रस्याधिकारो बोद्धव्यः—इति दायभाग (पृ० २०८) लिखनञ्चेति ।

श्रीर्ज्जयतितराम् **श्री हरिः शरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

श्रीर्ज्जयतितराम्

१०—सदर देमानी आदालतेर कायेम मकाम प्रथम हाकिम श्री युत जान हरवरट हारिङ्टीन साहेवेर हजुर हइते ए आदालतेर पण्डितदिगेर नाम ।

श्याम सुन्दर महेन्द्र आपिलाण्ट

कृष्ण चन्द्र भ्रमरवरराय पापड रेष्पाडण्टेर

२४ ६६ लंवरेर वावत मकद्दमाते अंगरेजी १८२५ सालेर

१—जीवितोः—व्यप० ।

२—दाय० १।१४

१२ फिबरवरी मासेर रोवकारिर लिखित ए मकर्दमाते मुद्दइर दाखिल करा ८९ नंबरेर दस्तावेज चटार अर्थात् लिखन आ जिला कटकेर कमिसनर साहेबेर काचारीते दाखिल हओया उभयेर सओयाल ओ जबाब दृष्टे सुवे उडस्यार चलित शास्त्रानुसारे एक सप्ताहेर मध्ये व्यवस्था दाखिल करण निर्बन्धे सवाल एइ ये—

नंबर २४६६

श्यामसुन्दरमहेन्द्र　　　　आपीलाण्ट

कृष्णचन्द्रभ्रमरवरराय　　　　रेस्पाण्डण्ट

यद्यपि विरोधीय राज्य ओ जमीदारिर दाखिलकार राजा रामचन्द्र ए दस्तावेजेर मजमूने लिखन मुद्दइर निकट लिखिया थाके। तत्परे ए राज्य ओ जमीदारीते मुद्दइके विना दाखिलकार करणे मरिया थाके, ए लिखनेर लिखित त्यागकरण अच्छियत ताहार साव्यस्त हओन प्रकारे मुद्दइ सत्वेर ताहार लिखित राज्य ओ जमिदारीर दान ओ अच्छियत ओ राजा रामचन्द्रेर औरस पुत्र फुल विवाहेर स्त्रीर गर्भजात कृष्णचन्द्र महेन्द्र आसल मुद्दाआलेहेर उत्तराधिकारित्व-सत्व असिद्धतार लिपिते ए सुबार चलित शास्त्रानुसारे बलवत्तर ओ गुणदायक बटे कि ना इति—

श्रीर्ज्जयतितराम्

प्रथम जबाब व्यवस्था—रामतनुविद्यावागीश—

राज्ञा रामचन्द्रेण मानसिंहस्य राज्ञो दत्तकपुत्रकृष्णचन्द्रभ्रमरवरसंज्ञकस्य कर्त्तृत्वादिकरणार्थं कृष्णचन्द्रभ्रमरवरासन्निधानेऽपि यल्लिखितं तल्लिखनानुसारेण दानकरणादध्यत्तकरणाच्च रामचन्द्रस्वत्वास्पदीभूतराज्यादौ तत्स्वत्वत्यागानन्तरं कृष्णचन्द्रभ्रमरवरस्य स्वत्वं जातम्। एवं रामचन्द्रलिखना(नु)रोधात् दासीगर्भजातः कृष्णचन्द्रमहेन्द्रस्तु पितृद्विट्, अतस्तद्राज्यादौ तस्य स्वत्वं भवितुं नार्हति इत्योड्रदेशचलितमनुमिताद्वरादिग्रन्थानुसारिणी व्यवस्था—

तत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् (५।१५२) ॥१॥

मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् ।

विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥ इति नारदवचनम्[1] ॥२॥

भूमिं दत्त्वा तु यः पत्रं कुर्य्याच्चन्द्रार्कसाक्षिकम् ।

अनाच्छेद्यमनाहार्य्यं दानलेख्यन्तु तद्विदुः ॥ इति बृहस्पति(पृ० ६१)-वचनम्[2] ॥३॥

पितृद्विट् पतितः (षण्ढो) यश्च स्यादौपपातिकः ।

औरसा अपि नैतेऽशं लभेरन् क्षेत्रजाः कुतः ॥

इति नारदवचनञ्च[3] इति (पृ० १६५) ॥४॥

श्रीहरिः शरणम्

श्रीरामतनुशर्मविद्यावागीशेन

श्रीर्ज्जयतिराम्

द्वितीय व्यवस्था—वैद्यनाथमिश्र—

एतद्धर्म्माधिकरणप्रथमाधिपतिस्थानाभिषिक्तश्रीयुक्तजानहरवरटहारिण्टीन-साहेवधर्म्माधिकरणलिखितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनु-सारेणोत्तरं लिख्यते ।

प्रभोराज्ञापितवादिप्रतिवादिनोः प्रश्नोत्तरपत्रार्थपरिज्ञानेन राज्ञा

---

१. दानमयूखे नारदः—(पृष्ठ० १२)। तत्र "दानस्यान्तो न विद्यते" इत्यस्य स्थाने "तस्यान्तो नैव विद्यते" इति पाठः ।

२. बृह०—धर्को०—३६४ । तत्र "चन्द्रार्कसाक्षिकम्" इत्यस्य स्थाने "चन्द्रार्क-कालिकम्" इति पाठः । "तद्विदुः" इत्यस्य स्थाने "तद्भृगुः" इति पाठः व्यप० संग्रहे ।

३. नार०—पृ० १६५ । तत्र "औरसाः" इत्यस्य स्थाने "ओरसाः" इति पाठः ।

त्रिलोचनसिंहेन फूलविवाहितायां स्त्रियामुत्पन्नो राजा रामचन्द्रः शौर्य्येण तदुत्तराधिकारित्वेन वा समस्तमेव पैत्रं राज्यं प्राप्य कतिपयदिनान्युपभुज्य फुलविवाहितायां स्त्रियां कृष्णशरणनामानं कृष्णचन्द्रमहेन्द्रप्रसिद्ध[1] पुत्रमुत्पाद्य[2] कृष्णचन्द्रभ्रमरवरस्यैतद्धर्म्माधिकरणप्रतिवादिनोऽन्तिके चर्चावसंज्ञकं[3] पत्रं प्रेषयित्वा मृत इति ज्ञातम्। तत्र यदि तद्देशे फूलविवाह-शब्देन शास्त्रोक्तगान्धर्वविवाह उच्यते तदा गान्धर्वविवाहसंस्कृतायां पत्न्यामुत्पन्नो[4] राजा रामचन्द्रः स्वपितुः मुख्य एवौरसः पुत्रः, तथा रामचन्द्रस्य फूलविवाहितायां स्त्रियामुत्पन्नः कृष्णचन्द्रमहेन्द्रो मुख्य एवौरसः पुत्रः। यदि च तद्देशे दास्येव फूलविवाहिताशब्देनोच्यते तदा दास्यामुत्पन्नो[4] राजा रामचन्द्रस्तथापि स्वपितुरौरस एव। उभयथा राजा रामचन्द्रः शूद्र एव। शूद्रेण विवाहितायां[5] स्त्रियामुत्पन्नो दास्यामुत्पन्नश्च धनाधिकारी भवत्येव। सति पुत्राद्यन्वये[6] धनाधिकारिणि विद्यमाने सर्वस्वदानं तदननु-मत्या क्रमागतस्वार्जितस्थावरदानं चासिद्धम्। अतो रामचन्द्रप्रेषितपत्र-लिखितत्यागकरणादिवृत्तान्तेन रामचन्द्रस्वामिकराज्यादौ कृष्णचन्द्र-भ्रमरवरस्यैतद्धर्माधिकरणप्रतिवादिनः स्वत्वं न भवति। एवं रामचन्द्रेण फूलविवाहितायां स्त्रियामुत्पन्नस्य कृष्णचन्द्रमहेन्द्रस्य तदुत्तराधिकारित्वेन स्वत्वनाशो न भवति—इति उत्कलदेशप्रचलितमनुमिताक्षरावीरमित्रोदय-व्यवहारमयूखप्रभृतिग्रन्थानुसारिणी व्यवस्था—

तत्र प्रमाणम्—

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः--इत्यादि मनुवचनम् (९।१६३) ॥१॥

स्वं कुटुम्बाविरोधेन देयं दारसुतादृते।

---

१. कृष्णचन्द्र—व्यप०।

२. उत्पाद्य—व्यप०।

३. "चटाव" इत्यपि भवितुमर्हति।

४. उतपन्नो···व्यप०।

५. विवाहितया—व्यप०।

६. ०द्यन्वये—व्यप०।

नान्वये[१] सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्[२]॥ इति मिताक्षरा-वीरमित्रोदयादि (पृ० ६५.१)ग्रन्थधृतयाज्ञवल्क्यवचनम्[३] (२।७५) ॥२॥

पुत्रपौत्राद्यन्वये[४] विद्यमाने सर्वं धनं न दद्यात्—इति मिताक्षरा-(पृ० २४५)लिखनम् ॥३॥

स्थावरे तु स्वार्जिते पित्रादिप्राप्ते[५] च पुत्रादिपारतन्त्र्यमेव—इति मिताक्षरा(याज्ञ० २।११३ पृ० २००)लिखनम् ॥४॥

जातोऽपि दास्यां शूद्रेण कामतोऽशहरो भवेत् ।
मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिकम् ॥
अभ्रातृको हरेत्सर्वं दुहितृणां सुताद्दते—इति मिताक्षरा-वीरमित्रोदयादिग्रन्थधृतयाज्ञवल्क्य(२।१३३-४ पृ० २१६)वचनञ्चेति॥५॥

श्रीर्ज्जयतितराम् **श्रीवैद्यनाथमिश्रेण**

श्रीर्ज्जयतितराम्

११ एइ मकद्दमाते प्रथमेते श्रीयुत कुर्टनी इशामिट साहेव द्वितीय हाकिमेर वैठकेते सओयाल। एइ ये

सओयाल—

जेला साहावाद साकिनेर एक व्यक्ति हिन्दु आपन सहोदर भ्रातार पुत्रके पुत्रनाते लइलेक। ताहार पर ए व्यक्तिर औरस पुत्र जन्मिल। ऐ व्यक्तिर मृत्युर पर ताहार त्यक्त धनेर मध्ये

---

१. नान्वये—व्यप० ।
२. प्रतिग्रहम्—व्यप० ।
३. स्वकुटुम्बविरोधेन—व्यप० ।
४. पुत्रपौत्रयद्यन्वये—व्यप० ।
५. स्वार्जिते पैत्रादि०—व्यप० ।

और्स पुत्र कि परिमान ओ दत्तक पुत्र कि परिमान पाइवेक, उचित–ये अतिशीघ्र एइ सओयालेर जवाव ऐ देशेर शास्त्रानुसारे दाखिल करेन इति ।

श्रीर्ज्जयतितराम्

जवाव-व्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरण-लिखितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यत्र कश्चित् हिन्दूजातीयः शाहावादप्रदेशीयः सोदरभ्रातृपुत्रं[1] दत्तकत्वेन गृहीत्वानन्तरमौरसपुत्रमेकमुत्पाद्य मृतः, तत्र तदीयसमस्तस्थावरास्थावरधनं चतुर्द्धा विभज्य भागत्रयमौरसः[2] पुत्रो गृह्णीयात्[3], दत्तकपुत्रस्त्वेकं भागं गृह्णीयादिति शाहावादप्रदेशादिचलितमिताक्षरादत्तकमीमांसादिग्रन्थानु-सारिणी[4] व्यवस्था इति ।

तत्र प्रमाणम्—

तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते[5] ।

चतुर्थभागभागी स्यात्···दत्तकः ॥ इति मिताक्षरा(याज्ञ०२।१३२)-दत्तकमीमांसादि(द०मी० १०३)धृतवशिष्ठवचनम्[6] ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीहरिः शरणम्
श्रीरामतनुशर्म्मविद्यावागीशेन

---

१. भ्रातृपुत्र—व्यप० ।

२. मौसरः—व्यप० ।

३. गृह्णीत—व्यप० ।

४. दत्तमीमांसा०—व्यप० ।

५. उतपद्यते—व्यप० ।

६. तस्मिन् दत्तके प्रतिगृहीते यद्यौरस उत्पद्यते तदा दत्तकश्चतुर्थांशं लभते न समां-शमित्यर्थः इति द०मी० पाठः ।

श्रीर्ज्जयतितराम्

मस्रोयाल—

१२—योगि जातिर स्त्री स्वामिर मरणेर पर आपन इच्छाते स्वामिर सहित दग्ध हइते पारे कि ना।

जवाब-व्यवस्था

योगिजातेः स्त्री स्वामिमरणानन्तरं स्वेच्छया स्वामिसहगमनं कर्त्तुमर्हतीति।

श्रीर्ज्जयतितराम् **श्रीहरिः शरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल रेजेष्टर मेघनाटन साहेवेर निकट।

श्रीर्ज्जयतितराम्[1]

१३—सस्रोयाल—

रामकृष्णेर चारि पुत्र, वड पुत्र रामहरि, द्वितीय रामचन्द्र, तृतीय पुत्र राममोहन, चतुर्थ पुत्र रामकान्त। ताहार मध्ये रामहरिर आपन ऐ तिन भ्राता ओ पिता मर्त्तमाने[2] दुइ पुत्र राखिया मृत्यु हय। रामहरि आपन उपार्जन[3] द्वारा धन सञ्चय करिया दुइ पुत्रेर नामे उइल अर्थात[4] विभागपत्र करिया देन। राम

१. श्रीज्र्यतितराम्—व्यप०।

२. वर्त्तमाने इति साधीयान् पाठः।

३. उपार्ज्र्न—व्यप०।

४. अर्थात—व्यप०।

कृष्ण ओ रामचन्द्र ओ राममोहन ओ रामकान्त प्रत्येके एइ धनेर अंशेर दाओया करे। यद्यपि ऐ धन रामहरि आपन धन ओ आपन सरीरायास द्वारा उपार्जन करिया थाके, ताहाते ताहारा किम्वा के के, एवं ताहादिगेर मध्ये कोन व्यक्ति ए धनेर कत अंश पाइते पारे। यद्यपि ऐ धन पितार धन ओ ताहार साहाज्यताते[1] एवं सुपारिप द्वारा उपार्जन करिया थाके ताहाते ताहारा कि रूप अंश पाइवे। एकान्न किम्वा पृथकान्न थाकिले ऐ धन ग्रहणेर कि विशेष इति।

श्रीर्ज्जयतितराम्[2]

जवाबव्यवस्था

प्रभुकृतप्रश्नानुसारेणोत्तरं लिख्यते। यत्र चतुर्णां सोदरभ्रातृणां मध्ये एको भ्राता पृथगन्नस्थितोऽपृथगन्नस्थितो वा विद्यमाने पितरि विद्यमानेषु त्रिषु भ्रातृषु चास्मदर्जितसमस्तधनमस्मत्पुत्रयोरित्यभिप्रायेण[3] विभागपत्रं कृत्वा मृतस्तत्र यदि तद्धनं यदि पितृधनोपघातेन पितुः शरीरायासेन वा उपार्जितं स्यात्तदा तदुपार्जितसमस्तधनास्यार्द्धभागित्वं पितुरवशिष्टार्द्धभागस्य पञ्च भागान् कृत्वा भागद्वयमुपार्जकस्यैकैको भागस्त्रयाणां भ्रातृणाम्। यदि च पितृधनानुपघातेन पितुः शरीरायासव्यापारव्यतिरेकेणोपार्जितं स्यात्तदा तद्भ्रातृणां न तद्धनाधिकारः, किन्तु समुदायद्रव्यस्यार्द्धभागित्व पितुरर्द्धभागित्वमुपार्जकस्य। उभयपक्ष एवोपार्जकपुत्रयोरुपार्जकभागभागित्वम् इति वङ्गदेशप्रचलितदायतत्त्वादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्।

द्व्यंशहरोऽर्द्धहरो वा पुत्रवित्तार्जनात्पिता—

इति दायभाग(पृ ४६, २।६५)दायतत्त्वादि(दात०—२४,५)-ग्रन्थधृतकात्यायन(पृ ८५१)वचनम्।

---

१. साहाय्यताते—इति साधीयान् पाठः।

२. श्रीर्ज्जयतितराम्—व्यप०।

३. ०स्मदुजर्ज्जित—व्यप०।

तत्र पितृद्रव्योपघातेन पुत्रार्जितवित्तस्यार्द्धं पितुरर्जकस्य पुत्रस्यांशद्वयमितरेषामेकैकांशिता[1], अनुपघाते पितुरंशद्वयमर्जकस्यापि तावदेव इतरेषामनंशत्वम्--इति दायभाग(पृ० ५१ २।७१)ग्रन्थलिखितैतद्वचनव्याख्यानञ्चेति ।

श्रीर्ज्जयतितराम्　　　　　　　　　　　　**श्रीहरिः शरणम्**

श्रीवैद्यनाथमिश्रेण　　　　　　　　**श्रीरामतनुशर्म्मविद्यावागीशेन**

श्रीर्ज्जयतितराम्

१४--नम्बर २३३६

रोवकारि मिलित आदालत देओयानी सदर इंरेजी सन १८२५ साल तारिख ५ माह आपरेल मताबक बाङ्गला सन १२३१ साल २४ चैत्र रोज मङ्गलवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर बैठके—

प्रियागसिंह　　　　　　　　　　　　　　आपीलाण्ट

अजध्यासिंह　　　　　　　　　　　　　रेस्पाण्डेण्ट

आपीलाण्टेर उकिलगण मुनसी महम्मद प(ना)ह ओ लाला आयुधलाल[2] ओ रेस्पाण्डेण्टेर उकिलगण नबि नेयामत आली विद्यमाने आइल। मकद्दमा रोबकार हइल। कोर्ट आपीलेर दाखिल हओया कागज नम्बर हइते तथाकार फयसला पर्य्यन्त ओ ए आदालते दाखिल हओया आरजि मजुवात ओ जवाब ओ २३३६ नम्बरे मकद्दमार कागजसकल पडागेल। तदपरे आपिलाण्टेर

---

१. ०कांशता—व्यप।

२. आयुधलाल आयुधलाल—व्यप०।

उकिलेरा सनद्विसिंह ओ मुसम्मात पाना आपीलाण्ट वालमुकुन्द रेष्पाडएटेर मकद्दमाते इंरेजि १८२३ साले २० आपरेल मासेर हओया एक केता फयसला(र) नकल ओ जिला त्रिहोटेर देओयानी आदालतेर पण्डितेर एक केता व्यवस्थार नकल ओ जिला साहाबादेर देओयानी आदालतेर पण्डितेर व्यवस्थार नकल छय टाका मूल्येर फेरस्त द्वारा लम्बरे दाखिल करिल हइ आइल। तत्परे ए आदालतेर पण्डितदिगेर स्थाने सओयाल करागेल एइ बयाने जे जिला साहाबाद सांकिमेर एक व्यक्ति हिन्दु आपन सहोदर भ्रातार पुत्रके पुत्रताते लइलेक। ताहार पर ऐ व्यक्तिर औरस पुत्र जन्मिल। ऐ व्यक्तिर मृत्युर पर ताहार त्यक्त धनेर मध्ये औरस पुत्र कि परिमान ओ दत्तक पुत्र कि परिमान पाइवेक। उचित जे अतिशिघ्र एइ सओयालेर जवाब ऐ देशेर शास्त्रानुसारे दाखिल करेन इति। सन १८२५ साल इङ्गरेजी तारिख ५ आपरेल यथा पण्डितेरा जवाब दाखिल करिलेक, ताहार तरजमार विवरण एइ ये, यद्यपि जिला साहाबाद साकिनेर एक व्यक्ति हिन्दु आपन सहोदरभ्रातृपुत्रके अपन पुत्रताते लइलेक। ओ तत्परे ऐ व्यक्तिर औरस पुत्र जन्मिलेक। ताहार मृत्युर पर ताहार स्थावरास्थावर समुदाय धन चारि अंश हइया, ताहार मध्ये हइते तिन अंश ताहार औरस पुत्रके ओ एकांश ताहार दत्तक पुत्रके वर्त्तिवेक। जिला साहाबाद ओ गयरहेर चलित मिताक्षरा ओ दत्तकमीमांसा प्रभृति ग्रन्थानुजाइ एइ व्यवस्था। इहार प्रमाण मिताक्षरा दत्तकमीमांसा ग्रन्थसकलेर लिखित वसिष्ठमुनिर[1] वचन। अर्थ एइ—यद्यपि कोन व्यक्ति प्रथम दत्तक ग्रहण करिया थाके ओ तदपरे ताहार औरस पुत्र जन्मे, से प्रकारे ताहार मृत्युर पर दत्तक[2] पुत्रके चतुर्थ अंश वर्त्तिवेक इति। यथा ए

---

१. मणिर—व्यप०।

२. दत्त—व्यप०।

आदालतेर पण्डितदिगेर जवाब अनुसारे उचित छिल जे कोटेर डिगरि रष्पाडण्टेर दाविर अर्द्धेकेर, कारण जे पूर्व्वे हइते अर्द्धेक त्यक्त धनेर उपर दखिल आछे, हइतो। ओ वृत्तान्त एइ ये आपील आदालतेर पण्डितेर जवाब अनुसारे दाओयार तिन एवं चौथाइर डिगरि हइयाछे। पण्डितेर स्थाने आपीलेर हाकिमेर सओयालेर वयान—जद्यपि हिन्दु जाति कोन व्यक्ति आपन[1] भ्रातुष्पुत्रके दत्तक करे, ओ ताहार दत्तक करणेर पर दत्तकग्रहीतृओर एक पुत्र जन्मे। अतएव ए प्रकारे ऐ व्यक्तिर त्यक्त धनादि दत्तक ओरस[2] पुत्रेर सहित शास्त्रानुसारे कि प्रकार विभाग हइवेक। कोट आपीलेर पण्डितेर जवावे(र) तरजमार विवरण—इहार मिताक्षरा ओ व्यवहारमयूख प्रभृति शास्त्रानुसारे ऐ व्यक्तिर त्यक्त धनके दुइ अंश करिया परे एक अंशके चारि अंश करा जावेक। सेइ चारि अंशेर एकांश दत्तक पुत्रके वर्त्तिवेक, ओ अवशिष्ट समुदाय त्यक्त धन ऐ औरस पुत्रेर सत्व—वशिष्ठमुनि ओ कात्यायनमुनिर कथित एइ कथा। अतएव हुकुम हइल ये एइ रोवकारिर नकल ए आदालतेर पण्डितदिगके समर्पन करा जाय। ये आपिल आदालतेर पण्डितेर जवावे ये तदनुसारे मृत[3] व्यक्तिर समस्त धन मध्ये सोलो आनार चोर्द्द आना औरस पुत्रके ओ दुइ आना दत्तक पुत्रके वर्त्ते-शुद्ध वटे कि अशुद्ध, ओ यदि शुद्ध हय, तवे कि प्रकारे ऐ आदालतेर पण्डितदिगेर व्यवस्थाते सम्यक धनेर तिन चौथाइ, ये सोल आनार वार आना हय, औरस पुत्रे(र) सत्व, ओ चतुर्थांश[4] अर्थात् चारि आनार

१. आपन आपन—व्यप०।

२. औरस—इति साधीयान पाठः।

३. मृत्यु—व्यप०।

४. चर्थांश—व्यप०।

दत्तक पुत्रेर सत्व लिखियाछे[1]। उचित ये कल्य दुइ प्रहरेर मध्ये एइ सओयालेर जवाब दाखिल करेन इति।

श्रीर्ज्जयतितराम्

जवाबव्यवस्थापत्र।

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेबधर्म्माधिकरण-लिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

एतद्विवादविषये कोर्टआपीलाख्यधर्म्माधिकरणनियुक्तपण्डितेन यत्तत्स्थानाधिपतिकृतप्रश्नोत्तरव्यवस्थापत्रे दत्तकपुत्रस्य ग्रहीतृधनाष्टमांश-भागित्वं लिखितम्, तल्लि(खि)तवशिष्ठवचनकात्यायनवचनाभ्यामेवमिदानीं तद्देशप्रचलितग्रन्थैश्च नायाति। तथा हि तल्लिखितवचनयोर्म्मध्ये वशिष्ठ-वचनस्यायमर्थः—दत्तकपुत्रे गृहीते सति यद्यौरसपुत्र उत्पद्यते तदा दत्तकपुत्रश्चतुर्थभागभागीति, एवं कात्यायनवचनस्यायमर्थः—औरसपुत्रे उत्पन्ने[2] सति दत्तकादयः पुत्राश्चतुर्थांशभागिन इति।

श्रीर्ज्जयतितराम् श्रीहरिः शरणम्

श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

श्रीर्ज्जयतितराम्[3]

१५—रोवकारि मिसिल आदालत नेजामत इङ्गरेजी १८२५ साल तारिख ६ माह जुन मताबक सन १२३२ वाङ्गला २५ माह

---

१. लिलिया छे—व्याप०।

२. उतपन्ने—व्यप०।

३. श्रीज्र्यति—व्यप०।

ज्येष्ठ रोज सोमवार आदालत मजकुरार प्रथम हाकिमेर काएम मोकाम श्रीयुत कुर्टनी इशमिट साहेवेर वैठके।

धर्म्मचन्द्र ओ गयरह सायेलान

सायलदीगेर उकिल सदासुकपण्डित हाजीर हइल। मौजे भूलुपुरेर मण्डलहायेर पुजारि-कर्म्म भोजकजाति ओ शिव-नर्माल्य-ग्राहक कालुरामेर वहालि विषये अन्य २ वयान सम्वलित सहर वारानशेर मेजष्टर साहेव ओ एलाका वारानशेर दायेर सायर आदालतेर द्वितीय हाकिमेर हुकुमसकलेर नारा-जीते सायेलादिगेर सओयाल, हुलासीराम ओ मानिकचन्द्रेर नामिक मुक्तारनामा ओ ऐ उकिलेर नामिक ओकालतनामा ओ इङ्गरेजी सन १८२० सालेर ५ ओ १६ मेइ ओ सन १८२३ सालेर ८।१० आक्तुवर ओ २ दिजम्वर ओ १८२४ सालेर मार्च्च मासेर लिखित सहर वारानशेर फौजदारि आदालतेर ६ कीता रोवकारिर नकल इङ्गरेजि सन १८२४ सालेर ३ आपरेल ओ सन हालेर २६।३१ मार्च्च ओ २८ ओ ३० आपरेल मासेर हओया एलाका वारानशेर दायेर सायेर आदालतेर ६ केता रोवकारिर नकल ओ ४ केता एजाहारेर नकल ओ ६ केता दरखास्तेर नकल इत्यादि दस्तावेजा सहित, जे हाल मासेर ४ तारिख दाखिल हइयाछील, ताराचन्द्र ओ लालचन्द्रेर उकिल मुनशी हसन आलीर हाजिरिते, जे आपन नामिक ताहादिगेर पक्षे ओकालत-नामा दाखिल करिलेक, दरपेश हइया दृष्टी आइल। तदपरे सायेल-दिगेर उकिल पण्डितदिगेर[1] व्यवस्थार तरजमाय नकल इङ्गरेजी अक्षर ओ पाठे दाखिल करिलेक, पडागेल। परे जिज्ञासा गेल जे उभयेर मानित शालिपदीगेर हाल सालेर जानओरि मासेर २१ तारिखेर पाठानो कैफियत कोता। जवाव दिलेक 'मजूद नाइ'।

---

१. पण्डित पण्डत—व्यप०।

पुनराय जिज्ञासा गेल जे पाठशालार पण्डितेरा एमत लिखेन नाइ जे कालूराम पूजारिर वहालिर योग्य नहे, वरं एइ लिखिया छेन जे कोनो व्यक्ति भोजक पूजारि थाकने शास्त्रानुसारे हानि नाइ। आर एइ लिखिया छेन जेअतएव देवालय स्वतंत्र की साधारण थाकनेर विवरण आमारदीगेर निटक प्रकाश नाइ। यदि साधारण हय ओ अतएव ओ कालूरामके रहित करावार योग्य जाने, रहितेर योग्य वटे, ओ यदि वहाल राखनेर योग्य जाने, वहालिर योग्य वटे। अतएव जिज्ञासा जाय जे तोमार मओक्लेर सओयाले कि निमित्ते व्यवस्थार मजमुनेर व्यतिक्रम लिखियाछे। जवाव दिलेक जे सओयाल लिखन पर्य्यन्त व्यवस्था पहुँछिया छिल ना। परे व्यवस्थार इङ्गरेजीर तरजमाय जे दिगम्वरि-दीगेर ओ सेतम्वरिदिगेर देवालय साधारण हय, कि स्वतन्त्र, ओ यद्यपि साधारण हय, ताहार पुजारि रहित ओ नियुक्त करण एक श्रेणीर क्षमताते हइते पारे, किम्वा दुइ श्रेणारेइ क्षमतार आवश्यक राखे। आर कोन व्यक्ति भोजक जाति हओन प्रकारे ऐ देवालयेते तहाके पूजारि हओनेर निषेध शास्त्रानुसारे बोध हय कि ना। उचित् ये सायेलदीगेर सओयाल ओ एइ रोवकारि ओ इङ्गरेजी १८२४ सालेर ६ मार्च ओ १८२३ सालेर १० आक्तुवर मासेर लिखित सहर वारानशेर फौजदारि आदालतेर रोवकारि ओ सन हालेर २९ मार्च्च ओ २८।३० आपरेल हओया वारानशेर कोट सरकटेर रोवकारि अवगत हइया ऐ सओयाल सकलेर जवाव बुधवार पर दिवस दुइ प्रहर पन्तर्य्य[1] दाखिल करेन इति।

---

१. पर्यन्त—प्रति साधीयान् पाठः।

श्रीर्जयतितराम्[1]

जवाब-व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिस्थानाभिषिक्तश्रीयुक्तकुर्टनीइशमिट-साहेबधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमेवं तदाज्ञापितैतद्धर्म्माधिकरण-वादिनां प्रश्नपत्रम् अङ्गरेजीशब्दप्रतिपाद्यचतुर्विंशत्यधिकाष्टादशशताब्दीय-मार्चमासीयषष्ठदिवसलिखितत्रयोविंशत्यधिकाष्टादशशताब्दीयाकतूवरमासीय-दशमदिवसलिखितवाराणस्यधिकरणफौजदारिसंज्ञकधर्म्माधिकरणलिखित-विचारपत्रपञ्चविंशत्यधिकाष्टादशशताब्दीयमार्चमासीयोनत्रिंशद्दिवसीयताद्द-शाब्दीयाष्टाविंशतिदिवसीयत्रिंशद्दिवसीयापरेलमासीयवाराणस्यधिकरणक[2]-कोटसरकटसंज्ञकधर्म्माधिकरणलिखितविचारपत्राणि[3] चावलोक्य यादृश-बोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

उपरिलिखितपत्राणामर्थानवगत्य वादिप्रतिवादिनोर्द्वयोरेव पारश-नाथाख्यदेवोपासकत्वमिति निश्चितम् । पारशनाथाख्यदेवोपासना च धर्म्मशास्त्रे न[4] क्वापि लिखितेति । पारशनाथाख्यदेवोपासकान्तर्गतयोर्दिगम्बर-श्वेताम्बरयोस्तद्देवालयः साधारणः, पृथक् पृथग्देवालयद्वयं वेत्यत्रापि धर्म्मशास्त्रालिखितत्वेन[5] धर्म्मशास्त्रानुसारेण तद्देवालस्य साधारण्या-साधारण्यनिश्चयो भवतुं नार्हति । परन्तु पञ्चविंशत्यधिकाष्टादशशताब्दीय-मार्चमासीयोनत्रिंशद्दिवसीयवाराणस्यधिकरणक—कोर्ट सरकट-संज्ञक-धर्म्मा-धिकरणलिखितविचारपत्रेण विवादास्पदीभूतमन्दिरद्वयमध्ये एकं[6] मन्दिरं दिगम्बराणामसाधारणमित्युभयवादिसिद्धमिति गम्यते । ततस्तस्मिन्न-

---

१. श्रीर्ज यतितराम्—व्यप० ।

२. वारानस्यधिकरण क०—व्यप० ।

३. सवकठ—व्यप० ।

४. ०ण—व्यप० ।

५. धर्म्मशास्त्रलिखितत्वेन—व्यप० ।

६. एकं एकं—व्यप० ।

साधारणे मन्दिरे पूजकनियोगकरणं दोषसहितपूजकत्यागकरणं च दिगम्बराणामिच्छया भवति ।

द्वितीयञ्च मन्दिरं तयोर्द्वयोर्मध्ये कस्यासाधारणं भवतीत्युपरिलिखितपत्रैर्नावगम्यते इति । द्वितीयं मन्दिरं तयोर्द्वयोः साधारणं चेत् तदा तत्र पूजकनियोगकरणं दोषसहितपूजकस्य त्यागकरणञ्च तयोर्द्वयोरेवेच्छया भवति । यदि च तयोर्मध्ये एकस्यासाधारणं तन्मन्दिरमिति निश्चयो भवति तदा यस्यासाधारणं तन्मन्दिरं भवति तदिच्छयैव तत्र पूजकनियोगकरणं दोषसहितस्य पूजकस्य त्यागकरणमिति लोके व्यवहारसिद्धमपि । अथ च धर्मशास्त्रोक्तभूर्जकण्टकजातीय एव लोकभाषायां भोजक जातिशब्देन प्रसिद्धः । स च भूर्जकण्टकः षोडशवर्षपर्यन्तमुपनयनसंस्कारहीनस्वरूपव्रात्याद्[1] ब्राह्मण्यामुत्पन्नो[2] भवति (कुल्लूकः—मनुः—१०।२१) । व्रात्यस्य तूपनयनसंस्कारहीनत्वेन पतितत्वाद् ब्राह्मणजात्युक्तकर्मानर्हत्वम् । अतः सुतरां व्रात्योत्पन्नस्य भूर्जकण्टकशब्दवाच्यस्य भाषायां भोजक-जातिशब्देन प्रसिद्धस्य धर्मशास्त्रोक्तब्राह्मणकर्मानर्हत्वम्—इति मनुमिताक्षराविवादचिन्तामण्यादिग्रन्थानुसारेणोत्तरम् ।

तत्र प्रमाणम्—

कामादिति अत्याज्यत्यागे ऋत्विजः ।
सहत्विक्त्यागे[3] याज्यस्य च पणशतद्वयं दण्डः ॥
सदोषस्य तु त्यागे न दोषः इत्यर्थः ।

इति (पृ० ३३।१५-१६) विवादचिन्तामणिग्रन्थलिखनम् ॥१॥

द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान् सावित्रीपरिभ्रष्टान् व्रात्यानिति विनिर्दिशेत् ॥

इति मनुवचनम् (१०।२०) ।

---

१. व्रात्याद्विप्राद्ब्राह्म—व्यप० ।
२. उत्पन्न०—व्यप० ।
३. ऋत्विक्०—विवादचि० ।

व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥
इति मनुवचनम् (१०।२१)।
उपनयनकालस्य परमावधिमाह—
आ[1]षोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल[2] औपनायनिकः परः ॥
अत ऊर्द्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते[3] क्रतोः ॥ इति मिताक्षरा-लिखनम् (या० स्मृ० १।३७-३८)।

श्रीर्ज्जयतितराम् **श्रीहरिः शरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

श्रीर्ज्जयतितराम्

१६—रोवकारि मिसिल अदालत नेजामत सदर इङ्गरेजी १८२५ साल तारिख २२ माह सेतम्बर मतावक वाङ्गला १२३२ साल ७ आश्विन रोज वृहस्पतिवार आदालत मजकुरार काएम मकाम प्रथम हाकिम श्रीयुत् कुटनी इशमिट साहेवेर वैठके।

धर्मचन्द्रप्रभृति शायेल

सायेलदिगेर उकिल सदासुख पण्डित ओ ताराचान्द, सेतावरेर उकिल मुनशी मुहम्मद पानाह ओ मुनशी हशान

---

१. आषोडशात्—व्यप० ।
२. ०श्च वत्सरात—व्यप० ।
३. कालश्चोपनायनिकः परः—व्यप० ।
४. व्रात्यस्तोमाद क्रतोर्विनेति—व्यप० ।

आलि हाजिर हइल। हुजुरेर तलव करा वारानशेन (वाराणसेय) पाटशाला(र) पण्डितदिगेर व्यवस्था असुद्ध, ओ ए आदालतेर पण्डितदिगेर व्यवस्था यथार्थ थाकन ओ शायेलदिगेर श्रेणीमत कोनो भोजाक जाति ठाकूर-पूजार कर्म्मेर योग्य ना हओन विशये ओ जती जाति पपाकर द्वाराय, जे ताहादिगेर नाम एइ दरखास्तेर निचे लेखा गियाछे, ए विषयेर ताहाकी-कातेर प्रार्थनार सायेलदिगेर शओयाल अन्य-हेतु सम्वलित, ये हाल मासेर १७ तारिखे दाखिल हइयाछिल, अद्य⋯कार पहुच्छा, हाल शनेर १२ आगस्त मासेर लिखित वारानशेर कोर्ट शरकटेर रिटरन ओ रोवकारि इत्यादि कागज ओ पाटशालार पण्डित-दिगेर जवाव सम्वलित पडा गेल। जाना गेल जे पाटशालार पण्डितेरा हाल शालेर २९ जुन मासेर हुकुम माफिक कालुराम भोजक पूजा करणेर योग्य हओन विशये द्वितीय व्यवस्था लिखियाछेन। अतएव हुकुम हइल ये ए आदालतेर[१] पण्डितेरा हालेर व्यवस्था सुन्दर रूप अनुमोदने पडीया ताहारदिगेर तजविजे शास्त्रानुसारे याहा हय लिखिया दाखिल करेन, ओ यद्यपि आपनदिगेर पूर्व्व व्यवस्थार कोन विशय परिवर्त्तकरण विवेचना करेन ताहार वेओरा कैफियत लिखेन, ओ सोमवार दिवस दुइ प्रहर पर्य्यन्त जवाव दाखिल करेन; ताहा दृष्टेर परे उचित हुकुम देओया याइवेक इति।

श्रीज्जयतितराम्

जवाव व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपति–स्थानाभिषिक्त–श्रीयुत–कुर्टनी इशमिट साहेव-धर्म्माधिकरण–समर्पित–वाराणस्यधिकरणक–श्रीमत्–सरकार–कंपिनी

१. आदालतेरा पाटशालार हालेर—व्यप०।

बहादुराख्य-सार्व्वभौम-पाठशालास्थ-पण्डित—लिखित—व्यवस्था-पत्रम-वलोक्य विविच्य च शास्त्रानुसारेण पर्य्यवसितार्थो लिख्यते। उपरिलिखित-व्यवस्थापत्रे यानि प्रमाणानि लिखितानि तानि विश्वम्भरवास्तुशास्त्रस्थानि जातिविवेकस्थानि बालम्भट्टकृताचाराध्यायस्य मिताक्षराटीकारूपग्रन्थ-स्थानीति(?)लिखितम्। परन्तु केषां मुनीनां तानि वचनानीति तत्र न लिखितम्। तेषां ग्रन्थानामिदानीं प्रचाराभावात् कुत्रापि तदनुसारेण व्यवस्था न दीयते। केनापि यद्यप्यप्रचरिततत्तद्ग्रन्थानुसारेणैव तत्तत्पण्डितै-र्व्यवस्था दत्ता। परन्तु तद्व्यवस्थालिखितवचनजातैर्भोजकजातिर्देवमन्दिरे देवपूजार्थं नियोक्तव्य इति नायाति। तथा हि भोजकजातेरुत्पत्तिप्रकार-द्वयं लिखितम्। तैस्तद्वचनजातैः षोडशवर्षपर्य्यन्तमुपनयनसंस्काररहीन-स्वरूपव्रात्याद्विप्राद् ब्राह्मण्यामुत्पन्नो भूर्जकण्टकजातिरित्येकः प्रकारः। द्वितीयश्च तस्मादेव भूर्जकण्टकाद् ब्राह्मण्याम् (उत्पन्नः) आवर्तकजातिः, आवर्तकाद् ब्राह्मण्यामुत्पन्नः कटधानजातिः, कटधानाद् ब्राह्मण्यामुत्पन्नः पुष्पशेखरजातिः, पुष्पशेखरजातीयायां स्त्रियां ब्राह्मणेनो[1]त्पन्नो भोजक-जातिरिति।

स एव भोजको मागध इत्यनयोर्पक्षयोर्म्मध्ये पूर्व्वः पक्षस्तेषामभिमत-श्चेत्तदा पूर्व्वपक्षोक्तभूर्जकण्टकस्य देवपूजार्थं देवमन्दिरे नियोगः शास्त्रानु-सारेण न सम्भवति,संस्कारहीनस्य व्रात्यस्य सावित्रीपतितत्वेन धर्म्मशास्त्रोक्त-ब्राह्मण[2]जात्युक्तकर्म्मानधिकारित्वात्। तदुत्पन्नस्य भूर्जकण्टकस्यापि सावित्रीपतितत्वेन सुतरां धर्म्मशास्त्रोक्तब्राह्मणजात्युक्तकर्मा[3]नर्हत्वम्। द्वितीयः पक्षस्तेषामभिमतश्चेत्तदा द्वितीयपक्षोक्तभोजकजातेर्देवपूजार्थं देवमन्दिरे नियोगः शास्त्रानुसारेण कदाचिदपि न सम्भवति, सावित्रीपतित-

---

१. ब्राह्मनो०—व्यप०।

२. ०जत्युक्त०—व्यप०।

३. कर्म्मनर्ह०—व्यप०।

व्रात्यवंशोद्भवायां पुष्पशेखरायां स्त्रियां ब्राह्मणेनोत्पन्नस्य भोजकस्य तदभिमत-मागधाभिधस्य पतितस्त्रीजातत्वेन पतितत्वात्, मागधत्वेन वर्णसङ्करत्वाद्[1] धर्म्मशास्त्रोक्तब्राह्मणजात्युक्तकर्म्मानर्हत्वम् ।

यत्तु तैरुक्तं क्वचित्[2] पुस्तके भूर्जकण्टकस्य पूजकत्वविषये निषेधाभावाद् देवमन्दिरे देवपूजार्थं नियुक्तो भोजकजातीयः कालूरामाख्यो निष्कासयितुमयुक्त एव, तदपि न—

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः । (यास्मृ० १।३८)
इत्यादिना योगीश्वरेण ,
सावित्रीपतिता व्रात्या भवन्त्यार्य्यविगर्हिताः । (२।३६)

इत्यनेन मनुना [च] धर्मशास्त्रोक्तब्राह्मणजात्युक्तकर्म्ममात्र एव तस्यानधिकारविधानात् ।

यत्तूक्तम्–भोजकापेक्षया निकृष्टस्य देवलकादेर्धर्म्मशास्त्रे देवपूजकत्वमुक्तम्, तत्र प्रमाणं किमपि न लिखितं तैरस्माभिरपि न दृष्टं क्वापि, अतस्तदपि हेयमेव । तस्मादस्माभिर्लिखिता पूर्व्वव्यवस्थाऽस्मिन् विवादे परावर्तनयोग्या न भवतीति ।

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीहरिःशरणम्
श्रीरामतनुशर्म्मविद्यावागीशेन

---

१. °शङ्कर०—व्यप० ।
२. कचित्—व्यप० ।

श्रीर्ज्जयतितराम्

लम्वर २३०२

१७ जानकीनाथराय प्रभृति आपीलाण्टान

गङ्गागोविन्दवन्द्योपाध्याय रस्पाडण्ट

सओयाल

सदर देओयानी आदालतेर कायेम मोकाम प्रथम हाकिम श्रीयुत कुर्टनि इशमिट साहेवेर हजुर हइते जानकीनाथराय प्रभृति आपिलाण्टान गङ्गागोविन्द(वन्द्यो)पाध्याय रष्पाडण्टेर २३०२ लम्वरेर मोकद्माते अंगरेजी १८२५ सालेर २९ जुन मासेर लिखित ए आदालतेर पण्डितानेर नामे कल्य दुइ प्रहर पर्य्यन्त वचन प्रमाणेर तफसील संवलित जवाव दाखिल करणे हुकुम। सवाल एइ ये :—

प्रथम सओयाल—१

वङ्गदेश निवासी एक जन ब्राह्मण आपन मातार त्यक्त धनेर उपर दखिल थाकिया वैमात्रेय भ्राता ओ स्त्री उत्तराधिकारि राखिया मरियाछे, ओइ त्यक्त धन स्त्रीके वर्त्तिवे, कि वैमात्रेय भ्राताके ?

द्वितीय सओयाल—२

यद्यपि स्त्रीके वर्त्ते, तवे स्त्री निःसन्ताना मरिले, ओइ त्यक्त धन वैमात्रेय भ्राताके आर्शिवे कि ना ?

तृतीय सओयाल—३

ओइ दुइ जनेर मातामह पृथक थाकन, एक वैमात्रेय भ्रातार उत्तराधिकारि द्वितीय वैमात्रेय भ्राता हओने शास्त्रमतो[१] निषेध आछे कि ना ?

---

१ शास्त्रमते—इति साधीयान् पाठः।

चतुर्थ सओयाल—४

यद्यपि प्रथम सओयालेर जवाबानुसारे मृत व्यक्तिर त्यक्त धन स्त्रीके पतिर ऋण परिशोधनार्थे ओ ताहार स्वर्गार्थे किम्वा अन्य हेतुते किम्वा आपन इच्छा ओ मतक्रमे ओइ सम्यक धन किम्वा तार मध्ये कतोक विक्रय ओ हेवाकरणेर क्षमता आछे कि ना ?

पञ्चम सओयाल—५

यद्यपि प्रपौत्र ओ पुत्रेर दौहित्रेर वैमात्रेय भ्राता वर्त्तमान आछे, ओइ दुइ जनेर मध्ये दौहित्रेर स्त्री, जे पतिमरणेर परे ताहार धनेते दखिलकार छिलो, निःसन्ताना मरिले पर मातामहेर त्यक्त धन कोन व्यक्तिके अर्शे ?

श्रीर्ज्जयतितराम्

जवाब-व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिस्थानाभिषिक्तश्रीयुत् कुर्टनीइश मिटसाहेव-धर्म्माधिकरणलिखितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम्—

वङ्गदेशीयः कश्चन ब्राह्मणः स्वमातृत्यक्तधनं प्राप्य तद्धन आयत्तत्वं सम्पाद्य स्वपत्नीमुत्तराधिकारिणीं स्ववैमात्रेयभ्रातरञ्चोत्तराधिकारिणं संरक्ष्य मृतस्तत्र तद्धनं यदि स्वमातुस्स्त्रीधनं स्यादथवा तस्याः पैतृकं धनमुत्तराधिकारित्वेन तत्संक्रान्तं स्याद्, उभयथाप्युत्तराधिकारित्वेन पुत्रेण प्राप्तं तद्धनं पुत्रमरणानन्तरं पुत्रस्य ये उत्तराधिकारिणस्तेषामेव भवति, तत्र च सत्यां पत्न्यां तस्या एवाधिकारो न तु वैमात्रेयभ्रातुरिति ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । इत्यादि दायभागादि(दाभा० ११।४)ग्रन्थधृतयाज्ञवल्क्यवचनम् (२।१३५) ।

द्वितीयप्रश्नस्योत्तरम्—

प्रथमप्रश्नोत्तरानुसारेण तद्धनाधिकारिण्याः पत्न्या मरणोत्तरं दुहितृदौहित्रपितृमातृसहोदर[1]भ्रातृपर्य्यन्ताभावे तद्धने वैमात्रेयभ्रातुरधिकार इति ।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणम् ॥ १ ॥ *तत्रापि प्रथमं सोदरस्तदभावे वैमात्रेयः*—इति दायभागादिग्रन्थ (दाभा०—११।५।७)[2] लिखनम् ॥२॥

तृतीयप्रश्नस्योत्तरम्—

भिन्नमातामहकवैमात्रेयभ्रातृधने भिन्नमातामहकापरवैमात्रेयभ्रातुरधिकारे शास्त्रानुसारेण निषेधो नास्तीति ।

अत्र प्रमाणम्—

द्वितीयप्रश्नोत्तरलिखितप्रमाणम् ॥ ३ ॥

चतुर्थप्रश्नस्योत्तरम्—

प्रथमप्रश्नोत्तरानुसारेण मृतस्य धनिनः पत्न्या गृहीतधनायाः पतिकृतकुटुम्बभरणार्थर्णपरिशोधनार्थं स्वशरीरधारणार्थं भर्तृकुटुम्बभरणार्थं पत्युरावश्यकश्राद्धाद्यर्थं च तद्धनविक्रयाधिकारः । एवं पतिस्वर्गार्थधनानुसारेण दानाधिकारोऽपि । परन्तु यावद्धनविक्रयेण[3] पतिकृतकुटुम्बभरणार्थर्णपरिशोधनं पतिश्राद्धादि पतिकुटुम्बभरणं स्वशरीरधारणञ्च भवति तावद्धनविक्रय एवाधिकारो, न त्वधिकधनविक्रये । यदि च समुदायधनविक्रय-

१. सहदर०—व्यप० ।

२. भ्रातरस्तथेत्युक्तभ्रातुरधिकारावसरे प्रथमं सोदरो गृह्णीयादित्यर्थः । तस्य त्वभावे सापत्नो भ्राता, एकप्रभवत्वेन तस्यापि भ्रातृशब्दार्थत्वात् । (दाभा० ११।५।७) ।

३. ०विक्रयते—व्यप० ।

व्यतिरेकेण पतिकृतकुटुम्बभरणार्थर्णपरिशोधनादिकमेव न भवति तदा तदर्थं समुदायधनविक्रयेऽप्यधिकारः, न तु स्वेच्छया स्वाभिप्रायेण वा समुदायधनस्य यत्किञ्चिद्धनस्य वा दानविक्रयाधिकारः ।

अत्र प्रमाणम्—

'कर्त्तुकामेन[1] वा भर्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नापि सा दाप्या धनं[2] दद्यात् श्रितं स्त्रिया ॥

इति विवादभङ्गार्णव (१ विवाभ०पृ०२०६) विवादार्णवसेतु(पृ० ३०) धृतनारदवचनम्[3] (पृ० ५१) ॥ १ ॥

यदि भर्तृधनं स्त्रिया गृहीतमप्र(पन्ना)पि स्वीकारमकुर्वत्यपि शोधयेत् । यदि तु मृत्युकाले भर्त्रा त्वया मम ऋणं देयमित्याज्ञापिता स्वीकारं करोति तदाऽगृहीतधनापि शोधयेत्—इति विवादभङ्गार्णवलिखनम् (१, पृ० २०६ ख) ॥ २ ॥

एवञ्च *पत्युरौर्द्ध्वदेहिकक्रियार्थं दानादिकमप्यनुमतमिति*—इति दायभागलिखनम् (११।१।६१) ॥३५॥

वर्तनाशक्तौ आधानमप्यनुमतम्, तत्राप्यशक्तौ विक्रयणमपि—इत्यादि दायभागग्रन्थलिखनम् (११।१।६२) ॥ ४ ॥

रिक्थग्राही ऋणं दाप्यः—इत्यादि विवादभङ्गार्णवादि(१, पृ०२१४ ख) ग्रन्थधृतयाज्ञवल्क्यवचनम्[4] (२।५१) ॥ ५ ॥

नापहारं स्त्रियः कुर्य्युः पतिवित्तात्[5] कथञ्चन—इति भारताद् (१३।४७।२४) अपहारशब्दार्थेन यथेष्टदानविक्रयाद्यनधिकार इति दायरहस्य लिखनञ्चेति ॥ ६ ॥

---

१. भर्तुकामेन—विमसे० ।

२. धनं यद्याश्रित स्त्रिया—विमसे० ।

३. न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा । अभ्युपेतादृते यद्वा सह पत्या कृतं भवेत् ॥ नामसं० (पृ०२४) । विवादार्णवसेतौ धृतमिदं नारदीयं वचनं नारदमनुसंहितायां बहुभिर्भिन्नैः पदैः पठितम् ।

४. रिक्थग्राह ऋणं दाप्य—इति यास्मृ०पाठः, ऋक्थग्राही व्यप० ।

५. दायात्—इति पाठान्तरम् । पितृवित्तात् इति—धर्मकोशस्थः पाठः ।

पञ्चमप्रश्नस्योत्तरम्—

प्रथमप्रश्नोत्तरानुसारेण धनाधिकारिणि दौहित्रेऽवगते सति दौहित्रमरणानन्तरं गृहीतधनायास्तत्पत्न्या मरणोत्तरं दौहित्रवैमात्रेयभ्रातुरधिकारो न तु प्रभुलिखितप्रश्नार्थावगतधनाधिकारिदौहित्रप्रमातामहप्रपौत्रस्य वर्त्तमानस्याधिकार इति वङ्गदेशचलितदायभागदायतत्त्वविवादभङ्गार्णवविवादार्णवसेतुप्रभृतिग्रन्थानुसारिणी व्यवस्था ॥ ५ ॥

अत्र प्रमाणम्—

तृतीयप्रश्नोत्तरविहितप्रमाणम् ॥ ३ ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

———

लंवर २७३९

१८. रोवकारि मिसिल आदालत देमानी सदर अंरेजी १८२५ साल तारिख ३ माह अगस्ति मताबक वाङ्गला १२३२ साल तारिख २० माह श्रावण रोज वुधवार आदालत मजकुरार काएम मकाम प्रथम हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर वैठके :—

मृत राजा अरिमर्द्दनशाहि आपिलाण्ट

शिवदयाल उपाध्याय रेस्पाण्डेण्ट

हाल शालेर १६ जुन मासेर लिखित जिला गोरकपुरेर जज साहेबेर एक किता रिटरन ताहार शामिलेर रोवकारि आदि सम्वलित लम्वर पहुँछियाछे, अद्य पडा गेलो। हुकुम हइलो ये ए आदालतेर पण्डितेरा हाल सनेर २२ जुन मासेर हओया जिला गोरकपुरेर देमानी आदालतेर रोवकारिर मजमुन वोध करिया कल्य दुइ प्रहर पर्य्यन्त निवेदन करेन जे ऐ देशेर शास्त्रा-

नुसारे देलमर्द्दनशाहि ओ समशेरशाहि दुइ सहोदर भ्राता, ओ पृथ्वीपतिशाहि सहोदर भ्रातुष्पुत्र, एहार मध्ये मृत राजा अरिमर्द्दनशाहिर उत्तराधिकारि कोन व्यक्ति बोध हय। ओ मुनसी महम्मद पनाह ओ लाला अवधलाल ये प्रकाशे ताहादिगेर नामिक ओकालतनामा ओइ देलमर्द्दनशाहिर तरफ हइते पँहुछियाछे ताहा कल्यकार मिशिले दाखिल करेन इति।

श्रीर्ज्जयतितराम्

जवाब-व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिस्थानाभिषिक्तश्रीयुतकुर्टनीइशमिटसाहेबधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशार्थबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यत्रानपत्यः पत्न्यादिपितृपर्य्यन्तरहितो राजा अरिमर्द्दनशाहिसंज्ञकः कश्चिद् व्यक्तिविशेषो दलमर्द्दनशाहि शमशेरशाहिसंज्ञकौ द्वौ सोदरभ्रातरौ पृथ्वीपतिशाहिसंज्ञकमेकं सोदरभ्रातृपुत्रं च संरद्दय मृतः, तत्र तत्सोदरभ्रातरौ दलमर्द्दनशाहिशमशेरशाहिसंज्ञकावेव तदुत्तराधिकारिणौ। सतोः सोदरभ्रात्रोः सोदरभ्रातृपुत्रस्य पृथ्वीपतिशाहिसंज्ञकस्य न तदुत्तराधिकारित्वमिति। अत्र राज्ञोऽरिमर्द्दनशाहिसंज्ञकस्य मरणोत्तरं तदुत्तराधिकारित्वविषये विवदमानानां अंगरेजशब्दप्रतिपाद्यपञ्चविंशत्यधिकाष्टादशशताब्दीय— जुनमासीयद्वाविंशतिदिवसीयगोरखपुरसंज्ञकप्रदेशाधिकरणकदेमानी-आदालत-संज्ञकधर्म्माधिकरणलिखितविचारपत्रनिविष्टानां त्रयाणां मध्ये राज्ञी वदनकुमारिनाम्नी काचित् स्त्री यद्यपि लिखिता, परन्तु तस्याः कश्चिद् वृत्तान्तस्तद्विचारपत्रे न लिखित इति सा राज्ञी राजा-अरिमर्द्दनशाहि-संज्ञकस्य का भवतीति न ज्ञातः। अतएव सा राज्ञी राज्ञोऽरिमर्द्दनसाहि-संज्ञकस्योत्तराधिकारिणी भवति न वेत्यपि न लिखितः। एवं तत्पत्रनिविष्टानां त्रयाणां मध्ये पृथ्वीपतिशाहिसंज्ञकस्य धनिनो राज्ञः सोदर-

भ्रातृपुत्रश्चाहं राज्ञो दत्तकपुत्रः, एवं तमलिकनामाख्यं पत्रं राज्ञा मह्यं दत्तमित्यादिवृत्तान्तो यद्यपि तत्पत्रे लिखितः, किन्तु यथाशास्त्रं दत्तकपुत्र-ग्रहणं तेन राज्ञा कृतं न वेत्यस्य, एवं तमलिकनामाख्यं पत्रं तस्मै राज्ञा दत्तं न वेत्यस्य च तत्पत्र(ा)लिखितत्वेन तस्य दत्तकपुत्रत्वादिसिद्धिर्भवति न वेत्यपि निश्चयः कर्त्तुं न शक्यत इति गोरखपुर-संज्ञक-प्रचलित-मिताक्षरा-वीरमित्रोदयप्रभृतिग्रन्थानुसारिणी व्यवस्थेति ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुताः—

इत्यादि मिताक्षरा (पृ० २१६) वीरमित्रोदय (पृ० ६०२) प्रभृति-ग्रन्थधृतयाज्ञवल्क्यवचनम् (२।१३५) ॥१॥

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे मातृगामि तदभावे पितृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि—इत्यादि तद्धृतबृहद्विष्णुवचनम् (मिता० पृ० २१७; वीर० पृ० ६०३) ॥२॥

अनन्तरः[1] सपिण्डाद्यस्तस्य तस्य धनं भवेत् । इत्यादि मनु(९।१८७)-वचनञ्चेति ॥ ३ ॥

श्रीर्ज्जयतितराम् **श्रीहरिः शरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

श्रीर्जयतितराम्

१९. प्रथम हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर बैठके सओयाल एइ ये—

पण्डितदिगेर स्थाने सओयाल :—

१. अनन्तरसपि०—व्यप० ।

ये हिन्दु ब्राह्मण हय, सोदरा दुइ भगिनीके विवाह करिया ओइ दुइ जनकेइ एकत्र आपन वाटीते राखिते पारे कि ना, वचन ओ कोन ग्रन्थेर लिखित ताहा सहित जवाव तलव इति।

पण्डितदिगेर आरजि सन १८२५, १३ सेतम्बर दाखिल हइल।

कल्य हुजुर हइते एइ मजमुने हुकुम हइयाछे ये हिन्दु ब्राह्मण जाति दुइ सहोदरा भग्नीके विवाह करिया एकत्र ऐ दुइ जनके आपन वाटीते राखिते पारे कि ना-वचन ओ ग्रन्थेर नाम सम्वलित आमरा जवाव दाखिल करि। खोदावन्द सहोदरा दुइ भगिनीके विवाह-करण ओ ताहादिगेके एकत्र आपन वाटीते राखन वङ्गदेशे सम्यक प्रकारे ओ पश्चिमदेशे कोनो स्थले चलित आछे। ये विषयेर दलिल धर्म्मशास्त्रेर ग्रन्थे एइ क्षण पर्य्यन्त पाइ नाइ। तलाप करितेछि, पाइले हुजुरे समर्पन करा प्रश्नेर जवाव दाखिल करिव।

श्रीर्ज्जयतितराम्

जवाव-व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिस्थानाभिषिक्तश्रीयुतकुर्टनीइशमिटसाहेव-धर्म्माधिकरणलिखित(म्)केनचिद् ब्राह्मणेनैकोदरप्रसूते द्वे कन्ये विवाह्य स्वगृहे स्थापयितुं शक्यते न वेत्यर्थकप्रश्न[1]पत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

वङ्गदेशे सर्व्वत्र, पश्चिमदेशेऽपि क्वचिदेकेनैकोदरप्रसूते द्वे कन्ये ततोप्यधिकतरा[2] विवाह्य स्वगृहे स्थाप्यन्ते इति व्यवहारः। अत्र विषये

---

१. प्रश०—व्यप०।

२. ततोप्यधिकारा—व्यप०।

यद्यपीदानीं प्रसिद्धधर्म्मशास्त्रे क्वापि विधिनिषेधौ न लिखितौ, तथापि पुराणादौ मुनीनां तादृशाचारदर्शनात्तदनुसारेणेदानीन्तनानामपि तादृशाचारः। अतएव तत्तद्देशाचारानुसारेणैव तत्तद्देशीयव्यवहारनिश्चयो भवितुमर्हतीति धर्म्मशास्त्रानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

यावत् सूर्य उदेति स्म यावच्च प्रतितिष्ठति।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥ (९।६।१०)
शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः।
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च योगिनम्॥ (९।६।३८)
तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम्। (९।६।३९-१)
वृतःस राजकन्याभिरेकः पञ्चशतावरः॥ (९।६।४३-२)
एवं गृहे वसन् कालं विरक्तो न्यासमास्थितः।
वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः॥ (९।६।५३)
इति श्रीभागवतीयनवमस्कन्धे सौभर्य्युपाख्यानम्॥ १॥
देशजातिकुलानाञ्च ये धर्म्माः प्राक् प्रवर्त्तिताः।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा॥

इतिवीरमित्रोदयग्रन्थ[1] (धर्का०-पृ० १९४१, स्मृच०पृ० १०, धर्मास्तत्प्र०-इति पाठान्तरम्,)धृतबृहस्पतिवचनम्॥ २॥

जातिजानपदान् धर्मान्श्रेणीधर्मांश्च धर्मवित्।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्॥
इति मनुवचनञ्चेति (८।४१)॥३॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

---

१. श्लोकोऽयं वीरमि त्रोदये न दृष्टः।

श्रीर्ज्जयतितराम्[1]

सओयाल—

२०. रोवकारि मिसिल आदालत देओयानि सदर इंरेजि १८२५ साल तारिख ८ नवेम्बर मोतावक वाङ्गला १२३२ साल तारिख २४ कार्त्तिक रोज मङ्गलवार आदालत मजकुरार कायेम मोकाम प्रथम हाकिम श्रीयुत कुर्टनी इशमिट साहेवेर वैठ—

कुन्दनगिर	आपिलाण्ट
दुर्गागिर ओ गायरह	रेष्पाडण्टान

एइ सनेर तारिख १३ सेतम्बर माहार जेला कानपुरेर यजसाहेवेर एक केता रोवकारिर सम्वलित रिटरन ... लम्वरे प्राप्त हइया अद्य पडा गेल। हुकुम हइल ये ए अदालतेर पण्डितेरा एइ सनेर तारिख १० आगष्ट माहार गुजरान शिवराजपुरेर कायेम मोकाम थानादार सयिद कादेर आलिर आरजि दृष्टि करिया आरज करेन ये गङ्गा वाखन[2] यवन जातीया वेश्यार गर्भ्भे जन्मिया ओ आपनार ज्ञानावस्थावधि हिन्दुर धर्म्म आचरण स्वीकार करिया छे, ओ ताहार पिता हिन्दु छिल, एतत्प्रयुक्त शास्त्रानुसारे हिन्दुर गणनाय आसिवेक कि ना, एवम् ए आदालतेर आरवावशरा उपरे उक्त कागज पडिया फतओया लेखेन ये ऐ व्यक्ति अपनार यवनि मातार त्यक्त धनेर उत्तराधिकारि (शरा) नुसारे हइते पारे कि ना। पण्डितदिगेर ओ आरवावशरा-प्रभृतिर (व्यवस्था) अवलोकनानन्तर उचित हुकुम देओया याइवेक इति।

---

१. श्रीर्जयति०—व्यप०।

२. ०वाकस—इ ति साधीयान् पाठः।

श्रीर्ज्जयतितराम्

जवाब-व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिस्थानाभिषिक्तश्रीयुतकुर्टनीइशमिटसाहेब-धर्म्माधिकरणलिखितप्रश्नपत्रमेवं तत्समर्पित अंगरेजी-शब्दप्रतिपाद्य[1]पञ्च-विंशत्यधिकाष्टादशशताब्दीयागस्तिमासीयदशदिवसलिखितशिवराजपुरग्राम-स्थस्थानपालप्रतिनिधि सैयद कादर-अली संज्ञकस्य विज्ञप्तिपत्रमवलोक्य यादृशार्थबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

उपरिलिखितप्रश्नपत्रसमर्पितपत्राभ्यां गङ्गाबक्ससंज्ञकस्य यवन-जातीयवेश्यागर्भजातत्वेन लिखितस्य स्वज्ञानावधि हिन्दुजातीयधर्म्मा-चरणेऽपि तत्पितुर्हिन्दुजातित्वेऽपि हिन्दुजातावन्तर्भावः शास्त्रानुसारेण भवितुं न शक्यते। प्रत्युत[2] गङ्गाबक्सपितुर्हिन्दुजातीयस्य उमरावगिर-संज्ञकस्य सन्न्यासिनो[3] ज्ञानकृतयवनीगमनेनाकृतप्रायश्चित्तस्य यवन-जातितुल्यत्वेन तत्पुत्रस्य तज्जन्यत्वेन यवनीगर्भजातित्वेन च सुतरां यवन-जातीयत्वमेवेति कान्धपुराख्यप्रदेशप्रचलितमनुमिताद्व्रानुसारिणी व्यवस्था-इति।

तत्र प्रमाणम्—

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यन्तु गच्छति॥

---

१. पतिपाद्य—व्यप०।

२. प्रत्यत—व्यप०।

३. सन्यासि—व्यप०।

इति मनुसंहिता (११।१०५)मिताक्षरादिग्रन्थ[1]धृतमनुवचनम् ।

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल कायेम मोकाम प्रथम हाकिम श्रीयुत कुर्टनि इशमिट साहेबेर वैठके—

---

२१. सदर देओयानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर सओयाल—

यद्यपि दुइ जन हिन्दु ब्राह्मण जाति सरिकिमते मदिरार बोतल सकल क्रय विक्रयेर वाणिज्य करे। ए प्रकार वाणिज्य बङ्ग-देशे ओ पश्चिमदेशेर शास्त्रानुसारे सिद्ध वटे कि असिद्ध; ओ यद्यपि असिद्ध हय सरिकीर शेष[2] हइले पर एक अंशीके अन्य अंशीर उपर ताहार लभ्येर अंश दाओया अर्शे कि ना। उचित ये ए विषयेर जवाव अगौणे दाखिल करेन इति।

जवाव-व्यवस्था

ब्राह्मणजातेर्मदिरापात्रव्यापारः शास्त्रसिद्धो न भवति। यद्यपि निन्दितत्वेन तेन कर्म्मणा द्वयोर्ब्राह्मणयोः संभूयकारिणोरुत्पन्नं धनम् तत्र द्वयोः समांश इति शास्त्रानुसारिणी व्यवस्था ।

तत्र प्रमाणम्—

याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्ज्जयेत्[3]—इति दायभाग[4]मिताक्षरा-(पृ० ३१.२)धृतमनुवचनम्[5] (१०।७६) ॥१॥

---

१. वचनमिदं मिताक्षरायामुपपातकशुद्धिप्रकरणे (यास्मृ० ३।२६५) नोपलभ्यते।

२. शेष शेष—व्यप०।

३. मर्ज्येत्—व्यप०।

४. षण्णां तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥
इति मनुस्मृतिवचनम्। तथा च मिताक्षरायाम् ॥

५. दायभागे वचनमिदं नोपलब्धम्।

यदा तु स्वत्वं लौकिकं तदा—

असत्प्रतिग्रहादिलब्धस्यापि स्वत्वात् इति मिताक्षरा (पृ० १६८-१६६) लिखनञ्चेति ॥२॥

श्रीज्जयतितराम् श्रीहरिःशरणम्
श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

श्रीर्जयतितराम्

सओयाल

२२. नानाशास्त्राध्यापक श्रीयुत वैद्यनाथमिश्र तथा श्रीयुत रामतनुविद्यावागीशपण्डितान् सदर देओयानि आदालत सच्चरित्रेषु—

यदि स्यात् कोन व्यक्तिर दुइ पुत्र थाके, सेइ व्यक्ति आपन जीवत्‌माने आपनार जमीदारी सेइ दुइ पुत्रके समर्पण करे, आर ताहार कतक दिवस परे ओइ कर्त्ता व्यक्तिर वर्त्तमाने ताहार ज्येष्ठ पुत्र एक स्त्री राखिया ताहाके पोष्यपुत्र राखिवार निमित्तक अनुमति पत्र लिखिया दिया मृत्यु हय। ताहार कतक दिवस परे ओइ कर्त्ता व्यक्ति, अर्थात् पुत्रदिगेर पितार, परलोक हय। तवे शास्त्रानुजाय ओइ कर्त्ता व्यक्तिर ज्येष्ठ पुत्रेर स्त्री जमीदारीर हिस्सा पाइते पारे कि, केवल खोरपोष पाय। यदि स्यात् खोरपोष पाय, तवे कर्त्ता व्यक्तिर कनिष्ठ पुत्रेर नाम संवलित ओइ स्त्रीलोकेर नाम सेरस्ताते दाखिल करा आवश्यक कि, कि प्रकार, शास्त्रानुज्ञाय जाहा यथार्थ हय इहार विवेचना करिया अतित्वराय प्रत्युत्तर लिखिवेन इति। २२ फिवरवरि—

श्रीर्ज्जयतितराम्

जवाब-व्यवस्था-पत्र ।

रोवडाख्यस्थानाधिपतिप्रेषितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि पित्रा द्वयोः पुत्रयोः स्वस्वामिकसमस्तस्थावरास्थावरधनं समर्पितम्, ततःकिञ्चित्कालानन्तरं,जीवत्येव पितरि तयोर्मध्ये ज्येष्ठः पुत्रः स्वजायां प्रति दत्तकपुत्रकरणार्थमनुमतिपत्रं लिखित्वा दत्त्वा मृतः, तदनन्तरं कनिष्ठपुत्रं संरक्ष्य तयोः पिता मृतः स्यात्, अत्र प्रभोः पत्रलिखितसमर्पणशब्दस्यार्थद्वयं भवति। स्वस्वत्वत्यागपूर्व्वकपरस्व[१]त्वापादनरूपं दानम्,सत्यपि स्वस्वत्वे धनसंरक्षणार्थमाज्ञाकरणं च । तत्र यदि पित्रा स्वस्वत्वत्यागपूर्व्वकपरस्वत्वापादनरूपं[२] दानं कृतं स्यात्तदा तद्दानेन पितुः स्वत्वापगमात् पुत्रयोरेव तद्धनं जातम् । अतो जीवत्यपि पितरि मृतस्य ज्येष्ठपुत्रस्यानुमत्या भविष्यत्तत्पत्नीकृतदत्तकः पुत्रस्तद्धने स्वपितृयोग्यांशं लब्धुमर्हति । यदि तदनुमत्या तत्पत्नीकृतो दत्तकः पुत्रो नैव भविष्यति तथापि दानपक्षे स्त्रीत्वेन तत्पत्न्यपि स्वभर्तृयोग्यांशभागिनी भवति । यदि च पित्रा सत्यपि स्वस्वत्वे धनसंरक्षणार्थमाज्ञा कृता स्यात्तदा तदाज्ञया पितुः स्वत्वाविनाशेन पुत्रयोस्तद्धनं न जातम् । अतो जीवति पितरि मृतस्य ज्येष्ठपुत्रस्य तद्धनांशयोग्यताविरहेण तद्धने स्त्रीत्वेन तत्पत्न्या नाधिकारः । किन्तु पत्यनुमत्या भविष्यद्दत्तकस्य पितामहधने यादृशोंऽशो भविष्यति तादृशांशसंरक्षणकर्तृत्वेन भविष्यद्[३]दत्तकस्याप्राप्तव्यवहारकालपर्य्यन्तं राज्ञा सा नियोक्तव्या । ततः सर्व्वथैव कर्त्तुः कनिष्ठपुत्रनामसहितं तस्या(पि)नाम राजस्थानेऽवश्यं लेख्यम्—इति वङ्गदेशचलितमनुदायभागव्यवहारतत्त्वप्रभृतिग्रन्थानुसारिणी व्यवस्था—

---

१ °परस्वत्वादान०—व्यप० ।

२ °परसत्वापादान०—व्यप० ।

३. भविष्यत्०–व्यप० ।

तत्र प्रमाणम्--

स्वस्वत्वनिवृत्तिपूर्व्वकपरस्वत्वापादनं[1] *दानम्*--इति (याज्ञवल्क्यस्मृति-टीकासुबोधिनी पृ० ७४१) कुल्लूकभट्टलिखनम् ॥ १ ॥

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः--इति मनुवचनम् ॥ २ ॥ (६।१८५)।

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा--इत्यादि दायभागादि(दाय०-११।१।४)ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ ३ ॥ (२।१३५)

अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते--इति दायभागादिग्रन्थधृत-देवलवचनम् (दाय ६।१।१८) ॥ ४ ॥

पुत्रान्[2] *द्वादश यानाह नृणां स्वायम्भुवो मनुः ।*
तेषां षड्बन्धुदायादाः षडदायादबन्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥

--इति मनुवचनद्वयम् ॥५॥ (६।१५८-१५६)

ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं च येऽभिकांक्षन्ति वृत्तिलोपो विगर्हितः ॥

--इति दायभागादि(ग्रन्थ--, दाय-१।४५)धृतमनुवचनम्[3] ॥६॥

अभावे बीजिनो माता तदभावे तु पूर्व्वजः ।

--इति व्यवहारतत्त्व(पृ० ६४६५)धृतनारदवचनम् (नामसं० पृ० ३० २।३३) ॥७॥

---

१. ०पादानं--व्यप० ।

२. पुत्रान--व्यप० ।

३. व्यासवचनमिदमिति धर्म्मकोषाजज्ञायते, मिताक्षरायाम् (१।११३) इदमुद्धृतम् । मनुस्मृतौ तु एतन्न दृश्यते । मनोर्वचनमिदमिति दायभागेऽप्युल्लिखितम् ।

अप्राप्तव्यवहाराणां[1] धनं व्ययविवर्जितम् ।
न्यसेयुर्बन्धुमित्रेषु प्रोपितानां तथैव च ॥

–इति दायभाग पृ० ६२ ३।१६)धृतकात्यायनवचनञ्चेति ॥८॥
(८४५) ।

श्रीर्ज्जयतितराम् **श्रीहरिः शरणम्**
श्रीवैद्यनाथ मिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल बोर्डरमनु

श्रीर्जयतितराम्

२३—सदर नेजामत आदालतेर पण्डितदिगेर नामे सओयाल।

श्रीहट्टनिवाशि एक व्यक्ति आपन दाशी, ताहार चारि पुत्र ओ एक कन्या सहित मूल्य निर्धार्य्य करिया अन्य कोनो व्यक्तिर निकट विक्रय करिते चाहे। ताहारा अर्थात् ए दाशी-प्रभृतिरा आदालते एइ रूप दरखास्त गुजराइलेक ये आमरा आपन मनिवेर सेवा करिते सम्मत आछि, तथापि आमारदिगेर मनिव शत्रुता करिया जाहार निकट आमारदिगेके विक्रय करिते उद्यत हइयाछे ताहार सहित एइ प्रकार याग करियाछे ये आमादिगेके भिन्न देशे निया पृथक २ भिन्न २ स्थाने विक्रय करे। अतएव जिज्ञासा जाय—श्रीहट्टदेशेर चलित शास्त्रमते एइरूप विक्रयेर स्थाने दासदिगेर ए प्रकार ओजर सिद्ध हय कि ना; यदि सिद्ध हय तवे ऐ दास-व्यक्तिरा आपनादिगेर स्वीकारमत अन्यत्रक जन क्रयकर्त्ता निर्दिष्ट करिते पारे कि ना; किम्वा ताहार निर्द्धार्य्य हओया मूल्य यद्यपि कोन प्रकारे मजुत करिते पारे, मूल्येर टाका आदाय करिया खालाश पाइते पारे कि ना इति।

---

१. बालपुत्रे मृते अकृत्य रक्षं तत्तन्तुबन्धुभिः–कास्मृसा० ८४५॥

श्रीर्ज्जयतितराम्

जवाब-व्यवस्था

प्रभुकृतप्रश्नानुसारेणोत्तरं लिख्यते—उपरिलिखितप्रश्नार्थावगमेन शास्त्रोक्तपञ्चदशदासानां मध्ये एतत्प्रश्नलिखितदासप्रभृतयो गृहजाता अवगम्यन्ते। तत्र च गृहजात-क्रीत-लब्ध-दायप्राप्तात्मविक्रेतॄणां पञ्चानां दासानां स्वामिप्रसादं विना न दास्यमोक्षः। तथा च यदि दासविक्रये प्रसन्नः स्वामी गृहजातादीनां पञ्चानां दासानां स्वकल्पितमूल्यद्वारा विक्रयेण दास्यमोक्षमिच्छति तदा प्रभुत्वात् स्वातन्त्र्याच्च[1] स्वामिसेवां कर्तुमिच्छतामपि दासानां विक्रयं कर्तुमर्हति। तत्र यदि स्वामिनिर्दिष्टक्रेतुः सकाशात् स्वकल्पितदासमूल्यग्रहणे दासानामात्यन्तिकं दुःखं स्यात्तदा दासनिर्दिष्टक्रेतुः सकाशादन्यस्मात् क्रेतुः सकाशाद्वा तदेव स्वकल्पितदासमूल्यं गृहीत्वा स्वामिनो गृहजातादिदासमोक्षणं शास्त्रीययुक्तिसिद्धं भवितुमर्हति, दासनिर्दिष्टक्रेतुः सकाशादन्यस्मात् क्रेतुः सकाशाद्वा स्वकल्पितदासमूल्यग्रहणेऽपि स्वामिनः क्षतिविरहात्[2]। परन्तु गृहजातादयो दासाः स्वधनात् स्वामिकल्पितमूल्यं दत्त्वा कदाचिदपि दास्यान्न मुच्यन्ते दासधनेऽपि स्वामिनः प्रभुत्वात्—इति वङ्गदेशान्तर्गतश्रीहट्टप्रदेशप्रचलितविवादभङ्गार्णवदायक्रमसंग्रहदायभागप्रभृतिग्रन्थ(ा)नुसारिणी व्यवस्थेति।

तत्र प्रमाणम्—

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अन्ना[3]कालभृतस्तद्वद्दाहितः स्वामिना च यः॥

---

१. स्वातन्त्र्या च—व्यप०।

२. विरहात—व्यप०।

३. अनाका०—व्यप०। अशनादिभृतस्तद्वदाधत्त: स्वा०... नामसं०। अनाकाल०—धको०।

मोक्षितो[1] महतश्चर्णाद् युद्धे प्राप्तः परो जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः[2] कृतः ॥

भक्तदासश्च विज्ञेयस्तथैव वडवाभृतः[3] ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥

—इति विवादभङ्गार्णव(१ विवाभ० ५१६ क)दायक्रमसंग्रह (पृ० ५२)धृतनारदवचनम् (नामसं०–पृ० ६६), गृहजातो दास्यामुत्पन्नः[4] —इति दायक्रमसंग्रहव्याख्यानम् (पृ० ५२) ॥ २ ॥

एतेषां गृहजातादिचतुर्णामात्मविक्रेतुश्च स्वामिप्रसादं विना न दास्य- **मोक्षः**—इति दायक्रमसंग्रहलिखनम् (पृ० ५४) ॥ ३ ॥

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।
युक्तिहीनविचारे तु धर्महानिः प्रजायते ॥

—इति व्यवहारतत्त्वादि(स्मृत० २।पृ० १९९)ग्रन्थधृतबृहस्पतिवचनम् (बृस्मृ०—१।१११) ॥ ४ ॥

भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः[5] स्मृताः ।
यत्ते समधिगच्छन्ति यस्यैते[6] तस्य तद्धनम् ॥

---

१. ऋणाच्च मोक्षितोऽनल्पाद् युद्धप्राप्तः–नामसं० ।

२. प्रव्रज्यापसृतः—नामसं० ।

३. °हृतः—धको० ।

४. °मुतपन्नः—व्यप० ।

५. एव धनाः—व्यप० ।

६. यस्यैते तस्यैतत्—इति विवाभ० पाठः ।

इति विवादभङ्गार्णव(१ विवाभ० ५३३क)दायभाग'दायतत्त्वादिग्रन्थधृतमनुवचनम् (८।४१६)चेति ॥ ५ ॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल अंगरेजी मिसिलते दासेर विषय।

श्रीर्जयतितराम्

२४—प्रश्न—यत्र कश्चिद् एतावत्[2]-कालपर्य्यन्तमर्थाद्दशवर्षपर्य्यन्तं विंशतिवर्षपर्य्यन्तं वा तव दास्यमहं करिष्यामीति परिभाष्य स्थितः, तत्र दास्यावस्थायामुत्प[3]न्नान्यपत्यानि स्वामिनो दास्यं कर्तुमर्हन्ति न वेति। यद्यर्हन्ति तदा पितुर्दास्यकालपर्य्यन्तमधिकं न्यूनं वेति च।

एतस्योत्तरम्—

प्रभुकृतप्रश्नानुसारेणोत्तरं लिख्यते—

एतत्प्रश्नलिखितदासः शास्त्रोक्तपञ्चदशदासानां मध्ये क्रीतदासः। क्रीतदासस्य[1] मोक्षः क्रीतकाल[3]व्यपगमेनैव। दास्यावस्थायां क्रीत[4]क्रीतकालदासेनोत्पन्नानामपि दास्यमोक्षः पित्रा सहैव—इतिशास्त्रीययुक्तिसिद्धा व्यवस्था।

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल आशिषटण्ट साहेबेर निकट।

---

१. न च भार्य्या पुत्रश्चेत्यादिवद् अस्वातन्त्र्याभिप्रायमात्रं वाच्यम्, तदानीं स्वत्वे प्रमाणाभावात्। भार्य्यादिषु तु यत्ते समधिगच्छन्ति अर्जयन्तीति स्वत्वे सिद्धे युक्तमस्वातन्त्र्यवर्णनम्—इति दायभागे (पृ० १२) मनुवचनसंगतः। वचनमिदं दासतत्त्वे न दृष्टम्।

२. एतावता—व्यप०।

३. उत्पन्ना०—व्यप०।

४. कृत०—व्यप०।

श्रीर्ज्जयतितराम्

ल० २३००

२५—सदर देओयानी आदालतेर पण्डितदिगेके सओयाल करा याइतेछे।—ई० १८२६ सालेर मार्च्चमासेर १३ तारिखे ऐ सदर देओयानी आदालतेर प्रथम हाकिम श्रीयुत ओलीयम नसेप्तर साहेव ओ चतुर्थ हाकिम श्रीयुत ओलीयम डोविन साहेवेर वैठके—

मृत भवानीचरणचन्द्रेर उत्तराधिकारी राधावन्धवचन्द्र ओ गयरह— आपीलाण्टान—

मृत गोविन्दचन्द्रचौधुरिर उत्तराधिकारी जगतचन्द्र चौधरी ओ गयरह— रेष्पाडण्टान—

हुकुम हइल ये मृत राजा चित्रसेनेर प्रधाना रानी आपीलाण्ट ओ कनिष्ठा रानी रेष्पाडण्टेर ५३२ लम्बरेर मोकद्दमार ओ जगतचन्द्रसेन आपीलाण्ट ओ केशवानन्दगोस्वामी ओ गयरह रेष्पाडण्टेर ८३२ लम्बरेर मोकद्दमार दाखिल हओया दुइ केता व्यवस्था एवं १६ लम्बरेर भवानीचरणेर नामिक मकररी पाट्टा ओ ११ लम्बरेर गोविन्दचन्द्रेर नामिक मकररी पाट्टा ओ ऐ पाट्टाजातेर सम्पर्कीय दुइ केता रसीद ल० १८२२ तोमारदिगके अर्पण करा जाय। उचित[१] ये नीचेर लिखित सओयालेर जओयाव ३ तिन दिवसेर मध्ये दाखिल करेन।

उपरेर लिखित मोकद्दमार दाखिल हओया व्यवस्थाते जाना याइतेछे ये देवत्रेर भूमि हइते जाहा उत्पन्न हय ताहा देवतार वस्तु वटे, ओ शास्त्रानुसारे देवतार भूमि विक्रय कि दान कि वन्धककरण सिद्ध नहे, आर केवल देवतार सेवार निर्व्वाह ओ सरववाह हओनेर अर्थे देवत्र भूमिर रक्षणापेक्षणेर क्षमता देवत्र

१. उचित—७५० ।

करणीया व्यक्ति अर्थात् देवत्र भूमिर रक्षक ११ ओ १६ लम्बरेर पाट्टार न्याय अन्य कोनो व्यक्तिके पुत्रपौत्रादिक्रमे सेलामीर टाका (देओया पूर्व्व हय ना)। एतावता पनेर टाकार वदले मकररी जमाते मकररी पाडा देय। एमत् पाट्टा शास्त्रमते सिद्ध वटे, कि सेवाती व्यक्तिर ऐ पाट्टा देओनेर क्षमता नाहि; ओ पाट्टा देओयानीर व्यक्तिर मृत्यु परे ये व्यक्तिके ताहार रक्षणापेक्षणकरण उत्तराधिकारित्वे अर्शे से ऐ पाट्टा रहित करणेर ओ देवत्र भूमिर नूतन वन्दवस्त करणेर क्षमता राखे ना, ओ ए विषये वाङ्गलादेशेर चलित शास्त्रानुसारे किछु हुकुम कि व्यवहार आछे कि ना ओ एमत् मोकद्दमार सिद्ध असिद्ध हओन एइ अर्थे ये ऐ मकद्दमार देवत्र वस्तुर लाभ ओ क्षति हओने सम्पर्क[1] राखे (कि ना) इति—

एतद्धर्माधिकरणप्रथमाधिपतिश्रीयुत - अलीयमनशघरसाहेवचतुर्थाधिपतिश्रीयुत - अलीयमडोरणसाहेवतदुभयधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितव्यवस्थापत्रद्वयं षोडशाङ्काङ्कितैकादशाङ्काङ्कितमकररीपाटासंज्ञकपत्रद्वयं त(त्-)सम्बन्धिसप्तदशाङ्काङ्कितद्वादशाङ्काङ्कितरसीदसंज्ञकपत्रद्वयञ्चावलोक्य विविच्यच यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

देवसेवार्थोत्सृष्टभूम्यादिस्तदुत्पन्नञ्च द्रव्यं देवस्वम्। देवस्वभूम्यादिविक्रय-दान-बन्धक-करण-क्षमता देवार्थभूम्युत्सर्जकस्य[2] तदुत्तराधिकारिणां वा नास्ति। केवलं देवसेवानिर्व्वाहार्थं देवस्वभूम्यादे रक्षणा-वेक्षणादि-कर्त्तृत्वं यो देवसेवां कारयति स एव वङ्गदेशे[3] सेवाइतशब्देनप्रसिद्धो यद्यन्यस्मै कस्मैचिद् देवार्थं दर्शनीयमुद्रा गृहीत्वा प्रभुसमर्पितोपरिलिखितमकररीपाटासंज्ञकपत्रद्वयलिखितरीत्या मकररीपाट्टासंज्ञकं नियमपत्रं

१. सम्पर्क—व्यप०।
२. ०भूम्युत्सर्ज०—व्यप०।
३. वङ्गदेश—व्यप०।

ददाति तदा तन्नियमपत्रं वङ्गदेशचलितव्यवहारानुसारेण च सिद्धं भवति, नहि देवस्वभूमेर्मकररीपाट्टासंज्ञकनियमपत्रदानं विक्रयो न च दानं न वा बन्धको भवति । मूल्यग्रहणप्रयुक्तस्वस्वत्वनाशकव्यापारस्यैव विक्रयपदार्थत्वेन स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारस्य दानपदार्थत्वेन चाधमर्णेनोत्तमर्णसमीपे ऋणपरिशोधनकालपर्य्यन्तं विश्वासार्थं स्थापितस्य स्वकीयद्रव्यस्य बन्धत्वेन च देवस्वभूमौ मकररीपाट्टासंज्ञकपत्रदातुः स्वत्वा[1]भावेन मूल्यग्रहणपूर्व्वकतन्निवृत्तेर्वा दानप्रकारेण वा तन्निवृत्तेरसम्भवात्, बन्धनेन स्थापनाभावाच्च । यथा राज्ञा ग्रामाधिपतिना वा स्वकीयग्रामक्षेत्रादिः प्रत्याब्दिककरग्रहणार्थमन्यस्यै प्रजायै वा कालनियमं कृत्वा अकृत्वा वा पुत्रपौत्रादिक्रमेण प्रत्यब्दमेता मुद्रा दत्त्वा त्वयैतद्[2]ग्रामः क्षेत्रादिर्वा भुज्यतामिति नियमपत्रं पाट्टासंज्ञकपत्रं मकररीपाट्टासंज्ञकं वा दत्त्वा समर्प्यते[3], तथा देवसेवार्थोत्सृष्टभूमिरपि वङ्गदेशसेवाइतपदवाच्ये[4]नोपरिलिखितरीत्या समर्प्यते[5] इति वङ्गदेशव्यवहारः । देवस्वभूमावेतादृशव्यवहारसिद्धौ तद्भूमाव[6]तिवृष्ट्यानावृष्ट्या वा शस्यानुत्पादेऽपि नियमितद्रव्यसाध्यदेवसेवाया अबाधः, इत्येव लाभः । तदसिद्धौ अतिवृष्ट्यादिदोषेण शस्यानुत्पादाद्देवसेवाबाधोऽपि भवितुं शक्नोति, इत्येव क्षतिः । एवञ्चै[7]तद्विवादे यद्युपरिलिखितमकररीपाट्टासंज्ञकपत्रद्वयान्तर्गतषोडशाङ्काङ्कितश्री देवमुद्राङ्कित नियमपत्रं तत्सम्बन्धिरसीदसंज्ञकपत्रञ्च वङ्गदेशे सेवाइतशब्दवाच्या या राज्ञा देवसेवार्थं दर्शनीयमुद्रा देवकोषे निवेश्य पुत्रपौत्रादिक्रमेण प्रत्यब्दमेता मुद्रा दत्त्वा भुज्यतामित्युपरिलिखितनियमपत्रमन्यस्मै[8]कस्मैचित् षोड-

---

१. सत्वाभावेन—व्यप० ।
२. त्वयैतत्—व्यप० ।
३. समर्पते—व्यप० ।
४. पदवाक्येन—व्यप० ।
५. समप्यते—व्यप० ।
६. ततभूमा—व्यप० ।
७. चैतत्—व्यप० ।
८. मन्यस्यै कस्यै—व्यप० ।

शाधिकद्वादशशताब्दे दत्तं तन्नियमपत्रेऽन्यस्याधिककरदातुरुपस्थितिं यावत् प्रतिवर्षं त्वया भुज्यतामितिलिखनाभावात् तन्नियमपत्रदात्र्याः सेवाइतशब्द-वाच्याया मरणोत्तरं तदुत्तराधिकारित्वेन तस्या एव। देवसेवार्थोत्सृष्टभूमे रक्षणावेक्षणादिकर्तृत्वं यस्य भवति स तु तत्पत्रमकर्म्मण्यं कृत्वा नियम-पत्रान्तरं दातुं न शक्नोति–इति वङ्गदेशप्रचलितमनुकुल्लूकभट्टकृतमन्वर्थ-मुक्तावलीविवादभङ्गार्णवप्रभृतिग्रन्थानुसारिणी व्यवस्था।

तत्र प्रमाणम्—

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥
—इति मनुवचनम् ॥१॥ (११।२६)

प्रतिमादिदेवतार्थमुत्सृष्टं धनं देवस्वम्।
—इति कुल्लूकभट्टव्याख्यानम् ॥ २ ॥ (मनु० ११।२६)

देशजातिकुलानाञ्च ये धर्म्माः प्राक् प्रवर्तिताः।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा॥
—इति बृहस्पतिवचनम् ॥ ३ ॥ (११।२६)

एकत्र बन्धस्यान्यत्रबन्धदानवद् एकत्र वशीभूताया भूमेरन्यत्र वशी-भवनमयोग्यमिति भूमिसमर्पणसमये अन्यस्याधिककरदातुरुपस्थितिं यावत् प्रतिवर्षं त्वया भुज्यतामित्येव प्रतिज्ञा कर्त्तव्या–इति विवादभङ्गार्णव-(१ विवाभ० पृ० ३१० ख) लिखनम् ॥ ४ ॥

एकत्र बन्धीभूतद्रव्यस्यान्यत्र बन्धकरणे परबन्धस्येव एकत्र वशीकृत-

१. कुल्लुक—व्यम० ।
२. °ना भेनो०—व्यम० ।
३. पापी परे०—व्यम० ।
४. गृध्नो—व्यम० ।
५ देशजातिकुलानां ये धर्म्मास्तत्प्रवर्तिताः इति बृस्मृ०पाठः ।

द्रव्यस्यान्यत्र वशीकरणेऽपि असिद्धिरेव-इति विवादभङ्गार्णवलिखनञ्चेति (१ विवाभ० पृ० ३१६ क) ॥ ५ ॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एतद्धर्म्माधिकरणप्रथमाधिपति—श्रीयुतश्रीलियमलसेटरसाहेबेतद्धर्म्माधिकरणचतुर्थाधिपति — श्रीयुतश्रीलियमडारनसाहेबेतदुभयधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितव्यवस्थापत्रद्वयं षोडशाङ्काङ्कितैकादशाङ्काङ्कितमकररीपाटासंज्ञकपत्रद्वयं, तत्सम्बन्धिसप्तदशाङ्काङ्कित-[1] द्वादशाङ्काङ्कितरसीदसंज्ञकपत्रद्वयमवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

देवसेवार्थो(त्सृष्ट)भूमिरक्षकः सेवाइतशब्देन (उच्यते) । यद्यसावन्यस्मै कस्मैचित् देवार्थदर्शनीयमुद्रा गृहीत्वा प्रभुसमर्पितापरिनिश्चितमकररीपाटासंज्ञकपत्रद्वयम् लिखितरीत्या मकररीपाटासंज्ञकं पत्रं ददाति तदा तन्मकररीपाटासंज्ञकं पत्रं वङ्गदेशचालितव्यवहारानुसारेण शास्त्रानुसारेण च सिद्धंभवति । एवञ्च तन्मकररीपाटासंज्ञकपत्रदातृसेवायितकर्त्तु[2]र्म्मरणानन्तरं तदुत्तराधिकारित्वेन तस्या एव । देवसेवार्थभूमे रक्षणावेक्षणादिकर्तृत्वं यस्य भवति स यदि तन्मकररीपाटासंज्ञकपत्रेऽन्यस्याधिककरदातु[3]रुपस्थितिं यावत्प्रतिवर्षं त्वया भुज्यताम्—इति लिखनं (करोति),न चेत्तदा तन्मकररीपाटासंज्ञकं पत्रमकर्म्मण्यं कृत्वा नूतनबन्दोबस्तसंज्ञकमायामं कर्त्तुं न शक्नोति । एवञ्च देवसेवार्थभूमौ मकररी-पाटासंज्ञकपत्रदानं व्यवहारानुसारेण शास्त्रानुसारेण च सिद्धं चेत्, अतिवृष्ट्याऽनावृष्ट्या वा तद्भूमौ[4] शस्यानुत्पादेऽपि नियमितद्रव्यसाध्यदेवसेवाया अबाधः—इत्येव लाभः। तदसिद्धावतिवृष्ट्यादि-

---

१ सप्तदशाङ्काङ्कितद्वादशा व्यप० ।

२ सेवाइत व्यक्त्तुर्म्मरण—व्यप० ।

३ ०परिस्थितं यावत—व्यप० ।

४ तत्भूमौ—व्यप० ।

दोषेण शस्यानुत्पादाद्[1] देवसेवाबाधोऽपि भवितुं शक्नोति-इत्येव-द्युतिः-इति वङ्गदेशप्रचलितमनुविवादभङ्गार्णवप्रभृतिग्रन्थानुसारिणी व्यवस्थेति ।

अत्र प्रमाणम्—

जातिजानपदान् धर्मान् श्रेणीधर्मांश्च धर्म्मवित् ।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपालयेत्[2]–इतिमनुवचनम् (८।४१) ॥१॥

एकत्र बन्धद्रव्यास्यान्यत्रबन्धदानवत् एकत्र वशीभूताया भूमेरन्यत्र वशीभवनमयोग्यम्–इति भूमिसमर्पणसमयेऽन्यस्याधिककरदातुरुपस्थितिं-यावत् प्रतिवर्षं त्वया भुज्यतामित्येव प्रतिज्ञा कर्तव्या—इति विवादभङ्गार्णवलिखनम् (१ पृ० ३१० ख) ॥ २ ॥

एकत्र बन्धीभूतद्रव्यस्यान्यत्रबन्धकरणे परबन्धस्येव एकत्र वशीकृतद्रव्यस्यान्यत्रवशीकरणेऽपि, असिद्धिरेव—इतिविवादभङ्गार्णवलिखनञ्चेति (१ विवाभ० पृ०३१६क) ॥ ३ ॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

सवाल

२६ सदर देमानी आदालतेर प्रथम हाकिम श्रीयुत ओलियम लसेष्टर साहेव ओ चतुर्थ हाकिम श्रीयुत ओलियम डोरण साहेवेर हुजुर हइते ओइ आदालतेर पण्डितगणेर प्रति अंगरेजी १८२६ साल १० अपरेल तारिकेर रोवकारिर हुकुमानुसारे—

राधावल्लभचन्द्र ओ गयरह् आपीलाण्टान
जगच्चन्द्रचौधुरी ओ गयरह् रष्पाडण्टान

पूर्ब्बे मोकद्दिमासकले लंवर ५३२ ओ ८३२ वावत ये व्यवस्थासकल दाखिल हइयाछे ताहार सत्वे देवोत्तर भूमिर

---

1 °नुत्सादात्—व्यप० ।
2 प्रतिपादयेत्—मस्मृ० ।

सेवाइतेर लिखित पुत्र-पौत्रादि क्रमे मोकररी पाटा सिद्ध हओनेर विषये तोमरा आपनारदिगेर मत उत्तरे लिखिया छ। अतएव पुनर्व्वार जिज्ञासा करा जाइतेछे ये हिन्दुलोकेर कोनो शास्त्रे मोकररी पाटार प्रस्ताव आछे; प्रबल सन्देहेर द्वाराय यदि एमत कोनो प्रस्ताव शास्त्रे पावा जाइतेछे ना,तबे पश्चाद्[1] ग्रन्थकारगनेर ग्रन्थेर मध्ये कोनो ग्रन्थे ताहार प्रस्ताव आछे, ओ तोमारदिगेर उत्तरेर लिखनानुसारे व्यवहार ओ ओइ व्यवहारेर सिद्धतार प्रस्ताव कोन ग्रन्थे पावा जाइतेछे। ये हेतुक एक्षणे एइ विषयेर सन्देह आछे ये कोनो वचन ए विषयेर जन्मे नाइ, वरं हिन्दुलोकेर ग्रन्थे ओ ए विषयेर प्रसङ्गमात्र नाइ ओ ए विषयेर विचार पूर्व्व व्यवस्थासकल ओ चलित आइनसकलेर अनुसारे आदालतेर हाकिमानेर सहितइ सम्पर्क राखे इति।

श्रीर्ज्जयतितराम्[2]

जवाव-व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिश्रीयुतओलियमलसेग्ररसाहेवैत[3]द्धर्म्माधिकरणचतुर्थाधिपतिश्रीयुत— ओलियमडोरणसाहेवैतदुभयधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

हिन्दुजातेर्धर्म्मशास्त्रीयस्मृतिचन्द्रिकावीरमित्रोदय-व्यवहारमातृकाव्यवहारचिन्तामणि-विवादभङ्गार्णवग्रन्थेषु लोके भाषायां मकररीपाटाशब्देन प्रसिद्धस्य शास्त्रोक्तशासनपत्रस्यास्ति प्रस्तावः। एवमस्मदुत्तरलिखितव्यवहारस्य तादृशव्यवहारसिद्धतायाश्चोपरिलिखितग्रन्थेभ्यः प्राप्तत्वात्—इत्युपरिलिखितग्रन्थानुसारेणोत्तरम्।

---

१. पश्चात् व्यप०।

२ श्रीर्ज्जयति०—व्यप० ?

३ वैतद्धर्म्मा०—व्यप०।

अत्र प्रमाणम्—

राजलेख्यं स्थानकृतं स्वहस्तलिखितं तथा ।
लेख्यं तु त्रिविधं प्रोक्तं भिन्नं तद् बहुधा पुनः ॥

— इति वीरमित्रोदय[1]ग्रन्थधृतबृहस्पतिवचनम् (बृस्मृ० ६।४) ॥१॥

तत्रशासनं निरूपयन्नाह याज्ञवल्क्यः

शासनं कारयेद्धर्म्यं[3] स्थानवंशादिसंयुतम् ॥ (बृस्मृ० ६।१६)

दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यं तु कारयेत् ।
आगामिभद्रनृपतिपरिज्ञाना[2]य पार्थिवः ॥ (यास्मृ० १।३१८)

निबन्धो वाणिज्यादिकरादिभिः प्रतिवर्षं प्रतिमासं वा किञ्चिद्धनमस्मै ब्राह्मणायास्यै देवतायै देयमित्यादिप्रभुसमयलभ्यमित्यर्थः । भूमिमिति ग्रामारामादीनामुपलक्षणार्थम् । अतएव बृहस्पतिः—

दत्त्वा भूम्यादिकं राजा ताम्रपट्टे ऽथवा पटे ।
शासनं कारयेद्धर्म्यं[4] स्थानवंशादिसंयुतम् ॥

—इतिस्मृतिचन्द्रिकालिखनम् । २ (स्मृचव्य० २।५५)

योगीश्वरः शासनमाह :—

भूमिं दत्त्वा निबन्धं वा कृत्वा लेख्यं तु कारयेत् ।
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः ॥ (यास्मृ० १।३१८)

पटे वा ताम्रपट्टे वा स्वमुद्रापरिचिह्नितम् —इत्यादिवीरमित्रोदय(पृ० ३५६)व्यवहारचिन्तामण्यादिग्रन्थलिखनम् ॥ ३ ॥

ताभिश्च वर्षोपयुक्तकरदानेन वर्षोपयुक्तस्वत्वमर्ज्यते । तद्वर्षे च राज्ञा तद्भूमेरन्यत्र दानविक्रयणादिकरणं न सिद्ध्यति । यदि तु प्रतिवर्षं त्वया भुज्यतामित्यादि प्रतिज्ञाभवत् तदा तु यावद्वर्षेष्वेव स्वत्वानुमतेः कदापि दानविक्रयादिकं न कर्त्तव्यमिति विवादभङ्गार्णवलिखनम् ॥४॥
(१ विवाभ० पृ० ३०८ कन्न)

---

१ लिखितं तावद् द्विविधं स्वहस्तकृतमन्यत्कृतञ्च—वी० मि० पृ० ५२०, यास्मृ०

२. °परिज्ञानाय—व्यप्र० ।

२।८५ व्यमा० ३३६ तमे पृष्ठे वचनमिदमुक्तमिति धर्मको० ।

३. ताम्रपट्टेऽथवा पटे इति बृस्मृ० पाठान्तरम्, ताम्रपट्टे तथा पटे स्मृचव्य० ५५

४. ०द्धर्मम्—बृस्मृ० ।

देशाचाराविरुद्धं यद्व्यक्ताधिविधि[1]लक्षणम् ।
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम ॥

—इति वीरमित्रोदयग्रन्थधृतनारदवचनम । (नामसं० २।११३) ।।५।। पृ० ५२) ।

व्यवहारो हि बलवान् धर्म्मस्तेनावहीयते ।

—इति व्यवहारतत्त्व(पृ० १६६) व्यवहारमातृका(पृ० २८४)धृतनारदवचनम् । (नामसं—१।३४) ।।६।।

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।

युक्तिहीनविचारे तु धर्म्महानिः प्रजायते ॥ —इति तत्तद्ग्रन्थधृत (व्यमा० २८२ : २६४)बृहस्पतिवचनम्, *युक्तिर्लोकव्यवहारः*[2]—इति तत्तद्ग्रन्थलिखनञ्चेति ।

श्रीश्रीर्जयतितराम् **श्रीहरिः शरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

---

२७ सदर देमानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर हुजुर हइते ऐ आदालतेर पण्डितदिगेर नामे मित्रजितसिंहेर ओ श्रीमति मनुबिबी सायलार मकद्दमाते तिन रोजेर मध्ये पश्चिमदेशेर एवं वङ्गदेशेर शास्त्रमते यवाव दाखिल करणेर हुकुमे इंगरेजी १८२६ शालेर ३० मे मासेर रोवकारिर लिखित सवाल एइ—एक व्यक्ति क्षत्रिर स्त्री, ये ताहार आपन स्वामीर त्यक्त धने दाखिलकार छिल, ताहार आपन स्वामीर

---

१. ०धिकृतल०—नामसं० ।

२. मिताक्षरा इति पठनीयः २।८६ ॥

२. युक्तिर्न्यायः स च लोकव्यवहारः इति व्यवहारमातृका—व्यत० पृ० १६६ ।

मातुल पुत्र राखिया मरियाछे। अन्य उत्तराधिकारी ना थाकन एवं ऐ मृत स्त्री-व्यक्तीर दत्तक पुत्र ना थाकन कालीन ऐ स्त्रीर त्यक्त धन ऐ पुत्र पाइते पारे कि ना इति।

यवावव्यवस्था(I)

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइश मिटसाहेवधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते :—

यत्र कस्यचिद् अनपत्यस्य क्षत्रियस्य स्त्री स्वस्वामित्यक्तधने भोगवती आसीत्, स्वस्वामिमातुलपुत्रं संरक्ष्य मृता[1]स्यात्, तत्र यदि तस्याः स्वामिनः पश्चिमदेशचलितमिताक्षरादिग्रन्थलिखितक्रमेण पत्न्यादि—मातृ[2]ष्वस्रीयपर्य्यन्तानपत्यधनाधिकारिणो न स्युः, तदापश्चिमदेशचलितमिताक्षरादिग्रन्थानुसारेण एवं वङ्गदेशचलितश्रीकृष्णतर्कालङ्कारकृतदायक्रमसंग्रह-विवादार्णवसेतु-विवादभङ्गार्णव-ग्रन्थलिखितक्रमेण पत्न्यादि-मातुलपर्यन्तानपत्यधनाधिकारिणो यदि न स्युःतदा वङ्गदेशीयतत्तद्ग्रन्थानुसारेण अथ च वङ्गदेशीयश्रीकृष्णतर्कालङ्कारकृतदायभागटीकारूपग्रन्थलिखितक्रमेण पत्न्यादिमातृष्वस्रीय[2]पर्य्यन्ता धनाधिकारिणो यदि स्युः, तदा वङ्गदेशीयतद्ग्रन्थानुसारेण एवञ्च तन्मतत्रय एव मृतायास्तस्याः स्त्रिया यदा दत्तकः पुत्रो नास्ति तदा च तस्याः स्त्रियास्त्यक्तधनं तत्स्वामिमातुल-पुत्र आदावेव[3] बन्धुत्वेन प्राप्तुं शक्नोति—इति पश्चिमदेशचलितमिताक्षरादिग्रन्थानुसारिणी वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाक्रमसंग्रह - विवादार्णवसेतु - विवादभङ्गार्णवादि-ग्रन्थानुसारिणी च व्यवस्था।

---

१. मृता—व्यप०।

२. °स्वस्रीय०—व्यप०।

३. आद्येव—व्यप०।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतो गोत्रजो बन्धुः—इत्यादि मिताक्षरादिग्रन्थलिखितयाज्ञवल्क्य-वचनम् (यास्मृ० २।१३५)। १

गोत्रजाभावे बन्धवो धनभाजः। बन्धवश्च त्रिविधाः।

आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति॥

यथोक्तम्—

आत्मपितृष्वसुः[1] पुत्रा आत्ममातृष्वसुः सुताः।

आत्ममातुलपुत्राश्च[2] विज्ञेया आत्मबान्धवाः॥

पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः।

पितु(र्)मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥

मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।

मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥

इति। तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवो धनभाजस्तदभावे पितृ-बन्धवस्तदभावे मातृबन्धवः—*इति क्रमो वेदितव्यः*—इति मिताक्षरादि- (मिता० २।१३, पृ० २१३) ग्रन्थलिखनम् ॥ २ ॥

तदभावे मातुलस्तदभावे मातुलपुत्रस्तदभावे मातुलपौत्रस्तदभावे मातामहदौहित्रोऽधिकारी—इत्यादिश्रीकृष्णतर्कालङ्कारकृत(*दाय*)क्रमसंग्रह ग्रन्थलिखनम्। (१०।१५, पृ० ६)॥ ३॥

---

१. आत्मपितृष्वसुः पुत्रा पितृमातृ०—व्यप०।

२. पितुर्मातुल०—व्यप०।

तत्र प्रथमं[1] मातुलस्तदभावे मातृष्वस्रीयस्याधिकारस्तदभावे मातुल-पुत्रपौत्राणां क्रमेणाधिकारः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकारूपग्रन्थलिखनम् । ॥ ४ ॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

---

२८ नंबर—

रोबकारी मिसिल आदालत देमाना सदर अंगरेजी १८२६ साल तारीख ७ माहे दिशम्बर मताबक वाङ्गला १२३३ साल २३ माहे अग्रहायण रोज वृहस्पतिवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुटनी इशमिट साहेबेर बैठके ।

श्रीमति सुलक्षणा—	आपीलाण्ट
श्यामाप्रसादनन्दी ओ गयरह	रेप्पाण्डण्टान

सन हालेर २० नंबर (नवम्बर) मासेर लिखित जिला मेदनीपुरेर जजसाहेबेर एक किता रिटरन, ताहार सामिलेर रोबकारी ओ गयरह मंबलित पहुचिया अत्र श्यामाप्रसादनन्दी ओ लक्ष्मीनारायणचौधुरीर उकिल मुनशी गोलाम वतुल ओ व्रजलालचौधुरीर उकिल मुनसी दादारवकश ओ सदासुख पण्डित ओ आनन्दलालचौधुरी ओ नन्दलालचौधुरि ओ मसम्मात हरिप्रियामणी राणीर[2] उकील सदासुख

---

१. तत्रापि प्रथमं मातामहस्तदभावे मातुलतत्पुत्रपौत्राणां क्रमेणाधिकारः—इति दायभागटीकायां कृष्णतर्कालङ्कारलिखनम् (पृ० २१८, ११।६ परि०)

२. हरिप्रियामणी रणीर–व्यप० ।

पण्डितेर हाजीरीते तीनि आदालतेर कागजात सहित दरपेस हइया पडा गेलो। तत्परे ब्रजलालचौधुरीर उकीलेरा अयोध्याप्रसाददास मुद्दइ श्यामाप्रसादनन्दी ओ गैरह मुद्दाआलेहेर मोकद्दिमाते अंगरेजी १८२२ सालेर मार्च्च मासेर हओया एलाका कलिकातार कोर्ट आपीलेर एक किता रोवकारिर नकल० लंवरे दाखिल करिलेक, दृष्टि आइलो। जाना गेलो ये आदालतेर साविक तृतीय हाकिम अंगरेजी १८२२ सालेर १४ शितम्बर मासेर हआया हुकुमे एइ लिखियाछेन ये विरोधी निष्पत्ति पर्य्यन्त मृत मधुसूदनेर हिस्सा सरवराहकारेर इलाकाते थाके, ओ ताहार हिस्सार मोनफा सरवराहकारेर निकट आमानत थाके, ओ कि प्रकारे विरोधी निष्पत्ति हय, ओ कोन व्यक्तिर स्वत्व—ए विषयेर किछु तजवीज करेन नाइ, अतएव ए विषयेर हुकुम सादर करण आवश्यक हइलो. ओ अंगरेजी १८११ सालेर माइ मासेर लिखित ए आदालतेर फयसलार दृष्टे वोध हय जे दौहित्रदिगेर मध्ये अर्थात् डिगरीदारानेर मध्ये एक जन मरिले, ताहार हिस्सा कोन व्यक्तिके अर्शिवेक। ओइ फयसलाते ए विषयेर किछु हुकुम नाइ। आर अंगरेजी १८२२ सालेर मार्च्च मासेर ११ एगारह तारिकेर हओया कलिकाता(र) कोर्टेर रोवकारीते अन्य मोकद्दिमाते, अर्थात अयोध्याराम मुद्दइ वनाम श्यामाप्रसादनन्दी ओ गैरह मुद्दाआलेहेर मोकद्दिमाते सम्पर्क राखे, एइ हुकुम आछे ये मधुसूदन मुद्दाआलेहेर पिता अन्य उत्तराधिकारीरा मोकद्दिमार तदविर करे, ओ ओइ रोवकारी अन्य मोकद्दिमार सम्पर्कीय ए मोकद्दिमाय प्रवेश हइते पारे ना। वरं ओइ रोवकारीर गरज अयोध्याराम मुद्दइर मोकद्दिमार······ छिलो। मृत मधुसूदनेर उत्तराधिकारीदिगेर विरोध निष्पत्तिर·· छिलो ना, ओ से मोकद्दिमाते ओइ मुद्दइर नालिस कलिकातार कोर्टे डिसमिस हइया मृत मधुसूदनेर उत्तराधिकारीदिगेर विरोधेर किछु निष्पत्ति कोर्टे हय नाइ।

आर जाना जाय ये छय ६ जन दौहित्र अर्थात डिगरी(दारदिगे)र-मध्ये केवल ओइ मधुसूदन मरियाछे। बाकी पाच जन। ताहार मध्ये मृत व्यक्तिर सहोदर भ्राता तिनि एइ त्तण पर्य्यन्त वर्तमान आछे, ओ व्रजलालचौधुरीर स्त्री हरिप्रियामणीर गर्भे अन्य दौहित्र जन्मे नाइ, आर मधुसूदनचौधुरीर पिता व्रजलाल-चौधुरी ओ माता हरिप्रिया ओ सहोदर तीनि भ्राता, आनन्दलाल ओ नन्दलाल ओ गङ्गानारायणचौधुरीके राखिया मरियाछे। अतएव हुकुम हइलो ये ए आदालतेर पण्डितान् स्थाने सवाल करा जाय ये ओइ प्रकारे मृत मधुसूदनेर अंश कोन व्यक्तिके अर्शे; ताहार पिता आदि उत्तराधिकारिदिगेके किंवा मृत राजा जादवरायेर, ये ओइ छय जनेर मातामह छिलो, ताहार बाकी पाच जन दौहित्रके अर्शे। उचित ये अंगरेजी १८११ सालेर २७ माइ मासेर हओया ए आदालतेर फयसलार मजमून ज्ञात हइया दायभागशास्त्र मते ये सेइ शास्त्र मते ए मोकद्दिमा ए आदालते निष्पत्ति हइयाछे; ओइ सवालेर यवाव परसु दुइ प्रहर पर्य्यन्त वचनग्रन्थेर वेओरा सम्वलित दाखिल करेन। पण्डितदिगेर यवाव दाखिल हइले पर उचित हुकुम देया जाइवेक इति।

श्रीर्ज्जयतितराम्[1]

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपमवलोक्यैवं तत्समर्पितांगरेजीशब्द-प्रतिपाद्यैकादशाधि[2]काष्टादशशताब्दीयमाइमासीयसप्तविंशतिदिवसीयैतद्धर्म्मा-

---

१. श्रीज्ज यति०—व्यप०।

२. °काष्ठा०—व्यप०।

धिकरणीयजयपत्रार्थमवगत्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते। यत्र मधुसूदनचौधुरीसंज्ञकः कश्चिद् व्यक्तिविशेषो व्रजलालचौधुरीसंज्ञकं पितरं हरिप्रियामणीनाम्नीं मातरमानन्दलाल-नन्दलालगङ्गानारायणचौधुरीसंज्ञकान् त्रीन् सोदरभ्रातृन्[1] संरक्ष्य मृतः तत्रोपरिलिखिततत्[2]द्धर्म्माधिकरणीयजयपत्रानुसारेणोत्तराधिकारित्वेन मधुसूदनचौधुरीसंज्ञकस्वत्वास्पदीभूतांशस्य तदीयधनत्वेन तन्मरणोत्तरं तदुत्तराधिकारिणामेवाधिकारो न तु पूर्व्वस्वाम्युत्तराधिकारिणाम्। तत्र च तत्पुत्र-पौत्र-पत्नी-दुहितृ-दौहित्र-पर्य्यन्ताभावे तत्पितु(र् व्रजलाल-चौधुरीसंज्ञकस्याधिकारः, (अ)सति पितरि मातृ-सोदर-भ्रात्रादीनाम्, एवं मृतस्य राज्ञो यादवरामरायस्य पूर्व्वधनस्वामिनोऽवशिष्टा(नां) पञ्चदौहित्राणां नाधिकारः—इति दायभागादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्

अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि—इत्यादि दायभागादि(दाभा० पृ० १५१,११।११।४)ग्रन्थधृतविष्णुवचनम् (विष्णु० १७।४)।१

दौहित्रस्याभावे पितुर्न्न मातुः—इत्यादि दायभागग्रन्थ (दाभा० पृ० १८५, ११।३।१)लिखनम्। २

तदभावे पिता तदभावे माता तदभावे भ्राता—इत्यादि श्रीकृष्ण-तर्कालङ्कारकृतदायभागटीकारूपग्रन्थ(दाभा० टी० पृ० २१८, प० १२)-लिखनञ्चेति।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीहरिः शरणम्
श्रीरामतनुशर्म्मविद्यावागीशेन

---

१. भ्रात्रीन्—व्यप०।

२. तेते धर्म्मा०—व्यप०।

सवाल

२९—सदर देमानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर हजुर हइते कमलाकान्तघोशाल ओ गैरह बनामे रामहरिनन्दिग्रामी ओ गैरहेर मोकद्दिमाते अंगरेजी १८२६ सालेर १३ दिशम्बर मासे रोवकारीर लिखित अदालत मजकुरार पण्डितानेर नामे परसु दुइ प्रहर पर्य्यन्त वचन ओ प्रमाणेर वेओरा संवलित यवाव तलव मजमुने सवाल एइ ये—

गोवर्द्धननन्दिग्रामी नरेन्द्रनित्यानन्दग्रामी ओ शीताराम-नन्दिग्रामी दुइ पुत्र(के) उत्तराधिकारी राखिया मरिलो, ओ नरेन्द्र-नित्यानन्द एक पुत्र गोपीनाथके राखिया मरिलो, ओ सीताराम एक पुत्र सहदेव नाम ओ एक कन्या, (या)हार नाम प्रकाश नाइ, उत्तराधिकारी राखिया मरिलो। ओ ओइ गोपीनाथ तीनि पुत्र रामहरिनन्दिग्रामी ओ गौरहरिनन्दिग्रामी ओ हारुनन्दिग्रामी-के राखिया मरिलो; ओ सहदेव निःसन्तान मरिलो, ओ ताहार भगिनी एक कन्या राखिया मरिलो, ओ ओइ सहदेव आपन जीवदशाते भगिनीर मृत्युर पर आपन भगिनीर कन्यार जीव-द्दशाते ताहार आपन भगिनीर पुत्र रामशङ्करघोशालके कयेक विघा ब्रह्मोत्तर ओ देवत्तर भूमि दातव्य करियाछे; ओ ताहार दानपत्र लिखिया दियाछे; ओ ग्रहीताके दातव्य करा भूमिर उपर दखिल कराइया ताहार तीनि वत्सर परे मरियाछे; ओ दानकालीन गोपीनाथनन्दिग्रामीर पुत्र रामहरी ओ गौरहरी ओ हारु नन्दिग्रामी वर्त्तमान छिलो, एवं आछे। ओ ओइ गोपीनाथ मरियाछे, ओ दाता व्यक्तिर मृत्युर कएक वत्सर परे ग्रहीता व्यक्ति मरियाछे। ताहार पुत्रेरा दान करा-भूमीर उपर दखिल हइयाछे। वङ्गदेशेर शास्त्रानुसारे ओइ

सहदेवेर लिखिया देया हेवा सिद्ध, कि असिद्ध, ओ ताहा असिद्ध हओन प्रकारे दान करा भूमि कोन व्यक्ति के अर्शे इति ।

श्रीर्ज्जयतितराम्[1]

यत्रात्र व्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यत्र गोवर्द्धननन्दिग्रामीसंज्ञकः कश्चिद् व्यक्तिविशेषो नरेन्द्रनित्यानन्दनन्दिग्रामीसीतारामनन्दिग्रामीसंज्ञकौ द्वौ पुत्रावुत्तराधिकारिणौ संरक्ष्य मृतः, नरेन्द्रनित्यानन्दोऽपि गोपीनाथसंज्ञकमेकं पुत्रं संरक्ष्य मृतः, एवं सीतारामोऽपि सहदेवनामानमेकं पुत्रमेकां कन्यां च संरक्ष्य मृतः, एवं गोपीनाथो रामहरी-गौरहरी-हारूसंज्ञकान् त्रीन् पुत्रान् संरक्ष्य मृतः, तत्रोपरिलिखितसहदेवः स्वजीवनदशायां स्वभगिनीदौहित्राय रामशङ्करघोशालाय यदि कतिपयविघाशब्दवाच्यां[2] कांचिद् ब्रह्मत्रभूमिं देवत्रभूमिञ्च दत्त्वा, तस्याश्च दानपत्रं लिखित्वा दत्त्वा, तस्यां च ग्रहीतुराय[3]त्तत्वं सम्पाद्य संवत्सरत्रयानन्तरमनपत्य एव मृतस्तदा दानकाले इदानीं च गोपीनाथपुत्रेषु रामहर्य्याद्युपरिलिखितेषु त्रिषु सत्स्वप्यविभक्तायां भूमौ स्वांशयोग्यायाः विभक्तायां च स्वांशरूपाया वा ब्रह्मत्रभूमेर्यद्दानं कृतं तद् वङ्गदेशचलितशास्त्रानुसारेण सिद्धं भवति, स्वतन्त्रस्वामिकृतत्वात्, एवं दानपत्रलिखिताया देवत्रभूमेर्य्यद्दानं तन्न सिद्ध्यति[4], देवत्रभूमौ केवलं देवताया एव स्वत्वं देवभिन्नानां केषाञ्चिदपि स्वत्वाभावात् । किन्तु देवत्रभूमेः संरक्षणवेक्षणादिकर्त्तृत्वं लोकानामेव व्यवहाराद् दृश्यते । तत्र यद्यनेन केनचिद् भूम्यधिपतिना देवसेवार्थं काचिद् भूमिर्न्नियमिता तत्संरक्षणादिकर्तृत्वं तद्देवपूजकत्वं वा सहदेवाय, तत्पूर्व्वपुरुषाय वा दत्तं स्यात्तदा

---

१. श्रीजयति०—व्यप० ।

२. ०वाच्या काचित् ब्रह्मत्रभूमिर्देवत्रभूमिश्च दत्ता … दत्वा—व्यप० ।

३. रायत्तत्वं—व्यप० ।

४ सिद्धसि—व्यप० ।

तदेव स्वकर्तव्यस्ववशीभूतसंरक्षणादिकर्तृत्वं तद्देवपूजकत्वं वा यदि सहदेवेनोपरिलिखितरामशङ्करघोशालाय दत्तं स्यात्तदा, यदि वा स्वयमेव सहदेवेन देवसेवार्थं स्वीयकाचिद्भूमिर्न्नियमिता तस्याः संरक्षणादिकर्तृत्वं तद्देव[1]पूजकत्वं वा तस्मै दत्तं स्यात्, तदा चैतदुभयविधं दानं लोकव्यवहारात्सिद्ध्यतीति, अतः शास्त्रानुसारेणापि सिद्धं भवितुमर्हतीति वङ्गदेशचलितदायभागमनुव्यवहारतत्त्व[2]व्यवहारमातृकादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

स्व[3]भागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्युर्यथेष्टं[4] तत्सर्वमीशास्ते[5] स्वधनस्य वै ॥

इति दायभागादि(दाभा० २।२९, पृ० ३५)ग्रन्थधृतनारदवचनम् (नामसं० पृ० १५७, १४।४२) । १

प्रदानं स्वाम्यकारणम्–इति मनुवचनम् । (मस्मृ० ५।१५२) । २

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः–इति मनुवचनम् (मस्मृ० ८।१९९) । ३

व्यवहारो हि बलवान् धर्मस्तेनावहीयते[6]—इति व्यवहारतत्त्वादिग्रन्थ(व्यत० पृ० १९९)धृतनारदवचनम् (नामसं० पृ० ८, १।३४)[४]

श्रीर्ज्जयतितराम् **श्रीहरिः शरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

---

१. ०लदेव०—व्यप० ।
२. ०तत्व०—व्यप० ।
३. स्वानंशान्—नामसं० ।
४. कुर्युर्यथे०—व्यप० ।
५. मीशते—नामसं० ।
६. नापचीयते—नामसं० ।

सवाल

३०—सदर देमानी अदालतेर द्वितीय हाकिम श्रीयुत कुटनी इशमिट साहेबेर हजुर हइते ओइ आदालतेर पण्डितदिगेर नामे अंगरेजी १८२५ सालेर १८ दिशम्बर मासेर रोवकारिर लिखित भवानीलालेर नामे हर्राशर्वीर्वार मोकादिमाते परसु दुइ प्रहर पर्य्यन्त वचन ओ ग्रन्थेर वेओरा संवलित यवाव दाखिल करनेर हुकुमे सवाल, एइ ये—

एक व्यक्ति हिन्दु, कायस्थ जाति, स्त्री ओ पिताके राखिया मरिलो। ताहार पर पिता स्त्रीके, ये प्रथम मृत व्यक्तिर माता नहे, आर अप्राप्त-व्यवहार पुत्र ओ भगिनीर पुत्रके राखिया मरिलो। पश्चात् ऐ अप्राप्त-व्यवहार पुत्र निःसन्तान मरिलो। तत्परे ऐ पितार स्त्री, ये अप्राप्त-व्यवहार पुत्रेर मृत्युर परे ऐ पितार त्यक्त धनेर उपर दखिलकार हइयाछिलो, आपन पतिर भगिनीर पुत्रके, ये उपरे उल्लेख हइलो, ऐ त्यक्त धनेर असियतनामा लिखिया दिया ग्रहीताके दान करा वस्तुर उपर दखिल ना कराइतेइ मरिलो मैथिलदेश ओ वङ्गदेशेर शास्त्रानुसारे ऐ असियतनामा प्रथम मृत व्यक्तिर स्त्री थाकने ओ सिद्ध ओ चलित वटे, कि ना? आर यद्यपि असियतनामा लिखा ना हइतो, एइ स्वीकार करा जाय उत्तराधिकारित्वक्रमे ऐ त्यक्त धन द्वितीय मृत व्यक्तिर भगिनीर पुत्रके किम्वा प्रथम मृत व्यक्तिर स्त्रीके अर्पितो इति।

श्रीर्जयतितराम्[1]

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीया(धि)पति - श्रीयुत-कुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

---

१. श्रीर्ज्ज यतितराम्—व्यप०।

यदि कश्चित्कायस्थजातिः स्वस्त्रियं स्वपितरञ्च संरक्ष्य मृतस्तदनन्तरं तत्पिता तद्विमातरमप्राप्तव्यवहारं पुत्रञ्चैकं स्वभगिनीपुत्रञ्च संरक्ष्य मृतः, पश्चादप्राप्तव्यवहारः स पुत्रोऽप्यनपत्य एव मृतः, तदनन्तरमप्राप्त-व्यवहारस्य पुत्रस्य पितुः पत्नी तस्मिन्विवादास्पदीभूतधने भोगवती भूत्वा स्वपतिभगिनीपुत्राय उपरिलिखिताय तस्यैव स्वायत्तीभूतधनस्य[१] असियत-नामाख्यं पत्रं लिखित्वा दत्त्वा गृहीततत्पत्रं तत्पत्रलिखितवस्तुपु[२] भोगम-कारयित्वा मृता स्यात्तदा मिथिलादेशचलितशास्त्रानुसारेण वङ्गदेशचलित-शास्त्रानुसारेण च तदेव[३]असियतनामाख्यपत्रं प्रथममृतव्यक्तेः स्त्रियां सत्यामसत्यां[४]वा सिद्धं प्रचलितं (च) भवितुं न शक्नोति। एवञ्च विवादास्पदी-भूतधने उत्तराधिकारिणामयं क्रमः[५]। तथाहि जीवति पितरि प्रथममृतो यः पुत्रस्तदीयविभक्तमसाधारणञ्च धनं तत्पत्नी मिथिलादेशचलितशास्त्रा-नुसारेण वङ्गदेशचलितशास्त्रानुसारेण च प्राप्तुमर्हति; यदि च तस्य स्वोपार्जितं धनं साधारणं स्थितं तदा तत्पत्नी तद्योग्यांशं वङ्गदेशचलित-शास्त्रानुसारेण प्राप्तुमर्हति, न तु मिथिलादेशचलितशास्त्रानुसारेण, तद्दे-शीयग्रन्थकारैः साधारणधने विभागे सत्येव पत्न्याधिकारालम्बनात्। एवञ्च प्रथममृतव्यक्तेर्विभक्तासाधारणधनातिरिक्तं विवादास्पदीभूतं धनं एतदु-भयविधतदीयधनाभावे च समस्तमेव विवादास्पदीभूतं धनं मिथिलादेश-चलितशास्त्रानुसारेण, अथ च तस्यैव पुत्रस्य विभक्तासाधारणं धनं विना तदुपार्जितसाधारणधनेऽपि तद्योग्यांशञ्च विना विवादास्पदीभूतं धनम्, एतत्त्वि-धधनाभावे च समस्तमेव विवादास्पदीभूतं धनं वङ्गदेशचलितशास्त्रानु-सारेण प्रथमपुत्रमरणोत्तरं तत्स्त्रियां सत्यामपि तत्पितुः स्वत्वास्पदीभूतम्, अतस्तस्मिन्मृते तस्याप्राप्तव्यवहारस्य पुत्रस्य उपरिलिखितपितृस्वत्वास्पदीभूत-यावद्धनाधिकारे जाते सति तद्धनं तदीयमेव जातम्। अतस्तस्मिननपत्ये[६] मृते

१. ०धनस्यासि०—व्यप०।

२. गृहीतरतत्पत्रलिखित०—व्यप०।

३. देवासि०—व्यप०।

४. सत्याम्वा—व्यप०।

५. °मयक्र०—व्यप०।

६. तस्मिन्ननपत्ये—व्यप०।

तदुत्तराधिकारिणामेव तद्धनाधिकारः। तत्र च तत्पत्न्यादिसगोत्रपर्य्यन्ताभावे तत्पितृभागिनेयस्य अ(ा)त्मबन्धुत्वेन मिथिलादेशचलितशास्त्रानुसारेण, एवं पत्न्यादितत्पितामहप्रपौत्रपर्यन्ताभावे तत्पितामहदौहित्रत्वेन वङ्गदेशचलितशास्त्रानुसारेण चाधिकारः। एवञ्च सति प्रथममृतव्यक्तेः स्त्री उपरिलिखितपतिस्वत्वास्पदीभूतधनाभावे एतद्धनादेव ग्रासाच्छादनाधिकारिणीति—इति मिथिलादेशचलितविवादचिन्तामण्यादिग्रन्थानुसारिणी वङ्गदेशचलितदायभागादिग्रन्थानुसारिणी च व्यवस्था।

तत्र प्रमाणम्—

स्त्रीणां[1] स्वपतिदायस्तु उपभोगफलः स्मृतः।
नापहारं स्त्रियः कुर्युः पतिवित्तात्[2] कथञ्चन॥

इति विवादचिन्तामणि विचि० पृ० २३८) दायभागादि(दाभा० पृ० १७३, ११।१।६०) लिखितमहाभारतवचनम् (भारत-१३।४६।७।२४)। १

अपहार ऐच्छिकं दानविक्रयादिकम्—इति विवादचिन्तामणिग्रन्थलिखनम् (पृ० २३८)। २

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे मातृगामि तदभावे पितृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि—इत्यादि विवादचिन्तामण्यादि(विचि० पृ० २३५)ग्रन्थधृतविष्णुवचनम् (विस्मृ० पृ० ४६)। ३

इदं च *विभक्तपतिधनपरम्*—इति विवादचिन्तामणिलिखनम् (पृ० २३४)। ४

---

१. स्त्रीणां तु पतिदायाद्यम्—भारतम्।

२. ०वित्तात—व्यप०, ०दायात—दाभा०।

अतोऽविशेषेणैव विभक्तत्वाद्यनपेक्ष्यैव[1]। अपुत्रस्य भर्त्तुः कृत्स्न-धने पत्न्यधिकारः—इत्यादि दायभागग्रन्थलिखनम् (पृ० १६६, ११।१।४६)। ५

'सगोत्राभावे बन्धुः'—याज्ञवल्क्य(वचना)त्, स (च) स्वबन्धुः पितृबन्धुर्मातृबन्धुश्च।

आत्मपितृष्वसुः[2] पुत्रा आत्ममातृष्वसुः[2] सुताः ॥
आत्ममातुलपुत्राश्च[3] विज्ञेया आत्मबान्धवाः।

पितुः पितृष्वसुः[2] पुत्रा पितु[4]र्मातृष्वसुः[2] सुता।
पितुर्मातुलपुत्राश्च विज्ञेया पितृबान्धवाः ॥

मातुः[5] पितृष्वसुः[2] पुत्राः मातुर्मातृष्वसुः[2] सुताः।
मातुर्मातुलपुत्राश्च विज्ञेयाः मातृबान्धवाः ॥

एतेषां क्रमेणाधिकारः—इति विवादचिन्तामणिलिखनम् (पृ० २४२)। ६

एवं पितामहप्रपितामहसन्ततेरपि दौहित्रान्तायाः पिण्डप्रत्यासत्ति[6]-क्रमेणाधिकारो बोद्धव्यः—इति दायभागग्रन्थलिखनम् (पृ० २०८-६)। ७

अविभागे तु शङ्खः।

भ्रातृभार्याणां (च) स्नुषाणाञ्च न्याय(तः प्र)वृत्तानामनपत्यानां पिण्डमात्रं गुरुर्दद्यात् ॥

---

१. ०नपेक्ष्यैव—दाभा०।

२. ०स्वसुः—व्यप०।

३. अत्म०—व्यप०।

४. पितुर्मा०—व्यप०।

५. मातुपि०—व्यप०।

६. प्रत्याशक्ति०—व्यप०।

जीर्णानि वासांस्यविकृतानि'[1]—इति विवादचिन्तामणिग्रन्थलिखनञ्चेति (पृ० २३६)

श्रीर्जयतितराम् श्रीहरिःशरणम्
श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

३१—रोवकारि मिसिल आदालत देमानी सदर इङ्गरेजि १८२६ साल तारिख २८ माह देशम्बर मतावक वाङ्गला १२३३ साल तारिख १४ पौष रोज वृहस्पतिवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर बैठके—

मृत गौरीप्रसादचौधुरि आपिलाण्ट
मसम्मात जयमालाचौधुराणी रेस्पाडण्ट

मृत्युञ्जयशर्म्मा शायेलेर उकिल सदासुखपण्डित विद्यमाने आइल। जयमालाचौधुराणी मुद्दाआलेहेर जमिदारि निलाम द्वाराय शायेलेर पओना डिगरिर टाका देयानेर वावत। शायेलेर दरखास्त नामञ्जुरिर विषये कोर्ट आपिलेर तृतीय हाकिमेर मञ्जुर राखा सहर ढाकार जजसाहेबेर हुकुमेर असम्मतिते ओ ऐ चौधुराणीर जमिदारिर किछु निलाम करिया डिगरिर लिखित टाका देओयानेर निमित्ते कोर्ट आपीलेर हाकिमदिगेर नामे ए आदालतेर हुकुम सादर हओनेर प्रार्थनाय शाएलेर दरखास्त ए उकिलेर नामिक ओकालतनामा ओ सन हालेर १ मेइ मासेर लिखित जाहाङ्गीरनगरेर कोर्टेर रोवकारिर नकल आर कोर्टे दाखिल हओया शाएलेर सओयालेर नकल सम्वलित जे हाल मासेर २३ तारिखे ए आदालते दाखिल हइयाछिल अद्य दरपेप हइया दृष्ट आइल। जाना गेल ये इङ्गरेजि १८१४

---

1 "स्यभिहृतानि"—व्यप०।

शालेर १६ देशम्बर मासेर हओया ए आदालतेर फयशला अनुसारे गोविन्द्रप्रसादचौधुरिर त्यक्त परगने काशीमपुर शाशान वाशान गयरह जमिदारिर आट आना रकमेर मध्ये ऐ गोविन्द प्रसादचौधुरिर प्रथमा स्त्री मसम्मात् पार्व्वतीचौधुराणिर दत्तक पुत्र गौरिप्रसादचौधुरिर स्वत्व अर्द्धक परिमाने, आ ऐ चौधुरिर द्वितीया स्त्री मसम्मात जयमालार दत्तक पुत्र शिव-प्रसादेर स्वत्व[1] द्वितीय अर्द्धक परिमाणे साव्यस्थ हइयाछे। ओ ए आदलतेर फएशलार परे द्वितीय स्त्रीर दत्तक पुत्र शिवप्रसाद-निःसन्तान मरिल; ओ ताहार मृत्यु हओन हेतुते ए गौरिप्रसाद चौधुरिर ताहार त्यक्त चारि आना स्वत्वेर दाओया करिलेक, ओ ए आदालतेर पण्डितेरा इङ्गरेजी १८१७ शालेर ७ फेवरओयारि मासे प्रथम हाकिमेर सओयालेर जवावे एक केता व्यवस्था एइ मजमुने, ये शिवप्रसादचौधुरीर त्यक्त चारि आना अंश ऐ अप्राप्त-व्यवहारेर मर्हातृ-माता जयमालाके अर्शे, ताहार भ्राता गौरीप्रसादके अर्शे ना, दाखिल करिलेन। ताहार पर तारिणी-प्रसाद अप्राप्त-व्यवहार पुत्र राखिया ए गौरीप्रसाद मरिल, ओ इङ्गरेजि १८१९ शालेर ३१ आगष्ट मासे मृत्युञ्जय शर्म्मा शाएल ऐ जयमालार नामे, ये ए क्षण पर्य्यन्त वर्तमान आछे, प्रकाश हय, ६७९।~)॥२ गण्डार डिगरि सहर ढाकार देओयानी आदा-लत हइते पाइल; ओ चाहितेछे ये ए चारि आना हिस्या किम्वा ताहार मध्ये किछु आपन हासिल करा डिगरिर टाका पाओनेर कारण विक्रय कराय, ओ तमसुकेर तारिख ये ए मृत्युञ्जयेर दाओयार मूल वटे अनिर्णय…। आर मसम्मात जयमाला-चौधुराणीर एजहार, एइ जे आमार एक कन्या, ताहार सन्तान जन्मे नाइ सम्भावना आछे; ओ द्वितीय कन्या पति-वर्तमाना, ताहार गर्भज, अप्राप्त-व्यवहार एक पुत्र आछे, ओ आमि स्वयं

---

१. सत्व-व्यप०।

द्वितीय एक पुत्रके दत्तक करियाछि। ए प्रकारे ए आदालतेर पण्डितदिगेर (स्थाने) जिज्ञासा जाय ये जयमालार एजहार सत्य-प्रकारे ऐ चारि आना अंश, किम्वा ताहार मध्ये किछ मृत्युञ्जय शर्म्मार पाओया डिगरि निमित्ते विक्रय हइते पारे कि ना, ओ ताहार एजहार मिथ्या हओन प्रकारे ताहार मृत्युर पर ऐ चारि आना हिस्या ताहार सपत्नीर पौत्र अर्थात् गौरीप्रसादचौधुरिर पुत्र तारिणीप्रसादचौधुरिके, किम्वा कोन व्यक्तिके अर्शिवेक, आर ताहार एजहार (प्रकारे) ताहार दुइ कन्या ओ एक दत्तक पुत्र थाकनेय विषये मिथ्याइ स्वीकार करणेर जवाव वङ्गदेशेर शास्त्रानुसारे मङ्गलवार दिवस दुइ प्रहर पर्य्यन्त दाखिल करेन इति।

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनी – इशमिटसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

मृत्युञ्जयशर्म्मणः प्राप्तजयपत्रलिखितऋणं यदि शिवप्रसादस्यावश्यकश्राद्धाद्यौर्द्ध्वदेहिकक्रियार्थं स्वभरणपोषणार्थं वा तन्मात्रा जयमालया कृतं तत्परिशोधनं यदि स्वसंक्रान्ततदीयांशविक्रयं विना न भवति तदा जयमालोपस्थापितवृत्तान्तस्य सत्यत्वेऽसत्यत्वे वा तदर्थमुपरिलिखितऋणपरिशोधनोपयुक्तस्य तदीयांशान्तर्गतस्य विक्रयो भवितुमर्हति, न तु स्वेच्छया स्वाभिप्रायेण वा जयमालया कृतस्य ऋणस्य परिशोधनार्थम्। यथा पतिधने पत्न्याः पतिश्राद्धाद्यौर्द्ध्वदेहिकक्रियार्थं पतिकृतकुटुम्बभरणार्थऋणपरिशोधनार्थं स्वभरणपोषणार्थमाधने विक्रयेऽशक्तावधिकारस्तथा पुत्रधने मातुरपि। एवञ्च जयमालामरणोत्तरं स एवांशस्तत्सपत्नीपौत्रस्य तारिणीप्रसादचतुर्धरिणस्य पूर्व्वधनस्वामिशिवप्रसादभ्रातृपुत्रस्य भविष्यति, यतः पुत्रधनस्योत्तराधिकारित्वेन मातृसंक्रान्तत्वेऽपि गृहीतपुत्रधनाया मातुरुपरमे पूर्व्वधनस्वामिपुत्रस्य ये उत्तराधिकारिणस्तेषामेव तद्धनं

भवति । तत्र च तद्भ्रातृपर्य्यन्ताभावे[1] सुतरां भ्रातृपुत्रस्यैवाधिकारः, सति भ्रातृपुत्रे पितृदौहित्रस्यानधिकारात्, स्वामिमरणोत्तरमेकत्रीकृतस्य द्वितीय-दत्तकशास्त्रलिखितत्वाच्च—इतिवङ्गदेशप्रचलितदायभागश्रीकृष्णतर्कालङ्कार-कृतदायभागटीकाक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्:—

रिक्थग्राह[2] ऋणं दाप्यः—

इत्यादिविवादभङ्गार्णवादिग्रन्थ (१विवा १७६ख)धृतयाज्ञवल्क्यवचनम् (२।५१) । १

पत्नी तद्धनं भुञ्जीतैव, परं न तु तस्य दानाधानविक्रयान् कर्तु-मर्हति । तदाह-कात्यायनः

अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः ॥ (कास्मृ० ९२१)

इतिदायभाग(पृ० १७१ ग्रन्थलिखनम् ॥२॥

एवञ्च पत्यु[3]रौर्द्ध्वदेहिकक्रियार्थं दानादिकमप्यनुमतम् । अतएव वर्तना[4]शक्तावाधानमपि, तत्राप्यशक्तौ विक्रयणमपि—इत्यादि दायभाग-ग्रन्थलिखनम् । (पृ० १६३, ११। १६१-६२)

यद्वा पत्नीत्युपलक्षणम्, स्त्रीमात्राधिकारेऽयमर्थो बोद्धव्यः ।
पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धुः—इत्यादिदायभागादिग्रन्थ (दाभा० पृ० १५१) लिखितयाज्ञवल्क्यवचनम् ॥ (२।१३५)५ ।

---

१ पर्य्यन्त०—व्यप० ।

२ ऋक्थग्राही—व्यप० ।

३ पत्युर्गद्ध ०—व्यप० ।

४ वर्त्तमाना०—व्यप० ।

५ पितरौ भ्रातरस्त०—व्यप० ।

भ्रातृपौत्रस्याभावे पितुर्दौहित्रस्याधिकारः—इति (दाय)क्रमसंग्रह-लिखनञ्चेति (पृ० ६)। ६

श्रीर्ज्जयतितराम् श्रीहरिःशरणम्
श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

श्रीर्ज्जयतितराम्।

३२—यत्र धनिनः सप्तमपुरुषज्ञातिमातुलपुत्रौ विद्येते तत्र तयोर्म्मध्ये जीमूतवाहनकृतदायभागमते धनिनो मातुलपुत्रस्यैव धनित्यक्तधने धनिनि-मृतेऽधिकारः, विज्ञानेश्वरकृतमिताक्षरामते तु तयोर्म्मध्ये सप्तमपुरुषज्ञाति-रेवाधिकारी न तु मातुलपुत्र इति—

श्रीर्ज्जयतितराम् श्रीहरिःशरणम्
श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

एइ व्यवस्था दाखिल सदर देमानीका रजिष्टर साहेब श्री मेघनाटन साहेबका हजूर कलकत्तेका कोर्ट आपील आदालतिके हाकिमानके सवालके यवाव इति—

श्रीवैद्यनाथपाराहत

सवाल

३३—आगम केतने प्रकार है? सप्त प्रकार आगम कोन पुस्तकमे लिखा हो? मिताक्षरा किम्बा अन्य काइ ग्रन्थमे लिखा हो इति।

यवाव

शास्त्रोक्त आगम सप्त प्रकार, ओ सप्त प्रकार आगम मिताक्षरा वीरमित्रोदय ओ गैरह ग्रन्थमे लिखा है इति ।

श्रीर्ज्जयतितराम् श्रीहरिःशरणम्

श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

एइ यवाव दाखिल नाएव रजिष्टर श्रीयुत विष्ट साहेवका हुजुरमो इति ।

श्रीर्ज्जयतितराम्

प्रथम सवाल


३४—कुशलरायेर चारि पुत्रेरा ओहार त्यक्त जमिदारी प्रभृतीर अंश सकलेर उपर समान अंशते दाखिलकार थाकिया कुशल-रायेर तृतीय पुत्र रामदुलाल आपन स्त्री रत्नादेव्याके राखिया निःसन्तान मरे, ओ ऐ स्त्रीलोक आपन जीवत्‌दशा पर्य्यन्त आपन स्वामीर त्यक्त जमिदारी-प्रभृतीर अंशेर उपर दाखिल थाकिया राजीवलोचन ओ कृष्णचन्द्र ओ रामगोपालेर पुत्रगण, जयराम-रायेर पुत्र हरिहरराय, ओ राधाचरणेर चारि पुत्र, राजचन्द्र ओ गयरहेर समक्षे मरिलो । अतएव रत्नादेव्या मजकुरार मृत्युर पर ताहार स्वामी अर्थात् कुशलराय मजकुरेर तृतीय पुत्र रामदुलाल-रायेर त्यक्त अंश शास्त्रानुसारे ताहारदिगेर मध्ये काहाके, की परिमान अर्शे इति ।

द्वितीय सवाल

रामगोपालरायेर औरस पुत्र कृष्णचन्द्रके रामदुलालराय पोष्यपुत्रकरण प्रयुक्त कृष्णचन्द्र मजकुर रामदुलालेर त्यक्तेर

स्वत्वे ताहार स्त्री रत्नादेव्यार मृत्युर पर आपन सहोदर भ्राता राजीवलोचन ओ पितृव्यपुत्रगण राजचन्द्र (ओ) गयरहेर सहित समान मर्य्यादा राखिवेक, कि ओहारदिगेर सम्पर्के ओहार स्वत्व न्यून किम्वा अधिक हइवेक इति।

यद्यपि रामगोपालरायेर पुत्र जयरामराय रत्नादेव्यार समक्षे मरियाथाके, ए प्रयुक्त ताहार पुत्र हरिहरराय रत्नादेव्या मजकुरार मृत्युर पर राजीवलोचन ओ गयरह रामदुलालेर भ्रातुष्पुत्रगणेर न्याय ऐ रामदुलालेर त्यक्त विषयेर अंशे स्वत्वाधिकारी हइवेक, किम्वा रत्नार समक्षे ताहार पितार मृत्यु हओन प्रयुक्त स्वत्वाधिकारी हइवेक इति।



श्रीर्ज्जयतितराम्

जवाबव्यवस्था

प्रभुसमर्पितवंशावलीपत्रानुसारेण प्रश्नानुसारेण चोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

यत्र कुशलरायस्य चत्वारः पुत्राः स्वपितृत्यक्तस्थावरजंगमांश-चतुष्टयं कृत्वा स्वस्वांशभोगवन्तः स्थिताः[1], तेषां मध्ये कुशलरायस्य तृतीय-पुत्रो रामदुलालः स्वपत्नीं रत्नादेवीं संरक्ष्य अनपत्य एव मृतः, ततो रत्ना-देवी स्वजीवनकालपर्य्यन्तं स्वपतित्यक्तसराजकरस्थावरांशभोगं कृत्वा रामगोपालपुत्रौ, राजीवलोचनकृष्णचन्द्रसंज्ञकौ, जयरामरायस्यैकं पुत्रं हरिहररायसंज्ञकं, राधाचरणस्य चतुरः[2] पुत्रान् राजचन्द्रमदनमोहन[3]-जग-मोहनकालिदासान् संरक्ष्य मृता स्यात्, तदा रत्नादेव्याः स्वामिनोऽर्थात् कुशलरायस्य तृतीयपुत्रस्य रामदुलालरायस्यांशं समस्तमेकादशधा वि-भज्य द्वौ द्वौ भागौ राधाचरणपुत्राणां राजचन्द्रमदनमोहनजगमोहन-कालिदासानां प्रत्येकं भवतः, तथैव द्वौ भागौ रामगोपालपुत्रस्य राजी-वलोचनस्य भवतः, अवशिष्टश्चैको भागो वंशावलीपत्रावगतरामरामराय-दत्तकपुत्रस्य कृष्णचन्द्रस्य भवति।

द्वितीयप्रश्नस्याप्यर्थादिदमेवोत्तरम्—इतिवङ्गदेशप्रचलितदायभागवि-वादभङ्गार्णवदत्तकचन्द्रिकादिग्रन्थानुसारिणीव्यवस्थेति।

तृतीयप्रश्नस्योत्तरम्—

यदि रामगोपालरायस्य पुत्रो जयरामरायो रत्नादेव्यां सत्यां मृतः स्या-त्, तदा तत्पुत्रो हरिहररायो रत्नादेव्या मरणोत्तरं रामदुलालभ्रातृपुत्रराजी-

---

1. स्थिता—व्यप०।
2. चतुर पुत्रान्—व्यप०।
3. मदन्मोहन—व्यप०।

वलोचनादिवद् रामदुलालत्यक्तधने अधिकारी न भवति, सत्यां रत्नादेव्यां मृतस्य जयरामरायस्य हरिहररायपितुस्तद्धने स्वत्वाभावात्। हरिहररायस्य तु रामदुलालभ्रातृपौत्रत्वेन सत्सु भ्रातृपुत्रेषु भ्रातृपौत्रस्य हरिहररायस्य तद्धनाधिकाराभावाच्च (नाधिकारः) इति —

अत्र प्रमाणम्—

प्रथमद्वितीयप्रश्नोत्तरप्रमाणान्तर्गतप्रथमद्वितीयप्रमाणमेव। अत्र यद्यपि द्वितीयप्रश्ने कृष्णचन्द्रस्य रामदुलालरायदत्तकपुत्रत्वं लिखितं तथापि वंशावलीपत्रेण कृष्णचन्द्रस्य रामरामरायदत्तकपुत्रत्वं निश्चित्येयं व्यवस्था दत्ता। कृष्णचन्द्रस्य रामदुलालरायदत्तकपुत्रत्वं निश्चितं भवति चेत्तदा तन्निश्चयोत्तरं तदुत्तरं दास्यामीति—

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथ मिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल रजेष्टर साहेब श्रीयुत मेघनाटन साहेबके हजुर कलकत्तका काट आदालत आदालतीको हाकिमानके सवालके यवावमो कुरशोनामा। मै सवाल।

सवाल

३५—जिले कानपुर साकिनेर एक हिन्दु जमीदार तीन स्त्री राखितो। ओ ताहार एक स्त्रीर गर्भे एक पुत्र ओ द्वितीय स्त्रीर गर्भे ओ एक पुत्र एवं अन्य स्त्रीगर्भे पाँच पुत्र छिलो। ओ जमीदार मजकुर ओइ सात पुत्र वर्त्तमान राखिया लोकान्तर हय। जमीदार मजकुरेर पैतृक जमीदारी ओइ सात सन्तानेर मध्ये की प्रकार अंश हइवेक इति।

सवाल

यदि स्यात् जमीदार मजकुरेर सन्तान सकलइ तीन स्त्रीर मध्ये एकेर गर्भजात हइया सकलइ परलोक प्राप्त हय तबे ओइ स्त्रीर कोनो सन्तान ना थाकाते ताहारदिगेर पैतृक हिस्सा की रूप वण्टक हइवेक, एवं कोन कोन व्यक्तिके अर्शिवेक इति ।

जवावव्यवस्था

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यत्र कस्यचित् कानपुरप्रदेशीयस्य हिन्दुजातेर्भूस्वामिनस्तिसृणां स्त्रीणां मध्ये एकस्या गर्भे एकः पुत्रो द्वितीयस्या अपि गर्भे एकः पुत्र एवमन्यस्या गर्भे पञ्च पुत्राः स्थिताः; स भूस्वामी यत्र्परिलिखितसप्तपुत्रान् संरक्ष्य मृतः स्यात्तदा तद्भूस्वामिनः[1] पैतृकं सराजकरस्थावरं समं सप्तधा विभज्य सप्तपुत्राणां प्रत्येकमेकैकांशो भवतीति—

तत्र प्रमाणम्—

अत[2] ऊर्द्ध्वं पितुः पुत्रा विभजेयुर्धनं समम्—इति मिताक्षरा(पृ० ५७५, यास्मृ० २।११४)वीरमित्रोदयादिग्रन्थधृतनारदवचनम्[3](धको० पृ० ११५२)।

यत्र्परिलिखितभूस्वा(मि)नस्तिसृणां[4] स्त्रीणां मध्ये एकस्या गर्भजाताः सन्ततयः सर्व्वाः परलोकं गतास्तदा तस्या मृतसन्तानायाः कस्या-

---

१. तत्भू०—व्यप० ।

२ पितर्युर्द्ध्वं गते पुत्रा विभजेरन् धनं क्रमात्—नास्मृ० पृ०१७६ । पितर्युपरते पुत्रा विभजेयुर्धनं पितुः—नास्मृ सं० पृ० १४६ ।

३. वीरमित्रोदये वचनमिदं न दृष्टम् । तत्रैतदर्थकम् विभजेरन् सुताः पित्रोरूर्द्ध्वमृक्थमृणं समम्—इति (यास्मृ० २।११७) धृतम् ।

४. तिसृणाम्—व्यप० ।

(श्वि)द्वर्त्तमानसन्ततेरभावेन तासां सतीनां पैतृकधनांशस्यायं विभागप्रकारः—यद्युपरिलिखितप्रश्नलिखितसमसापत्नभ्रातृणां पैतृकं (धनं) सराजकरस्थावरमविभक्तं स्यात्तदा वर्त्तमाना ये सापत्नभ्रातरस्ते एव मृतानां सापत्नभ्रातृणां योऽशस्तस्य तत्पुत्रपौत्रप्रपौत्रसोदरभ्रातृपर्य्यन्ताभावे समानांशभागिनो भवन्ति। यदि च ते प्रथमं परस्परं विभक्ताः पुनर्विभक्तं धनं मिश्रीकृत्यैकत्रैकधर्म्मेण संसृष्टाः सन्तः केचन मृतास्तदा येन येन सह ते संसृष्टाः (सन्तस्ते) स्थितास्तेषामेव[2] तद्धनम्, न त्वसंसृष्टानां पुत्राद्यभावेऽपि भवति। एतत्पक्षद्वये मृतानां धनग्राहिण्यः सकाशात् तत्तत्पत्न्यः तत्तन्मातरो[3]वा यावज्जीवमन्नाच्छादनभागिन्यः[4]। यदि च तेषां तद्धनं विभक्तमथवोपरिलिखितरीत्या ते ससृष्टा न स्थितास्तदा तेषां पुत्रपौत्रप्रपौत्ररूपापत्यपत्नीदुहितृदौहित्रपर्य्यन्ताभावे तेषां माता तत्तदंशभागिनी भवति—इति कानपुरप्रदेशचालितमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि मिताक्षरादिग्रन्थ-(मिता० पृ० २१६)धृतयाज्ञवल्क्यवचनम् (२।१३५) ॥१॥

सोदराणामभावे भिन्नोदरा धनभाजः—इति मिताक्षरालिखनम् (पृ० २२२) ॥ २ ॥

संसृष्टिनस्तु संसृष्टी—इत्यादि तद्धृत(मिता० पृ० २२५)याज्ञवल्क्यवचनम् (२।१३८) ॥ ३ ॥

---

१. °णामंशो तत्तत्०—व्यप० ।

२ °मेवलतुद्धनं न तत् पुत्राद्यभावे भवति—व्यप० ।

३ °पत्नी माता वा—व्यप० ।

४. °भागिनी—व्यप० ।

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्-इतिमिताक्षरा-लिखनम् (मिता० पृ० २१७) ॥ ४ ॥

श्रीर्जयतितराम् श्रीहरिःशरणम्

श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मणा विद्यावागीशेन

एइ व्यवस्था दाखिल रजिष्टर साहेब श्रीयुत मेघनाटनसाहेबका हजुर कलकत्तेका सदर कामिसनरके श्रीयुत राससाहेब सदर देमानी आदालतीके पञ्चम हाकिमके सवालके यवाव ।

३६-श्रीयुत रेजष्टर मेघनाटन साहेबेर हैते सवाल-प्रसादसिंह नामे एक व्यक्ति राजपूतेर औरसे धानक जाति स्त्रीर गर्भे जन्मियाछे । इहाते यद्यपि ताहार पितार सहित ताहार मातार विवाह हइया ना थाके, खोरपोष पाओनेर योग्यता राखे कि ना-एइ सवालेर यवाव हिन्दुस्थानि पण्डित लिखिया दन इति ।

यवावव्यवस्था

यदि कश्चित् प्रसादसिंहो राजपुतबीजतो[1] धानकजातीयस्त्रीगर्भे उत्पन्न-स्तत्र यद्यपि तत्पित्रा सह तन्मातुर्विवाहो नाभूत् तथापि अन्नाच्छादनं प्राप्तुं[2] शक्नोतीति ।

श्रीर्जयतितराम

श्रीवैद्यनाथमिश्रेण

एइ व्यवस्था दाखिल रेजस्टर श्रीयुत मेकनटन साहेबेर हजुरे-

---

१. राजपूत बीजते-व्यप० ।

२. प्राप्त०-व्यप० ।

सओयाल

३७—यद्यपि त्रिहोत जिला निवासी कोन व्यक्तिर भ्रातुष्पुत्र थाके से व्यक्ति दौहित्रके कृत्रिम पुत्र करिते पारे कि ना ?

जवाब

तीरभुक्तिप्रदेशीयेन केनचिदनपत्येन तद्देशचलितकेशवमिश्रकृतद्वैतपरिशिष्ट-रुद्रधरोपाध्यायकृतशुद्धिविवेकादिग्रन्थविवेचनया मनुवचनानुसारेण तद्देशीयपूर्व्वापरव्यवहारानुसारेण च सत्यपि भ्रातृपुत्रे दौहित्रः कृत्रिमपुत्रः कर्त्तुं शक्यते इति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथशर्म्मण

एइ व्यवस्था दाखिल श्रीयुत रेजेष्टर मेकनटन साहेबेर हजुरे।

———

सओयाल

३८—एक विधवा स्त्रिलोक आपन पतिर अनुमतिते शास्त्रोक्त विधि मत एक बालकके दत्तक करिलेक। ए प्रकारे ऐ स्त्रीर जीवद्दशाते ताहार मृत पतिर धन पाओनेर सत्वाधिकारी ऐ दत्तक हय कि ना।

जवाब

प्रभुसमर्पितप्रश्नपत्रप्रतिरूपमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यद्येकया विधवया स्त्रिया पत्यनुमत्या शास्त्रोक्तविधिना एको बालको दत्तकः कृतः स्यात्तदा तस्यां स्त्रियां जीवन्त्यामपि तस्या मृतपतिधनप्राप्तेः

स्वत्वाधिकारी स एव दत्तकः पुत्रो भवति शास्त्रोक्तमुख्यगौणपुत्राणामेवं पौत्रप्रपौत्राणां वाभाव एव पत्न्यादीनामधिकाराभिधानात्—इति मिताक्षरादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

एवं मुख्यगौणपुत्राननुक्रम्यैतेषां दायग्रहणे क्रममाह—

पिण्डदोऽशहरश्चैषां पूर्वाभावे परः परः—(यास्मृ० २।१३२) इति—मिताक्षरालिखनम् (पृ० २१४) ॥ १ ॥

मुख्यगौणसुता दायं गृह्णन्ति-इति निरूपितम् । तेषामभावे सर्व्वेषां दायादक्रम उच्यते । पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—(यास्मृ० २।१३५) इत्यादि मिताक्षरादिग्रन्थलिखनम् (पृ० २१६) ॥२॥

श्रीदुर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रण

श्रीहरिःशरणम
श्रीरामतनुशर्म्मविद्यावागीशेन

एइ व्यवस्था दाखिल इङ्गरेजी मिशील

———

सओयाल

३९—ये मकद्दमाते ए सओयाल करा गियाछे-आजमिर देशेर सम्पर्कीय छिल । जिज्ञासा जाइतछे ये वङ्ग देश दायभाग मते दत्तक पुत्रेर सत्वे ए आज्ञा सिद्ध वटे, कि ना । यदि सिद्ध ना हय ताहार हेतु वचन प्रमाण सम्वलित निवेदन करेण इति । २६ शेतम्वर सन १८२६ इंरेजि ।

यथाव-व्यवस्था

वङ्गदेशचलितदायभागादिग्रन्थमते दत्तकपुत्रस्य स्वत्वे इयमेव व्यवस्था प्रमाणं भवतीति ।

श्रीर्जयतितराम्   **श्रीहरिः शरणम्**

श्रीवैद्यनाथमिश्रेण   **श्रीरामतनुशर्म्मविद्यावागीशेन**

———

४०—सदर देमानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेवेर हुजुर हइते ऐ आदालतेर पण्डितदिगेर नामे अप्राप्त-व्यवहार शिवनाथघोषेर पक्षे अछिवनवामवसुर[1] नामे भानुमतीदास्यार मकद्दमाते इङ्गरेजि १८२७ शालेर ७ फिवरओरि मासेर रोवकारिर लिखित परस्व दुइ प्रहर पर्य्यन्त जवाव दाखिल करणेर हुकुमे सओयालात, एइ ये—

प्रथम सओयाल—

वङ्ग देशनिवासी एक व्यक्ति हिन्दु आपन तालुक हइते आपन स्त्रीके किछु भूमि पृथक करिया दिया ओ स्त्रीके ताहार उपर दखिल कराइया ताहार कएक वत्सर परे ऐ स्त्रीके ओ ताहार गर्भज तिन पुत्र राखिया मरियाछे। पश्चात् ऐ तिन पुत्रेर मध्ये एक जन स्त्री राखिया मरियाछे। तत्परे प्रथम मृत व्यक्तिर स्त्री वाकी दुइ पुत्र राखिया मरियाछे। जिज्ञासा करा जाइतेछे ये ऐ भूमिते मृत पुत्रेर स्त्रीर पत्यंशेर दाओया अर्शें कि ना ?॥ १ ॥

द्वितीय सओयाल—

यद्यपि प्रथम मृत व्यक्तिर स्त्री ऐ पुत्रेर मृत्युर पूर्व्वे किम्वा ताहार पर ऐ सम्यक भूमिर हेवानामा वाकी दुइ पुत्रेर एक

[1] अश्विनरामवसु—इति साधीयान् पाठः ।

জনার পুত্রকে লিখিয়া দিয়া থাকে, ও গৃহীতাকে হেবার[1] ভূমিতে দখিল করাইয়া থাকে ; এ প্রকার হেবা সিদ্ধ ও দাত্রীর অন্য পুত্রদিগের স্বত্বনাশ বোধক বটে কি না ॥ ২ ॥

তৃতীয় সওয়াল—

যদ্যপি প্রথম মৃত ব্যক্তির ঐ ভূমি পৃথক করিয়া দেওন কাল পর্য্যন্ত কেবল ঐ তিন পুত্রের মধ্যে এক জন, অর্থাৎ গৃহীতার পিতা, জন্মিয়া থাকে; এ প্রকারে শাস্ত্রের আজ্ঞাতে উত্তরাধিকারিত্ব স্বত্ব ও হেবা সিদ্ধ .... তার বিষয়ে বিশেষ আছে কি না ? ॥ ৩ ॥

শ্রীর্জয়তিতরাম্

যথার্থ-ব্যবস্থা

এতদ্ধর্ম্মাধিকরণ দ্বিতীয়াধিপতিশ্রীযুতকুর্টনীইশ মিটসাহেবধর্ম্মাধিকরণলিখিতপ্রশ্নপ্রতিরূপপত্রমবলোক্য যাদৃশবোধো জাতস্তদনুসারেণোত্তরং লিখ্যতে—

প্রথমপ্রশ্নস্যোত্তরম্—

যত্র বঙ্গদেশীয়ঃ কশ্চন হিন্দুজাতীয়ো ব্যক্তিবিশেষঃ স্বকীয়সরাজকরস্থাবরাৎ স্বস্ত্রিয়ৈ কাঞ্চিদ্ভূমিং পৃথক্কৃত্য দত্ত্বা তদুপরি তস্যাশ্চ ভোগং কারয়িত্বা কতিপয়বৎসরানন্তরং তাং স্ত্রিয়ং তদ্গর্ভজাংস্ত্রীন্ পুত্রাংশ্চ সংরক্ষ্য মৃতঃ, পশ্চাত্তেষাং ত্রয়াণাং মধ্যে কশ্চিদেকঃ পুত্রঃ স্বস্ত্রিয়ং সংরক্ষ্য মৃতঃ,তদনন্তরং প্রথমমৃতব্যক্তেঃ স্ত্রী তদবশিষ্টৌ দ্বৌ পুত্রৌ সংরক্ষ্য মৃতা স্যাৎ তত্র তদ্ভূমৌ মাতরি জীবন্ত্যাং মৃতস্য পুত্রস্য স্ত্রী পত্যংশং[2] কল্পয়িত্বা প্রাপ্তুং[3] নার্হতি। মাতরি মৃতায়ামেব বিদ্যমানানাং পুত্রাণাং পুত্রত্বেন মাতৃধনে স্বত্বং তাদৃশ্যা

---

১ হেবার—ব্যপ।

২ পত্যংশং—ব্যপ০।

৩ প্রাপ্তং—ব্যপ০।

दायत्वं भवति, जीवन्त्याश्च मातरि मृतस्य मातृधने स्वत्वोत्पत्त्यभावेन दायत्वाभावात् तत्स्त्रियाः सुतरां तद्दानानधिकारित्वात् इति ।

अत्र प्रमाणम्—

पूर्व्वस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे[1] यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः—इति दायभागग्रन्थलिखितम् (पृ० ५) ॥ १ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि प्रथममृतव्यक्तेः स्त्री तत्पुत्रमरणात् पूर्व्वं तदनन्तरं वा तस्याः सर्व्वस्या एव भूमेर्दानपत्रमवशिष्टयोर्द्वयोः पुत्रयोर्मध्ये एकस्य पुत्रस्य लिखित्वा दत्त्वा ग्रहीतुर्दानकृतभूमौ भोगं कारितवती स्यात्तदैतादृशदानं सिद्धं भवितुम्, एवं दात्र्या अन्यपुत्रादीनामुत्तराधिकारित्वेन स्वत्वनाशबोधकञ्च भवितुं नार्हति, यतो भर्त्तृदत्तस्थावरात्मकसौदायिकस्त्रीधने स्त्रिया दानाद्यनधिकारस्य विशेषतो दायभागादिग्रन्थलिखितत्वेनापरिलिखितविवादास्पदीभूतधनस्य भर्त्तृदत्तस्थावरात्मकसौदायिकस्त्रीधनत्वमिति ।

अत्र प्रमाणम्—

ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा ।
भर्त्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्—इत्यादि दायभागादि(दाभा० पृ० ७६, ४।२२)ग्रन्थलिखितकात्यायनवचनम् (कास्मृ० ६०१) ॥ १ ॥

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि—इति तद्धृत(दाभा० पृ० ७६, ४।२२)कात्यायनवचनम् (कास्मृ० ६०५) ॥ २ ॥

स्थावरेऽपि भर्त्तृदत्तमात्रे स्त्रिया दानाद्यनधिकारः । यथाह नारदः—

---

१. तत्स्वाम्योपरमे—दाभा० ।

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत् ।

सा यथाकाममश्नीयाद् दद्यात् वा स्थावरादृते ॥—इत्यादि दायभागग्रन्थलिखनम् (पृ० ७६-७७, ४।२३, नास्मृ० पृ० ५६) ॥ २ ॥

तृतीयप्रश्नस्योत्तरम्—

यद्यपि प्रथममृतव्यक्तिकर्त्तृ[१]कतद्भूमिपृथक्करणदानकालपर्य्यन्तं तेषां त्रयाणां पुत्राणां मध्ये केवलमेक एव अर्थाद् ग्रहीतुः पितैवोत्पन्नोऽभूद्, एतस्मिन् प्रकारे सत्यपि शास्त्राज्ञायामुत्तराधिकारित्वेन स्वत्वविषये एवं दानसिद्ध्यसिद्धिविषये च विशेषो नास्ति—इति वङ्गदेशचलितदायभागादिग्रन्थानुसारिणी व्यवस्था ॥

श्रीर्जयतितराम् **श्रीहरिः शरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

४१—रोवकारि मिसिल आदालत देओयानी सदर इंगरेजि १८२७ शाल २४ माहे आपरेल मतालक (मताबक) वाङ्गला १२३४ शाल १२ माहे वैशाख रोज मङ्गलवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर बैठके ।

नवकिशोरदास सायेल

सायेलेर उकिल मुनसी गोलाम वतुल हाजीर हइल । सायेलेर सओयालेर लिखित निवेदनेर अनुमोदने ओ दस्तावेजातेर दृष्टे सायेलेर दखली स्थान हइते शरवराहकार महकुफी ओ अन्य २ विषय सम्वलित ए आदालतेर हुकुम सादर हओनेर

१. प्रथक—व्यप० ।

प्रार्थनाय ऐ सओयाल ओ जगन्नाथ चक्रवर्त्तिर नामिक मक्तार-नामा ओ ऐ उकिलेर नामिक ओकालतनामा ओ इंगरेजी १८२६ शालेर २० शेतम्बर मासेर हओया जिला मयमनसिंहेर आदालतेर रोवकारिर नकल ओ सन हालेर जनओरि मासेर २०।२७ तारिखेर लिखित जाहाङ्गीर[1]नगरेर कोट आपीलेर रोवकारिर नकल दुइ केता सम्वलित, जे हाल मासेर २१ तारिखे दाखिल हइयाछिल, अद्य पडा गेल। तदपरे सदासुखपण्डित उकिल सओयालेर शामिल दस्तावेजातेर दृष्टे सरवराहकार वहालीर प्रार्थनाय एक केता सओयाल रामशङ्करराय ओ शोनारामसरकारेर नामिक मक्तारनामा ओ आपन नामिक ओकालतनामा ओ वाङ्गला पाठ ओ अक्षर वाङ्गला १२३१ शालेर १३ पौष मासेर लिखित नवकिशोरदासेर लिखिया देया एक केता एकरारनामार नकल सम्वलित अप्राप्त-व्यवहार गोपीमोहनदासेर माता राजेश्वरिदासीर पक्ष हइते दाखिल करिलेक, दृष्टि आइल। ओ मुनशी हयदर आली उकिल हाजिर हइया रामकिशोररायेर तरफ हइते ताहार हिस्या क्रोक हइते खालाश पाओनेर मजमुने एलाका जाहाङ्गीरनगरेर कोटेर हाकिमदिगेर हुकुम वहालिर प्रार्थनाय अन्य विषय सम्वलित एक केता सओयाल मये रघुनाथरायेर नामिक मक्तारनामा ओ आपन नामेर ओकालतनामा दाखिल करिलेक, पडा गेल। तदपरे सायेलेर उकिलेर ६ थाने जिज्ञाशा गेल जे आट भ्रातार मध्ये चारि भ्राता जे आपन स्त्री राखिया निःसन्तान मरियाछे से चारि भ्रातार नाम कि छिल। जवाव दिलेक जे शिवमोहन ओ व्रजकिशोर ओ शोभाराम ओ कुञ्जकिशोर। ताहार मध्ये कुञ्जकिशोरेर स्त्री ओ शिवमोहनेर स्त्री मरियाछे, ओ शोभारामेर स्त्री ओ व्रजकिशोरेर स्त्री वर्त्तमान आछे। जाना गेल जे नवकिशोर

१. जाहाजाहाङ्गीर०—न्यप।

दासेर सओयाले लेखा आछे ये आमार भ्राता गौरकिशोरराय संसार त्याग हइया आपन अस्थावर वस्तु आपन स्त्री राजेश्वरी दास्याके ओ स्थावर वस्तु आमाके दिया वैराग्य धर्म्माश्रय करिया देशान्तर हइया बहु काल परे पुनराय आपन बाटीते आसियाछिल। तत्कालीन गोपीमोहनदास नामे एक पुत्र राजेश्वरीदास्यार गर्भे जन्मियाछे। किन्तु शास्त्रमते मसम्माव मजकुरार ओ ताहार पुत्रेर सत्व मिलकियते रहे नाइ इति। एमते हुकुम हइलो जे ए आदालतेर पण्डितदिगेर स्थाने दुइ सओयाल करा जाय। एक एइ ये यद्यपि ऐ नवकिशोरदासेर एजहार सत्य हय, मन्यत हओया जाय राजेश्वरीदास्यार ओ ताहार पुत्र गोपीमोहनदासके गौरकिशोरदासेर मिलकियत अर्शे कि ना?'

द्वितीय, एइ ये सहोदर आट भ्रातार मध्ये दुइ भ्रातार निःसन्तान दुइ स्त्री जे अद्यापि वर्त्तमान आछे ताहारदिगेर पतित्यक्त दुइ अष्टम अंशेर सत्वाधिकारिणी वटे कि ना। उचित[1] ये शनिवार पर्य्यन्त वङ्गदेशेर शास्त्रानुसारे एइ दुइ सओयालेर जवाब दाखिल करेण। पण्डितदिगेर व्यवस्था दृष्ट उचित[1] हुकुम देया जाइवेक।

जवाबव्यवस्था।

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेबधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

यद्यर्थिनवकिशोरदासोपस्थापितवृत्तान्तान्तर्गतनवकिशोरदाससम्प्रदानकगौरकिशोररायकर्त्तृकस्वस्वत्वास्पदीभूतस्थावरधनविषयकं स्वस्त्रीराजेश्वरी-

1. उचित्—व्यप०।

दासीसम्प्रदानकगौरकिशोररायकर्त्तृकततत्स्वत्वास्पदीभूत[1]स्थावरधनविषयकञ्च दानं सत्यत्वेन मन्यमानं सन्निरुपाधिकं स्यात्तदा राजेश्वरीदास्यास्तत्पुत्रस्य गोपीमोहनदासस्य[2] वा गौरकिशोररायकर्त्तृकनवकिशोरदाससम्प्रदान-कस्वस्वत्वास्पदीभूतधनान्तर्गतनिरुपाधिदानकृतस्थावरवस्तुषु[3] नाधिकारः। किन्तु पतिलिखितराजेश्वरीदासीसम्प्रदानकनिरुपाधिदानकृतास्थावरवस्तुषु राजेश्वरीदास्या भवत्येवाधिकारः, न तु तत्पुत्रस्य गोपीमोहनदासस्य। एवं यत्रथ्युपस्थापितगौरकिशोररायकर्त्तृकसंसारत्यागस्य वैराग्य-धर्म्माश्रयणवृत्तान्तस्य च सत्यत्वेन मन्यमानत्वेऽपि राजेश्वरीगर्भजातस्य गोपीमोहनदासस्य गौरकिशोररायौरसस्य तत्कृतोपरिलिखितदानविषयीभूत-स्थावरास्थावरातिरिक्ततत्स्वत्वास्पदीभूतस्थावरास्थावरवस्तुषु तत्स्वत्वो-परमेऽधिकारः। यदि च उपरिलिखितं दानं सोपाधिकं स्यात्तदा तदुपाधि-निश्चयं विना सोपाधिदानकृतस्थावरास्थावरवस्तुषु राजेश्वरीदास्यास्त-त्पुत्रस्य गोपीमोहनदासस्य वा अधिकारो भवति न वेति निश्चयो भवितुं न शक्नोति।

अत्र प्रमाणम्—

स्वभागान्[4] यदि दद्युस्ते विक्रीणीयुरथापि वा।
कुर्य्युर्यथेष्टं तत्सर्वमीशास्ते[5] स्वधनस्य वै[6]॥ इति दायभागादि-(दाभा० पृ० ३५, २३१)ग्रन्थधृतनारदवचनम् (नास्मृसं० पृ० १५७, १४।४२)॥ १॥

उत्पत्त्यैवार्थ[7]स्वामित्वं लभेत इति आचार्या इति गोतमवचनम्। (गौध० १०।४८)। *तदपि पितृस्वत्वोपरमेऽङ्गजत्वस्य[8] स्वामित्वहेतुत्वेनोत्प-त्तिमात्रसम्बन्धेनान्यसम्बन्धाधिकेन जनकधने पुत्राणां स्वामित्वात्तद्धनं[9]*

---

१. ०भूत०—व्यप०।
२. मोपी०—व्यप०।
३. ०दानं—व्यप०
४. स्वानंशान्—नास्मृसं।
५. सर्वमीशते—नास्मृसं०।
६. ते—नास्मृसं०।
७. ०र्थं स्वामित्वान्लभ०—व्यप०।
८. ०त्वाद्धनम्०—व्यप०।
९. ०जत्वहेतुत्वेनोत्पत्ति०—व्यप०।

पुत्रो लभेत, नान्यः सम्बन्धीत्याचार्या मन्यन्ते इत्यर्थकम्—इतिदायतत्त्व-लिखनम् (पृ० २) ॥

द्वितीयप्रश्नस्योत्तरम्—

अष्टानां सहोदरभ्रातॄणां मध्ये द्वयोर्भ्रात्रोरनपत्ये द्वे स्त्रियौ विद्यमाने स्याताम्, तयोः स्वस्वपतित्यक्ताष्टभ्रातृसाधारणं समुदायधनान्तर्गतस्वस्वपति-योग्यांशेऽधिकारः—इति वङ्गदेशचलितदायभागदायतत्त्वविवादभङ्गार्णव-विवादार्णवसेतुप्रभृतिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादि-(दाभा० पृ० १५१, ११।१।४)ग्रन्थधृतयाज्ञवल्क्यवचनम् (२, १३५) ॥ १ ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

४२—रोवकारि मिसिल आदालत नेजामत इङ्गरेजी १८२७ शाल तारिख १ मेइ मतावक १९ माह वैशाख सन १२३४ वाङ्गला रोज मङ्गलवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर बैठके—

शङ्करदास— शायेल ।

शायेल हाजिर हइलो। हाल सनेर २९ मार्च्च मासेर लिखित आजिमाबादेर कोर्ट सरकोटेर एक केता रिटरन ताहार सम्वलितेर रोवकारि ओ मकद्दमार कागजात समेत पहुछिया ए आदालते दाखिल हओया सओयाल आदि सहित अद्य पडागेल। हुकुम हइलो ये ए आदालतेर पण्डितदिगेर स्थाने सओयाल कराजाय ये यद्यपि मन्यत हओया जाय ये शङ्करदासपटन-

ओयार सायेल ४४ टाका नगद किम्वा ५० टाकार एक केता तमकसुक रामचरनपटनओयार स्थाने लिखाइया लइया आपन स्त्री मसम्मात रघुवंशीयाके ऐ रामचरण स्थाने समर्पन करिया थाके, ओ रामचरण ऐ स्त्रीके आपन स्त्रीत्व व्यवहारे आनियाथाके ओ स्वयं ऐ स्त्री आपन आशल पतिर दौरात्म्येर एजहारे रामचरणपटनओयारेर निकट थाकिते सम्मत थाके। ए प्रकारे शङ्करदास शायेलेर निमित्ते स्वामित्व स्वत्व वाकि रहियाछे कि ना। आर ऐ स्त्री ऐ रामचरणेर निकटे रहिवेक, किम्वा आशल पति तलव करण प्रकारे, सम्मत किम्वा असम्मत हय, पुनराय आशल पतिर निकट जाइवेक। उचित ये फोजदारिर कागजातेर मजमुन विवेचना करिया ए विषयेर जवाव पश्चिम देशेर शास्त्रानुसारे शनिवार पर्य्यन्त दाखिल करेन। तत्कालीन उचित हुकुम देया जाइवेक इति—

श्रीर्ज्जयतितराम्

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितफौजादारिसंज्ञकधर्म्माधिकरणीय[1]पत्राणि चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यर्थिशङ्करदासपटनओयारेण चतुश्चत्वारिंशद्राजतमुद्राः किं वा[2] पञ्चाशद्राजतमुद्राणामेकमृणलेख्यं[3] रामचरणपटनओयारसकाशाल्लेखयित्वा गृहीत्वा स्वस्त्री रघुवंशीयानाम्नी तद्रामचरणस्थाने समर्पितेति मन्यमानं स्याद्, एवं रामचरणपटनओयारो रघुवंशीयया सह स्वस्त्रीवद्

---

१ °करणीर—व्यप० ।

२ किम्वा—व्यप० ।

३ °कं ऋण०—व्यप० ।

व्यवहारं कृतवान् स्याद्, अथ च सा स्त्री स्वकीयपाणिग्राहकपतिदौरात्म्योपस्थापनेन रामचरणपटनओयारस्य सन्निधौ स्थातुं सम्मता स्यादेतादृशप्रकारे सत्यप्यर्थिनः शङ्करदासस्य पतित्वप्रयुक्तस्वत्वमस्त्येव; एवं सा स्त्री स्वपतिकृताह्वाने[1] सति तत्सन्निधौ स्थातुमसम्मता सम्मता वा पुनः स्वकीयपाणिग्राहकपतिसन्निधौ गन्तुं योग्या भवति, यतः प्रभुसमर्पितफौजदारीसंज्ञकधर्म्माधिकरणीयपत्रजातविवेचनया अर्थिशङ्करदासकर्तृकस्वस्त्रीविक्र-(य)स्य दानस्य वानवगमात्, प्रत्युत रक्तगोपालनामकसाक्ष्युपस्थापितवृत्तान्तेनोपरिलिखितऋणलेख्यञ्च[2] अर्थिशङ्करदासकर्तृकस्वीकाराभावावगमात् ; एवं रघुवंशीयोपस्थापितवृत्तान्तेन तस्या रामचरणपटनओयारस्थानस्थितौ पतिदौरात्म्यमात्रस्यैव प्रयोजकत्वावगमात्,अथ च रामचरणपटनओयारोपस्थापितवृत्तान्तेन तस्याः पतिभगिनीपतित्वसम्बन्धेन तत्सन्निधानस्थित्यवगमाच्च। एवं रामचरणपटनओयारसंज्ञकप्रत्यर्थिनिर्द्दिष्टसाक्ष्युपस्थापितवृत्तान्तेनार्थिशङ्करदासकर्त्तृकरामचरणसकाशात् चतुश्चत्वारिंशद्राजतमुद्राग्रहणपूर्व्वकमेताश्चतुश्चत्वारिंशद्राजतमुद्रा मया गृहीता इयं रघुवंशीयानाम्नी स्त्री त्यक्तेत्यर्थकलेख्यदानं प्रतीयते। परन्तु तल्लेख्यस्य प्रभुसमर्पितपत्रेष्वदर्शनेन मुद्राग्रहणस्यापि सन्देहः। यद्यपि मुद्रा गृहीतास्तदा तत्पत्रजातनिविष्टऋणलेख्यस्य किमावश्यकत्वमिति। यदि च प्रत्यर्थिरामचरणनिर्द्दिष्टसाक्ष्युपस्थापितवृत्तान्तस्यैव सत्यत्वेन स्वीकारस्तथाप्येतादृशदारविक्रयस्य[3] शास्त्रानुसारेण व्यवहारानुसारेण च सिद्धिर्भवितुं नार्हति। अथ च यदि कश्चित् शास्त्रव्यवहारविरुद्धं कर्म्म करोति तं दण्डयित्वा राज्ञा तत्कार्य्यमवश्यं परावर्त्तनीयम्। तस्माद्रामचरणसकाशात् गृहीता रघुवंशीयानाम्नी स्त्री अर्थिना शङ्करदासेन स्वभर्त्रा यत्नतो भरणीया—इति पश्चिमदेशचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमयूखस्मृतिचन्द्रिकादिग्रन्थानुसारिणी व्यवस्था—

---

१ °ह्वाने०—व्यप०।

२ °लेख्यश्च—व्यप०।

३ °दरवि०—व्यप०।

अत्र प्रमाणम्—

निःक्षेपः पुत्रदाराश्च[1] सर्व्वस्वं चान्वये[2] सति ।

आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना ॥

अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम्—इति मिताक्षरा(पृ० २४४)वीरमित्रोदयस्मृतिचन्द्रिका(पृ० १६१)व्यवहारमयूखादिग्रन्थलिखित-नारदवचनम् (नामसं०, पृ० ८६ ५।४,५) । १ ।

गृह्णा[3]त्यदत्तं यो[4] मोहाद् यच्चा[5]देयं प्रयच्छ ते ।

दण्ड[6]नीयावुभावेतौ धर्म्मज्ञेन महीक्षिता—इति (मिता० पृ० २४६; २।१७६)वीरमित्रोदय(वीमि० पृ० ३६३)स्मृतिचन्द्रिकादिग्रन्थ-(स्मृच० पृ० १६४)धृतनारदवचनम् (नामसं० पृ० ६१, ५।११; नास्मृपृ० १४०, ७।१२) । २ ।

अदत्तादेयग्रहणाद् गृहीतस्य परावर्त्तनमपि कार्य्यमिति गम्यते—इति वीरमित्रोदय(पृ० ३६४)ग्रन्थलिखनम्[7] ॥ ३ ॥

रक्षेत् कन्यां पिता विन्नां पतिः पुत्रास्तु[8] वार्द्धके ।

अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः ॥

इति मिताक्षरा(पृ० २५)वीरमित्रोदयादि(वीमि० पृ० १५०)-ग्रन्थलिखितयाज्ञवल्क्यवचनम् (१,८५) ४ ।

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।

रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥

इति मिताक्षरादि[9]ग्रन्थधृतमनुवचनञ्चेति (मस्मृ० पृ० ३४६) ५ ।

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

---

१ निक्षेपं पुत्रदारं च—नास्मृ सं० । २ सर्व्वस्व चान्व०—व्यप० ।

३ गृह्णत्य०—व्यप० । ४ लोभाद्—मिता० ।

५ ०यंचा—नास्मृ० सं०, यच्चादेय०—व्यप० ।

६ अदेयदायको दण्ड्यस्तथादत्तप्रतीक्षकः—नास्मृ०, तथादेयस्य दायकः—नमस० ।

७ गृहीतस्यपरावर्तनमपि महीक्षिता कार्यम्—स्मतिचन्द्रिकायाम् ।

८ पुत्राश्च— ।४ स्मृ० ।

९ मिताक्षरायान्तु-क्वचिदपि स्त्रीणां नैव स्वातन्त्र्यम्—इति लभ्यते ।

४३—आदालत आपिल एलाके अजिमावाद—

शदर देओयानी आदालतेर पण्डितदिगेर स्थाने सओयाल-जवाव—यद्यपि एक व्यक्ति गयाओयाल ब्राह्मण आपन सहोदरा भगीनि ओ ताहार पतिर नामे वाटीर दानपत्र, ये ताहार नकल पाठान याइतेछे, एइ प्रकार करियाथाके ये आपन जीवदशा पर्य्यन्त ऐ वाटीते थाकिया आमार मृत्युर परे उहारा आमार क्रिया कर्म्म करिवेक, ओ सहोदरा भगिनी, ओ ताहार पति दातार पूर्व्व मरियाछे, ओ ताहार परे दाता मरियाछे, ए प्रकारे शास्त्रानुसारे ऐ जायगा सहोदरा भगिनी ओ ताहार पतिर उत्तराधिकारिदिगेके अर्शीवेक, किम्वा दातार उत्तराधिकारि दिगेके इति। शन १८२७ इङ्गरेजि तारिख ५ माहे मार्च्च मतावक २२ माहे फाल्गुण सन १२३४ फशली लेखा गेल—

रोवकारि मिशील आदालते दे(ओ)यानी सदर इंरेजी सन १८२७ साल तारिख १५ मेइ मतावक—

लच्छिराम— आपीलाण्ट—
मशर्म्मात आनन्दिवाइ— रष्पाडण्ट—

शन हालेर ५ मार्च्च मासेर लिखित अजिमावादेर प्रवनशान कोटेर एक केता सार्टपिकिट ताहार सामिलेर रोवकारि आदि सहित पहुछिया अद्य दृष्टि आइल। हुकुम हइल ये पण्डितदिगेर स्थाने जवाव शनिवार पर्य्यन्त दाखिल कराइया दृष्टि करा जावे इति।

इंरेजी शन १८२७ शालेर २६ मेइ व्यवस्था दाखिल हइया पाटन पाठानेर हुकुम सारद हइल—

श्रीजयतितराम्

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितसप्तविंशत्यधिकाष्टादशशताब्दीयमेइमासीयपञ्चदशदिवसीयविचार-

पत्रलिखिताज्ञानुसारेण तत्समर्पितपाटलिपुत्राख्यनगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणीयविचारपत्रादिनिविष्टप्रश्नपत्रमेवं दानपत्रप्रतिरूपपत्रञ्चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

यद्येकः कश्चिद् गयावालब्राह्मणः स्वकीयसहोदरभगिनीनामकमेवं तत्पतिनामकञ्च वाट्या दानपत्रमेतत्प्रकारेण लिखितवान्[1]—स्वजीवनपर्य्यन्तं तस्यां वाट्यामहं स्थास्यामि[2]; अस्मन्निधनानन्तरं तावस्मत्क्रियाः करिष्यतः,एवं दातरि विद्यमाने सति तौ जायापती मृतौ स्यातामेवं तदनन्तरं दाता मृतश्चेत् एतत्प्रकारे सति उपरिलिखितदानपत्रलिखितरीत्या शास्त्रानुसारेण सा वाटी दातुः सहोदरभगिन्यास्तत्पत्युश्चोत्तराधिकारिणामेव भवति, न तु दातुरुत्तराधिकारिणाम्; यतो दानपत्रे श्रीविष्णुपदे सहोदरभगिनीतत्पत्युभयसम्प्रदानकं कुशोदकग्रहणपूर्व्वकसङ्कल्पकरणपूर्व्वकवाट्यादिसर्व्वस्वत्यागात्मकधर्म्मार्थदानं मया कृतमिति दात्रा लिखितम्। एतादृशवैधदानेन तदनन्तरकाल एव दातुः स्वत्वनिवृत्तिः, ग्रहीतुः स्वत्वोत्पत्तिश्च भवति। एवं दात्रा सम्प्रदानभूतयोस्तयोर्जायापत्योः ससन्तानयोः स्वायत्तीभूतग्रहादिनिष्ठायत्तत्वसम्पादनमपि कृतमित्यपि लिखितम्। अथ च दानादिना बद्धे[3] तद्गृहे तौ सम्प्रदानभूतौ जायापती दानपत्रानुसारेण तिष्ठतामायत्तत्वञ्च कुरुताम्, अस्मत्स्वत्वमद्यावधि किञ्चिदपि नास्तीतिदानपत्रलिखनेन दातुः स्वत्वविनाशस्य सम्प्रदानभूतयोस्तयोः स्वत्वस्य च दृढीभूतत्वेनावगमात्। अतएव दानकृतवाट्यां यावज्जीवं दातुः स्थितेः सम्प्रदानकर्तृकदातुः श्राद्धाद्यौर्द्ध्वदेहिकक्रियाकरणभावस्य च सम्प्रदानस्वत्वोत्पत्तिप्रतिब(न्ध)कोपाधित्वं न सम्भवति, उपरिलिखितप्रकारैर्दानस्य वैधत्वेन धर्म्मप्रयोजनकत्वेन भोगद्वारा पूर्णतया सम्पन्नत्वेन च सोपाधित्वाभावात्—इति पाटलिपुत्रप्रदेशप्रचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमयूखादिग्रन्थानुसारिणी व्यवस्था—

---

१. लिखिनवान—व्यप० ।
२. °स्याम्यस्मनिध°—व्यप० ।
३. वध्ये—व्यप० ।

अत्र प्रमाणम्—

देशे काल[1]उपायेन द्रव्यं श्रद्धासमन्वितम् ।

पात्रे प्रदीयते यत्तत् सकलं धर्म्मलक्षणम् —इति मिताक्षरादिग्रन्थ-(मिताप्टृ० ३)धृतयाज्ञवल्क्यवचनम् (१।६)॥ १ ॥

प्रदीयते यथा न प्रत्यावर्त्तते तथा परस्वत्वावसानं त्यज्यते ।

एतद्धर्म्मस्योत्पादकम्—इति मिताक्षरालिखनम् (पृ० ३) ॥ २ ॥

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् (५।१५२) ॥ ३ ॥

स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु (गौध० १०।३८) ।

ब्राह्मणस्याधिकं लब्धम्—(गौध० १०।३६) ।

क्षत्रियस्य विजितम् (गौध० १०।४०) ।

निर्व्विष्टं वैश्यशूद्रयोः (गौध० १०।४१) इति मिताक्षरा (पृ० १३५) वीरमित्रोदयव्यवहारमयूखा(व्यम०८६ उत्त०)दिग्रन्थधृतगौतमवचनम् ॥४॥

तत्र च हिरण्यवस्त्रादावुदकदानानन्तरमेवोपादानादिसम्भवात्—इत्यादिमिताक्षरालिखनम् (पृ० १४१) ॥ ५ ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

४४—रोवकारि मिसिल आदालत देओयानि सदर इङ्गरेजि १८२७ शाल तारिख १४ माहे जुन मतावक वाङ्गला १२३४ शाल १ आषाढ रोज वृहस्पतिवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेवेर वैठके—

राममोहनघोष वनामे रामधनराय ···ओगयरह ···· शायेलेर उकिल मुनशी गोलाम वतुल हाजिर हइल । सन हालेर ३१ मेइ मासेर हओया रोवकारिर लिखित पञ्चम हाकिमेर हुकुमानुसारे खास आपीलेर सओयाल ओ गयरह तत्सम्पर्कीय

---

१ काले—व्यप० ।

कागजात आमार बैठके उपस्थित हइया दृष्टे आइल। उभयेर एक वारे जाना जाइतेछे ये विरोधि लाट अर्थात् लाट परला वर्द्धमानेर काछारि मोकामे रासयात्रा दिवस निलाम हइया छे। मुद्दैदिगेर एजहार एइ रूप जाना याइतेछे ये आमरा रासयात्रार दिवस वाकि टाका जमिदारेर आमलाल निकट नियाछिलाम, जमिदारेर आमला रासयात्रार दिवस हओनेर ओजरे से दिवस वाकीर टाका लओनेर स्वीकार ना करिया जवाव दिलेक ये कल्य आइस, लओया जाइवेक, ओ आमरा गेले परे यात्रार दिवस हओनेओ महालेर द्वितीय वन्दवस्त करिलेक, आर इङ्गरेजि ८१९ शालेर अष्टम आइनेर द्वादश धाराते हुकुम आछे-निलाम, अर्थात् द्वितीय वन्दवस्त, ये एइ आएन निर्द्दिष्ट हओयार पूर्व्वे हइया थाके. तत्सम्पर्केओ ऐ डाँडा ये ऐ आइनेर एकादश धाराते लेखाआछे. निलाम-अर्थात् द्वितीय वन्दवस्त, पूर्व्व प्रसिद्ध ओ विना शठताय ओ देश व्यवस्थार मत हओन नियमेओ वर्त्तिवेक। यथा सन्देह हइतेछे ये शास्त्रानुसारे एइ प्रकार कार्य रासयात्रार दिवस सिद्ध ना हय, विशेषतो रासयात्रार दिवस कहिया वाकीर टाका लओने अस्वीकार हइया, आगत कल्य ताहा लओनेर करार करिया, वाकिदारदिगेक् विदाय दिया. परे सेइ दिवस रासयात्रार दिवस हओनेओ वाकि दाविर हेतुते महालेर द्वितीय वन्दवस्त ये वाकिदारदिगेर असाक्षाते करायाय सिद्ध रहिवेक ना। एइ प्रयुक्त ए विषये वङ्गदेशेर शास्त्रेर जिज्ञासा करण आवश्यक हइलो। ए कारण हुकुम हइलो ये आदालतेर पण्डितेरा वङ्गदेशेर शास्त्रानुसारे परस्व दुइ प्रहर पर्य्यन्त ए विषयेर जवाव लिखिया गुजराएन ये मुद्दैदिगेर एजहार सत्य ओ रासयात्रार दिवस निलाम हओन सत्वेओ ए प्रकार कार्य्य यथार्थ ओ सिद्ध हइते पारे कि ना, ओ पण्डितदिगेर जवाव दाखिल हइले परे उचित हुकुम देओया जाइवेक इति।

श्रीर्ज्जयतितराम्

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यर्थिवृत्तान्तस्य सत्यत्वं स्यात्तदैतादृशकार्य्यस्य छलकृतत्वेन, अथ चार्थिनोऽवशिष्टकरदानानुकूलव्यापारे सत्यपि सराजकरभूस्वाम्यधिकृतैस्तत्करमगृहीत्वा करदानानुरूपोपाधिसम्बन्धेन[1] भूस्वामिकृतदाननिमित्तमर्थिनां भोगोपयुक्तं स्वत्वं यत्र तस्य प्रयासान्तरकरणेन निष्पन्नत्वाच्च सिद्धिर्भवितुं[2] नार्हति; यतः सराजकरभूस्वामिसकाशात् करदानरूपोपाधिसम्बन्धेन[3] तत्कृतदानात् प्रजादीनां भोगोपयुक्तं स्वत्वमुत्पद्यते। तत्स्वत्वञ्च करदानरूपोपाधिसम्बन्धेन[4] तिष्ठति, तदभावे गच्छति। प्रकृते त्वर्थ्युपस्थापितवृत्तान्तेन अर्थिकर्तृककरदानाभावानवगमात् सुतरां करदानरूपोपाधिसम्बन्धेन भूस्वामिनो दाननिमित्तमर्थिनां भोगोपयुक्तं स्वत्वं गन्तुं न शक्नोति। अथ च भाषायां निलामशब्दवाच्यस्य द्वितीयवन्दवस्तशब्देन प्रसिद्धस्य द्वितीयप्रयासस्य रासयात्रादिवसीयत्वेन[5] सिद्धिर्भवति न वेत्यस्येदानीं वङ्गदेशचलितग्रन्थेष्वलिखनात्—इति वङ्गदेशप्रचलितमनुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यत्र वाप्युपाधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्[6]॥

—इति मनुवचनम् (८।१६५)॥ १॥

---

१. सम्बन्देन—व्यप०। २. सिद्धि०—व्यप०।
३. म्धन्देन—व्यप० ४. ०न तिति०—व्यप०।
५. दियशीयत्वेन—व्यप०। ६. निविवर्त्तयेत—व्यप०।

ताभिश्च वर्षो(प)युक्तकरदानेन वर्षोपयुक्तस्वत्वमर्ज्यते। तद्वर्षे च राज्ञा तद्भूमेरन्यत्र दानविक्रयणादिकरणं न सिद्ध्यति। यदि तु प्रतिवर्षं मुज्यतां त्वया-इत्यादि प्रतिज्ञाभवत्तदा तु यावद्वर्षेष्वेव स्वत्वानुमतेः कदापि दानविक्रयादिकं न कर्त्तव्यम्। यदि तु प्रजा करं न ददाति तदा सोपाधिदानमुपाध्यसिद्धावसिद्धमिति अन्यत्र दातुं शक्नोतीति—इति विवादभङ्गार्णवलिखिनम् (१ विवाभ० पृ०३०८ क. ख) ॥ २ ॥

करदानरूपोपाधिसम्बन्धेन राज्ञो दाननिमित्तमेव प्रजानां स्वामित्वं[1] *जायते। अन्यत्र गमने च करदानाभावे उपाध्यसिद्ध्या दानासिद्धिः। न च राजसम्बन्धतुल्यसम्बन्धापत्तिरिति वाच्यम्, राज्ञस्तथाविधेच्छाभावात्। तथाहि-एतस्यां मम भूमौ मत्स्वत्वे विद्यमान एव निकृष्टं भोगोपयुक्तं तव स्वत्वं भवतु-इति राज्ञस्तुष्टथा तादृशमेव स्वत्वं जायते-इति* (१ विवाभ० पृ० ३१० क) विवादभङ्गार्णवलिखनञ्चेति ॥ ३ ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

४५—सदर देओयानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर हजुर हइते आदालत मजकुरार पण्डितदिगेर नामे इङ्गरेजी १८२७ शालेर ३ जुलाइ मासेर रोवकारि लिखित छन्दासिंह आपिलाण्ट मशम्मात दुर्गाकुमार रष्पाडण्टेर मकद्दमाते वृहष्पतिवार दिवा दुइ प्रहरेर मध्ये वचन ओ ग्रन्थेर वेओरा सम्वलित जवाव दाखिल करणेर हुकुमे सओयालसकल, ये एइ—

प्रथम सओयाल—

पाटना सहर निवासी एक व्यक्ति हिन्दु आपन तिन स्त्री ओ चारि कन्या थाकिते आपन धन आपन तिन स्त्रीर मध्ये एक

---

१. सामित्वं—व्यप०।

स्त्रीर भ्राताके ओ तिन स्त्रीर मध्ये द्वितीय स्त्रीर गर्भज कन्यार पतिके फशली १२१६ शालेर ४ माघ तारिखे लिखिया दिया फशलि १२१९ शालेर २ वैशाख तारिखे ऐ तिन स्त्री ओ चारि कन्याके राखिया मरियाछे। तद्देशेर शास्त्रानुसारे हेवानामा सिद्धि हइते पारे कि ना इति।

द्वितीय सओयाल—

ऐ व्यक्ति ओ ताहार तिन स्त्रीर मध्ये दुइ स्त्री मरणेर परे तृतीय स्त्रीर तिन कन्यार मध्ये[1] एक कन्या आपन दुइ भगिनीर विन सराकते, आपन मातार विद्यमाने, आपन[2] भ्रातार पत्नी-दिगेर मध्ये एक जन निःसन्तान मरण हेतुते ऐ दाता व्यक्तिर त्यक्त धनेर अर्द्धकेर दाओया करिलेक। ऐ दान मिथ्या हओन प्रकारे मृत कर्त्ता व्यक्तिर कन्यार पक्ष हइते ए प्रकार दाओया, ये मुद्दइयार मातार सम्मति क्रमे हइयाछे, सिद्ध हइते पारे कि ना इति।

तृतीय सओयाल—

ऐ दानेर सिद्धताते मुद्दाइयार माता प्रभृति ऐ मृत व्यक्तिर स्त्रीरदिगेर एक वार यद्यपि ऐ कन्यार दाओयार पूर्व्व संघटन हइयाथाके कन्यार दाओयार निषेधि वोधक वटे कि ना इति।

श्रीर्ज्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

१. मध्ये मध्ये०—व्यप०।

२. आपन मातार पत्नी०—व्यप०।

यद्येकः कश्चित् पाटलिपुत्राख्यनगरनिवासी हिन्दुजातीयो व्यक्तिविशेषः स्वकीयानां तिसृणां स्त्रीणामेवं चतसृणां कन्यकानां विद्यमानानां मध्ये तिसृणां स्त्रीणां मध्ये एकस्याः स्त्रिया भ्रात्रे द्वितीयस्याः कस्याश्चिज्जामात्रे स्वस्वत्वास्पदीभूतधनस्य[१] दानपत्रं लिखित्वा दत्त्वोपरिलिखितास्तिस्रः[२] स्त्रियश्चतस्रः कन्यकाश्च संरक्ष्य मृतश्चेत्तदा तद्दानपत्रं यदि तिसृणां स्त्री(णा)मन्नाच्छादनोपयुक्तं द्रव्यमेवं चतसृणां कन्यकानां मध्ये या न विवाहितास्तासां विवाहकालपर्य्यन्तमन्नाच्छादनोपयुक्तं द्रव्यमथ च विवाहोपयुक्तं द्रव्यं विनाऽवशिष्टधनस्य चेत्तदा तद्दानपत्रलिखितदत्तधनस्य दानमेतत्प्रकाराभावे चोपरिलिखितान्नाच्छादनाद्युपयुक्तद्रव्यं विनाऽवशिष्टधनस्य दानञ्च सिद्धं भवितुं शक्नोतीति—

अत्र प्रमाणम्—

स्वं कुटुम्बाविरोधेन[३] *देयम्*—इत्यादि मिताक्षरा(पृ० २४४)वीरमित्रोदय(पृ० ६५१)व्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थधृतयाज्ञवल्क्यवचनम् (२।७५)॥ १ ॥

स्वमात्मीयं कुटुम्बाविरोधेन (कुटुम्बानुपरोधेन) कुटुम्बभरणावशिष्टमिति यावत्तद्द्यात् तद्भरणस्यावश्यकत्वात् । तथा च[४] *मनुः*—*वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः (८।३५)*—इति मिताक्षराग्रन्थलिखनम् (पृ० २४४) ।

देयस्वरूपमाह नारदः[५] (नामसंपृ० ८६, ५।६)

द्रव्यं कुटुम्बभरणाद्[६] *यत्किञ्चिदतिरिच्यते ।*

तद्देयमुप[७]*हृत्यान्यद् ददद्दोषमवाप्नुयात्*[८]—इति ।

---

१. स्वत्वस्प०—व्यप० । २. ०तिस्रः स्त्रियाश्च०—व्यप० ।
३. कुटुम्बविरोधेन–व्यप० । ४. यथाह०—मिता० ।
५. स एव—व्यप० । ६. भरणात्०—व्यप० ।
७. उपहृत्यान्यान्नतदद्दो०–व्यप० । उपहृत्यान्यं०–स्मृच० ।
८. ददद्दागः समाप्नु०—नामस० ।

अन्यद्[1] *उपहृत्य भर्त्तव्यकुटुम्बमनवरुध्येत्यर्थः*[2]*। उपरोधश्च (निस्वतया)-भोजनाच्छादनादि*[3]*राहित्यनिबन्धनतोऽत्राभिमतो*[4]*, न ताम्बूलादिभोगसाधनवैकल्यनिबन्धनः*—इत्यादि (वीमि० पृ० ३६४)स्मृतिचन्द्रिका[5](पृ०१६०) ग्रन्थलिखनम्। ३।

कन्याभ्यश्च पितृद्रव्याद्देयं[6] *वैवाहिकं वसु*—इति स्मृतिचन्द्रिका-(पृ० १६०) ग्रन्थलिखितदेवलवचनम्। ४।

द्वितीयप्रश्नस्योत्तरम्—

तद्व्यक्तेस्तिसृणां तत्स्त्रीणां मध्ये द्वयोः स्त्रियोश्च मरणोत्तरं तृतीयस्याः स्त्रियाः कन्याः, आसां मध्ये एकस्याः कन्यकायाः स्वकीय भगिनीद्वय-साधारण्यं विना विद्यमानायां स्वमातरि सा परमातॄणां मध्ये एकस्याः निःसन्तानायाः मरणेन तस्या दातृव्यक्तेस्त्यक्तधनार्द्धप्राप्तिस्तद्दानस्य मिथ्यात्वप्रकारे सत्यपि तन्मातृसम्मत्यापि[7] सिद्धा भवितुं न शक्नोति, यतस्तस्याः पूर्व्वमधिकारिण्यां मातरि विद्यमानायां तस्याः स्वत्वमेव नोत्पद्यते इति—

अत्र प्रमाणम्—

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि—इत्यादि मिताक्षरादि(मिता०पृ०२१७)ग्रन्थधृतवृद्धविष्णुवचनम् (विस्मृ०१७।६-७)। १।

तृतीयप्रश्नस्योत्तरम्—

तद्दानं दातृव्यक्तेरुत्तराधिकारिणां स्वत्वोत्पत्तिप्रतिबन्धकं चेदर्थिन्या मातृप्रभृतीनामर्थान्मृतव्यक्तेः स्त्रीणां ततत्कन्याया धनप्राप्तीच्छाया[8] पूर्व्वकालीनस्य स्वीकारस्य तद्दानसाधकत्वेन निर्द्दिष्टस्य तत्कन्यायास्तद्धनप्राप्तिनिषेधकत्वं विना साधकत्वं नास्ति—इति पाटलिपुत्राख्य-

१. अन्यत्—स्मृच०। २. उपरुध्य०—स्मृच०।
३. ०दनाच्छादना०—स्मृच०। ४. अत्राभिमता०—स्मृच०।
५. वीरमित्रोदय०—व्यप०। ६. पितृद्रव्यं०—स्मृच०।
७. ०सम्मत्यपि—व्यप०। ८. ०च्छयाः—व्यप०।

नगरप्रभृतिचलितमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारकौस्तुभादि-ग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

(स्व)स्वत्वनिवृत्तिः परस्वत्वापादनञ्च दानम्—इति सुबोधिनीलिखनम्[१] (पृ० ७४१)

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

४६—रोवकारि मिसिल आदालत देओयानी सदर इंरेजि १८२७ शाल तारिख २२ माहे जुलाइ मतावक वाङ्गला १२३४ शाल २९ आषाढ रोज वृहस्पतिवार आदालत मजकुरार द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर बैठके।

छन्दासिंह आपिलाण्ट

मसम्मात दुर्गाकोङर रेष्पाडण्ट

ए आदालतेर पण्डितेरा हाल मासेर ३ तारिखेर हुकुमानुसारे व्यवस्था लम्बरे दाखिल करिलेन। आपिलण्टेर उकिल मुनशी महम्मद पनाह ओ लाला आउधलालेर हाजिरिते दृष्टे आइल। तत् परे मुनशी दादार वक्श ओ मौलवी गोलाम एजदानी उकिलेरा आपनादिगेर नामिक एक केता ओकालतनामा ओ ए आदालतेर नाएब तहविलदारेर दस्तखति आपनादिगेर मेहनतानार[२] वावत मवलग २६६॥।. आनार रशीद ओ हाल शनेर ९ जुन मासेर हओया आजिमावादेर कोटेर रोवकारिर नकल दुइ

---

१ मिताक्षरा इति—व्यप० । २ मेहनतानाव वावत०—व्यप० ।

टाका मूल्यकेह्र बण्ड[1] द्वाराय रष्पाडण्टेर पक्ष हइते लम्बरे दाखिल करिलेक, पडागेल। तत् परे रष्पाडण्टेर उकिलदिगेर स्थाने जिज्ञासा करागेल ये फयशला जारि महकुफिर वावत तोमादिगेर मञ्ओक्केलार ओजर कि। जवाव दिलेक ये आमारदिगेर मञ्ओकेलार ओजर एइ ये फयशला जारि हइयाछे, ओ मञ्ओकेलारा दखल पाइयाछे। हुकुम हइल ये ए आदालतेर पण्डितदिगेर स्थाने चतुर्थ शञोयाल करा जाय। से, एइ ये सहर पाटना निवासी एक व्यक्ति हिन्दु तिन स्त्री राखिया, ये ताहार मध्ये एक स्त्री निःसन्ताना, ओ एक स्त्रीर तिन कन्या, ओ एक स्त्रीर एक कन्या जन्मियाछे, मरियाछे। ओ ताहार परे जे स्त्री निःसन्ताना छिल मरियाछे। तद्देशशास्त्रानुसारे मृत स्त्रीर अंश कोन व्यक्तिके ओ ताहार दाओया करणेर क्षमता कोन व्यक्तिके अर्शे। उचित् ये एइ सञोयालेर उत्तर[2] परस्व दुइ प्रहर पर्य्यन्त ग्रन्थ ओ वचनेर वेओरा सम्वलित दाखिल करेण। ताहार परे उचित हुकुम देओया जाइवेक इति।

श्रीर्ज्जयतितराम्

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यद्येकः कश्चित् पाटलिपुत्राख्यनगरनिवासी हिन्दुजातीयो व्यक्तिविशेषस्तिस्रः स्त्रिय एवं तासां तिसृणां स्त्रीणा मध्ये एकस्या एकां कन्यामेकस्यास्तिस्रः कन्यका एकां निःसन्तानाञ्च[3] संरक्ष्य मृतः, तदनन्तरं निःसन्ताना स्त्री मृता चेत्तदा मृतायास्तस्या निःसन्तानायाः स्त्रियाः पतित्यक्तधनांशो

---

१. ०रण्ड—व्यप० । २. टद्वार—व्यप० ।

३. एका निःसन्तानाश्च—व्यप० ।

जीवन्तीनां तत्सपत्नीनामेव भवति, एवं तत्प्राप्तीच्छाकरणक्षमतापि तत्सपत्नीनामेव, यतोऽनपत्यपतिधनस्योत्तराधिकारित्वेन पत्नीसंक्रान्तत्वेऽपि तन्मरणोत्तरं तद्धनं तद्भर्त्तुरुत्तराधिकारिणामेव भवति। तत्र च भर्त्तुरुत्तराधिकारिणां मध्ये पुत्रपौत्रप्रपौत्राभावे पत्न्या एव प्राधान्यम्—इति पाटलिपुत्राख्यनगरप्रभृतिचलितमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः—इति वीरमित्रोदयादि-(वीमि० पृ० ६२७)ग्रन्थधृतकात्यायनवचनम् (कास्मृ० ६२१) ॥१॥

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि—इत्यादि मिताक्षरादिग्रन्थधृत मिता० पृ० २१७)बृहद्विष्णुवचनम् ॥ २ ॥

पत्नी दुहितरश्चैव—इत्यादि तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् (२।१३५) ॥ ३ ॥

श्रीर्जयतितराम्	**श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण	**श्रीरामतनुशर्म्मविद्यावागीशेन**

४७—सदर देवोयानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट शाहेबेर हुजुर हइते राय वंशीधर बनामे मनोहर लाल ओ गयरहेर मकद्दमाते इङ्गरेजी १८२७ शालेर २४ जुलाइ मासेर रोवकारिर लिखित परम्व दुइ प्रहर पर्य्यन्त वचन ओ ग्रन्थेर वेओरा सम्वलित जवाव दाखिल करणेर हुकुमे आदालत मजकुरारार पण्डितदिगेर नामे सओयाल सकल, एइ ये—

प्रथम सओयाल—

वेहार जिला निवासी एक व्यक्ति हिन्दु कायेत जाति पितृधन विभाग करणेर परे दुइ भ्रातष्पुत्र ओ चारि दौहित्र राखिया

मरियाछे। ऐ देशेर शास्त्रानुसारे ताहार त्यक्त धन ताहार भ्रातुष्पुत्रदिगके अर्शे कि ताहार दौहित्रदिगेके ?

द्वितीय सओयाल—

यद्यपि ऐ व्यक्ति पितृधन विना विभाग करणे मरितो ताहार त्यक्त धन कोन व्यक्तिके अर्शितो ?

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेबधर्म्माधिकरणलिखितप्रश्नपत्रिकापत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम् —

यदि वङ्गाख्यप्रदेशनिवासी कश्चिदेकः कायस्थजातिः पितृधनविभाग-करणानन्तरं द्वौ भ्रातृष्पुत्रौ चतुरो दौहित्रांश्च[1] संरद्य मृतः स्यात्तदा तत्-त्यक्तधने चतुर्णां दौहित्राणामधिकारो, यतो दौहित्रेषु विद्यमानेषु विभक्तधने भ्रातृपुत्राणां नाधिकार इति ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतः—इत्यादि मिताक्षरावीरमित्रोदयादि(वीमि० ६०२)ग्रन्थधृत-याज्ञवल्क्यवचनम् ॥ १ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि तद्व्यक्तिविशेषः पितृधनविभागमकृत्वा मृतस्तदा पितृधने तद्योग्यांशो भ्रातृपुत्रयोरेव भवति, न तु दौहित्राणां विभक्तधन एव पत्नीदुहितृ-दौहित्राणामधिकारस्य मिताक्षरादिग्रन्थलिखितत्वात्, अविभक्तधने तेषामधि-कारस्यालिखितत्वाच्च, वरं बालम्भट्टकृतमिताक्षराटीकायां[2] विभक्तधन एव दौहित्राधिकारस्याविभक्तधने तदधिकाराभावस्य च स्पष्टीकृतत्वाच्चेति[3]

---

१. दौहित्राश्च—व्यप० । २. बालमभट्ट०—व्यप० । ३. पष्टीकृ०—व्यप० ।

वेहाराख्यप्रदेशचलितमिताक्षरावीरमित्रोदयबालम्भट्टकृतमिताक्षराटीकादि-ग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

एवं दौहित्रभ्रातृसुतसमवाये मृतस्य विभक्तत्वे दौहित्रस्य बलवत्त्वस्य अंशहरणे सत्त्वेऽपि पिण्डादौ स एव बलवान्, अविभक्तत्वे तु पितुः[१] भ्रातृसुतानामेवांशहरत्वादपि—इति व्यवहाराध्यायस्य मिताक्षराटीकायां (पृ० २०) बालम्भट्टलिखनम् ॥ १ ॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

४८—सदर देओयानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेवेर हुजुर हइते ए आदालतेर पण्डितदिगेर नामे स्वयं ओ आपन अप्राप्त-व्यवहार भ्राता आनन्दीलालेर ओयाली रामधुमनलाल सायेलेर मकर्दमाते इङ्गरेजी १८२७ शालेर २९ आगष्ट मासेर रोवकारिर लिखित सायेलेर सओयाल ओ आजिमावादेर कोर्टेर फयशला ये ताहाते आदालतेर सओ-याल ओ तथाकार राधाकृष्णपण्डितेर जवाव लिखा आछे दृष्ट ओ सम्पूर्ण अनुमोदन परे वचन ओ ग्रन्थेर वेओराते परस्व पर्य्यन्त जवाव दाखिल करणेर हुकुमे सओयाल, एइ ये—

सओयाल—

राधाकृष्णपण्डितेर लिखिया देया आपिल आदालतेर सओ-यालेर जवाव मिताक्षरा पुथि मत प्रसिद्ध वटे कि ना, अर्थात् दुइ दाओयार मध्ये सायेलदिगेर मासी जितकोँरेर दाओया किम्वा सायेलदिगेर दाओया प्रसिद्ध वटे, अथवा दुइ दाओयाइ मिथ्या

---

१. पितुरिति पाठो नास्ति बालम्भट्टकृतटीकायाम् ।

ओ पण्डितेर जवाव प्रसिद्ध ।

राधाकृष्णपण्डितेर व्यवस्था, एइ ये—

पतिमरणानन्तरं तत्पत्नी तद्धनमु(पभु)ज्य दुहितृर्विहाय[1] मृता । तत्रैका दुहितृमती, द्वितीया पुत्रवती, द्वेऽपि विधवे, तृतीयास्ति[2] यौवना सभर्तृका अनपत्या । तर्हि तद्धने ताः समांशभागिन्यो भवितुमर्हन्ति, दौहित्रौ तु न तद्धनहारिणौ । *पत्नी दुहितरश्चैव*—इति मिताक्षराधृतयाज्ञवल्क्यवचनात् (२।१३५) ।

अङ्गादङ्गात् सम्भवति पुत्रवद् दुहिता नृणाम् ।

तस्मात् पितृधनं त्वन्यः कथं गृह्णाति मानवः—इति (मिता० पृ० २२१) बृहस्पतिवचनात्, *सदृशी सदृशेनोढा*—इति वचनाच्च ।

त्रिवेदिश्रीराधाकृष्णशर्म्मणाम् ।

श्रीर्ज्जयतितराम्

सदर देओयानी अदालतेर सओयालेर जवाव व्यवस्था—

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रं तत्समर्पितार्थिनिवेदनपत्रं चैवं पाटलिपुत्राख्यनगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणीयजयपत्रं तदन्तर्गततद्धर्म्माधिकरणीयप्रश्नमेवं राधाकृष्णाख्यपण्डितलिखिततत्प्रश्नोत्तरं चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

विवादास्पदीभूतं धनं यदि ज्ञानकोमराख्यायाः पतिमरणानन्तरं तदीयधनत्वेनोत्तराधिकारित्वेन तत्संक्रान्तं स्यात्, अथ च तिस्र एव दुहितरो निर्धनाः[3], सर्व्वा एव वा सधनास्तदा राधाकृष्णाख्यपण्डितलिखितकोर्टआपीलाख्यधर्म्माधिकरणप्रश्नोत्तरं मिताक्षराग्रन्थसम्मतं[4] भवति । यदि च तिसृणां दुहितृणां मध्ये एका निर्धना द्वे वा[5] निर्द्धने तदा तत्पण्डितस्योत्तरं

---

१. दुहितॄ०—व्यप० । २. तृतीया तृतीया०—व्यप० ।

३. निर्द्धना०—व्यप० । ४. सम्मं०—व्यप० ।

५. द्वेवा०—व्यप० ।

तद्ग्रन्थसम्मतं न भवति, मिताक्षरायां दुहितुः पितृधनाधिकारप्रकरणे अप्रतिष्ठितानामर्थान्निर्धनानां दुहितॄणामभाव एव प्रतिष्ठितानामर्थात् सधनानां दुहितॄणामधिकारविधानात्। एवं चैतत्पक्षे द्वयोर्द्धनप्राप्तीच्छयोर्मध्ये अर्थिनो मातृष्वसुर्जीतकोमराख्यायास्तत्समस्तधनप्राप्तीच्छा केवलं तस्या एव निर्धनत्वे, द्वयोर्निर्धनत्वे तद्धनार्द्धप्राप्तीच्छा, तिसृणां निर्धनत्वे तत्तृतीयांशप्राप्तीच्छैव तद्ग्रन्थसम्मता भवति। यदि च विवादास्पदीभूतं धनं ग्यानकोमराख्यायास्तदीयशुल्काभिन्नं स्त्रीधनं भवति, अथ च तिसृणां मध्ये पुत्रवत्याः सधनत्वे जीतकोमराख्यायास्तद्धनार्द्धप्राप्तीच्छा तद्ग्रन्थसम्मता भवति, मिताक्षरायां दुहितॄणां मातुस्तादृशस्त्रीधनाधिकारप्रकरणे प्रतिष्ठितानामर्थान्निर्द्धनानाम् अनपत्यानां वा दुहितॄणामभाव एव प्रतिष्ठितानामर्थात् सधनानां सापत्यानां वा दुहितॄणामधिकारविधानात्। एवं तिसृणां मध्ये द्वयोः पुत्रपौत्ररूपापत्यरहितत्वावगमात् पुत्रवत्या निर्द्धनत्वे, जीतकोमराख्यायास्तद्धनतृतीयांशप्राप्तीच्छैव तद्ग्रन्थसम्मता भवति, तत्प्रकरणे मिताक्षरायां निर्द्धनानपत्ययोर्द्विविधयोरेव दुहित्रोः प्रथममधिकारविधानात्। अर्थिनां तद्धनप्राप्तीच्छा चोपरिलिखितपक्षद्वय एव विद्यमानत्वात् तन्मातृप्रभृतिषु तद्ग्रन्थसम्मता न भवतीति।

अत्रप्रमाणम्—

पत्नी दुहितरश्चैव—इत्यादि मिताक्षराग्रन्थधृत(पृ० २१७)याज्ञवल्क्यवचनम् (२।१३५) ॥ १ ॥

अप्रतिष्ठिताप्रतिष्ठितानां समवाये अप्रतिष्ठितैव तदभावे प्रतिष्ठिता—इति दुहितुः पितृधनाधिकारप्रकरणे मिताक्षराग्रन्थलिखनम् (पृ० २२१) ॥ २ ॥

अप्रतिष्ठिता निर्द्धना अनपत्या वा—इति मिताक्षराग्रन्थलिखनम् (पृ० २२१, खपुस्तके) ॥ ३ ॥

प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता गृह्णाति, तदभावे प्रतिष्ठिता। यथा गौतमो मुनिः स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति। तत्र शब्दात् तत्र प्रत्तानां प्रतिष्ठितानाञ्च। अप्रतिष्ठिता निर्द्धना अनपत्या

त्रा । एतच्च शुल्कव्यतिरेकेण—इत्यादि दुहितॄणां मातुः स्त्रीधनाधिकार-प्रकरणे मिताक्षराग्रन्थलिखनं चेति (पृ० २२६) ॥ ४ ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

सओयाल—

४९—सदर देओयानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेवेर हुजुर[1] हइते ऐ आदालतेर पण्डितदिगेर नामे इङ्गरेजि १८२७ सालेर ११ शेतम्वर मासेर रोवकारि लिखित अभिमानवाय[2] सा(ए)लेर मकद्दमाते परस्व दुइ प्रहर पर्य्यन्त वारानश देशेर शास्त्रानुसारे वचन ओ ग्रन्थेर वेओरा सम्वलित जवाव दाखिल करणेर हुकुमे सओयाल, एइ ये—

हिन्दु चारि व्यक्ति टीका लइया आपनादिगेर मिलकियतेर मौजा एक व्यक्ति हिन्दुर निकट वन्धक राखिलेक। ताहार परे वन्धक दाता चारि जनेर मध्ये एक जन चाहिलेक ये ऐ[3] वन्धकेर वेवाक टाका दिया समस्त मौजार वन्धक छाडाय, ओ वन्धक ग्रहीता वाकि वन्धक दाता तिन जनेर असम्मति जानाइया एक जन वन्धक दातार स्थाने समुदाय वन्धकि टाका लओन ओ समस्त मौजार वन्धक हइते छाडन स्वीकार न करिया चहिलेक ये ऐ एक व्यक्ति वन्धक दातार स्थाने वन्धक वावद चतुर्थ अंश टाका लइया ताहार अंश परिमाण अर्थात् वन्धकि मौजार चतुर्थ अंश छाडिया दिया वाकि वारय आना मौजार उपर पूर्व्व मत वाकि तिन जन वन्धक दातार पक्ष हइते वन्धक

---

१. हुजुरा इते०—व्यप० २. अभिमानराय—इति साधीयान् पाठः।

३. ०येक वन्ध करे—व्यप०

छाडान पर्य्यन्त दाखिलकार थाके। अतएव जिज्ञासा जाइते छे। यद्यपि यथार्थइ बाकि तिन जन वन्धक दाता आपन २ हिस्यार वन्धक चतुर्थ वन्धक दातार पक्ष हइते छाडानेते सम्मत ना थाके, ताहारदिगेर असम्मति बाकी बारय आना हिस्यार वन्धक छाडानेते निषेधि वटे, किम्वा चतुर्थ वन्धक दाताके वर्त्तें ये निजे समस्त वन्धकि टाका आदाय करिया आपन हिस्यार उपर अधिकार प्रकारे ओ बाकि तिन जन वन्धक दातार हिस्यार उपर वन्धक ग्रहीता प्रकारे दखल पान इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरण-लिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते। प्रश्नार्थेन प्रश्नपत्रलिखिताशेष[1]शास्त्रोक्तचर्तुविधाध्यन्तर्गताकृतकालात्मक-भोग्याधित्वनिश्चयात्, तत्र यदि चतुर्भिर्हिन्दुजातीयैर्मुद्रा[2] गृहीत्वा स्वस्व-त्वास्पदीभूतग्राम एकस्य कस्यचित् हिन्दुजातीयस्य निकटे बन्धकीकृतः, तदनन्तरं बन्धकदातॄणां चतुर्णां मध्ये एकः कश्चिद् बन्धकग्रामस्य समस्तमुद्रा दत्त्वा सम्पूर्णग्रामो बन्धकात् मोक्तव्य इतीच्छति, तत्र यदि बन्धकीभूतग्रामश्चतुर्णां साधारणश्चेत्, तदा तदन्तर्गतत्रयाणां यथार्थभूता स्वस्वयोग्यांशमोचनासम्मतिः सुतरामवशिष्टद्वादशाणकपरिमितांशत्रयस्य[3] बन्धकमोचने प्रतिबन्धिका भवति। एवं चतुर्थबन्धकदातुरवशिष्टबन्धकदातॄणां त्रयाणां सम्मतिश्चेत् तदैव समस्तमुद्रा दत्त्वा स्वांशे स्वामित्वेनावशिष्टबन्धकदातॄणां त्रयाणामंशे बन्धकग्रहीतृत्वेना[4]यत्तत्वप्राप्तिर्भवितुमर्हति, यतः साधारणधने सर्व्वेषामंशिनामनुमतिं विना तन्मध्ये एकस्य कस्यचिद्दानाधमनविक्रयक्षमता नास्तीति। अतः सुतरां साधारणधनाधिमोचनाक्षमताप्यर्थसिद्धैव। यदि च बन्धकभूतग्रामे तेषामंशनिर्णयश्चेत्तदा बन्धकदात्रन्तर्गतत्रयाणामनुमतिं विनापि-

१. ०ताषेशशा०—व्यप०।
२. चत्वारो हिन्दुजातीया—व्यप०।
३. ०त्रयाणां०—व्यप०।
४. ०गृहीतृ०—व्यप०।

चतुर्थबन्धकदाता पृथङ्[1] निर्द्दिष्टस्वांशं बन्धकान्मोचयितुमर्हति—इति वाराणसीप्रचलितमिताक्षरादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

अविभक्तेषु द्रव्यस्य मध्यस्थत्वाद्[2] एकस्यानिश्चयत्वात् सर्व्वाभ्यनुज्ञावश्यं कार्य्या । विभक्तेषु (तूत्तरकालं विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञा, न पुनरेकस्यानीश्वरत्वेन । अतो) विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्ध्यत्येव इति व्याख्येयम्—इति मिताक्षरादिग्रन्थलिखनम् (मिता० पृ० २००) ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

५०—सदर देओयानी आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेबेर हुजुर हइते ऐ आदालतेर पण्डितदिगेर नामे इङ्गरेजि १८२७ सालेर ११ शेतम्बर मासेर रोवकारीर लिखित भवानीचरणदत्त सायेलेर मकद्दमाते निचेर लिखित दस्तावेजेर अनुमोदन पूर्व्वक परस्व दुइ प्रहर पर्य्यन्त वचन ओ ग्रन्थेर वेओरा सम्वलित जवाव दाखिल करणेर हुकुमे सओयालः—

एइ ये, सनातन हालदारेर स्त्री मुषम्मात जानकी, ये आपन पतिर मृत्यु परे वाङ्गला १२३२ सालेर २९ चैत्र मासेर हओया दस्तावेज भवानीचरणदत्तके लिखिया दियाछे, मुशम्मात मजकुरार पक्ष हइते ए प्रकार दस्तावेज लिखिया देओन वङ्गदेशेर शास्त्रानुसारे सिद्ध छिल कि ना; ओ दस्तावेज लिखार एक वतसर परे मुशम्मात मजकुरार मृत्यु हओन हेतुते ऐ दस्तावेज जे तत्सम्पर्के मशम्मात मजकुरार पतिर भ्रातारा ओ भ्रातुष्पुत्रेरा प्रतिवन्धक ओ स्वीकार आछे मिथ्या हय कि ना इति ।

---

१ पृथक—व्यप० । २. ०मध्यगत्वा०—व्यप० ।

श्रीर्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितवाङ्गलाख्यद्वात्रिंशदधिकद्वादशशताब्दीयोनत्रिंशद्दिवसीयचैत्रमासीयदस्तावेजसंज्ञकपत्रञ्चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

यदि सनातनहालदारस्त्रिया जानक्या पतिमरणानन्तरमुपरिलिखितदस्तावेजसंज्ञकपत्रं भवानीचरणदत्ताय लिखित्वा दत्तं तत्र तत्पत्रलिखितवृत्तान्तस्य सत्यत्वञ्चेत्तदैतादृशपत्रदानं वङ्गदेशचलितशास्त्रानुसारेण सिद्धमासीत्, यतोऽनपत्यपतिधनस्योत्तराधिकारित्वेन पत्नीसंक्रान्तत्वे पत्न्या वर्त्तनाद्यशक्तौ तदुपयुक्ततद्धनाधानविक्रयणं शास्त्रानुमतं भवति। वर्त्तनादिमूलीभूतस्य तद्धनरक्षणस्यावश्यकत्वेन[1] सुतरां तद्धनरक्षणार्थं तदुपयुक्तस्य तद्धनस्याधानविक्रयणं शास्त्रसम्मतं भवति। प्रकृते तूपरिलिखिततत्पत्रेण जानक्याः स्वामिमरणानन्तरं तत्पतिप्रत्यर्थिकतत्पतिभ्रात्रर्थिकतत्पत्रलिखितविवादद्वयनिष्पत्तेरुत्तराधिकारित्वेन केवलं तस्या एव कर्त्तव्यत्वेन तत्र तस्या अशक्तया उपरिलिखितदस्तावेजसंज्ञकपत्रलिखितधनदानात् तद्विवादनिष्पत्त्या अवश्यं तत्पतिकर्त्तव्यस्वधनरक्षणवत् तत्पत्रलिखितधनादवशिष्टसमुदायपतित्यक्तधनरक्षणार्थत्वात् तत्पत्रस्य इत्यवगमात्, एवं तत्पत्रलिखनादनन्तरमेकसंवत्सरानन्तरं जानक्या मरणेन तत्पत्रं तस्याः पत्युः[2] भ्रातृभिरेवं तत्पतिभ्रातुष्पुत्रैश्च प्रतिबन्धमस्वीकृतञ्च मिथ्या भवितुं नार्हति, यतस्तत्पत्रेण तल्लिखनसमये तत्पतिभ्रातृभिस्तत्पुत्रैर्व्वा उपरिलिखितविवादद्वयान्तर्गतैकस्मिन् विवादे विरोधित्वेन तया सह विवाद

---

१. रक्षणस्यावस्यावस्यक०—व्यप० ।

२ पतिः पतिः—व्यप० ।

कृत्वा तत्पत्रलिखनतस्तस्या निवारणं न कृतमित्यवगमाद्[1], इदानीं तस्या मरणेन तत्पत्रास्वीकारस्य तत्प्रतिबन्धस्य च अप्रयोजकत्वात्—इति वङ्गदेशचलितदायभागविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

अतएव वर्त्तनाशक्तावाधानमप्यनुमतम्। तत्राप्यशक्तौ विक्रयणमपि—इति दायभागलिखनम् (पृ० १७३, ११।१।६२) । १ ।

तथा च भर्त्ता जीवन् यथा यस्य पोषणादिकं यद्वा कर्म्म करोति मृतभर्तृकापि स्वशक्त्यनुसारेण तथैव तस्य पोषणं तच्च कर्म्म कुर्व्वीत—इति विवादभङ्गार्णव(२ विवाभ० पृ० ३१६ क)लिखनञ्चेति ॥ २ ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीहरिःशरणम्
श्रीरामतनुशर्म्मविद्यावागीशेन

५१—सदर देमानी आदालतेर पञ्चम हाकिम श्रीयुत आलक सुन्दर राश साहेबेर हुजुर हैते ऐ आदालतेर पण्डितदिगेर नामे इंराजि १८२७ सालेर ११ सेतम्बर मासेर रोवकारिर लिखित १८५७ लम्बरेर[2] वावत गणेश आर्पालाण्ट विनसिया[3] रष्पाडण्टेर मकद्दमाते वारानश देशेर चलित शास्त्र मते वृहस्पतिवार पर्य्यन्त जवाव दाखिल करणेर हुकुमे सओयाल सकल एइ ये—

प्रथम सओयाल—

वारानश साकिनेर कलुजाति एक स्त्रीलोकेर विवाह कोन व्यक्तिर सहित हइयाछिल, ओ ताहार स्वामि अनुद्देश हइल,

---

१. °गमात—व्यप० ।
२ लम्बवे वावात—व्यप० ।
३. विलसिया—इति साधीयान् पाठः ।

ओ ऐ स्त्रीलोक ताहार स्वामि अनुद्देश हओयार तेर वत्सरेर परे ताहार पतिर कनिष्ठ भ्रातार सहित शाङ्गा करिते पारे कि ना, ए प्रकार (शाङ्गा) शास्त्र अनुसारे सिद्ध हय कि ना।

द्वितीय सओयाल—

यद्यपि ए प्रकार शाङ्गा सिद्ध हय, ओ ऐ स्त्रीलोकेर द्वितीय पति ऐ स्त्रीलोक व्यक्ति ओ आपन पिता ओ तिन सहोदर भ्राताके राखिया मरियाछे, ओ समस्त धन साधारण कि असाधारण हय, ए दुइ प्रकार मृत व्यक्तिर अस्थावर त्यक्त धन कोन व्यक्ति-के (अर्शे) इति।

जवाव व्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिश्रीयुतआलकशरडरधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

शास्त्रे शाङ्गाइशब्दवाच्यकार्य्यस्य प्रस्तावो नास्ति। परन्तु यदि वाराणसीप्रदेशीयानां[1] तैलकारजातीयानां प्रश्नपत्रलिखितप्रकारकसगाइ-शब्दवाच्यस्य व्यवहारश्चेत् तदा प्रश्नपत्रलिखितशास्त्रालिखितप्रकारकं[2]-सागाइशब्दवाच्यं कार्य्यं[3] कर्त्तुं शक्नोति। एवमेतत्प्रकारकं सागाइशब्दवाच्यं तत्कार्य्यमुपरिलिखितव्यवहारसिद्धमिति चेत्तदा शास्त्रानुसारेणापि सिद्धं भवितुं शक्नोति, व्यवहारस्य शास्त्रानुसारेण बलवत्त्वादिति।

अत्र प्रमाणम्—

जातिजानपदान् धर्म्मान् श्रेणीधर्म्मांश्च धर्म्मवित्।
समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपालयेत्॥

इति—मनुवचनम् (८।४१)। १।

---

१ वारनसी०—व्यप०। ३. ०कार्य्यं—व्यप०।

२ शास्त्रप्रश्नलि०—व्यप०।

यस्मिन् देशे यदाचारो[1] व्यवहारः कुलस्थितिः ।
तथैव परिपाल्योऽसौ यदा वशमुपागतः ॥

—इति मिताक्षरादि(मिताप्ृ० १०५)ग्रन्थधृतयाज्ञवल्क्यवचनम् (१।३४३) । २ ।

स्पष्टशास्त्रानुपलम्भे तु देशव्यवहारानुरोध्येव[2] निर्णयः कार्य्यः ।
इत्यप्याह स एव ।

तस्मात् शास्त्रानुसारेण राजकार्य्याणि साधयेत्, वाक्याभावे तु सर्व्वेषां देशदृष्टमतं नयेत्—इति वीरमित्रोदयलिखनम् । ३ ।

द्वितीयप्रश्नस्योत्तरम्—

यदि प्रश्नपत्रलिखितसगाइशब्दवाच्यं कार्य्यं प्रथमप्रश्नोत्तरलिखित-व्यवहारानुसारेण सिद्धं चेदथ च तस्या एव स्त्रिया द्वितीयपतिस्तां स्त्रियमेवं स्वपितरं त्रीन् स्वसोदरभ्रातॄन्[3] च संरक्ष्य मृतः स्यादेवं तदीयसमस्तस्थावरधनं पित्रा भ्रातृभिश्च सह[4] साधारणं चेत्तदा तद्योग्यस्तदीयस्थावरधनांशः[5] भ्रातॄणां च भवति; यदि च केवलं पित्रा सह धनं[6] साधारणं चेत्तदा केवलं पितुरेव; यदि वा केवलं भ्रातृभिः सह साधारणं चेत्तदा केवलं भ्रातॄणामेव भवति; यद्यसाधारणं तद्धनं चेदथ च तद्देशीयानां तज्जातीयानां[7] यथा विवाहिता स्त्री असाधारणपतिधने अधिकारिणी भवति तथैव सगाइ-संज्ञककार्य्यकृत् स्त्र्यपि तद्धने अधिकारिणी भवतीतिव्यवहारश्चेत्तदा सा शास्त्रानुसारेणापि[8] तद्धनं प्राप्तुं शक्नोति । एवं व्यवहारो न चेत्तदा धनस्यासाधारणत्वपक्षे तत्पितुरेव(तद्धनम्)–इति वाराणसी[9]प्रचलितमनु-मिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था ।

---

१. य आ०—यास्मृ० ।
२. °रोध्येरनि०—व्यप०
३. सोदर भ्रातुः स्वसंरक्ष्य—व्यप० ।
४. °भिःस्वसह—व्यप० ।
५. धनांश—व्यप० ।
६. धनं सह साधा०—व्यप० ।
७. तज्जातीयानां—व्यप० ।
८. शास्त्रं प्राप्तं शक्नोति—व्यप० ।
९. वाराणशी—व्यप० ।

अत्र प्रमाणम्—

तदुपरिलिखितमेव । १ ।

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि मिताक्षरादि(मिता० पृ० २१६)ग्रन्थधृतयाज्ञवल्क्यवचनञ्चेति (२।१३५) । २ ।

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

———

नं० १८६७

५२—रोवकारि मिसिल आदालते देओयानी सदर इङ्गरेजी १८२७ साल तारिख १५ माह सेतम्वर मोतावक वाङ्गला १२३४ साल रोज शनिवार आदालत मजकुरार पञ्चम हाकिम श्रीयुत आलक सुन्दर राश साहेवेर वैठके—

गणेश आपीलाण्ट

मुशान्मति वेलसिया रेष्पाडण्ट

एइ मासेर ११ तारिखेर हुकुमानुसारे ए आदालतेर पण्डितगण लम्वरे व्यवस्था दाखिले करिलेर दृष्टे आसिया द्वितीय सओयाल उचित हइल । अतएव हुकुम हइल ये ए रोवकारिर नकल एइ हुकुमे पण्डितगणके समर्पण करा जाय ये नीचेर लिखित सओयालेर जवाव तातिलेर परे दाखिल करेन ।

सओयाल—यद्यपि एइ मत सङ्गाइ वारानश देशे सिद्ध हय आर ऐ दाखिल करा व्यवस्थार लिखित द्वितीय सओयालेर जवाव मते वोध हइते (छे ना) ये साङ्गाइ स्त्रीर द्वितीय पतिर त्यक्त धन किछु साङ्गाइ स्त्रिके अर्शिवेक कि ना; यदि ना अर्शे तवे ऐ स्त्रिर भरण पोषणेर अवधारण काहार जिम्वा थाकिवेक इति—

श्रीर्ज्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणस्वामाधिपतिश्रीयुतआलकसुन्दरसाहेबधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि वाराणस्यादिप्रदेशे[१] एतादृशसगाइशब्दवाच्यं कार्य्यं[६] व्यवहारानुसारेण सिद्धं[२] भवति, एवं सगाइशब्दवाच्यकार्य्यकृत्स्त्रिया द्वितीयपतित्यक्तधनं यदि तत्पित्रा तद्भ्रातृभिश्च सह किंवा केवलं तद्भ्रातृभिः सह साधारणं चेत्तदा सगाइशब्दवाच्यकार्य्यकृत्स्त्रीस्वामित्वेन किञ्चिदपि तद्धनात् प्राप्तुं[३] न शक्नोति। एवं चेत्तदा तस्याः स्त्रिया भरणपोषणं यावज्जीवनमेतद्विवादे पूर्व्वलिखितास्मद्व्यवस्थान्तर्गतद्वितीयप्रश्नोत्तरव्यवस्थानुसारेण तस्या द्वितीयपतित्यक्तसाधारणधनाधिकारिभिरेव कार्य्यम्। तत्र तस्य साधारणधनाधिकारिणो यदि पिता भ्रातरश्च सर्व्वे भवन्ति तदा तैः सर्व्वैरेव कर्त्तव्यम्, यदि च केवलं तत्पिता भवति अधिकारी तदा तेनैव कर्त्तव्यम्, यदि च केवलं तद्भ्रातर एव भवन्ति तदा तैरेव[४] कर्त्तव्यम्—इति वाराणस्यादिप्रचलितमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्—इति मिताक्षरालिखनम् (पृ० २१७)। १।

भरणं चास्य कुर्व्वीरन् स्त्रीणामाजीवनं[५] क्षयात्—इत्यादि मिताक्षरा-(पृ० २२०)वीर मित्रोदय[६](पृ० ६३६ ख)ग्रन्थधृतनारदवचनम् (नास्मृ० पृ० १६६)। २।

---

१. वारानस्यादि०—व्यप०। २. सिद्ध सिद्धं०—व्यप०। ३. प्राप्तं—व्यप०।

४. तैनैव०—व्यप०। ५. जीवित—नास्मृ०।

६. स्त्रीणामनपत्यानां भरणमात्रं नारदेन प्रतिपादितमिति वीमि०ग्रन्थे। नारदवचनं तु तत्र नोपलब्धम्।

स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी।
अविभक्ते धनांशे तु प्राप्नोत्यामरणान्तिकम् ॥

इति वीरमित्रोदयादि(वीमि० पृ० ६५४ ख)ग्रन्थधृतकात्यायनवचनं चेति (कास्मृ० ६२२)। २।

श्रीर्ज्जयतितराम् **श्रीहरिः शरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

५३—जिला गाजिपुरेर फौजदारि आदालतेर रोवकारि तारिख ५ छेनम्बर सन १८२७ इङ्गरेजी हेनरि छिओनानओन फण्ड साहेब मेजेष्टरेर[1] वैठके।

सरकार मुद्दइ
ओमराओ राय शतिर ओयारिश—
ओ दण्डधारि चौवे ओ झाभराय मुदाआलेहेम।
ओ परस आहिर

कारण मुपम्मात रामकलिर शति हओा थानाद्‌गनिवने हवसालि। अद्य मकद्दमा रुवकार हइल। मुदाआलेहेमे जओाव, ओ ओदनराय ओ सिओदयाल[2] ओ वनओारि ओ सिवजोरराय ओ रामदेहलराय ओ आकुहुराय ओ अच्युत आनन्द ओ हरनाम राय ओ रओसन आली ओ दस्त साक्षीदिगेर एजाहार दस्तुर मत लिखा जाइया मकर्द्दमार मिछिल सामिल पडागेल। जे हेतुक एइ मकर्द्दमार कएक प्रकरण वोध करा आवश्यक, अतएव हुकुम हइल ये ओमराओ राय एक सउ टाकार जामिन दिया हाजिर थाके, एवं अन्य अन्य आसामीयान साक्षीयान सहित विदाय हये। एक किता इङ्गराजी चिटी एक विषयेर

---

१. मेजेष्टर वेटेर। २. सिओदयाल—व्यप०।

जिज्ञासा पूर्वक जे ब्राह्मण जाति व्यतिरिक्त सती स्त्रीलोकेर प्रति-स्वामीर मृत्यु संवाद श्रवणेर परे कत दिवस किम्वा काल अनुमरण हइवार रीति निरूपित आछे—सदर नेजामते पाठान जाय इति।

श्रीर्ज्जयतितराम्

यवाव्यवस्था

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

पतिमरण[1]श्रवणानन्तरं ब्राह्मणजातिव्यतिरिक्ता स्त्री यद्यनुमरण-मिच्छति तदा शीघ्रमेवानुमरणं कर्त्तुमर्हतीति शास्त्रे लिखितम्। किन्तु शीघ्रशब्दस्यार्थः कश्चिद् विशेषतो न लिखितः। परन्तु अनुमरणस्यायं व्यवहारः पतिमरणश्रवणानन्तरमनुमरणकर्त्री ब्राह्मणजातिव्यतिरिक्ता स्त्री प्रथमतोऽनुमरणमहं करिष्यामितीच्छति[2]। तत्र यदि कश्चिल्लौकिकः प्रति-बन्धश्चेत्तदा तत्प्रतिबन्धकदूरी[3]करणानन्तरमपिशीघ्रमेवानुमरणं करोति। अथवा अनुमरणेच्छायां कृतायामपि यदि सा रजस्वला भवति तदा राज-स्वलाशौचानन्तरमपि अनुमरणं करोतिइति च व्यवहारः—इति गाजिपुरा-ख्यादिप्रचलितमिताक्षरादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

अयञ्च सकल एव सर्व्वासां स्त्रीणामगर्भिणीनामबालापत्याना-माचण्डालं साधारणो धर्म्मः-इति मिताक्षराग्रन्थलिखनम् (पृ० २५)।१।

दयितं यान्यदेशस्थं मृतं श्रुत्वा पतिव्रता ॥
समारोहति[4] दीप्तेऽग्नौ[5] तस्याः शक्तिं निबोधत ॥
यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः।
संप्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः ॥

---

१. पतिमरणे श्रवण०—व्यप०।
२. ०मीतीच्छति—व्यप०।
३. दुरी करण०—व्यप०।
४. समारोहेत—(वीमि० पृ० १५२)।
५. शीघ्राग्नौ—व्यप०।

तिष्ठते विवशो[1] दीनो बध्यमानः[2] स्वकर्म्मभि ।
व्यालग्राही यथा व्यालं बलाद्[3] गृह्णात्यशङ्कितः ।
तद्वद्भर्त्तारमादाय दिवं[4] याति तपोबलात् ।
तत्र सा भर्तृपरमा स्तूयमानाप्सरोगणैः ।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्द्दश ॥

इति व्यासवचनञ्चेति[5] । २ ।

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

एइ व्यवस्था दाखिल इङ्गरेजि मिसिल सती विषयेर –

५४—सदर देओयानि आदालतेर द्वितीय हाकिम श्रीयुत कुर्टनी इशमिट साहेवेर हुजुर हइते कालिप्रसादराय सायेलर मकद्दमाते इङ्गरेजी १८२७ सालेर ३० आक्तुवर मासेर रोवकारिर लिखित मत परस्व दुइ प्रहर पर्य्यन्त वङ्गदेश चालित शास्त्रानुसारे इङ्गरेजी १८२४ सालेर २२ दिजम्वर मासेर लिखित जिला वर्द्धमानेर रोवकारी ओ इं० हाल सालेर १६ आपरेल मासेर लिखित कलिकातार कोटेर रोवकारि ओ सायेलेर सओयालेर मजमुन सकलेर अनुमोदने जवाव दाखिल करार हुकुमे आदालत मजकुरेर पण्डितगणेर नामे सओयाल ।

यद्यपि इहार परे मृत पार्व्वतीचरणेर भगिनी मशम्मात श्यामासुन्दरी गर्भे एक पुत्र जन्मे । ऐ पार्व्वतीचरणेर पितामही मुशम्मात राशमणिर त्यक्त वस्तु ऐ पुत्रेर स्वत्व हइवेक कि ना ? यदि हइवेक, एइ क्षण ऐ वस्तु मसम्मात श्यामासुन्दरीर जिम्माय किम्वा

---

१. विवशा०—व्यप० । २. वेष्टमानः—वीमि० ।
३. बिलाद्धरते वलात्—वीमि० । ४. तेनैव सह मोदते—वीमि० ।
५. कपोतिकाचित्राङ्गकोपाख्यानम्० ।

पार्व्वतीचरणेर खुडागण अर्थात् कालीप्रसादराय ओ दुर्गा-सुन्दररायेर जिम्याय राखा जाइवेक; ओ यद्यपि उहार खुडा-गणेर जिम्वाय रहिवेक, विरोधीय वस्तु हस्तान्तर ना करण कराते उहाद्दिगेर स्थान हइते जामिन लओया शास्त्रेर आज्ञा सम्मत वटे कि ना इति ।

श्रीर्ज्जयतितराम्

जवावव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतकुर्टनीइशमिटसाहेवधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितेङ्गरेजीशब्दप्रतिपाद्यचतुर्व्विंशत्यधिकाष्टादशशताब्दीयद्वाविंशतिदिवसीयदिशम्बरमासीयवर्द्धमानजिलाख्यधर्म्माधिकरणीयविचारपत्रमथ च इङ्गरेजीशब्दप्रतिपाद्यसप्तविंशत्यधिकाष्टादशशताब्दीयषोडशदिवसीयापरेलमासीयकलिकाताकोर्टापीलाख्यधर्म्माधिकरणीयविचारपत्रमेतद्धर्म्माधिकरणार्थिनिवेदनपत्रञ्चावलोक्य विविच्य च याद्दशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

उपरिलिखितपत्रजातै राममुन्दररायमरणानन्तरं तत्यक्तधनं तत्पुत्रेण पार्व्वती[1]चरणेन प्राप्तमिदं ज्ञातमिति, विवादास्पदीभूतधनं पार्व्वती-चरणस्यैव जातम् । अतस्तन्मरणानन्तरं तद्धनं तदुत्तराधिकारिणामेव भवति । तत्र च तदुत्तराधिकारिणां मध्ये पुत्रादिपितामहपर्य्यन्ताभावे तत्पितामह्या राशमण्या उत्तराधिकारित्वेन तद्धनं प्राप्तम् । राशमण्यां मृतायामेतत्परं यद्यपि मृतस्य पार्व्वतीचरणस्य भगिन्याः श्यामासुन्दर्य्या गर्भे एकः पुत्रो जनिष्यते तथापि पार्व्वतीचरणपितामहीरासमणिसंक्रान्ततदीय-धने भविष्यतः पार्व्वतीचरणपितृदौहित्रस्याधिकारो न भविष्यति, यतो विवादा-स्पदीभूतधनस्योत्तराधिकारित्वेन पार्व्वतीचरणपितामहीसंक्रान्तत्वे तन्म-रणोत्तरं तस्याः पूर्व्वमधिकारिपितामहादपि पूर्व्वमधिकारिणः पितृदौहित्र-

---

१ ०चरणेव—व्यप० ।

स्याधिकारप्रतिपादकशास्त्राभावात्--इति वङ्गदेशचलितश्रीकृष्णतर्कालङ्कार दायभागटीकाविवादभङ्गार्णवदायक्रमसंग्रहादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

भ्रातृपौत्राभावे पितृदौहित्रः तदभावे पितामहः तदभावे पितामही—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनम् (पृ० २१८) ॥ १ ॥

दौहित्रान्तपितृसन्तानाभावे पितामहो धनाधिकारी आसन्नत्वात् तदभावे पितामही--इति विवादभङ्गार्णवलिखनम् (२ विवाभ० पृ० ३६४ ख) ॥ २ ॥

दौहित्रान्तस्वसन्तानाभावे पितुरधिकारवत् पितृदौहित्रान्तसन्तानाभावे पितामहाधिकारः[२], *सांदृष्टिकन्यायसिद्धत्वाद् धनिभोग्यप्रपितामहपिण्डदातृत्वाच्च पितामहाभावे पितामही*—इति दायक्रमसंग्रहलिखनञ्चेति (पृ० ७) ॥ ३ ॥

श्रीज्जेयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

५५—नं० ७१५५ आपील सदर आमीन—

रोवकारि आदालत देओयानी जिला वर्द्धमान इंरेजि १८२७ साल ११ जुन प्रथम रेजेष्टर श्रीयुत मेस्तर जान एङ्गलेश हारणी-साहेबेर वैठके ।

रामप्रशादवन्द्योपाध्याय आपीलाण्ट

आपन अप्राप्त-व्यवहारा कन्या

अन्नपूर्णादेव्यार पक्ष हइते

श्रीमतिदेव्या ओ गयरह रष्पाडण्टान

सुवर्णादेव्या ओजरदार

---

१ भ्रातृपुत्राभावे भ्रातृपौत्रः...तदभावे पितृदौहित्रः...तदभावे पिता०—दायभाग-टीकापाठः ।

२. पितामहस्य, सांदृष्टिक०—दायक्रमसंग्रहपाठः ।

ए मकद्दमार विवरण दृष्टे एइ जिलार पण्डितेर उपर व्यवस्था तलवे एइ सओयाल हइयाछिल। ये यद्यपि दुइ भग्नि पितृधने दखिलकार हइया, ताहार मध्ये एक जन भग्नि ओ दुइ पुत्र समक्षे मरे, तवे मृत व्यक्तिर धन भग्निके अर्शिवेक, किम्वा ताहार पुत्रदिगेके अर्शिवेक। ताहाते एइ रूप व्यवस्था पहुछिल ये मृतार धन ताहार भग्निके अर्शिवेक। एइ रूप आमार तलव करण मते एलाका कलिकातार कोर्ट आपिल आदालतेर पण्डितेर निकट हइते ये व्यवस्था पहुछियाछे जिलार व्यवस्था ऐक्यता हइल। किन्तु विचारेर दाँडाते हजुरेर विवेचना सम्मत ना हइया उपरेर लिखित सओयाल एइ वेओराते ये दाओया करा वस्तु साधारण ओ पृथक थाकन प्रकारे उपरेर वेओरा करा कोन उत्तराधिकारिके अर्शिवेक—इंरेजि चिटी द्वारा हुगुलि जिलाते पाठान गियाछिल। हुगुलि जिलार पण्डित ए जिलार व्यवस्थार नितान्त व्यतिक्रम, अर्थात् दाओया करा वस्तु साधारण किम्वा पृथक, दुइ प्रकारेइ पुत्रदिगेके अर्शिवेक लिखियाछे। अतएव व्यवस्थार व्यतिक्रम हओने सन्देह उत्पत्ति हइया ताहार निष्पत्ति कारण सदर देओयानि आदालतेर व्यवस्था तलव करण आवश्यक बोध हइया हुकुम हइल ये सओयाल एइ रोवकारिर नकल द्वारा जज साहेवेर समीपे एइ प्रार्थनाय पाठान जाय ये सओयालेर व्यवस्था सदर देओयानी आदालत हइते आनाइया ए आदलते पाठायेन इति।

रोवकारि आदालते देओयानी जिला वर्द्धमान तारिख १९ माह जुन शन १८२७ शाल मेस्तर हेनरि मेरट जज साहेवेर वैठके—

रामप्रसादवन्धोपाध्याय	आपीलाण्ट
आपन अप्राप्त-व्यवहारा कन्या	
अन्नपूर्णादेव्यार पक्ष हइते—	रेष्पाडण्टान्
श्रीमतिदेव्या ओ गयरह	

सुवर्णादेव्या— ओजरदार

एइ मासेर ११ तारिखेर लिखित ए जिलार रेजेष्टर साहेवेर रोवकारिर एक केता नकल एक मृता स्त्रीर भग्नि ओ दुइ पुत्रेर उत्तराधिकारत्वेर[1] विशये ए आदालतेर पण्डितेर व्यवस्था कोर्ट आपिल आदालतेर व्यवस्थार सहित ऐक्य, ओ जिला हुगुलिर आदालतेर पण्डितेर व्यवस्थार सहित व्यतिक्रम हओन मजमुने एक केता सओयाल सम्वलित सदर देओयानी आदालतेर पण्डितेर व्यवस्था हासिल करणेर कारण ऐ सओयाल सदर देओयानी आदालते पाठानेर प्रार्थनाय उपुल हइल। हुकुम हइल ये साहेव मौसुकेर आसल रोवकारि ऐ सओयाल सम्वलित एइ रोवकारिर नकल आमार इंरेजि चिटिर सामिल सदर देओयानि आदालतेर प्रवल प्रताप हाकिमानेर हजुरे पाठान जाय इति—

सओयाल—

यद्यपि कोन व्यक्ति आपन दुइ कन्या वर्त्तमाना राखिया फौत् करे। ताहार पर ऐ दुइ कन्यार एक कन्या आपन दुइ पुत्र ओ भग्निके राखिया फौत् करे। इहाते मृता कन्यार विशय ताहार भग्निके अर्शे, कि ताहार पुत्रदिगेर अर्शे ? इहार संसृष्ट मते ओ विभाग प्रयोगे पृथक २ शास्त्रानुसारे जवाव लिखिवेन इति।

श्रीर्ज्जयतितराम्

जवावव्यवस्था

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यत्र कश्चिद्व्यक्तिविशेषः स्वकीये द्वे कन्ये संरक्ष्य मृतः, तदनन्तरं द्वयोः कन्ययोर्मध्ये एका कन्या द्वौ पुत्रौ एकां भगिनीञ्च संरक्ष्य मृता स्यात्, तत्र सा कन्या यदि अविवाहिता सती पितृधनाधिकारिणी चेत्तदा, यदि च

[1] उत्तराधिकारत्वे च—व्यप०।

विवाहिता सती पितृधनाधिकारिणी जाता, परन्तु तस्याः सा भगिनी वन्ध्या, पुत्रहीना विधवा चेत्तदा च, तस्याः पितृत्यक्तधनांशे तत्पुत्रयोरधिकारः। यदि च सा कन्या विवाहिता सती पितृधनाधिकारिणी जाता, अथ च तस्याः सा भगिनी वन्ध्या, पुत्रहीना विधवा वा नो चेत्तदा तद्भगिन्याः, अर्थात् पुत्रवत्याः सम्भावितपुत्रा(याः)वा, अधिकारः। पितृधने ऊढाया दुहितुरधिकारे जातेऽपि तन्मरणोत्तरं पितुरुत्तराधिकारिणामेव क्रमेण तद्धनं भवति। तत्र च पितुरुत्तराधिकारिणां मध्ये पुत्रादिपत्नीपर्यन्ताभावे दुहितुरेव प्राधान्याद् विभक्तेऽविभक्ते वा व्यावहारिकसंसृष्टिनि, असंसृष्टिनि वा सति पूर्व्वाधिकारिणी तदनन्तराधिकारिणां वङ्गदेशचलितशास्त्रानुसारेण अधिकाराभावाच्च—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृत-दायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्न्यभावे दुहिता...तत्रापि प्रथमं कुमारी...तत्रायं विशेषः। कन्या जाताधिकारा पश्चात् परिणीता सती अविद्यमानपुत्रा यदि म्रियेत तदा तत्पितृदाये सपुत्रायाः सम्भावितपुत्रायाश्च भगिन्यास्तुल्याधिकारः। न तु तद्भर्त्रादीनां, स्त्रीधन एव तेषामधिकारात्। कुमार्य्यभावे चोढायाः पुत्रवत्याः सम्भावितपुत्रायाश्च भगिन्यास्तुल्याधिकारः, तयोरेकतराभावे एकतराधिकारः। वन्ध्यापुत्रहीनविधवयोस्तु पुत्रद्वारेण पार्व्वणपिण्डदानोपकाराभावात्, पुत्रवतीसम्भावितपुत्रयोरसत्त्वेऽपि नाधिकारः...सर्व्वदुहित्रभावे दौहित्रस्याधिकारः—इति दायक्रमसंग्रह(पृ० ३-४) विवादार्णवसेतु[1](पृ० ४३-४४)प्रभृतिग्रन्थलिखनम्॥ १॥

---

१. पत्न्यभावे कुमारी धनाधिकारिणी।...तदभावे चोढा...तत्रायं विशेषः। कन्या जाताधिकारा पश्चात्परिणीता अविद्यमानपुत्रा यदि मृता तदा तत्पितृदाये सपुत्रायाश्च भगिन्यास्तुल्याधिकारो न तु तद्भर्त्रादीनां, स्त्रीधन एव तेषामधिकारात्। तदभावे पुत्रवती सम्भावितपुत्रा च तुल्याधिकारिणी एतयोरेकतराभावे अन्यतराधिकारः।...स्वपुत्रद्वारा पार्वणपिण्डदातृतया द्वयोरुपकाराविशेषाच्च।...वन्ध्यापुत्रहीनविधवयोस्तु नाधिकारः।...तयोरभावे दौहित्रः—इति विवादार्णवसेतुपाठः।

एवञ्च दुहितुरप्यधिकारे जाते तस्यां मृतायां तदभावोक्ताः पितृधनाधिकारिणो गृह्णीयुः न तु दुहितृधनाधिकारिणः—इति दायभाग(पृ० १७४) ग्रन्थलिख(न)ञ्चेति ।

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

नम्बर २५६५

५६—रोवकारी मिसिल आदालते देओयानी सदर तारिख २४ माहे जानओरि सन १८२८ इङ्गरेजी मतावेक १२ माहे माघ सन १२३४ वाङ्गला रोज वृहस्पतिवार ऐ आदालतेर हाकिम श्रीयुत कटवरट थरलेन सिलि साहेवेर वैठके—

देविद्याल प्रभृति आपीलाण्टान

हरहोरसिंह रेष्पाडण्ट

आपीलाण्टेर उकिल मुनशी महम्मद पाणाह विद्यमान आशील। ए मकर्द्दमा गत दिवस रेष्पाडण्टेर असाद्याते आमार वैठके रोवकार, ओ जिलार आदालतेर कागज-सकल १० लम्वर पर्य्यन्त पडागिया स्थकित छिल। पुनराय अद्य रोवकार हइया ऐ आदालतेर वाकि कागज-सकल फयशला पर्य्यन्त ओ कोट आदालतेर तावत् कागज ओ ए आदालतेर समुदय कागज पडागेल। यथा ए मकर्द्दमार सम्पर्के नातक हुकुम सादर हओनेर पूर्व्व एइ विषय जानन जे हरहोरसिंहेर वाशे वैशन शास्त्रानुसारे साव्यवस्थ वटे कि ना आवश्यक हइल। अतएव हुकुम हइल ये एइ रोवकारिर नकल सहित ए मकर्द्दमार समस्त कागज एइ आदालतेर पण्डीतगणके एइ हुकुमे समर्पण करा जाय ये मकर्द्दमार दाखिल हओया सम्यक कागज ओ सकल दस्तावेज दृष्टी करिया व्यवस्था लेखेन ये हरहोरसिंहेर वाशे

वैशन शास्त्रानुसारे साव्यवस्थ बटे कि ना; ओ व्यवस्था दाखिल हओन परे उचित हुकुम सादय हइवेक इति ।

एतद्धर्माधिकरणाधिपतिश्रीयुतकटवरटथरनेलसेलिसाहेवधर्म्माधिकरण-लिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवंतत्समर्पितैतद्विवादपदविषयनि-विष्टपत्रजातं चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

हरहोरसिंहनिर्द्दिष्टसाक्ष्युपस्थापितवृत्तान्तेन वाराणस्यधिकरणककोट-आपीलाख्यधर्म्माधिकरणनिविष्टसप्तदशाङ्काङ्कितव्यवस्थापत्रेणैव[1] मष्टादशा-ङ्काङ्किततद्व्यवस्थाप्रतिरूपपत्रेण चैवं तद्व्यवस्थापत्रलिखितप्रश्नत्रयेण चैव-मेतद्विवादविषयनिविष्टपत्रजातैश्च हरहोरसिंहः स्वपितुर्जनकस्यैक एव पुत्रः, एवं जनकपितृमरणानन्तरं तन्मात्रा वा मनेवाजसिंहाय भार्यायां राशशिनी-शब्दप्रतिपाद्यदत्तकपुत्रकरणार्थे दत्त इति ज्ञातम् । एतादृशवृत्तान्ते सति हरहोरसिंहस्य वा मनेवाजसिंहकर्तृकं भार्यायां राशनसिनीशब्दप्रतिपाद्य-दत्तकपुत्रत्वं सिद्धं भवितुं न शक्नोति । एकमात्रपुत्रो दत्तकपुत्रकरणार्थं न दातव्यः—शास्त्रे[5] निषेधस्मरणात्, भर्त्तुरनुमतिं विना स्त्रियाः पुत्रदान-निषेधाच्च । अथ च हरहोरसिंहनियुक्तरुक्कानशब्दवाच्ये यद्व्यवस्थापत्रं वाराणस्यधिकरणककोटापिलाख्यधर्म्माधिकरणे निविष्टं तद्व्यवस्थापत्रे तत्प्रतिरूपपत्रे चेदमेव लिखितम् । काचिदेकपुत्रा तत्पुत्रभरणपोषणा-द्यसमर्था[2] स्त्री स्वकीयमेकपुत्रं दत्तवती[3] । आवयोः सकलकार्य्यकारी अयं पुत्रः अस्तु । अतएवायं द्व्यामुष्यायणः पुत्रः सिद्धो भवतीति तदतीवा-शुद्धम् । तादृक्[4] संविदः सत्यत्वस्य प्रभुसमर्पितपत्रजातैरेव प्राप्तत्वात्, पत्युरनु-मतिं विना केवलभरणाद्यसमर्थया मात्रा दत्तस्यैकमात्रपुत्रस्य द्व्यामुष्याय-णस्य शास्त्रालिखितत्वाद्, भर्त्तुरनुमतेः प्रभुसमर्पितैतद्विवादविषयनिविष्टपत्र-जातैरेवप्राप्तत्वाच्च । अथ च जिलाख्यधर्म्माधिकरणनिविष्टपत्रान्तर्गत-

१. पत्रेन०—व्यप० । २. भरनपोषणाद्यसर्था०—व्यप० ।
३. स्वकियत देक पुत्रमलेनशात विदादत्तवति०—व्यप० ।
४. तादृश०—व्यप० । ५. इति शास्त्रे—व्यप० ।

तद्धर्म्माधिकरणनियुक्तपण्डितलिखितव्यवस्थापत्रमेवं पाठशालास्थपण्डितलिखितव्यवस्थापत्रं च शुद्धमशुद्धं वेत्यस्माभिर्न लिख्यते,[1] यतस्तद्व्यवस्थाद्वये हरहोरसिंहस्य दत्तकपुत्रत्वसिद्धयसिद्धयोः प्रस्तावश्च नास्ति; इत्यतस्तस्यानावश्यकत्वमेव—इति वाराणस्यादिप्रदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारमयूखव्यवहारकौस्तुभदत्तकमीमांसादत्तकदीधितिदत्तकचन्द्रिकादत्तकनिर्णयादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

माता भर्त्तुरनुज्ञया[2] प्रोषिते प्रेते वा भर्त्तरि पित्रा वोभाभ्यां वा सवर्णाय यो यस्मै दीयते स तस्य दत्तकः पुत्रः ।

यथाह मनुः—

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।

सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥—इति (६।१६८) ।

आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेधः । तथा एकपुत्रो न देयः । "न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति वशिष्ठस्मरणात्", तथा *"अनेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः । ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः"*—इति (मनु०—६।१०६) ।

तस्यैव पुत्रकार्य्यकरणे मुख्यत्वात्—इति मिताक्षराग्रन्थलिखनम् (पृ० २१३-१४) ॥ १ ॥

अपुत्रेणेति पुं(स्त्व)श्रवणात् न स्त्रिया अधिकार इति गम्यते । अतएव वशिष्ठः । न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः—इति दत्तकमीमांसाग्रन्थलिखनम् (पृ० ७) ॥ २ ॥

नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन ।

बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः ॥—इति दत्तकचन्द्रिकादत्तकमीमांसादि (पृ० ६६)ग्रन्थधृतशौनकवचनञ्चेति (पृ० ११) ॥ ३ ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

---

१. लिखितो०—व्यप० । २. भर्त्रनुज्ञया०—व्यप० ।

५७—रोवकारि मिसिल आदालत देओयानी सदर तारिख ५ माह मार्च्च सन १८२८ इङ्गरेजी मताबक २३ माह फालगुण सन १२३४ वाङ्गला रोज बुधवार ऐ आदालतेर द्वितीय हाकिम श्रीयुत आलक सुन्दर राश साहेवेर वैठके—

जयरामगिर वनाम मयागिर ओ देविगिर

साएल हाजीर आशील। इं० १८२७ शालेर १३ आगस्त माशेर लिखित मरसीदावादेर प्रवलसिएल कोटेर एक केता रिटरन तथाकार रोवकारि सहित ओ तहार सम्वलित मकर्द्दमार रोएदाद पौछिया ऐ सनेर जुलाइ माशेर २३ तारिखे दृष्टी हओया साएलेर सओयाल प्रभृति, ताहार समपर्कीय कागज-सकल अद्य दृष्टे आशिल। यथा साएलेर सओयाल सम्पर्के चुडन्त हुकुम सादर हओनेर पूर्व्व शास्त्र विवेचना करण उचित बोध हइलो, अतएव हुकुम हइलो ये एइ रोवकारिर नकल एइ हुकुमे एइ आदालतेर पण्डितगनके अर्पण कराजाय ये निचेर लिखित सओयालेर जवाव सोमवार पर्य्यन्त दाखिल करेण।

सओयाल—यद्यपि एक व्यक्त गोसाञी आपन गुरुर मृत्युर पर उहार त्यक्त धने दाखिल हइया अन्य व्यक्तिके आपन चेला नियुक्त करे, ओ ताहार पर आपन चेलार असम्मतिते आपन गुरुर त्यक्त धन ओ आपन स्वोपार्ज्जित (धन)के गुरुर त्यक्त धन सम्वलित किम्वा पृथक् अन्य स्थाने हस्तान्तर करे। वङ्गदेश चलित शास्त्रानुसारे एमत हस्तान्तर सिद्ध वटे कि ना इति।

श्रीर्ज्जयतितराम्।

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतआलकसुन्दरसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्येतत्प्रश्नलिखितकश्चित्संन्यासिगोस्वामी स्वगुरोर्मृत्योः परं तत्त्यक्तधने आयत्तत्वं सम्पाद्यान्यं कञ्चिद्व्यक्तिविशेषं शिष्यत्वेन नियुक्तवान्।

तदनन्तरं तच्छिष्यानुमतिं विना स्वगुरुत्यक्तधनं स्वोपार्जितधनं चैकीकृत्य पृथग्वान्यस्य कस्यचिन्निकटे हस्तान्तरं[1] कृतवान् स्यात्तत्र तद्धनं यदि देवसेवार्थं नियमितं भवति तदा देवस्वत्वास्पदीभूततद्धने हस्तान्तरकर्त्तुः स्वत्वाभावेन, यदि च तद्धनमतिथिसेवार्थं नियमितं तत्रायं नियमश्चेदे- तद्धनादतिथिसेवैतत्स्थाननियुक्तेन कर्त्तव्या, न तु दानविक्रयावपि, तदा च शिष्यानुमत्या तदननुमत्या वा हस्तान्तरकरणं शास्त्रानुसारेण सिद्धं भवितुं नार्हति; यतः शास्त्रानुसारेण[2]पोष्यवर्गाभरणे नरकं भवति। अथ च संन्या- सिनामिदानीन्तनानां प्रायशोऽतिथिसेवाव्यवहारो वर्त्तते। अथ चातिथिसेवार्थं धननियमोऽपि वर्त्तते। तद्धनदानविक्रयावपि न भवत इत्यपि व्यवहारः। व्यवहारस्यापि शास्त्रसिद्धप्रमाणत्वात्। अथ च संन्यासिनामनेके सम्प्रदाया अनेकाः श्रेण्यस्तत्रैतत्प्रश्नलिखितसंन्यासिनो गोस्वामिनो गुरुपरम्परा- यामेतद्व्यवहारश्चेत् शिष्यानुमतिं विना गुरुणा गुरुपरम्परागतधनस्य हस्तान्तरं न कर्त्तव्यं तदा तादृशव्यवहारात् शिष्यानुमतिं विना गुरुपरम्परा- गतधनस्य हस्तान्तरकरणं शास्त्रानुसारेण भवितुं नार्हति। यदि च तद्गुरु- परम्परायां तादृशव्यवहारो न चेत्, तदैतत्प्रश्नलिखितधनं यदि देवसेवार्थ- मतिथिसेवार्थं वा नियमितं न भवति तदा च स्वोपार्जितस्य गुरुपरम्परागत- स्य वोभयविधधनस्यास्य[1] संन्यासिजातिव्यवहारात् शिष्यानुमतिं विनापि गुरुणा हस्तान्तरकरणं शास्त्रानुसारेण सिद्ध्यति, अतः शास्त्रानुसारेणापि सिद्धं भवितुमर्हति। व्यवहारस्य शास्त्रसिद्धप्रमाणत्वमुपरि लिखितमेव—इति वङ्गदेशचलितमनुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाव्यवहारतत्त्व व्यवहारमातृकादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।

स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति।—इति मनुवचनम् (११।२६)।१।

---

१. हस्तान्तरं—व्यप०। २. शास्त्रानुसारेणापोष्य—व्यप०।

१. धनस्यास्य ज्जातसन्यासिव्य०—व्यप०।

प्रतिमादिदेवतार्थमुत्सृष्टं[1] धनं देवस्वम्—इति कुल्लूकभट्टव्याख्यानमिति (पृ० ४३०) । २ ।

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।

अकृतस्स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इति मनुवचनम् (८।१९९) । ३ ।

व्यवहारो हि बलवान् धर्म्मस्तेनावहीयते—इति व्यवहारतत्त्व(पृ० ४) व्यवहारमातृकादि(पृ० २८२)ग्रन्थधृतनारदवचनम् । (पृ० १७) १।४०) ।४।

भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।

नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् ॥—इति दायभागादिग्रन्थधृत(दाभा० पृ० ३३)मनुवचनम्[2] । ५ ।

पिता माता गुरुर्भार्य्या प्रजा दीनाः समाश्रिताः ।

अभ्यागतोऽतिथिश्चैव पोष्यवर्ग उदाहृतः ॥—इति श्रीकृष्णतर्कालङ्कारधृतमनुवचनम्[3] (दाभाटी० पृ० ३४) । ६ ।

जातिजानपदान् धर्म्माञ्छ्रेणीधर्म्मांश्च धर्म्मवित् ।

समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपालयेत् ॥—इति मनुवचनं चेति (८।४१) । ७ ।

श्रीर्ज्जयतितराम्	**श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण	**श्रीरामतनुशर्म्मविद्यावागीशेन**

—इङ्गराजि दस्तखत—

१. देवता तदर्थम०—यप० ।

२ मनुस्मृतौ वचनमिदं नोपलभ्यते ।

३. वचनमिदं मनुस्मृतौ नोपलभ्यते यद्यपि वाक्यमिदं "मनुनैवोक्तम्" इति दायभागटीकालिखनम् ।

शाओयाल—

५८—एक व्यक्ति सामन्त रजपूत जातीय राजा प्रथमा ओ द्वितिया दुइ वनिता ओ द्वितीया वनितार एक दुहिता ओ स्थावर ओ अस्थावर वस्तु स्वर्णादि राखिया निहतो अर्थात् मृत्यु हय। तदपरे ए निहतो व्यक्तिर द्वितिया वनितार एक दौहित्र हय। ऐ द्वितिय वनिता ओ ताहार दुहिता ओ दुहितार पुत्र वर्त्तमान आछे। ए क्षणे ऐ राजार प्रथमा वनिता आपन स्वामीर फौतेर पर ऐ सकल वस्तुते दखिलकार थकिया आपन सपत्नीर साम्वत्सरेर भरण पोषणेर वेतन दिया आपन सजातीय चरि वत्सरेर वयक्रमेर एक व्यक्तिके पौष्यपुत्र राखियाछे। एमते प्रस्ता जिज्ञासा करा जाइतेछे। ऐ युत राजार द्वितीया वनितार दौहित्र वर्त्तमाने प्रथमा वनिता आपन स्वामीर विना अनुमतिते पौष्यपुत्र करिते पारे कि ना। यदि पारे कोन शास्त्रेर मत, ओ शे शास्त्रेर नाम की, ओ कोन वचन ओ प्रमाण ताहा एइ शाओलेर पृष्ठे लिखियादेन। इति इं शन १८१८ साल, तारिख ७ मार्च्च।

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते

प्रश्नपत्रलिखितस्य राज्ञो द्वितीयवनिताया दौहित्रे विद्यमाने सति प्रथमा वनिता स्वस्वाम्यनुमतिं विना दत्तकपुत्रं कर्त्तुं न शक्नोति—इति दत्तकमीमांसा-दत्तकचन्द्रिका(पृ० ३)दत्तकदीधितिप्रभृतिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद् वाऽन्यत्रानुज्ञानाद् भर्त्तुः—इति दत्तकमीमांसा(पृ० ७)दत्तकचन्द्रिका(पृ० ३)दत्तकदीधितिप्रभृतिग्रन्थधृतवशिष्ठवचनम्।

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

———

नं० २६१८

५९—रोवकारि मिषिल आदालत देओोनि सदर तारिख १३ माह मार्च सन १८२८ इङ्गरेजी मोतावक २ चैत्र सन १२३४ बाङ्गला रोज बृहस्पतिवार ऐ आदालतेर हाकिम कटवरट थरनेल मिली साहेबेर बैठके—

नफरमित्र ओ राजीवमित्र— आपीलाण्टान
रामकुमारचट्टोपाध्याय प्रभृति— रेष्पाडण्टान

आपीलाण्टानेर उकिलगण मुनशी हयदरालि ओ मुनशी गोलाम बतुल रेष्पाडण्टानेर उकीलगणेर मध्ये एक जन मौलवि करम्-होशेन हाजिर आशील। पूर्व्वे एइ मकद्दमा एइ मासेर ११ ओ १२ तारिख सकले रोवकार हइया ओ शहर आदालत ओ प्रविनशल कोर्टेर कागजसकल तथाकार फयशला सहित पडागिया दिवा आवसान हेतु स्थकित छिल, पुनराय अद्य उपस्थित हइया खाप आपीलेर सओाल याहा मौक्तुवातेर स्थाने करार दियाछे ओ ताहार जवाव इङ्गरेजी १८२४ शालेर १७५२९ (?) जुलाइ मासेर हओया ए आदालतेर रोवकारि सकल ओ आदालतेर समुदाय कागज पडागेल। जानागेल ये एइ मकद्दमाय सहरेर पण्डितेर निकट हइते दुइ व्यवस्था ओ कोर्टेर पण्डितेर निकट हइते एक व्यवस्था दाखिल हइयाछे, ओ ऐ व्यवस्थासकल परस्पर अनैक्य। अतएव चूडान्त हुकुम सादर हओनेर पूर्व्वे एइ आदालतेर पण्डितगणेर निकट व्यवस्था लओन उचित बोध हइया हुकुम हइल जे एइ रोवकारिर नकल नीचेर लिखित सओ(।)लसकल लिखिया मकद्दमार समुदाय कागज सहित एइ आदालतेर पण्डितगणके समर्पण कराजाय।

प्रथम सओयाल। एइ जे यद्यपि रामकृष्णमित्रेर[1] स्त्री मुसम्मात धनमणि आपन पतिर मृत्युर पर आपन पतिर अंश ओ त्यक्त

१. वाइ कृष्ण०—व्यप०।

बावत मलहि किसमतेर उपर, याहा उत्तराधिकारित्व प्रकारे उहाके पौछियाछे, दखिल हइया ताहा आपन दौहित्र मानिक-लालके हेवा करिया थाके; एमत हेवा सिद्ध वटे कि ना।

द्वितीय। एइ ये यद्यपि हेवानामा लिखिया देओन परे मुसम्मात[1]मजकुरा ऐ लिखित वस्तुके पुनराय रघ्पाटएटानेर पिता डोमनचट्टोपाध्यायेर निकट विक्रि करियाथाके, एमत विक्री करार ऐ मुसम्मातर[2] त्तमता छिल कि ना। ओ यदि स्यात् हेवा ओ विक्रय दुइओ सिद्धि ना हय तवे ऐ वस्तु आपीलाएटानके, ये धनमणिर पतिर भ्रातुष्पुत्र वटे, अर्शे कि ना?

तृतीय[3]। यद्यपि धनमणि एखन पर्य्यन्त जीवमान थाके तवे ऐ वस्तुते उहार स्वत्वाकी आछे कि ना। उचित ये पण्डितगण मकद्दमार समुदाय कागज दृष्टि करिया वङ्गदेश चलित शास्त्रानुसारे व्यवस्था दाखिल करेण इति।

श्रीहरिःशरणम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरनेलसिलीसाहेवधर्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

उपरिलिखितपत्रान्तर्गतमुरुसिदा[4]वादाख्यनगरसम्बन्धिधर्म्माधिकरणीयजयपत्रेणैकत्रिंशदङ्काङ्कितविचारपत्रेण तद्धर्माधिकरणनियुक्तपण्डितसंबन्धिप्रश्नपत्रेण चैवं कोटापीलाख्यधर्म्माधिकरणीयजयपत्रेणैकादशाङ्काङ्कितविचारपत्रेण तद्धर्म्माधिकरणनियुक्तपण्डितसम्बन्धिप्रश्नपत्रेण च रामकृष्णमित्रमरणानन्तरं तत्त्यक्तधनं गङ्गागोविन्दमित्रेण तत्पुत्रेणोत्तराधिकारित्वेन प्राप्तमिति ज्ञातम्। अतो रामकृष्णमित्रस्वत्वास्पदीभूतयावद्धने तस्यैव

१. असम्मात—व्यप०। २. असम्मातर—व्यप०।
३. द्वितीय—व्यप०। ४. मुरुसिदावादाभ्य—व्यप०।

स्वत्वं जातम् । अतस्तस्यानपत्यस्य पत्नीमारभ्य पितृपर्य्यन्तानपत्यधनाधिकारिरहितस्य मृतस्य चोत्तराधिकारित्वेन तन्मात्रा धनमन्या तद्धनं प्राप्यायत्तत्वं समपाद्य[1] माणिक्यलालनाम्ने स्वदौहित्राय दत्तं चेत्, तदा तद्दानं सिद्धं भवितुं न शक्नोति, यतो दानपत्रे धनमन्या लिखितं मया स्वेच्छया तुभ्यमेतद्भाषायामष्टादशगण्डाशब्दप्रतिपाद्यं धनं दत्तम्, अतएव स्वेच्छया स्त्रिया दानाद्यधिकारस्योत्तराधिकारित्वेन संक्रान्तधने शास्त्रासिद्धत्वात् । यथा पतित्यक्ते पत्नीसंक्रान्ते धने पत्न्याः स्वेच्छया दानाद्यनधिकारस्तथापुत्रत्यक्तेऽपि मातृसंक्रान्ते धने मातुरपीति ॥ ० ॥—

अत्र प्रमाणम्—

स्त्रीणां स्वपतिदायस्तु उपभोगफलः स्मृतः ।
नापहारं स्त्रियः कुर्य्युः पतिदायात् कथञ्चन ॥—इति दायभाग-(पृ० १७३)विवादभङ्गार्णवादि(पृ० २ विवाभ० ३२१ क०)ग्रन्थधृत-भारतवचनम् (१३।४७।२४) । १ ।

नापहारं स्त्रियः कुर्य्युः पतिदायात् कथञ्चनेति भारतादपहारशब्दार्थेन यथेष्टदानविक्रयादौ नाधिकारः—इति दायरहस्यलिखनम् । २ ।

यद्वा पत्नीत्युपलक्षणम् । स्त्रीमात्राधिकारेऽयमर्थो बोद्धव्य—इतिदायभागादिग्रन्थलिखनम् ॥ ३ ॥

द्वितीयप्रश्नस्योत्तरम्—

प्रथमप्रश्नोत्तरानुसारेण शास्त्रासिद्धदानपत्रलिखनानन्तरं धनमणी तद्दानपत्रलिखितवस्तुनः पुनरेतद्धर्म्माधिकरणप्रत्यर्थिनां पितुः[2] डोमनचट्टोपाध्याय(स्य) सन्निधौ विक्रयं कृतवती स्यात्तदैतादृशविक्रयकरणे तस्या धनमण्याः क्षमता नासीत्, यतो विक्रयपत्रे स्वीकृतसंक्रान्तधनस्य[3] विक्रये शास्त्रोक्तावश्यकानां हेतूनामलिखनात् प्रभुसमर्पितावशिष्टपत्रजातैरप्रातत्वाच्च शास्त्रोक्तविक्रयहेतोर्विना पतित्यक्तधने यथा पत्न्या विक्रये नाधिकारस्तथा पुत्रत्यक्तधने मातुरपि नाधिकारः । एवञ्चोपरिलिखितप्रकारेण

१. समपाद्य—व्यप० । २. पितृ०—व्यप० ।
३. °नस्य शास्त्रोक्तहेतूनां विक्रये आवश्यकानामलि०—व्यप० ।

दानविक्रययोरसिद्धौ सत्यां विवादास्पदीभूतधनान्तर्गतगङ्गागोविन्दमित्रस्य पूर्व्वस्वत्वास्पदीभूतभाषायामष्टादशगण्डाशब्दप्रतिपाद्यपरिमितवस्तुषु यदि गङ्गागोविन्दमित्रस्य पुत्रपौत्रप्रपौत्ररहितस्य वङ्गदेशचलितदायभागादिग्रन्थलिखितक्रमेण पत्नीमारभ्य पितामहपुत्रपर्य्यन्तानपत्यस्य धनाधिकारिणो न स्युस्तदैतद्धर्म्माधिकरणाथिनां गङ्गागोविन्दमित्रस्य पितामहपौत्राणामधिकारो भवतीति।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरप्रमाणत्रयम्। तदभावे पितामही तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयस्तदभावे पितृसोदरपुत्रस्तदभावे पितृवैमात्रेयपुत्रः— इत्यादि श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनम्।

तृतीयप्रश्नस्योत्तरम्—

यदि धनमणी एतत्कालपर्य्यन्तं जीवति तदा विवादास्पदीभूतधनान्तर्गतभाषायामष्टादशगण्डाशब्दप्रतिपाद्यपरिमितं यद्रायकृष्णमित्रमरणोत्तरं तत्पुत्रेण गङ्गागोविन्दमित्रेण प्राप्तं तद्धने धनमण्या मातृत्वेन स्वत्वमस्त्येव, यतो गङ्गागोविन्दमित्रस्य पुत्रपौत्रप्रपौत्ररूपापत्यपत्नीदुहितृदौहित्रपितृपर्य्यन्तानपत्यधनाधिकारिराहित्यात्[1] प्रभुसमर्पितपत्रजातैरवगमादुपरिलिखितप्रकारेण दानविक्रययोरसिद्धत्वाच्च—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवदायरहस्यादिग्रन्थानुसारिणी व्यवस्था।

तृतीयप्रश्नोत्तरप्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुतः—इत्यादि दाय(पृ १५१) भागादिग्रन्थधृतयाज्ञवल्क्यवचनम् (२।१३५)।

अत्र यद्यपि विवादास्पदीभूतं धनं भाषायामेकादशगण्डाधिकैकाणकपरिमितमिति विक्रयपत्रादिना ज्ञातम्, किन्तु तन्मध्ये भाषायामष्टादशगण्डाशब्दप्रतिपाद्यं यद्धनमण्या उत्तराधिकारित्वेन प्राप्तं तस्यैवेदमुत्तरं प्रभुसम-

---

१. ०राहित्यस्य—व्यप०।

र्पितप्रश्नपत्रानुसारेण दत्तं, नावशिष्टस्य भाषायां त्रयोदशगण्डाशब्दप्रतिपाद्यस्य नत्रकान्तविश्वासविक्रीतस्य तद्विषयकप्रभुप्रश्नाभावात्—इतिनिवेदनमिति ।

श्रीर्ज्जयतितराम्	**श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण	**श्रीरामतनुशर्म्मविद्यावागीशेन**

नम्वर २५६५

६०—रोवकारि मिसिल आदालते देओानि सदर तारिख ९ माह आपरेल शन १८१८ इङ्गरेजी मोतावक २९ माह चैत्र शन १२२४ वाङ्गला रोज वुधवार ए आदालतेर हाकिम श्रीयुत कटवरट थरनेल मिली साहेवेर वैठके ।

मुसम्मात ज्ञानकौँओर ओ जयाकौओर आपिलण्टान

दुःखवहनसिंह ओ देवदत्त रेष्पाडण्टान

आपिलण्टनेर उकिलगण मौलवि गोलाम इजदाणी ओ लाला आउधलाल, रेष्पाडण्टनेर उकिलगणेर मध्ये एक जन सदासुकपण्डित हाजीर आसिल । कल्य एइ मकर्द्दमा रोवकार हइया नालिशी आरजि पडागिया दिवा अवसान प्रयुक्त स्थकित छिल, पुनराय अद्य उपस्थित हइया प्रविन्शन कोटेर वाकि कागज फयशला पर्य्यन्त ओ आदालते दाखिल हओया आरजि मजुवात ओ जवाव प्रभृति समस्त कागज गृष्ट आशील । यथा ए माकर्द्दमार सम्वन्धे चुडन्त हुकुम सादर हआनेर पूर्व्वे ए आदालतेर पण्डितगणेर स्थाने व्यवस्था लओन उचित हइल, अतएव हुकुम हइल ये एइ रोवकारिर नकल मकर्द्दमार समुदय कागज सम्वलित एइ सओयाले ए आदालतेर पण्डितगणेर हाओला कराजाय ये मुसम्मात ज्ञानकौँओर आपन पिता केहरसिंहेर त्यक्त स्थावर वस्तुते ए आदालतेर डिकरि अनुसारे

उत्तराधिकारि प्रकारे कावेज हइयाछे, ओ मुसम्मात मजकुरा बन्धुसिंह नामे एक पुत्र ओ उम्मेदकौँओर ओ देओमुरत ओ नन्नाकौँओर नामिक तिन कन्या वा त ओ उहार पुत्र बन्धुसिंह जयाकौँओर नामे एक स्त्रि राखिया निःसन्तान मरिल। तत्परे मुसम्मात देओमुरत द्वितीय कन्या दुइ पुत्र अर्थात् रुपाडण्टान-के राखिया मृत्य हइल, ओ ताहार पर उहार तृतीय कन्या मुसम्मात नन्नाकौँओर मृत बन्धुसिंहेर स्त्री मुसम्मात जया-कौँओरके ऐ समुदाय वस्तु किम्बा ताहार हइते किञ्चित दान करणेर क्षम निःसन्तान मरिल। अतएव मैथिल ओ पश्चिम देशेर चलित शास्त्रानुसारे ज्ञानकौंङरके (अपत्य) ना थाकाते तबे ताहार मृत्युर पर उहार सत्याधिकारि कोन व्यक्ति हइबेक। उचित ये कागज-सकल दृष्टी ओ अनुमोदन करिया एइ सओयालेर जवाब शास्त्रेर प्रमाण सहित सप्ताह मध्ये दाखिल करि(बे)न इति।

श्रीर्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरनेलसिलीसाहेबधर्म्माधिक-रणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद् विवादविषय-निविरपत्रजातञ्चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रभुसमर्पितपत्रान्तर्गतषड्विंशत्यङ्काङ्कितपूर्व्वलिखितैतद्धर्म्माधिकरणीय-जयपत्रानुसारेण केहरसिंहाजितसिंहयोर्विभक्तयोर्द्वयोः सोदरभ्रात्रोर्मध्ये केहर-सिंहस्य पुत्रपौत्रप्रपौत्रपत्नीपर्य्यन्तरहितस्य मृतस्य समस्तविभक्तस्थावरधनांशे तद्दुहितुर्ज्ञानकोङराख्याया उत्तराधिकारित्वेनाधिकारे जाते सति, ज्ञानकोङ-राख्याया मिथिलादेशचलितशास्त्रानुसारेण पश्चिमदेशचलितशास्त्रानुसा-रेण चोपरिलिखितपैतृकसमुदायस्थावरधनांशस्य तदन्तर्गतकिञ्चिद्धनस्य वा

मृतस्वपुत्रबन्धुसिंहपत्नीं जयाकोमराख्यामुद्दिश्य दानकरणे क्षमता नास्ति, यतः शास्त्रे लिखितं पुत्रप्रपौत्रपर्य्यन्तरहितस्य मृतस्य विभक्तधने पत्न्या उत्तराधिकारित्वेनाधिकारे जातेऽप्यदृष्टार्थं विना तदन्तर्गतकिञ्चिद्धनस्यापि दानानधिकारः। अत एव पत्नीतो जघन्याया दुहितुरर्थात् पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य विभक्तधने प्रधानाधिकारिण्याः पत्न्याः पश्चादधिकारिण्या उत्तराधिकारित्वेन विभक्तपितृधनाधिकारे जातेऽप्यदृष्टार्थं विना तदन्तर्गतकिञ्चिद्धनस्य सुतरां दानाधिकारित्वेनोपरिलिखितपैतृकसमुदायस्थावरधनांशस्य दानकरणक्षमतायाः सुतरां दूरापास्तत्वाद्विवादास्पदीभूतधनस्य ज्ञानकोमराख्याया स्त्रीधनत्वाभावाच्च। प्रकृते तु प्रभुसमर्पितपत्रान्तर्गतानचत्वारिंशदङ्काङ्कितदानपत्रेणावशिष्टपत्रजातैश्चादृष्टार्थदानानवगमात्, पैतृकसमुदायस्थावरधनांशदानावगमाच्च। एवञ्चोपरिलिखितप्रकारेण ज्ञानकोमराख्याया उपरिलिखितपैतृकसमस्तस्थावरधनांशस्य तदन्तर्गतकिञ्चिद्धनस्य वा दानकरणक्षमतायामसत्यां, तस्या मरणोत्तरं तद्धनं धनिनः केहरसिंहस्योत्तराधिकारिणामेव भवति; यतः शास्त्रानुसारेण पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य विभक्तधने पत्न्या उत्तराधिकारित्वेनाधिकारे जातेऽपि तन्मरणोत्तरं तद्धनं तत्पत्युरुत्तराधिकारिणामेव यथा भवति तथा शास्त्रविवेचनया पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य विभक्तधने दुहितुरुत्तराधिकारित्वेनाधिकारे जातेऽपि तन्मरणोत्तरं तद्धनं तत्पितुरुत्तराधिकारिणामेव भवति। प्रकृते तु मिथिलादेशचलितशास्त्रानुसारेण प्रभुसमर्पितपत्रान्तर्गतवंशावलीपट्कलिखितस्य धनिनः केहरसिंहस्य पितुः कृष्णसिंहस्य पितृपितामहप्रपितामहादिसन्ततीनां मध्ये यः कश्चित् केहरसिंहस्यासन्नतरः सपिण्डो ज्ञानकोमराख्याया मरणोत्तरं स्थास्यति स एवाधिकारी भविष्यति, यतो ज्ञानकोमराख्यायाः पितुर्धनिनः केहरसिंहस्योत्तराधिकारित्वं प्रश्नपत्रलिखितानाम्, अर्थात् ज्ञानकोमराख्याया मृतपुत्रबन्धुसिंहपत्न्या जयाकोमराख्याया एवं तत्प्रथमकन्याया उमेदकोमराख्याया एवं तद् द्वितीयकन्याया देवमूर्त्तिकोमराख्यायाः पुत्रयोरर्थादेतद्धर्म्माधिकरणप्रत्यर्थिनोरेव, एतद्भिन्नानामुपरिलिखितवंशावलीपट्कलिखितानां मध्ये कस्यचिदपि मिथिलादेशचलितशास्त्रानुसारेण न भवति, यतो मिथिलादेशचलितशास्त्रानुसारेण धनाधिकारिशृङ्खलाया-

मेतादृशानां पुत्रपौत्रप्रपौत्ररहितस्य सम्बन्धिनामुल्लेखाभावात्, पश्चिम-देशचलितशास्त्रानुसारेणोपरिलिखितवंशावलीषट्कलिखितस्तुतीसिंहाख्यो, यो धनिनः केहरसिंहस्य दौहित्रः, स यदि ज्ञानकौमराख्याया मरणोत्तरं स्थास्यति तदा तस्याधिकारो भविष्यति, यतः प्रश्नपत्रलिखितानामुपरिलिखितानामेवमुपरिलिखितवंशावलीषट्कलिखितानामन्येषां च पश्चिमदेशचलितशास्त्रानुसारेण ज्ञानकौमराख्यायाः पितुर्धनिनः केहरसिंहस्योत्तराधिकारित्वं न भवति, यतः पश्चिमदेशचलितशास्त्रानुसार्य्यपुत्रधनाधिकारिशृङ्खलायामेतादृशापुत्रसम्बन्धिनामुल्लेखाभावात्—इति मिथिलादेशचलितविवादचिन्तामणिविवादरत्नाकरविवादचन्द्रादिग्रन्थानुसारिणी पश्चिमदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थानुसारिणी च व्यवस्था।

अत्र प्रमाणम्—

भारते (१३।४५।१२) :—

स्त्रीणां[१] स्वपतिदायस्तु उपभोगफलः स्मृतः।
नापहारं स्त्रियः कुर्युः पतिवित्तात् कथञ्चन॥

अपहारमैच्छिकदानविक्रयादिकम्—इति विवादचिन्तामणि (पृ० २३८) लिखनम्॥ १॥

यथेष्टविनियोगार्थं तु कन्यायाः पितृधनग्रहणं दूरापास्तमेव—इति वीरमित्रोदय (पृ० ६५६) ग्रन्थलिखनम्॥ २॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥

इति विवादरत्नाकरवीरमित्रोदयादिग्रन्थधृतकात्यायनवचनम् (कास्मृ० ६२१)॥३॥

स्वपुत्रस्तदभावे पौत्रस्तदभावे साध्वी भार्य्या तदभावे दुहिता तदभावे माता तदभावे पिता तदभावे भ्राता तदभावे तत्पुत्रस्तदभावे आसन्न-

१. स्त्रीणां तु पतिदायाद्यमुपभोगफलं स्मृतम्—महाभा०।

सपिण्डस्तदभावे यथाक्रमं व्यवहितसपिण्डः—इत्यादि विवादचिन्तामणि-
(पृ० २४३)ग्रन्थलिखनम् ॥ ४ ॥

दुहित्रभावे दौहित्रो धनभाग्—इति मिताक्षरा(पृ० २२१) ग्रन्थ-
लिखनञ्चेति ॥ ५ ॥

दुहित्रभावे दौहित्रः—इति वीरमित्रोदयग्रन्थलिखनञ्चेति ॥६॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

सओयाल—

६१—यदि कोन ग्रहस्तेर कन्याके ताहार पिता-माता मूल्यादि ना लइया काहारो नफरेर सङ्गे विवाह देय, एवं विवाह देओय। कालिन ऐ कन्यार पिता-माता ऐ कन्याके दासि करिया देओयार कोनो लिखित पडित अथवा अङ्गिकार ना करे, तवे सेइ कन्या ओ ताहार गर्भजात सन्तानसकल यथाशास्त्र दासि ओ नफर हइते पारे कि ना ? एवं कोन शास्त्रानुसारे ए विषयेर निषेध कि विधिर व्यवस्था हय सेइ व्यवस्थार श्लोक ओ भाषाते विवरण अवगत हओया आवश्यक[1] इति ।

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यत्र कस्यचिद् गृहस्थस्य कन्याया विवाहस्तत्पित्रा मात्रा वा मूल्यादिकमगृहीत्वा कस्यचिन्नफरशब्दवाच्येनार्थाद्दासेन सह कारितः, एवं विवाहसमये तस्याः पित्रा मात्रा वा दासीत्वेन दानस्य किञ्चिल्लिखितादिकमथवा स्वीकरणं न कृतं स्यात्तत्र यदि प्रश्नपत्रलिखितगृहस्थशब्द[2](वाच्यः ?) कस्यचिद् दासो(न)भवति, तत्कन्यापि कौमारावस्थायां कस्यचिद् दासी न स्थिता तदा, यदि वा प्रश्नपत्रलिखितगृहस्थशब्देन (वाच्यः) कस्यचिद्दासो

---

१ आविस्वक—व्यप० । २. ०शब्देन कस्य०—व्यप० ।

भवति, तत्कन्यापि कौमारावस्थायां कस्यचिद्दासी स्थिता, कस्यचिद्दासेन सह विवाहे तस्याः स्वामिनो यद्यनुमतिस्तदा च सा परिणेतृदासेश्वरस्य दासी भवितुं शक्नोति। एवञ्च सत्येतत्पक्षद्वये तस्या गर्भजाताः सन्ताना अपि तत्परिणेतृदासेश्वरस्य दास्यो दासाश्च भवितुं शक्नुवन्ति, उपरिलिखित-प्रकारेण तस्या दासीत्वेन तद्गर्भजातसन्तानानामपि शास्त्रोक्तपञ्चदश-दासान्तःपातिगृहजातात्मकप्रथमदासत्वात्। यदि च सा कन्या कौमारा-वस्थायां कस्यचिद्दासी स्थिता किन्तु कस्यचिद्दासेन सह विवाहे तस्याः स्वा-मिनो नानुमतिस्तदा च सा कन्या परिणेतृदासेश्वरस्य दासी भवितुं न शक्नोति, किन्तु पूर्व्वस्वामिन एव दासी भवति; एवं सत्येतत्पक्षे गर्भ-जाताः सन्ताना अपि एकस्य दासोत्पन्नत्वेन द्वितीयस्य दास्युत्पन्नत्वेन च द्वाभ्यामेव स्वामिभ्यां विभज्य ग्रहीतव्या भवन्ति—इति वङ्गदेशचलित-विवादभङ्गार्णवक्रमसंग्रहादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात्।
यस्माद् भर्त्ता प्रभुस्तस्याः[१] स्वाम्यधीनः प्रभुर्यतः॥

इतिविवादभङ्गार्णव (१ विवा० पृ० ५३५ क)(दाय)क्रमसंग्रहादि-(दायक्र०पृ० ५४)ग्रन्थधृतकात्यायनवचनम् (कास्मृ० ७२५)।१।

सा च द्विविधा। कस्यापि न दासी, अन्यदासी च। तत्र पूर्व्वा दासोढात्वमात्रेणैव दासेश्वरस्य दासी, परा च तत्प्रभोरनुमतिसहकारेण अनुमता च न दासी—इति क्रमसंग्रहग्रन्थलिखनम् (पृ० ५४)।२।

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अन्ना[३]कालभृतस्तद्वदाहितः स्वामिना च यः॥
मोक्षितो महतश्चर्णाद् युद्धे प्राप्तः पणे जितः।
तवाहमित्युपगतः प्रव्रज्या[२]वसितः कृतः॥

---

१ तस्याम्—दाक्रसं०। २ ०प्रव्रज्यापसृत—नामसं०।

३ अशनादिभृतस्तद्वदाधत्तः स्वामिना च यः। ऋणाच्च मोक्षितोऽनल्पाद् युद्धप्राप्तः पणे जितः—नामसं०।

भक्तदासश्च विज्ञेयस्तथैव वडवाभृतः[1] ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः॥

इतिविवादभङ्गार्णव (१ विवा० ५१६ क) दायक्रमसंग्रहादि (दाक्रसं०—पृ० ५२) ग्रन्थधृतनारदवचनम् (नामसं० —पृ० ६६) ॥३॥ ० ॥ ० ॥

एवञ्च यद्यप्यननुमत्या[2] दासेन दासी परिणीता तदा च स्वस्वस्वामिनोरेव दासदास्यौ, तयोरपत्यन्तु द्वाभ्यामेव स्वामिभ्यां विभजनीयम्—इति (दाय)क्रमसंग्रहग्रन्थलिखनञ्चेति (पृ० ५५) ॥ ८ ॥ ० ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

६२—सदर देओयानि आदालतेर द्वितीय हाकिम श्रीयुत आलक सुन्दर रास साहेवेर हजुर हइते अप्राप्त-व्यवहार राजा शशीभूषणदेवरायेर पक्षे अशी ? कमलाकान्तचक्रवर्ति अपिलाण्ट गुरुगोविन्दचौधुरि रष्पाडण्टेर मकद्दमाय इङ्गरेजी १८२८ सालेर १३ माह सेतम्बर मतावक वाङ्गला १२३५ शालेर ३० माह भाद्र रोज शनिवारेर हओया रोवकारिर लिखित ऐ आदालतेर पण्डितगणेर नामे आएन्दा मिसिले जवाव दाखिल करणेर हुकुमे सओयाल—

सओयाल—

कागज-सकलेर द्वाराय पष्ट आछे ये वङ्गदेश निवासि राम शङ्कर राय नामिक एक व्यक्ति आपन जमिदारिर मध्ये एक ग्राम आपन माता राजराजेश्वरीर भरण ओ पोषणेर परिवर्त्ते याहा नगद निर्दिष्ट छिल आपन माताके एइ प्रकार ओ एइ नियमे सोपर्द्द करिल ये ऐ ग्रामेर विक्रय कवाला कृष्णप्रसादनन्दी एक

---

१ प्रव्रज्यापसृतः कृतः—नामसं० । २ यद्यनुमत्या—दाक्रसं० ।

व्यक्तीर विनामे लिखिया अन्य कोन व्यक्तिके ताहा विक्रय ओ हेवा ना करण, ओ ऐ राजराजेश्वरि आपन जीवद्दशा पर्य्यन्त ताहार उपस्वत्वे भोगवान थाकन, ओ ऐ मुसम्मातेर मृत्युर पर ऐ ग्राम ऐ रामसङ्करेर पुत्रेर हस्रोन सम्वलित आपन मातार स्थान हइते एक किता एकरारनामा, ओ कृष्णप्रसादनन्दि फरजि व्यक्ति हइते ऐ मुसम्मातेर लिखिया देओया एकरारनामार मजमुन मतो द्वितीय एक किता एकरारनामा लिखाइया लइल। तत् परे यखन सरकारेर वाकी खाजानार जन्ये समुदय महालेर, याहा ऐ रामशङ्कररराय ओ ताहार पुत्र मोहनचन्द्रेर नामे कालेकटरिर सिरस्ताते लेखाजाय, निलामेर इस्तहार कालेकटरि सिरस्ता हइते लटके, तखन ऐ राजराजेश्वरि ऐ रामशङ्करेर अभिप्राय ओ फरजि व्यक्ति कृष्णप्रसादेर सम्मतिते ये ग्राम ऐ रामशङ्कर आपन माता मुसम्मात राजराजेश्वरिके नगद ग्रास अच्छादनेर परिवर्त्ते दियाच्छिल द्वितीय एक व्यक्तिर हस्ते सम्यक प्रकारे विक्रय करिल। ओ ऐ कृष्णप्रसादनन्दिर नाम हइते कवाला लेखा गेल। अतएव जिज्ञासा करा याइतेछे ये ऐ रामशङ्करेर पुत्र मोहनचन्द्र प्राप्त व्यवहार थाकने, ओ द्वितीय विक्रीर सम्वन्धे ताहार अनुमति ना थाकने, ओ ऐ मोहनचन्द्रेर अप्राप्त-व्यवहारे ऐ द्वितीय विक्रिर सम्वन्धे उहार अनुमति थाकने, फरजी व्यक्ती कृष्णप्रसादनन्दिर लिखिया देओया द्वितीय विक्रयपत्र, याहा रामशङ्कर ओ ताहार माता मुसम्मात राजराजेश्वरिर अभिप्राय मते हइयाछे, वङ्गदेश चलित शास्त्रानुसारे सिद्धि ओ सङ्गत वटे कि ना इति।

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतआलकसुन्दरराससाहेवधर्म्माधिकरणलिखितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रश्नपत्रलिखितप्रकारकरामशङ्कररायकर्त्तृकस्वस्वत्वास्पदीभूतसराजकरस्थावरान्तर्गतैकग्रामसम्वन्धिप्राथमिकछलविक्रयस्यार्थात् स्वमात्रे राजराजे-

श्वर्य्यै यावज्जीवं तद्ग्रामोत्पन्नोपस्वत्वभोगार्थं तद्ग्रामसमर्पणस्य प्रश्नपत्रलिखितप्रकारकाभ्यां राजराजेश्वरीलिखितसंवित्पत्रकृष्णप्रसादनन्दिनामकव्यक्त्यन्तरलिखितसंवित्पत्राभ्यां राजराजेश्वर्य्यां यावज्जीवं तद्ग्रामोत्पन्नोपस्वत्वभोगोपयुक्तमात्रस्वत्वोत्पादकत्वपर्य्यवसायित्वेन तद्ग्रामसम्बन्धिन्यां भूमौ रामशङ्कररायस्य स्वत्वाविनाशकत्वात्, प्रश्नपत्रलिखितप्रकारेण राजराजेश्वर्य्यै तद्ग्रामसमर्पणेन रामशङ्कररायस्य तद्भूमौ स्वत्वविनाशकयोर्वास्तवं दानविक्रययोरनवगमाच्च, एवञ्च सति पितृस्वत्वे विद्यमाने पुत्रस्वत्वाभावबोधकवङ्गदेशचलितशास्त्रेण प्रश्नपत्रलिखितप्रकारेण तद्ग्रामसम्बन्धिन्यां भूमौ मोहनचन्द्रस्य पितू रामशङ्कररायस्य स्वत्वे विद्यमाने मोहनचन्द्रस्य स्वत्वोत्पत्तिर्न भवति। नहि राजराजेश्वरीलिखितसंवित्पत्रेण राजराजेश्वरीमरणोत्तरं मोहनचन्द्रस्य स्वत्वं रामशङ्करस्य स्वत्वविनाशो वा तद्ग्रामे तद्ग्रामोत्पन्नोपस्वत्वे वा भवति। उपरिलिखितप्रकारेण राजराजेश्वर्य्या यावज्जीवं तद्ग्रामोत्पन्नोपस्वत्वमात्रस्वामित्वेन तद्ग्रामस्वामित्वाभावात् स्वमरणोत्तरं तद्ग्रामोत्पन्नोपस्वत्वास्वामित्वात् राजराजेश्वरीलिखितैतादृशसंवित्पत्रस्य धर्म्मशास्त्रोक्तस्वत्वोत्पादकहेत्वनन्तःपातित्वाच्च। एवञ्च सति जीवन्त्यां राजराजेश्वर्यां रामशङ्कररायें च जीवति सति सर्व्वथैव तद्ग्रामस्य तद्ग्रामोत्पन्नोपस्वत्वस्य चास्वामिनो मोहनचन्द्रस्य तद्ग्रामसम्बन्धिद्वितीयविक्रये अनुमतेरनावश्यकत्वेन तस्यप्रासव्यवहारतायां तदनुमतावसत्यामप्राप्तव्यवहारतायां च तदनुमतौ सत्यामपि द्वितीयविक्रयस्य तद्ग्रामसम्बन्धिभूस्वामिरामशङ्कररायाभिप्रायेण कृष्णप्रसादनन्दिनामकव्यक्त्यन्तरानुमत्या चोपरिलिखितप्रकारेण यावज्जीवं तद्ग्रामोत्पन्नोपस्वत्वस्वामिराजराजेश्वरीकृतत्वेनैवं यदा राजग्राह्यकरग्रहणार्थं समुदायस्य सराजकरस्थावरस्य यत्तद्रामशङ्कररायतत्पुत्रमोहनचन्द्रयोर्नाम्ना केलटरीसंज्ञकराजस्थाने लिखितं तस्य निलामसंज्ञकविक्रयाज्ञा तत्स्थानाधिपतिना दत्ता, तदा उपरिलिखितप्रकारेण जातत्वेन च सिद्धेर्निष्प्रत्यूहत्वेन तत्प्रमाणभूतं कृष्णप्रसादनन्दिनामकव्यक्त्यन्तरनाम्ना लिखितं द्वितीयविक्रयपत्रं यत्तद्राजराजेश्वरीरामशङ्करोभयसम्मत्या जातं शास्त्रानुसारेण सिद्धं सङ्गतञ्च भवति, यतः स्वामिसम्मत्या अस्वामिकृतोऽपि विक्रयः शास्त्रसिद्धः—इति वङ्गदेशचलितमनुकुल्लूकभट्टकृतमन्वर्थमुक्तावली-

दायभागदायतत्त्वविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था —

अत्र प्रमाणम्—

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेत् ॥

इति मनुवचनम्(८,१६५) ॥ १ ॥

योगशब्दश्छलवाची । छलेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न तत्त्वतो, अन्यत्रापि निःक्षेपादौ यत्र छद्म जानीयात्,वस्तुतो निःक्षेपादि न कृतं तत्सर्व्वं निवर्त्तते । इति मन्वर्थमुक्तावल्यां (पृ० ३०३) कुल्लूकभट्टव्याख्यानम् ॥ २ ॥

पितर्य्युपरते पुत्रा विभजेयुर्धनं पितुः ।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते ॥

इति दायभाग(पृ० १३)दायतत्त्व(पृ० ३)विवादभङ्गार्णवादि(२ विवा० ५ क)ग्रन्थधृतदेवलवचनम् ॥ ३ ॥

सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥ इति मनुववचनम् (१०,११६) ॥ ४ ॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥

इति दायभागादि(पृ० ३५)ग्रन्थधृतनारद (१३।४२–४३)वचनम् ॥ ५ ॥

तथा च स्वामिनोऽनुमतिसत्त्वे तु अस्वामिकृतविक्रयोऽपि सिद्ध्यति व्यवहारोऽपि तथा—इति विवादभङ्गार्णव(१ विवा० ३०३ ख) लिखनञ्चेति ॥ ६ ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम्	**श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण	**श्रीरामतनुशर्म्मविद्यावागीशेन**

६३—रोवकारि मिसिल आदालत देओयानी सदर तारिख २० माह माइ सन १८२८ इ० मोतावक ८ माह ज्यैष्ठ सन १२३५ वाङ्गला रोज मङ्गलवार एइ आदालतेर द्वितीय हाकिम श्रीयुत आलक सुन्दर रास साहेवेर वैठके—

रत्नसिंह साएल

साएल हाजिर आसिल। साएलेर सओयाल एक आना छय दाम तेर कौडी नओ वुडिर। मकद्दमा ताहार त्रिगुण उपस्वत्व मवलग १३२।=॥।४ उनिष दामा तिन कौडीर तायदादे खास आपिल मञ्जुर करणेर विषय एलाके आजिमावादेर प्रविनसन कोर्टेर हाकिमगणेर नामे हुकुम सादर हओनेर प्रार्थनाय मसम्मात धुपु ओ फथेसिंह ओ नियधारिसिंह ओ धोकलसिंह ओ कानायासिंहेर पक्षेर आपन नामिक मोक्तारनामा ओ एइ सनेर फेरवओारि माहेर ९ तारिखेर लिखित अजिमावादेर आपील आदालतेर एक कीता रोवकारिर नकल ओ इं १८२२ शालेर डिसम्वर मासेर १६ तारिखेर लिखित जेला वेहारेर रेजष्टर साहेवेर डिगरिर नकल एक केता ओ इं० १८२५ शालेर माइ मासेर ११ तारिखेर लिखित ऐ जिलार जज साहेवेर डिगरिर नकल सहित ये गत दिवस हुजुरे दाखिल हइयाछिल अद्य दृष्टे आसिल। यथा शाएलेर सओयालेर सम्वन्धे चूडान्त हुकुम सादर हओनेर पूर्व्वे ए आदालतेर पण्डितदिगेर उपर सओयाल करा उचित वोध हइल, अतएव हुकुम हइल ये एइ रोवकारिर नकल ए आदालतेर पण्डितगणके एइ हुकुमे अर्पन करा जाय ये निचेर लिखित सओयालेर जवाव एक सप्ताह मध्ये दाखिल करेन।

सओयाल—यद्यपि जिले वेहार निवासिनी हिन्दु एक स्त्री आदालत हइते आपन पतिर हिस्या वावत एक आना छय दाम तेर कौडी नओ वुडी जमिदारिर डिगरि हासिल

करिया ऐ रकमेर भूमि सकल स्वतन्त्र करिया लओनेर ओ ऐ डिगरि मते ताहार उपर दखिल हओनेर अनुमति डिगरिते लिखा थाकनेओ आपन हिस्यार भूमि सकल पृथक करिया ना लइया हिस्यार मदी मते ताहार उपस्वत्व लइया पुत्र सन्तान ना राखिया मरे, एवं ऐ मृत स्त्रीर कन्या ओ कन्यार पुत्रगण आपनादिगके ऐ हिस्यार स्वत्वाधिकार ओ एवं ऐ स्त्रीर पतिर भ्रातार सन्तानरा ऐ हिस्या आवश्यक थाकन एजहारे ऐ मृत स्त्रीर कन्या ओ कन्यार पुत्रगणेर स्वत्वेर अस्वीकारे आपनादिगके ऐ रकमेर स्वत्वाधिकार करार देय—एमत अवस्थाय डिगरि हओया रकम वण्टक किम्बा अवण्टक बोध हवेक, ओ ऐ मृत स्त्रीर कन्या ओ दौहित्रगणके अथवा ताहार पतिर भ्रातार सन्तान-गणके अर्पिवेक इति ।

श्रीर्ज्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतआलकसुन्दरराससाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रभुकृतप्रश्नपत्रलिखितवृत्तान्ते यदि तत्प्रभुपत्रलिखितायाः स्त्रिया जीवतः पत्युरंशो विभक्तो जातः स्यात्तन्मरणानन्तरं तस्य पुत्रपौत्रप्रपौत्ररहितत्वेन तत्पतिभ्रातृपुत्रादिभिर्बलात्कारेण विभक्तं तत्पत्यंशं गृहीत्वा समुदायधनमस्माकं साधारणमेव, नात्र विभागो जातः, अतएवेयं[1] पत्यंशयोग्यं प्राप्तुं नार्हतीत्युक्त्वा[2] तस्यै विभक्तः पत्यंशो न दत्तश्चेत्तदा यदि सा धर्म्माधिकरणे निवेदनं कृत्वा स्वपत्युर्विभक्तांशस्य जयपत्रं प्राप्तवती, तज्जयपत्रलिखितधनस्य पृथक्कृत्य[3] ग्रहणस्यान्ते सति[4] तज्जयपत्रे लिखिते सत्यपि सा पृथक्-

---

१. °अत्र नेयं—व्यप० ।   २. प्राप्तं नार्हतीत्युक्त्वा न स वि०—व्यप० ।

३. पृथक०—व्यप० । ४. ग्रहणस्यान्तमतो तज्जयपत्रे लिखितायां सत्यामपि—व्यप० ।

कृत्य तद्गृहीत्वा तदुपयुक्तोपस्वत्वं गृहीत्वा च मृताचेत् तथापि तज्जयपत्र लिखितधनं विभक्तमेवावगम्यते। एवं[1] मृतायास्तस्याः स्त्रिया दुहितुस्त-दभावे दौहित्राणां तत्राधिकारस्तस्याः पत्युर्भ्रातृपुत्रादीनां नाधिकारः। यदि च तस्याः स्त्रिया जीवतः पत्युरंशो विभक्तो न जातश्चेत्तदा प्रभुकृत-प्रश्नपत्रलिखितप्रकारेण तया अविभक्तधने पतियोग्यांशस्थावरोत्पन्नोपस्व-त्वग्रहणेऽपि तज्जयपत्रलिखितधनमविभक्तमेवावगम्यते। एतत्पक्षे तद्धने तस्याः पतिभ्रातृपुत्रादीनामधिकारः, न तु तद्दुहितृणाम्, तदभावे दौहि-त्राणां वा—इति वेहाराख्यप्रदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमा-धवव्यवहारमयूखव्यवहारकौस्तुभमिताक्षराटीकासुबोधिनीव्यवहाराध्यायबाल-म्भट्टकृतमिताक्षराटीकादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु विषयतया व्यवस्थापनम्—इति मिताक्षरा (पृ० १६७) ग्रन्थलिखनम् ॥१॥

विभागशब्दस्त्वनेकस्वाम्यानां द्रव्यसमुदायविषयाणां तत्तदेकदेशे व्य-वस्थापने शक्तः—इति वीरमित्रोदय (पृ० ५२२) ग्रन्थलिखनम् ॥२॥

पत्न्यभावे दुहितरोऽपुत्रविभक्ता संसृष्टिधनभाजः (वीमि० पृ० ५५६)। *दुहितुरभावे दौहित्रः*—इति वीरमित्रोदयग्रन्थलिखनम् (पृ० ६६१)॥ ३॥

एवं दौहित्रभ्रातृसुतसमवाये मृतस्य विभक्तत्वे दौहित्रस्य बलवत्त्व-स्यशांहरणे सत्त्वेऽपि पिण्डादौ स एव बलवान्। अविभक्तत्वे (तु) तद्-भ्रातृसुतानामेवांशहरत्वादपि—इति व्यवहाराध्यायस्य मिताक्षराटीकायां बालम्भट्ट (पृ० ८२०) लिखनञ्चेति ॥ ४॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीहरिः शरणम्
श्रीरामतनुशर्म्मविद्यावागीशेन

---

[1] एत—व्यप०। [2] °तस विभक्तः—व्यप०।

६४—रोवकारि मिसिल आदालत दिमानि सदर तारीख ७ माह आगष्ट सन १८२८ अङ्गरेजी मतावक १४ माह श्रावण सन १२३(?) वाङ्गला रोज वृहस्पतिवार ओइ आदालतेर द्वितीय हाकिम श्रीयुत आलक सुन्दर रास साहेवेर वैठके—

गङ्गाधरवाचस्पति साएल

साएलेर उकील मुनसी फकिर महम्मद हाजिर आइलो। साएलेर हस्त हइते फतेहपुर परगणार मौजे आमरसिर वन्धक खालास विषये वारानसेर कोर्ट आर्पालेर हाकिमानेर हुकुमेर असम्मतिते ओ ताहार वन्धक हओनेर विषये एइ[1] आदालत हइते उचित हुकुम सादर हओनेर प्रार्थनाय अन्य हेतु सम्वलित साइलेर सओयाल आइ उकिलेर नामिक उकालतनामा ओ एइ सनेर आपरेल मासेर .... तारिखेर लिखित वारानशेर आपील आदालतेर रोवकारीर नकल ओ इं :८(?) सालेर आगष्ट मासेर .... तारिखेर लिखित जिला फतेपुरेर आदालतेर एक-किता रोवकारिर नकल सम्वलित याहा[2] एइ मासेर २ तारिखे दाखिल हइयाछिल, अद्य दृष्टे आसिल। यथा साइलेर सओयालेर सम्वन्धे हुकुम सादर हओनेर पूर्व्व शास्त्रेर विवरण ज्ञात हओन उचित वोध हइल, अतएव हुकुम हइल ये आदालतेर पण्डित-गण निचेर लिखित सओयालेर जवाव एक सप्ताह मध्ये दाखिल करेण।

सओयाल

यद्यपि वारानश देसेर कोन जमिदारि चारि सरीकेर मध्ये एकत्र ओ साधारणे थाके, ओ जमिदारीर सरीकगण मध्ये दुइ जने आपन २ अवण्टक हिस्या काहारोनिकट वन्धक राखे, तवे एइ प्रकार वन्धक वारानस देसेर चलित शास्त्रानुसारे सिद्ध वटे

---

१. राइ—व्यप०। २. माहा—व्यप०।

कि ना ? ओ ताहा सिद्धि हओन विषये अन्य सरिकेर अनुमति[1] आवश्यक कि ना इति ।

एतद्धर्म्माधिकरणद्वितीयाधिपतिश्रीयुतआलकसुन्दरराससाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यद्यपि वाराणसीप्रदेशीया काचित्सराजकरभूश्चतुर्णामंशिनां मध्ये एकत्र साधारणे वर्त्तते । अथ च सराजकरभुवोंऽशिनां मध्ये द्वावविभक्तस्वस्वांशं कस्यचिन्निकटे बन्धकीकृत्य स्थितः, तदैतादृशबन्धककरणमवशिष्टयोर्द्वयोरंशिनोरनुमतिं विना सिद्धं न भवति । अतएव तत्सिद्ध्या[2]ऽंशयन्तरानुमतिरावश्यकी—इति वाराणसीप्रदेशचलितमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

अविभक्तेषु द्रव्यस्य मध्यगत्वादेकस्यानीश्वरत्वात् सर्व्वाभ्यनुज्ञा अवश्यं कार्य्या । विभक्तेषु तु (उत्तरकालं विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्य्याय सर्वाभ्युनज्ञा न पुनरेकस्यानीश्वरत्वेन । अतो) विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्ध्यत्येवेति व्याख्येयः--इति मिताक्षरा (पृ० २००) ग्रन्थलिखनम् ॥ १ ॥ ० ॥ ० ॥ ० ॥

एइ सवाल सोलही अगस्ति १६ रोज शनिवार प्रहर पाँच घण्टाके वखत मिला, ओ एकैसा २१ अगस्ति रोज वृहस्पतिवार चारि घण्टाके ····· व्यवस्था दाखिल किया सिरस्तामों ।

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

———

१० अनुमतिर—व्य५० । २. सिद्धावंशयन्तरानुमतिः—व्य५० ।

नं० २५५३

६५—रोवकारि मिसिल आदालत देओयानि सदर तारिख ११ माह आगस्त सन १८२८ इङ्गरेजि मतावक २८ माह श्रावण शन १२३५ बाङ्गला रोज सोमवार ऐ आदालतेर हाकिम श्रीयुत कटवरट थरनेल शेलि साहेवेर बैठके—

जयरामधामि स्वयं ओ मृत वखोरिधामिर स्त्री दिपुधामिनिर अप्राप्तव्यवहार पुत्र रामचन्द्र धामिर पत्ते अलि प्रकारे—

आपिलाण्ट

मुशनधामि रष्पाडण्ट

स्वयं आपिलाण्ट ओ रष्पाडण्टेर उकिल मौलवि गोलाम एज-दानि हाजिर आसिल। ए मकर्द्दमा इं १८२७ सालेर २५ आगस्त मासेर हओ।। रायकारि लिखि। सावेक द्वितीय हाकिमेर हुकुम मते एइ मासेर सावेक ३ आ ५ तारिखे रोवकार हइया ओ जिलार आदालतेर दाखिल हओया कागज सकल १ लम्बर हइते तथाकार फयशला आ प्रवणसन कोर्टेर कागज सकल तथाकार फयशला ओ ए आदालतेर कागज सकल १ लम्बर हइते ३३ लम्बर तक पड गिया दिवा अवशान प्रयुक्त स्थकित छिलो, पुनराय अग्र उपस्थित हइया ए आदालतेर वाकि कागज सकल इं १८२७ शालेर २५ आगस्त मासेर लिखित सावेक द्वितीय हाकिमेर राय सम्वलित दृष्ट आसिल। जानागेल ये जिला वेहारेर जज साहेव ऐ जिलार आदालतेर पण्डित हइते व्यवस्था लआन परे आपिलाण्टेर पूर्व्व पुरुस भोलाधामि ओरफे लछुमन धामि ओ मृत वखारिधामिर दावि डिकरि करेन। प्रवनसन कोर्टेर हाकिमगण शास्त्रानुसारे भोलाधामि ओरफे लक्ष्मणधामिके मशम्मात नेवाजा मताफिया पुष्यपुत्र करण ओ मशम्मात मजकुरा वृत्ति रामशिला प्रभृति ऐ धामिके दान करणेर क्षमता ना थाकन ज्ञान करिया जेलार डिगरि रद्द करियाछेन। किन्तु

मकर्द्दमार कागजसकलेर मते जाना जाइतेछेना ये ए विषयेर कोन एक व्यवस्था कोर्ट आपिलेर पण्डित हइते लओया गियाछे। ओ ए आदालतेओ एखन पर्य्यन्त एइ आदालतेर पण्डितगण हइते कोन व्यवस्था दाखिल हय नाइ। अतएव ए मकद्दमा।)र चूडन्त हुकुम सादर हओयार पूर्व्वे एइ आदालतेर पण्डितगण हइते व्यवस्था लओन उचित बोध हइया, हुकु(म) हइल ये एइ रोवकारिर नकल तिन आदालतेर कागजसकल सम्वलित एइ आदालतेर पण्डितगणके समर्पण कराजाय। उचित ये एइ आदालतेर पण्डितगण तिनो आदालतेर नथि विलक्षण अनुमादने दृष्टि करिया जेला वेहारेर चलित शास्त्रानुसारे एइ विषयेर व्यवस्था दाखिल करेण ये प्रकृतार्थे मसम्मात नेवाजोके भोला ओरफे लक्ष्मणधामिके पुष्यपुत्र लओन ओ ताहाके वृत्ते रामशिला प्रभृति हेवाकरणेर क्षमता छिल कि ना ताहा दाखिल हओनेर पर ये हुकुम इनसाफेर उपयुक्त हय सादर हइवेक इ त।

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरनेलसिलीसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं चावलोक्य विविच्य च[1] यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

नेवाजोनाम्न्या लक्ष्मणधामिप्रसिद्धभोलाधामिनाम्नो दत्तकपुत्रत्वेन ग्रहणे क्षमता वास्तवं नासीत्, भर्त्तुरनुमतिं विना स्त्रिया दत्तकपुत्रग्रहणानधिकारात्, प्रभुसमर्पितपत्रजातान्तर्गतैकस्मादपि पत्रात्तस्या नेवाजोनाम्न्या दत्तकपु(त्र)ग्रहणाधिकारप्रयोजकभर्त्रनुमतेरनवगमात्, वरं तत्पत्रजातान्तर्गताष्टत्रिंशदङ्काङ्कितकोर्टापीलाख्यधर्म्माधिकरणीयविचारपत्रेणैवं जिलाख्यधर्म्माधिकरणीय(त)सम्बन्धिप्रश्नपत्राभ्यामथ च जिलाख्यधर्म्माधिकरणीयपत्रजातान्तर्गतसप्तविंशत्यङ्काङ्कितकोर्टापीलाख्यधर्म्माधिकरणीयजयपत्रालिखित-

१. त—व्यप०।

—तद्विवादप्रत्यर्थिनी नेवाजोनाम्नी दत्तोत्तरतात्पर्य्यार्थेन च भर्त्रनुमत्यभावस्य निश्चितत्वेनावगमात्। एवं तस्या नेवाजोनाम्न्या रामशिलात्वृत्तिप्रभृतिधनस्य तस्मै लक्ष्मणधामिप्रसिद्धभोलाधामिनाम्ने[1] दानकरणक्षमतापि वास्तवं नासीत् तत्पत्र जातान्तर्गतैतद्धर्म्माधिकरणार्थिनिवेदनपत्रेणैवं कोटापीलाख्यधर्म्माधिकरणीयजयपत्रेणाथ च एतद्धर्म्माधिकरणीयपञ्चविंशत्यङ्काङ्कितैतद्धर्म्माधिकरणप्रत्यर्थिनिवेदनपत्रेण च विवादास्पदीभूतस्य रामशिलात्वृत्तिप्रभृतिधनस्य तस्या नेवाजोनाम्न्याः पतिधनत्वेनावगमाद् अथ च तत्पत्रजातान्तर्गतैतद्धर्म्माधिकरणीयचतुरङ्काङ्कितमाधवरामनामकार्थिसम्बन्धिविवादनिविष्टनेवाजोनाम्नीप्रत्यर्थिनीदत्तोत्तरपत्रेणैवं कोटापीलाख्यधर्म्माधिकरणीयपञ्चविंशत्यङ्काङ्कितैतद्धर्म्माधिकरणप्रत्यर्थिनिवेदनपत्रेण च विवादास्पदीभूतरामशिलात्वृत्तिप्रभृतिधनस्य तस्या नेवाजोनाम्न्याः पत्युः क्रमागतत्वेनावगमाच्च। [2]यतस्तदुपरिलिखितप्रकारकपतिधनस्योत्तराधिकारित्वेन पत्नीसंक्रान्तत्वेप्यदृष्टार्थं विना तदन्तर्गतकिञ्चिद्धनस्यापि पत्न्या दानानधिकारः। प्रकृते तु तत्पत्रजातान्तर्गतजिलाख्यधर्म्माधिकरणीयचतुर्विंशत्यङ्काङ्कितलक्ष्मणधामिप्रसिद्धभोलाधामिनामकोद्देश्यकदानपत्रेण विवादास्पदीभूतधनस्यादृष्टार्थकदानानवगमाद् वरं विवादास्पदीभूतोपरिलिखितप्रकारकसमस्तपतिधनस्य स्वेच्छया स्वाभिप्रायेण च नेवाजोनाम्नीकर्त्तृकदानावगमाच्च—इति वेहाराख्यप्रदेशचलितदत्तकमीमांसादत्तकचन्द्रिकादत्तकदीधितिमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः—इति दत्तकमीमांसा(पृ० ७)दत्तकचन्द्रिका(पृ० ३) दत्तकदीधितिप्रभृतिग्रन्थधृतवशिष्ठवचनम् ॥ १ ॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणात् क्षान्ता दायादा उर्द्ध्वमाप्नुयुः ॥

---

१. °धाम०—व्यव० । २. यतदुपरि०—व्यव० ।

इति वीरमित्रोदयादि(वीमि० ख पृ० ६२७)ग्रन्थधृतकात्यायन(कास्मृ० ६२१)वचनम् ॥ २ ॥

स्त्रीणां[1] स्वपतिदायस्तु उपभोगफलः स्मृतः ।
नापहारं स्त्रियः कुर्य्युः पतिवित्तात्[2] कथञ्चन ॥

इति वीरमित्रोदयादि(वीमि० ख पृ० ६२८)ग्रन्थधृतभारत(१३।४७।२४) वचनञ्चेति ॥ ३ ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

नं० २६८४

६६—रोवकारि मिसिल आदालत देओयानी सदर तारिख १९ माह आगस्त सन ८२८ इं मताबक माह ५ भाद्र सन १२३५ बाङ्गला राज मङ्गलवार ऐ आदालतेर पञ्चम हाकिम श्रीयुत रावरट हालडन राटार साहेवेर वैठके ।

राजा गिरीशचन्द्रराय आपिलाण्ट

मृत राजा ईशानचन्द्रदेवरायेर अप्राप्तव्यवहार पुत्रगण राजकोङर नरहरिचन्द्रदेवराय प्रभृतिर उछि राजा उमेशचन्द्रराय—
रेष्पाडण्ट—

आपिलाण्टेर उकिल मुनसि गोलाम मण्डल, रेष्पाडण्टेर उकिल सदासुक पण्डित हाजिर आसिल। एइ मकद्दमा कल्य रोवकार हइया प्रविशन कोटेर कागजसकल १ लम्वर हइते तथाकार फयशला पर्य्यन्त ओ ए आदालतेर दाखिल हओया

---

१. स्त्रीणां तु पतिदायाद्यनुपभोगफलं स्मृतम्—भार० । २. °पतिवृत्तात्—व्यप० ।

आरसि[1] मजुयात पडागिया दिवा अवशान प्रयुक्त स्थकित स्थिल। पुनराय अद्य उपस्थित हइया ए आदालते दाखिल हइया जवाव दृष्ट आसिल। देशेर सर्व्वकालेर डाँडा आछे ये हिन्दु जाति ये पितार मृत्युर परे ताहार धन ओ वस्तु उत्तराधिकारिगणेर मध्ये वण्टक हय। किन्तु ताहार वहिर्भूत उभयेर पूर्व्व पुरुष मृत राजा कृष्णचन्द्रराय आपन जीवद्दशाय कोटेर नथिते दाखिल हओया हेवानामाय आपन समुदाय वस्तु अन्य पुत्रगणेर नैराशे आपिलाण्टेर पितामह ज्येष्ठ पुत्र राजा शिवचन्द्ररायके लिखिया दियाछे। यद्यपि ऐ राजा हइते देशेर ओ नियमेर डाँडार वहिर्भूत हइयाछे, तथा[2] च राजार दानकारण ओ हेवानामा लिखिया देओनेर क्षमता ताहाके छिल। किन्तु यथा ऐ हेवानामाते लेखा गियाछे ये कोङर शम्भुचन्द्रदेवरायेर अधिक पुण्य शालियाना मवलग १५००० हाजार टाका ओ कोङर महेशचन्द्रदेवरायेर शालियाना मवलग १०००० हाजार टाका ओ कोङर नरहरिचन्द्रदेवराय अप्राप्तव्यवहार प्रभृतिर पिता कोङर ईशानचन्द्रदेवरायेर[3] शालिआना मवलग १०००० हाजार टाका ओ मृत भैरवचन्द्रदेवरायेर पुष्यपुत्र माधवचन्द्र देवरा(ये)र २५०० आडाइ हाजार टाका ओ मृत कोङर हरचन्द्रदेवरायेर पोष्यपुत्र यज्ञचन्द्ररायेर[4] शालिआना मवलग २५०० आडाइ हाजार टाका मशाहरा देयाइया पाइवेन इति, ओ हेवानामार मजमुनेर द्वाराय राजार आकांक्षा स्पष्ट वोध हइतेछेना ये मशाहरा-पाउयागणेर मृत्युर पर ताहादिगेर उत्तराधिकारिगण मशाहरा देइया पाइवेन, किम्वा वन्ध हइवेक। ओ आमार वुद्धे आइसे ये अन्य पुत्रगणेर जन्ये येसकल मशाहरा नियुक्त राखियाछे[5] ताहा फलितार्थे जामिदारि[6] प्रभृतिर अंशेर वदले ये ताहारो ओहार स्वत्वाधिकार छिल, हइयाछे। ओ ऐ हेतुते ऐ मशाहरा

१. आरजि—इति साधीयान् पाठः। २. तत्रा च—व्यप०।
३. देवराय—व्यप०। ४. यज्ञचन्द्रराय शलि०—व्यप०।
५. रागिया छे—व्यप०। ६. जमिदारिरि प्रभृ०—व्यप०।

प(।)इया गणेर उत्तराधिकारिगणसकल आपन आपन पूर्व्व पुरुष-गणेर सत्वे नियुक्त हओया मशहरा, याहा उहादिगेर पूर्व्व पुरुष-गणेर जमिदारि प्रभृतिर हिस्यार वदले वटे, पाओनेर वलवान स्वत्वाधिकारि वोध हय। किन्तु ऐ हेवानामाय मशहरार विस्तारित लेखा ना थाकन सन्देह प्रयुक्त ये ऐ मशहरासकल ताहा पाइयागणेर जीवद्दशा पर्य्यन्त वहाल थाकिवेक, किम्वा ताहारदिगेर मृत्युर पर ओहादिगेर उत्तराधिकारिगणकेओ अर्शिवेक। ऐ विषयेर उचित हुकुम सादर हओया अनुचित। अतएव चूडान्त हुकुम सादर हओनेर पूर्व्व सन्देह छेदनार्थे एइ आदालतेर पण्डितगण हइते एइ विषय जिज्ञासा करण उचित हइल ये यद्यपि मृत राजा कृष्णचन्द्रायेर अन्य पुत्रगण पितृ-जमिदारिर प्रभृति मालामालेर अंश हइते नैराश हइवेन, ओ जमिदारि प्रभृतिर अंशेर वदले उहार दिगेर जन्ये मशाहेरा नियुक्त हइल, ए प्रयुक्त मशाहेरा पाओइयागणेर जीवद्दशा तक, किम्वा ताहारदिगेर मृत्युर परे उहादिगेर उत्तराधिकारीगणकेओ ऐसकल मशाहेरा अर्पन पण्डितगणेर विवेचनाय हय। उचित ये हेवानामार मजमुन सुन्दर प्रकार ज्ञात हइया ऐ विषयेर जवाव आएन्दा मङ्गलवारेर दश घण्टा पर्य्यन्त दाखिल करेन। अतएव हुकुम हइलो ये एइ रोवकारिर नकल हेवानामा सहित पण्डितगणके अर्पन करा जाय ओ अद्य मकद्दमा स्थकित थाके इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणपञ्चमाधिपतिश्रीयुतरावर्टहालडनराटरिमाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य तत्समर्पितदानपत्रार्थमवगत्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि मृतस्य राज्ञः कृष्णचन्द्ररायस्यान्ये ये पुत्राः पैतृकसराजकरभू[1]-

१. °सरजकर°—व्यप०।

प्रभृतिधनांशान्निरस्ता[1]: अथ च सराजकरभूप्रभृतेरंशविनिमये तेषां प्रभुसमर्पितविचारपत्रलिखितप्रकारेण वार्षिकं नियुक्तम्। अतो वार्षिकग्राहिणां मरणानन्तरं तेषामुत्तराधिकारिणामपि तत्समस्तवार्षिकसमर्पणमस्मद्विवेचने सिद्धं भवति, यतः प्रभुसमर्पितदानपत्रेण मृतराजकृष्णचन्द्ररायकर्तृकराजशिवचन्द्ररायोद्देश्यकस्वत्वास्पदीभूतसराजकरभूप्रभृतिधनदानावगमात्। तत्र यदि राजशिवचन्द्ररायमरणानन्तरं तदुत्तराधिकारिणां तद्दानाधीनराजशिवचन्द्ररायस्वत्वास्पदीभूतसराजकरभूप्रभृतिधनाधिकारस्तदा तद्दानपत्रलिखितवार्षिकदानाधीनदानपत्रलिखितवार्षिकग्राहिस्वत्वास्पदीभूतवार्षिकधने तेषां मरणानन्तरं तद्वार्षिकग्राह्युत्तराधिकारिणामप्यधिकारस्य शास्त्रसिद्धत्वाद्, दानस्य उभयत्र तुल्यत्वाद् वार्षिकस्य तेषां सराजकरभूप्रभृतिधनांशविनिमयत्वात्। यतस्तद्दानेन वार्षिकग्राहिणां स्वत्वोत्पत्तिरत एव तदुत्तराधिकारिणां तद्वार्षिकस्य दायत्वेन स्वत्वोत्पत्तेर्निष्प्रत्यूहत्वात्। अथ च दानपत्रलिखितप्रकारेण स्वपुत्रभैरवचन्द्रदेवस्य औरसपुत्रापेक्षया जघन्यदत्तकपुत्रमाधवचन्द्रदेवसंज्ञकस्वपौत्रोद्देश्यकवार्षिकदानेन स्वपुत्रहरचन्द्रदेवस्य दत्तकपुत्रयशचन्द्रदेवसंज्ञकस्वपौत्रोद्देश्यकवार्षिकदानेन च एवं मया यो नियमः कृतस्तस्योल्लङ्घनं तैरेवं त्वया च कदाचिदपि न कर्त्तव्यम्; यदि कश्चित् कदाचिदेतन्नियमस्यान्यथाचरणोद्युक्तस्तदा तदन्यथाचरणं लोकतो धर्म्मतश्च राजसन्निधौ चाग्राह्यमितिदानपत्रलिखनेन च मृतस्य राज्ञः कृष्णचन्द्ररायस्य तथाभिप्रायावगमाच्च—इति वङ्गदेशचालितमनुदायभागादिग्रन्थानुसारिणी व्यवस्थेति—

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनुवचनम्। (५।१५२)॥ १॥

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः।

प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥—इति मनुवचनम्। (१०।११५)

[1] °निरस्तः—व्यप०।

ततश्च पूर्व्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः—इति दायभाग(पृ० ५)ग्रन्थलिखनञ्चेति ।

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

नं० २५९०

६७—रोवकारि मिसिल आदालत देओयानि सदर तारिख २५ माह सेतम्बर सन १८२८ इं मतावक ११ माह आश्विन सन १२३५ वाङ्गला रोज वृहस्पतिवार ऐ आदालतेर प्रथम हाकिम श्रीयुत उलियम नसष्टर साहेवेर वैठके ।

जयमणिदेव्या प्रभृति	आपिलाण्टगण
फकिरचन्द्रचक्रवर्त्ति	रेस्पाण्डण्ट

आपिलाण्टगणेर उकिल मुनशी होसेन आलि ओ रेस्पाण्डण्टेर उकिलगण मुनशी दादार वक्स ओ प्राणचन्द्र चट्टोपाध्याय हाजीर आसिल। ए मकद्दमा एइ सनेर आगष्ट मासेर २६ तारीखे आमार वैठके रोवकार हइया ए मकद्दामार खास आपिल मञ्जुरिर हेतु सम्वलित इं १८२३ सालेर नवम्वर मासेर ८ ओ इं १८२४ सालेर जानओरि मासेर ७ तारिखेर लिखित ए आदालतेर रोवकारि-सकलेर दृष्टे वोध हइल ये ए मकद्दमा शास्त्रे सम्पर्क राखन ओ सास्त्रेर हेतुसकल यथार्थ विवेचना ना हओन दृष्टे ताहार आपिल मञ्जूर हइयाछे। अतएव समुदय कागज दृष्ट हओनेर पूर्व्वे ऐ आदालतेर पण्डितगण हइते निम्नेर सओयालसकलेर जवावे व्यवस्था लओन उचित वोध हइया हुकूम हइल ये एइ रोवकारिर नकल ए आदालतेर पण्डितगणके समर्पण करा जाय, ये ऐ

सञोयालसकलेर जवाव वङ्गदेश चलित शास्त्रानुसारे एक सप्ताह मध्ये दाखिल करेण।

प्रथम सञोयाल। यद्यपि एक व्यक्ति पैतृक देवोत्तर भूमिसकल ओ देवसेवार पालि राखिया आपन स्त्री ओ पुत्र ओ पुत्रवधुर समक्षे मरे, ओ कथक दिवसान्तर मृत व्यक्तिर पुत्र ओ माता ओ स्त्री राखिया निसन्तान मरे, तवे दुइ स्त्रिलोक अर्थात् सासुडि ओ पुत्रवधुर मध्ये के ऐ त्यक्त धनेर स्वत्वाधिकारिणी हइवेक।

द्वितीय सञोयाल। यदि स्यात् मृत व्यक्तिर पुत्रेर मृत्युर पर सासुडि ओ पुत्रवधु अनक्य प्रयुक्त ऐ सकल देवोत्तर भूमि सेवार पालि हिस्या करिया लइया ताहार नादावि आपनादिगेर हिस्या दान विक्रयेर क्षेमतार नियमे लिखित ओ पडित करिया थाके, तवे शास्त्रानुसारे देवोत्तर भूमि ओ ठाकुरसेवार पालि वावत एमत लिखित पडित सिद्धि कि ना ?

तृतीय सञोयाल। यदि दुइ स्त्रीलोक नादाविर लिखित पडितेर अनुसारे देवोत्तर भूमिसकल ओ सेवार पालिते दखिल हइया ऐ सासुडि आपन पुत्रवधुर जिवद्दशाते आपन अंशेर देवोत्तर भूमिसकल ओ सेवार पालि काहारो निकट वन्धक राखेन, किम्वा आपन परकालेर कर्मेर पैतृके अथवा पतिर ऋण परिशोधनार्थ काहार हस्ते विक्रय करिया थाके, तवे एमत विक्रयसिद्धि इहवे कि ना इति।

श्रीर्ज्जयतितराम्

जवावव्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिश्रीयुतअलियमनसष्टरसाहेवधर्म्माधिकरणलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

यद्यप्येकः कश्चित् पित्राद्यायत्तभूतां समस्तां देवत्रभूमिमथ च देव-सेवायाः कालिकांशं च संरक्ष्य विद्यमानायां स्वपत्न्यां स्वपुत्रे च विद्यमाने पुत्रवध्वां च विद्यमानायां मृतः, ततः किञ्चित्कालानन्तरं मृतव्यक्तेः पुत्रोऽपि स्वमातरं स्वपत्नीं च संरक्ष्य निःसन्तान एव मृतः, तदा द्वयोः श्वश्रूपुत्रवध्वोर्म्मध्ये पुत्रवधूरेवोपरिलिखितप्रकारकधनेऽधिकारिणी भवति, यत उपरिलिखितप्रकारेण पितृमरणोत्तरं तत्त्यक्तधने तत्पुत्रस्याधिकारे[1] जाते सति तद्धनं तत्पुत्रस्यैव जातम्। अतस्तन्मरणोत्तरं तदुत्तराधिकारिणामेव तद्धनाधिकारः। तत्र च तदुत्तराधिकारिणां मध्ये तस्य प्रश्नपत्र-लिखितप्रकारेण पुत्रपौत्रप्रपौत्राभावे तत्पत्न्या एव प्राधान्यमिति—

अत्र प्रमाणम्—

तत्र प्रथमं पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रः—इति श्रीकृष्णतर्का-लङ्कारकृतदायभागटीका(पृ० २१८)लिखनम् ॥ १ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादिग्रन्थ-(दाभा० पृ० १५१)धृतयाज्ञवल्क्यवचनम् (२।१३५) ॥ २ ॥ ० ॥

द्वितीयप्रश्नस्योत्तरम्—

यद्यपि मृतव्यक्तेः पुत्रस्य मरणानन्तरं श्वश्रूपुत्रवध्वोरनैक्येन तत्समस्त-देवत्रभूमिमथ चदेवसेवायाः कालिकांशं च विभज्य ताभ्यां गृहीत्वा तस्य देवत्रभूम्यादेः स्वस्वेतरांशप्राप्त्यनिच्छया कल्पितस्वस्वांशदानविक्रयक्षमता-नियमेन लिखितं कृतं स्यात्तदा शास्त्रानुसारेण देवत्रभूमेर्देवसेवायाश्च कालिकांशस्यैतादृशं लिखितं सिद्धं भवितुं न शक्नोति, प्रथमप्रश्नोत्तरलिखित-प्रकारेण पुत्रवध्वा एव पतित्यक्तधनाधिकारित्वेन तस्याश्च तद्धने स्वेच्छया-दानविक्रयैतादृशविभागकरणक्षमताविरहाद् देवत्रभूमौ देवभिन्नानां केषा-ञ्चिदपि स्वत्वाभावाच्चेति—

---

१. अधिकारो०—व्यप०।

अत्र प्रमाणम्—

देवस्वं ब्राह्मणस्वं वा लोभेनापहिनस्ति यः ।

स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥—इति मनु (११।२६) वचनम् ॥ १ ॥

प्रतिमादिदेवतार्थमुत्सृष्टं[1] *धनं देवस्वम्*—इति कुल्लूकभट्ट (पृ० ४३०) व्याख्यानम् ॥ २ ॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः ॥—इति दायभागादि (पृ० १७१)ग्रन्थधृतकात्यायन(कास्मृ० ६२१)वचनम् ॥३॥०॥०॥

तृतीयप्रश्नस्योत्तरम्—

यदि द्वे स्त्रियौ[2] स्वस्वेतरांशप्राप्त्यनिच्छया लिखितानुसारेण समस्त-देवत्रभूमौ[3] देवसेवांशे चायत्तत्वं सम्पादितवत्यौ[4], तयोर्मध्ये श्वश्र्वा जीवन्त्यां स्वपुत्रवध्वां तल्लिखनानुसारेण स्वांशभूतत्वेन मन्यमाना या देवत्रभूमेस्तथा-विधस्य देवसेवांशस्य च कस्यचिन्निकटे बन्धकमथवा स्वस्वर्गार्थोल्लेखे-नाथवा पतिकृतऋणापाकरणार्थोल्लेखेन विक्रयं वा कृतवती तद्दैतादृशविक्रय-करणं सिद्धं भवितुं न शक्नोति, प्रथमप्रश्नोत्तरलिखितप्रकारेण तस्यास्तद्ध-नस्वामित्वाभावाद्, द्वितीयप्रश्नोत्तरलिखितप्रकारेण स्वस्वेतरांशप्राप्त्यनिच्छा-लिखितस्यासिद्धत्वेन तल्लिखितानुसारेणापि तस्यास्तद्धनस्वामित्वाभावाच्च-इति वङ्गदेशचलितमनुकुल्लूकभट्टकृतमन्वर्थमुक्तावलीदायभागश्रीकृष्ण-तर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेत् ॥—विवादभङ्गार्णवादि (१ विवा ३१७ ख)ग्रन्थधृतकात्यायन(कास्मृ०—६१२)वचनम् ॥ १ ॥

---

१. ०देवतातदर्थमु०—व्यप० । २. स्त्रियो०—व्यप० ।

३ देवत्र देवत्र भूमो—व्यप० । ४. संपादितवत्यो०—व्यप० ।

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ।।-इति मनु (८।१६६)
वचनञ्चेति ।। २ ।।

श्रीर्ज्जयतितराम् **श्रीहरिःशरणम्**
श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

६८—रोवकारि मिसिल आदालत देओयानि सदर तारिख १ माह दिशम्वर सन १८२८ इं मतावक १७ माह अग्रहायण शन १२३५ वाङ्गला रोज सोमवार ऐ आदालतेर हाकिम श्रीयुत कटवरट थरलेन सिलि साहेवेर वैठके ।

मृत वावु अभयनारायणसिंहेर स्त्री मुसम्मात पुनितकोङर ओ कन्या मुसम्मात अस्यमेधकोङर— साएल ।

साएलानेर उकिलगण मुनशी दादार वकस ओ मुनशी महम्मद आलि खा ओ वावु रूपनारायणसिंह, द्वितीय पक्षेर उकिल सदासुक पण्डित हाजिर आसिल । एइ सनेर नवम्वर मासेर २६ तारिखे उभयेर दाखिल करा सओयाल प्रभृति ताहार सम्पर्कीय कागजसकल आमार वैठके उपस्थित हइया दिवा अवसान प्रजुक्त स्थकित छिल, अद्य पुनराय रोवकार हइया ऐ कागजशकल एइ सनेर २७ आगस्त ओ २५ सितम्वर मासेर लिखित द्वितीय हाकिम ओ पञ्चम हाकिमेर राय सम्वलित दृष्टे आसिल । तत् परे वावु रूपनारायणसिंहेर उकिल इं १८२७ शालेर मार्च्च मासेर २४ तारिकेर निवेदित आजिमावादेर प्रविनसन कोर्टेर दाखिल हओया जेला त्रिहोतेर कालेक्टर साहेवेर सओयालेर एक किता नकल ओ इङ्गरेजि छय किता चिटिर नकल दाखिल करिल, पडागेल। यथा

एइ मकद्दमार चूडन्त हुकुम सादर हओनेर पूर्व्वे ए आदालतेर पण्डितगण हइते व्यवस्था लओन उचित हइल अतएव हुकुम हइल ये ए आदालतेर दाखिल हओया कागजसकलेर सम्वलित एइ रोवकारिर नकल एइ हुकुमे ए आदालतेर पण्डितगणके समर्पण करा जाय ये ए आदालतेर पण्डितगण ऐ कागजसकलेर दृष्टे मैथिल देसेर चलित शास्त्रानुसारे निचेर लिखित सओयालेर जवाव एक सप्ताह मध्ये दाखिल करेण।

सओयाल —

चौधरिगी आजितसिंहेर तिन पुत्र। प्रथम वावु दिगविजयसिंह, द्वितीय वावु सर्व्वजिनसिंह, तृतीय वावु उमराओसिंह छिल। उमराओसिंह तृतीय पुत्र निस्वन्तान मरिल। वावु दिगविजयसिंहेर पुत्र वावु भुपनारायनसिंह ओ वावु सर्व्वजितसिंहेर पुत्र वावु रञ्जीतसिंह उत्तराधिकारित्व स्वत्वे आपनर पितार माल ओ मिलकियते भोगवान् छिलेन। ताहारद्विगेर मृत्युर पर वावु भुपनारायणसिंहेर पुत्र वावु अभयनारायणसिंह आ वावु रञ्जितसिंहेर पुत्र वावु रूपनारायणसिंह आपनर पितार त्यक्त धन ओ वस्तुते दाखलकार हइया वावु अभयनारायणसिंह मुसम्मात पुनितकाङर स्त्री ओ मुसम्मात अस्यमेधकाङर कन्या, आ तृतीय पुरुसिय खुडतात भ्राता वावु रूपनारायणसिंहके राखिया मृत्यु हय। अतएव जिज्ञासा जाय जे यद्यपि वावु अभयनारायणसिंह आपन मृत्युर पूर्व्वे तालुक केवल नारायणपुर प्रभृतिर अर्द्धेक-हिस्यार उपर आपन खुडतुता भ्राता वावु रूपनारायणसिंहेर साधारणे दाखिल थाकिया मरिया थाके तवे ऐ मृत व्यक्तिर त्यक्त वस्तु कोन व्यक्तिके अर्थात् स्त्री, किम्वा कन्या, किम्वा वावु रूपनारायणसिंहके असिवेक। ओ यद्यपि ऐ मृत व्यक्तिर त्यक्त अर्द्धेक हिस्या ताहार मृत्युर पूर्व्वे विभाग हइया ऐ मृत व्यक्ति विभाग अनुसारे ताहार उपर भोगवान हइया मरिया थाके तवे ऐ व्यक्तिगणेर मध्ये कोन व्यक्तिके मृत व्यक्तिर त्यक्त वस्तु असिवेक इति।

श्रीजयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरलेनसिलीसाहेवधर्म्माधिकरण लिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद् विवादविषयनिविष्ट पत्रजातं चावलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि मृतबाबुअभयनारायणसिंहः स्वमृत्योः पूर्व्वं केशवनारायणपुर प्रभृतिसराजकरस्थावरस्यार्द्धांशे[1] स्वपितृव्यपुत्रबाबुरूपनारायणसिंहस्य साधारण्येन भुञ्जानस्सन् मृतस्तदा तस्या एव मृतव्यक्तेस्त्यक्तं केशवनारायण पुरप्रभृतिसराजकरस्थावरस्यार्द्धांशं[2] बाबुरूपनारायणसिंहः सपिण्डत्वेन साधारण्यप्रतियोगित्वेन च प्राप्तुं शक्नोति, प्रभुसमर्पितपत्रजातैर्विवादास्पदीभूत क्रमागतसराजकरस्थावरान्तर्गतकेशवनारायणपुरप्रभृतिग्रामाणां तत्तद्ग्रामा न्तर्गताया भूमेर्वा अंशपरिच्छेदानवगमाद् वरं तत्पत्रजातान्तर्गतारेजीशब्द प्रतिपाद्यपञ्चविंशत्यधिकाष्टादशशताब्दीयनवम्बरमासीयचतुर्थदिवसलिखित तीरभुक्तिप्रदेशीयकलकटरपदाभिषिक्तसाहेवलिखितविचारपत्रेणैवं[3] सप्त विंशत्यधिकाष्टादशशताब्दीयापरेलमासीयपञ्चमदिवसलिखितकलकटरपदा भिषिक्तसाहेवकृतनिवेदनपत्रेण च विवादास्पदीभूतस्य केशवनारायणपुर प्रभृतिसराजकरस्थावरस्याभयनारायणसिंहरूपनारायणसिंहयोस्साधारण्याव गमाद् एतादृशक्रमागतसाधारणधने पत्नीदुहित्रोरधिकारप्रतिपादकं मिथि लादेशचलितशास्त्राभावाच्च। यदि च तस्या एव मृतव्यक्तेस्त्यक्तार्द्धांशो विभक्तः, सा च मृतव्यक्तिर्विभागानुसारेण तदुपरि आयत्तत्वं सम्पाद्य मृता, तदोपरिलिखितानां मध्ये पुनीतकोमराख्या, तत्पत्नी, तस्या एव मृतव्यक्ते स्त्यक्तधनं प्राप्तुं शक्नोति, पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य विभक्तधने पत्न्याः प्रधानाधिकारित्वात्[4]—इति मिथिलादेशचलितविवादरत्नाकरविवादचिन्ता मणिविवादचन्द्रद्वैतनिर्णयद्वैतपरिशिष्टादिग्रन्थानुसारिणी व्यवस्था—

१. °द्धंशे—व्यप०। २. स्याद्धंश—व्यप०।
३. पत्रेणेवं—व्यप०। ४. °त्यात—व्यप०।

अत्र प्रमाणम्—

अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च ॥—इति विवाद-रत्नाकर (पृ० ५११)विवादचिन्तामण्यादि(पृ० २३६)ग्रन्थधृतवृद्धमनु-वचनम् ॥ १ ॥

इदञ्च *विभक्तपतिधनपरम्*—इति विवादचिन्तामणि(पृ० २३७) ग्रन्थलिखनम् ॥ २ ॥

अविभक्ते[1] मृते पत्यौ तस्यांश एव नाभूदिति[2] किमियं गृह्णातु । न च सैवांशप्रतियोगिनी प्रापकाभावात् । न चैतान्येव वाक्यानि प्रापकाणि तेषां[3] विभक्तधनपरत्वेनाप्युपपत्तेः—इति विवादचिन्तामणि(पृ० २३७)-ग्रन्थलिखनम् ॥ ३ ॥

भ्रातृभार्य्यायां विधवायां पत्याहितगर्भायां तद्देवरादीनां विभागे प्रक्रान्ते[4] तस्या अपि शङ्कितपुत्रप्रसवायां[5] दाय[6] आप्रसवं स्थाप्यः । स च तस्याः पुत्रे जाते[7] तत्पुत्रस्यैव भवति पुत्रेऽनुत्पन्ने तु देवरादिभिर्ग्राह्यः—इत्यादि विवादचिन्तामणि (पृ० २३८) ग्रन्थलिखनम् ॥ ४ ॥

विभक्तानामपि यत्रांशपरिच्छेदो न जातस्तन्मध्यगमेव तिष्ठति तेन तत्र साधारणत्वमेव—इति विवादचिन्तामणि (ख वि० चि० पृ० १६१) द्वैतपरिशिष्टादिग्रन्थलिखनम् ॥ ५ ॥

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे मातृ-गामि तदभावे पितृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि[8] तद-

---

१. अविभक्तप्रमीते तु पत्यौ०—विचि० ।
२. ०भूतः किमि०—विचि० ।
३. एषां—विचि० ।
४. प्राप्ते—विचि० ।
५. शाङ्कित०—व्यप ।
६. भा०—विचि० ।
७. पुत्रे अनुत्पन्ने—विचि० ।
८. तदभावे भ्रातृपुत्रगामि—अंशोऽयं विवादचिन्तामणौ नोपलभ्यते ।

भावे बन्धुगामि—इत्यादि विवादचिन्तमण्यादि(विचि० पृ० २३५)ग्रन्थलिखनञ्चेति ॥ ६ ॥—

श्रीर्ज्जयतितराम् श्रीहरिःशरणम्
श्रीवैद्यनाथमिश्रेण श्रीरामतनुशर्म्मविद्यावागीशेन

६९—सहर श्रीरामपुरेर देमानि आदालतेर जज साहेबेर हुजुर हइते सदर देमानि आदालतेर पण्डितेरदिगेर प्रति सओयाल—

यदि कोन व्यक्ति तिन पुत्र वर्त्तमाने लोकान्तर हय परे ऐ तिन पुत्रेर मध्ये ताहादिगेर ज्येष्ठ भ्राता अन्न प्राथक्य हइया पैतृक सर्व्वसाधारणेर एक बागान, याहाते कतक प्रजार वसति आछे एवं ताहादिगेर तिन भ्रातार अंशेर भिन्न२ सिमा चिह्नत हय नाइ, ताहार तिन अंशेर एक अंश कोन अन्य व्यक्तिके विक्रय करे। ताहाते यदि आर दुइ भ्राता प्रतिवादि हइया हाकिमेर निकट नालिस करिया ऐ तिन अंशेर एक अंश, याहा ताहादिगेर ज्येष्ठ भ्राता विक्रय करे, ताहार यथार्थ मूल्य दिया खरिदेर प्रार्थना राखे, तबे ऐ तिन अंशेर एक अंश खरिद करिते काहार अधिकार हय: ऐ दुइ भ्रातार, अथवा ऐ खरिदारेर—इहार व्यवस्था शास्त्रानुसारे लिखिबेन इति। शन १८२८, ७ मेइ मों शन १२३५, २६ वैशाख।

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते। यदि कश्चिद् व्यक्तिविशेषस्त्रीन् पुत्रान् संरक्ष्य मृतस्तदनन्तरं तेषां त्रयाणां पुत्राणां मध्ये ज्येष्ठः पृथगन्नो भूत्वा पितृत्यक्तभ्रातृत्रयसाधारणैकात्मकसप्रजकभूमेस्त्रयाणां भ्रातॄणां विभागव्यञ्जकसीमाचिह्नरहिताया अंशत्रयमध्ये एकमंशमन्यस्मै कस्मैचिद् विक्रयं कृतवान्[1], कर्त्तुमिच्छति वा, तत्र यद्यवशिष्टौ द्वौ

---

१. कस्मैचित्—व्यप०। २ प्रतिवादिनौ—व्यप०।

भ्रातरौ प्रतिवादिनौ[1] भूत्वा राजसन्निधौ निवेदनं कृत्वा तेषां[3] त्रयाणामंशानामेकमंशमर्थाज्ज्येष्ठभ्रात्रा विक्रीतं, विक्रेतव्यं वा, तस्य यथार्थ[2] मूल्यं दत्त्वा क्रेतुं प्रार्थयतस्तथापि तेषां त्रयाणामंशानामेकमंशं क्रेतुं यस्मै उपरिलिखितविक्रय[4]कर्त्ता प्रसन्नस्सन् विक्रेतुमिच्छति तस्यैवाधिकारः, यत इदानीं वङ्गदेशचलितधर्मशास्त्रे क्रयकर्तुर्विचारो न लिखितः—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवविवादार्णवसेतुप्रभृतिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।

कुर्य्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै ॥—इति दायभाग(पृ० ३५) विवादभङ्गार्णव(१ विभ० ख ४२३)विवादार्णवसेतु (पृ० ८३)प्रभृतिग्रन्थधृतनारद(नामसं० १३।४२-४३)वचनम् ॥ १ ॥

तथा च विभक्तस्यैवाविभक्तस्थावरस्यापि[5] स्वामिकृतदानादि सिद्धय[6]त्येव अन्नपातादिना पश्चादंशपरिचयसम्भवादितिभावः— इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० ३५) लिखनञ्चेति ॥ २ ॥ ० ॥ ० ॥

श्रीर्जयतितराम् **श्रीहरिःशरणम्**

श्रीवैद्यनाथमिश्रेण **श्रीरामतनुशर्म्मविद्यावागीशेन**

७०—रोवकारि मिसिल आदालत देओयानि सदर तारिख ८ माह आपरेल सन १८२९ ई० मतावक २७ माह चैत्र शन १२३५ वाङ्गला रोज वुधवार ऐ आदालतेर प्रथम हाकिम श्रीयुत अलियम नसष्टर साहेवेर वैठके—

१. प्रतिवादिनो—व्यप० । २. यथार्थमूल्य—व्यप० ।
३. तेषा—व्यप० । ४. दुपरिलिखित—व्यप० ।
५. तथा च विभक्तस्यैवाविभ०—व्यप० । ६. सिद्धचे च—व्यप० ।

राजचन्द्रराय सायेल

एइ सनेर मारच मासेर १४ तारिखेर सायेलेर मकद्दमार कागज सकल रोवकार ओ दृष्टी हइया कोरक करा भूमि निलामेर निषेधि हुकुम सादर[1] हओन परे अनुमोदनार्थे स्थकित छिल, अद्य पुनराय उपस्थित हइया अन्य कागज सकल दृष्ट करागेल। यथा ए मकद्दमार सम्पर्के हुकुम हओनेर पूर्व्व देवात्तर भुमिसकलेर सम्बन्धे शास्त्रेर कथन आज्ञा विवेचना करा उचित हइल, अतएव हुकुम हइल ये एइ रोवकारि एइ आदालतेर पण्डितगणके समर्पण कराजाय, ये निचेर सओयालसकलेर जवावे दुइ सप्ताह मध्ये शास्त्रानुसारे व्यवस्था दाखिल करेण।

प्रथम सओयाल—यद्यपि शास्त्रानुसारे देवोत्तर भूमिसकल विक्रय करण एकान्त सिद्ध नहे। अतएव ताहार उपस्वत्व विक्रय करण (सिद्ध) हइवेक कि ना?

द्वितोय सओयाल—सरवराहकारि कीम्वा सेवाइती प्रयुक्त देवोत्तर भूमि अथवा ताहार उपस्वत्वे सेवाइतेर किछु स्वत्व हय कि ना, ओ यद्यपि हय, ताहार किछु निर्द्दिष्ट आछे कि ना? येमन एक विघा देवोत्तर भूमि किम्वा ताहार उपस्वत्व एक टाकार मध्ये सेवाइतेर स्वत्व कि परिमान हइवेक?

तृतीय सओयाल—यद्यपि देवोत्तर भूमि किम्वा ताहार उपस्वत्वे सेवाइतेर स्वत्व परिमाने निर्द्दिष्ट हइयाथाके, तवे सेवाइतेर देनार निमित्ते सेवाइतेर स्वत्वेर परिमानेर भूमि अथवा ताहा हइते ये परिमाने उपस्वत्व सेवाइतके(?)सकल हइते पारे विक्रय-हइवेक कि ना?

चतुर्थ सओयाल—यद्यपि ये भूमिसकले किम्वा ताहार उपस्वत्वते सेवाइतेर स्वत्व वर्त्तिया समुदय देवोत्तर भूमिसकलेर सम्वलित थाके, ओ सिमा चिह्नओ भिन्न ना हइया थाके, तवे समुदय देवात्तर भुमि, किम्वा ता हइते किञ्चित् वण्टक ना

१. सादर—५५०।

হওয়ান হেতুক সেবাইতের দেনার জন্যে বিক্রয়ের যোগ্য হইবেক, কিম্বা কিছুই নাই ইতি।

जवाबव्यवस्था

एतद्धर्म्माधिकरणप्रथमाधिपतिश्रीयुतालियमनसष्टरसाहेबधर्म्माधिकरणलिखितैतदब्दीयापरेलमासीयाष्टमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तन्मासीयषोडशदिने सपादघटिकाद्वयाधिकसमये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

यतः शास्त्रानुसारेण देवत्रभूमीनां विक्रयकरणं कदाचिदपि न सिध्द्यति अतएव तदुत्पन्नोपस्वत्वस्यापि देवमात्रस्वत्वेन तदितरस्वत्वाभावात्तद्विक्रयकरणमपि न सिध्द्यति।

अत्र प्रमाणम्—

देवस्वं ब्राह्मणस्वं वा लोभेनापहिनस्ति यः।

स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥--इति मनुवचनम् (मनुस्मृ० ११।२६) ॥ १ ॥

प्रतिमा देवता। तदर्थमुत्सृष्टं धनं देवस्वम् ॥—इति मन्वर्थमुक्तावल्यां कुल्लूकभट्टलिखनम् (पृ० ४३०) ॥ २ ॥

अस्वामिना कृतो यस्तु दायो विक्रय एव वा।

अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इति मनुवचनम् (मस्मृ० ८।१९९) ॥ ३ ॥

द्वितीयप्रश्नस्योत्तरम्—

भाषायां सरवराहकारशब्दवाच्यस्य सेवाइतशब्दवाच्यस्य वा भाषायां सरवराहकारीकर्म्मप्रयुक्तं सेवाइतीकर्मप्रयुक्तं वा देवत्रभूमौ तदुत्पन्नोपस्वत्वे वा किञ्चिदपि न स्वत्वं धर्म्मशास्त्रीयप्रमाणाभावादिति।

तृतीयप्रश्नस्योत्तरम्—

द्वितीयप्रश्नोत्तरलिखितप्रकारेण देवत्रभूमौ तदुत्पन्नोपस्वत्वे वा सेवाइतशब्दवाच्यस्य स्वत्वाभावेन तद्देयपरिशोधनार्थं देवत्रभूमेस्तदुत्पन्नोपस्वत्वस्य

ना विक्रयो भवितुं नार्हति। चतुर्थप्रश्नोत्तरमप्यर्था(दा)यातमिति न पृथग् लिखितम्। —इति मन्वादिधर्मशास्त्रानुसारिणी[1] व्यवस्था—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

नं० २७६६

७१—रोवकारि मिसिल आदालत देओयानी सदर तारिख१५ माह आपरेल शन १८२९ इं मतावक ४ माह वैशाख सन १२३६ वाङ्गला रोज वुधवार ऐ आदालतेर पञ्चम हाकिम श्रीयुत मान्तकिओ हेनरि टरम्वल साहेवेर वैठके।

वावु गङ्गाप्रसादनारायण — आपीलाण्ट

वावु लछमिनारायण — रष्पाडण्ट

आपीलाण्टेर उकिल मुनर्सी दादारवस्क ओ रष्पाडण्टेर उकिल लाला आउधलाल हाजिर आसिल। ए मकद्दमा एइ सनेर मारच मासेर ३१ तारिखेर हुकुम मते अद्य आमार वैठके रोवकार हइया प्रविशन कोर्टेर दाखिल हओया नालिसी आरजी प्रभृति कागच सकल तथाकार फयसला पर्य्यन्त ओ ए आदालते दाखिल हओया आपीलेर मजुवात ओ ताहार जओयाव प्रभृति कागजसकल गत मारच मासेर ३१ तारिखेर ए आदालतेर तृतीय हाकिमेर विस्तिर्म्म[2] रोवकारि सम्वलित पडागेल। यथा वोध हइल ये मुद्दाआलेहे, एइ त्तणकार आपीलाण्ट, एइ विषयेर आपत्ति राखे ये उभयेर पूर्व्व पुरुष मृत वावु नरसिंहनारायणसिंहेर कनिष्ठ भ्राता वावु फतेनारायणसिंहेर स्त्री मुसम्मात रामकोङरेर सालिसि शास्त्रानुसारे सिद्ध ओ जारि हओनेर योग्य नहे। अतएव ओ एवं जिला ओ कोर्टेर पण्डितगणेर दाखिल करा व्यवस्थासकल ओ एइ दृष्टे

---

१. मन्वादि०—व्यप०। २. विस्तीर्ण—इति साधीयान् पाठः।

ये एकथा लग्रोन वटे ऐ विषयेर सम्मन्धे शास्त्रेर आज्ञासकल ज्ञात हओन उचित हइया ए मकद्दमार सम्पर्कें चूडन्त हुकुम छादर हओनेर पूर्व्वे हुकुम हइल ये एइ रोवकारिर नकल ए आदालतेर पण्डितगणके अर्पण करा जाय—ये निचेर सओयालसकलेर जवाव दुइ दिवसेर मध्ये व्यवस्था दाखिल करेण।

प्रथम सओयाल—जिला वारानश चलित शास्त्रानुसारे स्त्रिलोकेर सालिसी सिद्ध वटे कि ना ?

द्वितीय सओयाल—यद्यपि दुइ व्यक्ति, नैकट्य कुटुम्व, उभयेर[1]विरोध ओ आपत्ति निष्पत्त्येर जन्ये, याहा उहादिगेर मध्ये थाके, आपन वंशेर एक स्त्रीलोकके, ये दुइ व्यक्तिर विस्वासी हय, आपनारदिगेर अभिप्राये सालिष नियुक्त करिया थाके, ओ ऐ स्त्रीलोक निष्पत्ती करिया देय। तवे एमत स्त्रीलोकेर सालिसी शास्त्रेर आज्ञासकलेर मते सिद्ध ओ ताहार फयसला जारि हओनेर योग्य हइवेक कि ना ? इति।

जवावव्यवस्था

एतद्धर्म्माधिकरणपञ्चमाधिपतिश्रीयुतमान्तकिहेनरीटरम्वलसाहेवधर्म्माधिकरणलिखितैतदब्दीयापरैलमासीयपञ्चदशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तन्मासीयषोडशदिने चतुर्थप्रहरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

मिताक्षरावीरमित्रोदयग्रन्थानुसारेण स्त्रीकृतव्यवहारनिर्णयोऽसिद्ध एव। विवादचिन्तामणिविवादचन्द्रनारदस्मृत्याद्यनुसारेणापन्निवारणार्थं स्त्रीकृतोऽपि व्यवहारनिर्णयः सिद्ध्यति।

अत्र प्रमाणम्—

बलोप(1)धिविनिर्वृत्तान्व्यवहारान्निवर्तयेत्।
स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा॥

---

१. अभयं० —•यप०।

इति मिताक्षरा(पृ० १४३)व्यवहारचिन्तामणिधृतयाज्ञवल्क्यवचनम् (२।३१) ॥ १ ॥

स्त्रीषु रात्रौ[१] बहिर्ग्रामादन्तर्वेश्मन्यरातिषु ।
व्यवहारः कृतोऽप्येषु पुनः कर्तव्यतामियात् ॥

इत्यादि वीरमित्रोदयव्यवहारचिन्तामणिग्रन्थधृतनारदवचनम्(नामसं० १,३७) ॥ २ ॥

स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदि ।
विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥—इति व्यवहारचिन्तामणिविवादचन्द्र(पृ० १४७)नारदस्मृत्यादिधृतनारदवचनम्(नामसं० २।२२) ॥ ३ ॥

आपत्प्रतीकारार्थं स्त्रीकृतमपि प्रमाणमेव,अनापदीत्यभिधानात् —इति विवादचन्द्रग्रन्थलिखनम् (पृ० १४७) ॥ ४ ॥

अनापदीत्यनेनापत्प्रतीकारार्थं स्त्रीकृतान्यपि प्रमाणान्येवेत्युक्तम्—इति व्यवहारचिन्तामणिग्रन्थलिखनम् ॥ ५ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि द्वयोः सन्निहितसम्बन्धिनोर्विरोधस्यापत्तेश्च कस्याश्चिन्निष्पत्त्यर्थं[१] स्ववंशसम्बन्धिनी एका काचित् स्त्री, या तदुभयोर्विश्वस्ता[२], ज्येष्ठा, श्रेष्ठा च, स्वस्वाभिप्रायेण स्वसम्बन्धिविवादनिर्णयकर्तृत्वेन द्वाभ्यामेव विरोधिभ्यां नियुक्ता सती सैव स्त्री तद्विवादनिर्णयं कृतवती स्यात्तदैवंविधविवादनिर्णयो मिताक्षरा[३]वीरमित्रोदयग्रन्थानुसारेण सिद्धो भवितुं तत्कृतजयपत्रं चापिप्रचलितं भवितुं नार्हति, व्यवहारमाधवग्रन्थानुसारेण च तन्निर्णयः सिद्धो भवितुं तत्प्रमाणभूतं तज्जयपत्रं च प्रचलितं भवितुमर्हति, प्रश्नपत्रलिखितप्रकारेण द्वाभ्यामेव विरोधिभ्यां तदधिकारस्य तस्यै दत्तत्वेन तद्विवादनिष्पत्तेस्तदधीनत्वात् "यदि च तत्समये तया स्त्रिया यदि विवादनिर्णयो न भविष्यति तदा अस्माकं महत्पापं[४] भविष्यति"—इति ज्ञात्वा द्वाभ्यामेव विरोधिभ्यां विश्वस्ता

१. निष्पत्तर्थं—व्यप० । २. ०तदुभयोविश्वस्तो०—व्यप० ।
३. ०मितक्षराक्षा०—व्यप० । ४. महदापविष्य०—व्यप० ।

ज्येष्ठा श्रेष्ठा सा स्त्री तदापन्निवारणाय[1] विवादनिर्णायकत्वेन नियुक्ता तदा तत्स्त्रीकृतविवादनिर्णयो व्यवहारचिन्तामणिविवादचन्द्रनारदस्मृत्याद्यनुसारेण सिद्धो भवितुं तत्प्रमाणभूतं तत्कृतजयपत्रं च प्रचलितं भवितुमर्हति—इति सारणदेशचलितमिताक्षरावीरमित्रोदयव्यवहारचिन्तामणिविवादचन्द्रव्यवहारमाधवनारदस्मृत्यनुसारिणी व्यवस्था।

अत्र प्रमाणान्युपरिलिखितानि सर्व्वाण्येव।

गुरुः स्वामी कुटुम्बी च पिता ज्येष्ठः पितामहः।
विवादानथ[2] पश्येयुः स्वाधीने विषये नृणाम्॥—इति व्यवहारमाधव-(पृ० २४) ग्रन्थधृतव्यासवचनञ्चेति।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

—०—

लम्बर २७८९

७२—रोवकारि मिसिल आदालत देओयानि सदर ४ माह माइ सन १८२९ इं मतावक २३ माह वैशाख सन १२३६ वाङ्गला रोज सोमवार ऐ आदालतेर हाकिम श्रीयुत कटवरटथरलेनसिलि साहेवेर वैठके।

मुसम्मातदुलादेइ ओ सोनोसिंह	आपिलाण्टान्
क्षेमाजितराय ओ किर्त्तिराय	रष्पाडण्ट

आपिलाण्टगणेर उकिल लाला आउधलाल, ओ रष्पाडण्टानेर उकिल मुनशी दादार वक्स हाजिर आसिल। ए मकद्दमा पूर्व्वे एइ सनेर आपरेल मासेर २७ ओ २८ ओ २९ तारिख सकले रोवकार हइया, ओ जिलार आदालतेर समुदय कागज १ लम्वर हइते तथाकार फयशला पर्य्यन्त ओ प्रविनसन कोर्टेर कागजसकल फयशा-

१. ०न्निवारक विवादनिर्णयकत्वे—व्यप०। २. विवादानपि—धर्मकोषः, पृ० ६४।

ला सहित ओ ए आदालतेर समस्त कागज ओ चेमाजितराय प्रभृतिर नामिक सेक मछाहेर आलि प्रभृतिर मकद्दमा जिलार आदालतेर समस्त कागज ओ कोर्टेर कागज १० लम्वर पर्य्यन्त पडागिया, दिवा अवसान प्रयुक्त स्थकित छिल, अद्य पुनराय उपस्थित हइया ऐ मकद्दमा वावत कोर्टेर वाकी कागज दृष्टे आसिल। तत् परे रष्पाडण्टेर उकिल इं १८२१ शालेर जुन मासेर २८ तारिखेर लिखित जिला वेहारेर आदालतेर एक किता फयशलार नकल इं १८०५ शालेर माइ मासेर २५ तारिखेर लिखित आजिमावादेर प्रविनसन कोर्टेर एक किता फयशलार नकल ओ इं १८२७ शालेर सेतम्वर मासेर ६ ओ १३ तारिखेर लिखित ऐ प्रविनसन कोर्टेर दुइ किता रोवकारिर नकल ओ फशलि ११९९ सालेर रमजानेर १५ तारिखेर लिखित धर्म्मनारायणेर लिखा एक किता सराकतनामा ओ इं १७९४ शालेर लवम्वर मासेर २० तारिखेर लिखित सैयद महम्मद, ओ सैयद होसेन आलि ओ सैयद रोस्तम आलि ओ सैयद आलि आमजद-मुद्दइगणेर उकिल सैयद केरामत होसेनेर लिखा एक किता राजिनामार नकल १२ टाका मूल्येर फेहरस्तेर द्वाराय लम्वरे दाखिल करिल, पडागेल। यथा ए मकद्दमार चुडन्त हुकम सादर हओनेर पूर्व्व एइ आदालतेर पण्डित हइते व्यवस्था लओन उचित वोध हइल, अतएव हुकम हइल ये मकद्दमार कागज सहित एइ रोवकारिर नकल पण्डितके समर्पण करा जाय। उचित ये पण्डित मौ····· प मकद्दमार समस्त कागजेर अनुमोदने निचेर लिखित दुइ सओयालेर जवाव एक सप्ताह मध्ये दाखिल करेण।

प्रथम सओयाल—यद्यपि विरोधीय वस्तु वण्टक हइयाथाके, ऐ अवस्थाय मुसम्मात दुलारदेइ आपिलाण्ट आपन जीवद्दशापर्य्यन्त केवल भरण-पोषण पाइवेक, किम्वा आपन पतिर त्यक्तहिस्याय दखिलकार थाकिया ताहार उपस्वत्वे भोगवान थाकिवेक ओ ताहा दानेर क्षमता राखिवेक कि ना इति।

द्वितीय सओयाल—विरोधीय वस्तु अवण्टक थाकने मुसम्मात मजकुरा प्रथम सओयालेर विस्तिर्ण सत्व-सकल हइते कोन स्वत्वेर स्वत्वाधिकारि बटे इति ।

श्रीर्ज्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरलेनसिलीसाहेबधर्म्माधिकरणलिखितैतदब्दीयमैमासीयचतुर्थदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं यत्तन्मासीयषष्ठदिने यामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम्—

यद्यपि विवादास्पदीभूतं वस्तु विभक्तमभूत्तदा दुलारदेइनाम्नी एतद्धर्म्माधिकरणार्थिनी स्वजीवनपर्य्यन्तं पुत्रपौत्रप्रपौत्ररहितस्वपतित्यक्तविभक्तधनांशे आयत्तत्वं सम्पाद्य तदुपस्वत्वे भोगवती स्थास्यति । एवं तद्वस्तुनो आवश्यकादृष्टार्थं विना दानक्षमता तस्या न स्थास्यति, यतः पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य विभक्तधने पत्न्या उत्तराधिकारित्वेनाधिकारे जातेऽप्यावश्यकादृष्टार्थं विना तद्धनस्य दानकरणक्षमता नास्तीति ।

अत्र प्रमाणम्—

तस्मादपुत्रस्य स्वर्यातस्या[1]संसृष्टिनो धनं परिणीता स्त्री संयता सकलमेव गृह्णातीतिस्थितम्—इति मिताक्षरा(पृ० २२१)ग्रन्थलिखनम् ॥ १ ॥

पत्नी गृह्णीयादित्येद्वचनजातं विभक्तस्त्रीविषयम्—इति मिताक्षराग्रन्थलिखनम् ॥ २ ॥

स्त्रीणां स्वपतिदायस्तु उपभोगफलः स्मृतः ।
नापहारं स्त्रियः कुर्य्युः पतिवित्तात् कथञ्चन ॥

इति—वीरमित्रोदयादि (विमि० ख० पृ० ६२८) ग्रन्थधृतमहाभारतवचनम् (१३।४७।२४) ॥ ३ ॥ ० ॥ ० ॥ ० ॥

---

१. व्यालस्य—व्यप० ।

द्वितीयप्रश्नस्योत्तरम्—

विवादास्पदीभूतं धनमविभक्तं चेत्तदैतद्धर्म्माधिकरणार्थिनी दुलारदेइ-नाम्नी प्रथमप्रश्नलिखितस्वत्वसमुदायान्तर्गतकेवलं यावज्जीवं भरणपोषण-प्राप्तिरूपप्रथमप्रकारोपयुक्तस्वत्वाधिकारिणी भवति, प्रभुसमर्पितपत्रजातैर्विवा-दास्पदीभूतधनस्य विभागानवगमात्— इति वेहारदेशप्रचलितमिताक्षरावीर-मित्रोदयव्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी ।

अविभक्ते धनांशे तु प्राप्नोत्यामरणान्तिकम् ॥—इति वीरमित्रोदयादि-(वीमि० ख० पृ० ६५४)ग्रन्थधृतकात्यायनवचनं (कास्मृ० ६२२) चेति ।१।

१८ मे सन हाल, दो प्रहर वाद दाखिल किया—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

नं० १७६३

७३—रोयकारी मिसिल आदालत देओयानि सदर तारिख ६ माह माइ सन १८२६ इं० मतावक २५ माह वैशाख सन १२३६ वाङ्गला रोज वुधवार ऐ आदालतेर पञ्चम हाकिम श्रीयुत मान्तेगिओ हेनरि टरम्वल साहेवेर वैठके ।

गोवर्द्धनलाल— आपिलाण्ट

मोहनलाल ओ मृत सोहनलालेर उत्तराधिकारि गङ्गाप्रसाद—

रेप्पाडण्टान

आपिलाण्टेर उकिल मुनशी दादार वकस ओ रेष्पाडण्टा-नेर मध्ये मोहनलाल रेषपाडण्टेर उकिल लाला आउधलाल हाजिर आसिल । अद्य ए मकद्दमा तरतिव[१] लम्वर मते आमार

---

१ तवनिव—व्यप० ।

निकट रोवकार हइया इं १८२८ सालेर मारच मासेर ३१ तारिखेर लिखित ए आदालतेर परिसिष्टेर उत्तरे एइ सणेर आपरेलमासेर १६ तारिखेर लिखित जिला रामगडेर जज्साहेवेर[1] पाठानो विवरण ताहार समभिव्याहारीय[2] रोवकारि प्रभृति कागजातसकल सहित लम्वरे पौहुछिया पडागेल। यथा वेचुसिंह ओ द्वितीय वेचुसिंह साक्षिगण, ओ गङ्गाप्रसादेर पिता मोहनलाल ओ भ्राता जोगललालेर एजाहारे ओ रेप्पाडएटगणेर मध्ये एक रेप्पाडएट मृत सोहनलालेर स्त्री मुसम्मात धोपार दरखास्ते ऐ मृत व्यक्ति गङ्गाप्रसादके पोष्यपुत्र लओन साव्यस्थ हइल, अतएव हुकुम हइल जे मृत रेप्पाडएटेर स्थाने गङ्गाप्रसादेर नाम लेखा जाय। ताहाओ लेखागेल, ओ गङ्गाप्रसाद ऐ मृत व्यक्तिर उत्तराधिकारि साव्यस्थ हओनेओ स्वयं किम्वा उकिलेर द्वाराय ए अदालते हाजिर हय नाइ, अतएव ऐ व्यक्तिर सम्वन्धे ए मकद्दमार तजविज एकसपार्टि प्रकारे कराजाय। किन्तु प्रकाश हय ये जद्यपि अन्यकेह मृत सोहनलालेर उत्तराधिकारि ओ गङ्गाप्रसादेर पोष्यपुत्रता मिथ्या हओनेर दावि करे। एइ हुकुम ताहारे दावि ओ स्वत्वेर तजविजेर निषेधीय हइवेकना। ततपरे प्रविनसन कोठ दाखिल हओया लालिसि आरजि प्रभृति कागजसकल तथाकार फयसला पर्य्यन्त ए आदालते दाखिल हइया आपिलेर मजुवात ओ ताहार जवाव पडागेल। जानागेल जे ए मकद्दमार तजविज सास्त्रे सम्पर्क राखे। अतएव ए मकद्दमार सम्मन्धे चूड(ा)न्त हुकुम सादर हओनेर पूर्व्वे सास्त्रे(र) आज्ञासकल ज्ञात हओनार्थ व्यवस्था लओन उचित वोध हइया हुकुम हइल ये ए मकद्दमा अद्य स्थकित थाके, ओ एइ रोवकारिर नकल ७० लम्वरेर इं १८१९ सालेर जानओरि मासेर १७ तारिखेर लिखित हेवानामा[3] दस्तावेज सहित ए आदालतेर पण्डितके समार्पन कराजाय, जे पश्चिम देशेर, जाहाते रामगड जिला थाकिवेक, चलित शास्त्रानुसारेनिचेर

१ साहेवेर—व्यप०। २. समम्यारीय—व्यप०। ३. हेवानामा—व्यप०।

लिखित सओयालसकलेर जवावे एक सप्त(ा)ह मध्ये व्यवस्था लिखिया दाखिल करेन।

प्रथम सओयाल—यद्यपि हिन्दु जाति हइते एक व्यक्ति आपन कृत स्थावर वस्तुसकल आपन पुत्रगण हइते एक पुत्रके दान करिया, दान गृहीताके ताहार दखल देओयाय। अतएव ऐ दान गृहीतार अन्य भ्रातागण थाकनेओ ताहार स्वत्वे ऐ दान सिद्धि हइवेक कि ना, ओ दातार मृत्युर पर आपन आपन अंश पाओनेर जन्ये अन्य भ्रातागणेर दावि अर्शे कि ना ?

द्वितीय सओयाल—यद्यपि एक व्यक्ति हिन्दुर पाच पुत्र, ओ ताहारद्विगेर मध्ये ये पुत्र भ्रातागण हइते कनिष्ठ छिल अन्ध थाके, ओ ऐ व्यक्ति आपन कृत अस्थावर वस्तुसकल चार पुत्रके, याहारा अन्ध नहे, सुस्थ स्वरिर वटेन, दिया आपन कृत स्थावर वस्तु, जाहा मूल्येर द्वाराय चारि पुत्रेर एक २ पुत्रेर अस्थावर वस्तुर अंश हइते तुल्यकिम्वा नून थाके, अन्ध पुत्रके आपन विशय उपज्जन करण हइते अक्षम थाकन दृष्टे दान करिया थाके, तवे ए दान एमत पुत्रेर स्वत्वे सिद्धि ओ यथार्थ हइवेक कि ना ?

तृतीय सओयाल—चण्डाल १ वागदि २ साहा ३ सुँडी ४ काँओरा ५ धोपा ६ ओ डोम ७—एइ कय व्यक्तिर सुकृतिपत्रेर द्वाराय शपथ हय कि ना इति।

सओयाल सुप्रीम कोर्टादालतिका मेघनाटन साहेवका हुकुम से यवाव देना होगा इति।

नकलयवाव

प्रश्नपत्रलिखितजातीयानां शास्त्रानुसारेण स्वीकृतिपत्रद्वारा शपथो भवितुं न शक्नोति प्रमाणाभावादिति—

एतद्धर्म्माधिकरणपञ्चमाधिपतिश्रीयुतमान्तकीयूहेनरीटरम्वलसाहेवधर्म्माधिकरणलिखितैतदब्दीयमेमासीयषष्ठदिवसलिखितविचारपत्रान्तर्गतप्रश्नप्रति—

रूपपत्रं यत्तन्मासीयनवमदिने यामद्वयानन्तरं (मया) प्राप्तं तदवलोक्य एवं तत्समर्पितदानपत्रञ्च विविच्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यत्रैकः कश्चित् हिन्दुजातीयो व्यक्तिविशेषः स्वोपार्जितं सर्व्वमेव स्थावरं स्वपुत्राणां मध्ये एकस्मै पुत्राय दत्त्वा दानग्रहीतुस्तदुपरि आयत्तत्वं सम्पादितवान् स्यात्तत्र तद्दानं यदि पित्रा सर्व्वपुत्रानुमत्या कृतं तदा तद्दानग्रहीतुर्भ्रात्रन्तरेषु विद्यमानेष्वपि[1] तदर्थं तद्दानं सिद्धं भवितुं शक्नोति, एवं दातुर्म्मरणानन्तरं दानग्रहीतुर्भ्रात्रन्तराणां स्वयोग्यांशप्राप्तीच्छा न सम्भवति । यदा च पित्रा तद्दानं सर्व्वपुत्रानुमत्या न कृतं तदा तद्दानग्रहीतुर्भ्रात्रन्तरेषु सत्सु तदर्थं तद्दानं सिद्धं भवितुं न शक्नोति, एवं दातुर्म्मरणानन्तरं दानग्रहीतुर्भ्रात्रन्तराणां स्वस्वयोग्यांशप्राप्त्यर्थं तत्प्राप्तीच्छा सम्भवत्येव, यतः सर्व्वपुत्रानुमतिं विना पितुः स्वार्जितस्थावरस्यापि दानकरणक्षमताया अभावेन न तत्कृतदानेन तेषां तत्र स्वत्वविच्छेदाभावात् । प्रकृते तु प्रभुसमर्पितदानपत्रेण तद्दाने दानग्रहीतुभ्रात्रन्तराणामनुमतेरनवगमाच्च ।

अत्र प्रमाणम्—

स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव—इति मिताक्षरा(पृ० २००)वीरमित्रोदय[2](ख० पृ० ५३२)व्यवहारमाधव(पृ० ३३२) व्यवहारकौस्तुभादिग्रन्थलिखनम् ॥ १ ॥

स्थावरं द्विपदं चैव यद्यपि स्वयमर्ज्जितम् ।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः ॥

ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं तेऽपि हि कांक्षन्ति न दानं न च विक्रयः ॥—इति उपरिलिखितग्रन्थधृतव्यास(मिता० पृ० २००)वचनद्वयञ्चेति ॥ २ ॥

---

१. विद्यमाणे०—व्यप० ।

२. स्थावरादौ तु स्वार्जिते पित्रादिपरम्पराप्राप्ते पुत्रादिपारतन्त्र्यं तुल्यमेवेति पाठः वीमि० ख ।

द्वितीयप्रश्नस्योत्तरम्—

यद्यप्येकस्य कस्यचित् हिन्दुजातीयस्य पञ्चपुत्राः, एतेषां मध्ये यः सर्व्वेभ्यो भ्रातृभ्यः कनिष्ठ आसीत् सोऽन्धः, एवं स एव व्यक्तिविशेषः स्वोपार्जितमस्थावरं सर्व्वं वस्तु अन्धभिन्नेभ्यः स्वस्थशरीरेभ्यश्चतुर्भ्यः[१] पुत्रेभ्योऽदत्त्वा स्वोपार्जितं स्थावरं वस्तु यन्मूल्यद्वारा चतुर्णां पुत्राणाम् एकैकपुत्रांशास्थावरधनांशात् तुल्यं न्यूनं वा भवति, तदन्धपुत्राय तद्दृष्ट्वा दत्तवान्। अत्र च स्वयं धनोपार्ज्जनाक्षमः। तत्रापि सर्व्वपुत्रानुमत्या दत्तञ्चेत् सिद्ध्यति, नो चेन्न सिद्ध्यति. इति पश्चिमदेशान्तर्गतरामगडजिलाख्यावान्तरदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणानि त्रीण्युपरिलिखितान्येव ॥ ३ ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

७४। रोवकारि मिसिल आदालत देओयानि सदर तारिख २७ माह माइ सन १८२९ इं मतावक १५ माह ज्यैष्ठ सन १२३६ बाङ्गला रोज बुधवार ए आदालतेर हाकिम श्रीयुत अलियम नसप्टर साहेबेर बैठके।

हलधरमुखोपाध्याय — आपिलाण्ट
अन्नपूर्णादेव्या प्रभृति — रेष्पाडण्टान्

आपिलाण्टेर उकिल मुनशी सोहेन आलि ओ स्वयं आपिलाण्ट हाजिर आसिल, ओ रेष्पाडण्टानेर उकिल सदासुक पण्डित काहिलेन······आपत्ये हाजिर हइलो ना। एइ मासेर २५ तारिखेर हुकुमानुसारे ए मकर्द्दमा आमार बैठके उपस्थित

१ स्वस्थशरीरिभ्यश्च०—व्यप०।

हइया नालिषि आरजि प्रभृति प्रविनमन कोर्टेर कागचसकल ६६ लम्वर पर्य्यन्त पडागिया स्थकित छिल, अद्य पुनराय उपस्थित हइया प्रविगमन कोर्टेर वाकि कागजसकल तथाकार फयशला पर्य्यन्त ओ आपिलेर मजुवात ओ ताहार जवाव पडागेल। समस्त कागजेर अनुमोदने यद्यपि रेस्पाडण्टानेर मध्ये एक रेस्पाडण्ट अन्नपूर्णादेव्यार लिखा एजाहार आपिलेण्टेर दरपेष करा इं १८(?)७ शालेर जुन मासेर १२ तारिखेर लिखित २६ लम्वरेर दानपत्र निदर्शनेर सत्यतार प्रति पूर्ण सन्देह हइतेछे। किन्तु चूडान्त हुकुम (सादर) हओनेर पूर्व्वे ए आदालतेर पण्डित हइते नीचेर विस्तीर्ण हेतुसकलेर विवेचना कारण उचित वोध हइया हुकुम हइल ये प्रविनसन कोर्टेर नथिर १ नम्वरेर वाङ्गला १२११ शालेर आश्विन मासेर १ तारिखेर लिखित मृत वलराम भट्टाचार्य्येर लिखा मोक्तारनामा ओ उक्ताविस २६ लम्वरेर दानपत्र एइ रोवकारिर नकल सहित ए आदालतेर पण्डितके समर्पण करा जाय, ये ऐ निदर्शनसकलेर उपर अनुमोदन करिया, वाङ्गालार चलित शास्त्रानुसारे नीचेर लिखित प्रश्न सकलेर जवाव एक सप्ताह मध्ये दाखिल करेण।

प्रथम सओयाल—मुसम्मात अन्नपूर्णार दान सिद्ध वटे कि ना, ओ द्वितीय व्यक्तिगणेर अंशेर सम्मन्धे ताहा असिद्ध हओने अन्नपूर्णादेव्यार स्वयं अंश वावत सिद्ध हइवेक कि ना। ओ यद्यपि सिद्ध हय, उहार कि परिमाण अंश हइवेक।

द्वितीय (सओयाल)—वलरामभट्टाचार्य्येर लिखा मोक्तारनामा मते मुद्दाआलेहके किछु अंश अर्शे कि ना, ओ वलरामभट्टाचार्य्यके ताहार आपन एक स्त्री उहार मृत पुत्रेर स्त्री ओ उहार मृत पुत्रेर स्त्री ओ अविवाहिता एक कन्या थाकनेओ मुद्दाआलेहके अंश देओनेर क्षमता छिल किना इति।

१ लिखित शास्त्रानु साकलेर—व्यप०।

श्रीर्ज्जयतितराम्

जवाबव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतालियमनष्टरसाहेबधर्म्माधिकरणलिखितैतदब्दीयसप्तविंशतिदिवसीयमेइमासीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितकोर्टापिलाख्यधर्म्माधिकरणनिविष्टपत्रान्तर्गतोनविंशत्यङ्काङ्कितवाङ्गलाख्यैकादशाधिकद्वादशशताब्दीयाश्विनमासीयप्रथमदिवसीयमृतबलराम-भट्टाचार्य्यलिखितमोक्तारनामासंज्ञकपत्रमेवं षड्विंशत्यङ्काङ्कितदानपत्रञ्च यज्जुनमासीयपञ्चदशदिने सार्द्धघटिकाचतुष्टयाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

अन्नपूर्णाकृतदानं सिद्धं भवितुं न शक्नोति, यतः प्रभुसमर्पितमोक्तारनामासंज्ञकपत्रदानपत्राभ्यां विवादास्पदीभूतधनस्यान्नपूर्णादेव्याः पत्युर्बलराम-भट्टाचार्य्यस्य पुत्रपौत्रप्रपौत्ररहितस्य मृतस्योत्तराधिकारित्वेन तत्सङ्क्रान्तत्वेनावगमेन, तस्याश्च स्वेच्छया स्वाभिप्रायेण वा तद्धने दानानधिकारात्। प्रकृते तु प्रभुसमर्पितदानपत्रेण स्वेच्छया स्वाभिप्रायेण च दानावगमात् पत्न्यां विद्यमानायामन्येषामर्थाद् दुहित्रादीनां कथञ्चिदपि पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य धनेऽधिकारप्रतिपादकवङ्गदेशचलितशास्त्राभावेनांशविवेचनाया[1] अनावश्यकत्वादिति—

अत्र प्रमाणम्—

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः—इति दायभागादि-(दाभा पृ० १७१) ग्रन्थधृतकात्यायनवचनम् (कास्मृ० ९२१)। १।

स्त्रीणां स्वपतिदायस्तु उपभोगफलःस्मृतः।

नापहारं स्त्रियः कुर्य्युः पतिवित्तात् कथञ्चन॥—इति भारतादपहार-शब्दार्थेन यथेष्टदानविक्रयाद्यनधिकारः—इति दायरहस्यग्रन्थलिखनम्॥३॥

---

१ धनेकारकार०—व्यप०।

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्याद्युपरिलिखितग्रन्थधृत-याज्ञवल्क्यवचनञ्चेति (पृ० २१६, २।१३५) ॥ ४ ॥ ० ॥ ० ॥ ० ॥

द्वितीयप्रश्नस्योत्तरम्—

बलरामभट्टाचार्य्यलिखितमोक्तारनामासंज्ञकपत्रानुसारेण प्रत्यर्थिनः किञ्चिदप्यंशत्वेन प्राप्तुं नार्हन्ति, तत्पत्रेण प्रत्यर्थिनामंशप्राप्तिप्रयोजकस्य तत्स्वत्वोत्पत्तिप्रयोजकस्य प्रत्यर्थिन उद्दिश्य बलरामभट्टाचार्य्यकृतस्य दानादेरनवगमात् । बलरामभट्टाचार्यस्य पत्न्यामेकस्यां पुत्रवध्वामदत्तायां कन्यायामेकस्यां विद्यमानायामपि स्वातन्त्र्याद्बाधकाभावाच्च प्रत्यर्थिनोंऽशदानत्तमता आसीत्—इति वङ्गदेशचलितदायभागदायरहस्यश्रीकृष्णतर्कालङ्कारकृतदायक्रमसंग्रहविवादभङ्गार्णवविवादार्णवसेत्वादिग्रन्थानुसारिणी व्यवस्था—

जुनमासस्य षड्विंशतिदिने शुक्रवासरे घटिकाधिकयामद्वये दत्तेति ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

नं० २४९६

७५—रोवकारि मिसिल आदालत देओयानि सदर तारिख ३ माह जुन शन १८२९ इं मतावक २२ माह ज्यैष्ठ शन १२३६ वाङ्गला रोज वुधवार ऐ आदालतेर हाकिम श्रीयुत अलियम नसष्टर साहेवेर वैठके—

आकवरराय प्रभृति मोकलेशगण आपिलाण्टान्

यदुनाथसिंह ओ साहेवसिंह प्रभृति रष्पाडण्टान्

रष्पाडण्टानेर मध्ये रामप्रतापसिंह एक रष्पाडण्ट हाजिर आसिया ए मकद्दमार सानि तजविजेर प्रार्थनाय एक किता सओयाल वारानशेर पाठशालार ओ कलिकातार कालेजेर पण्डितगणेर दुइ किता व्यवस्था ओ ताहार एक किता इङ्गरेजि तरजमा ओ १७५७ लम्वरेर मकद्दमा ओ ए मकद्दमा वावत इं १८२३

सालेर माइ मासेर १० (तारिखेर) ओ एइ सनेर फेवरओरि मासेर २४ तारिखसकलेर लिखित आखेरि दुइ किता रोवकारिर नकल सम्वलित लं दाखिल करिल। एइ सनेर फेवरओरि मासेर २४ तारिखेर हओया ए आदालतेर फयशला सहित पडागेल। यथा रष्पाडण्टाणेर सओयालेर उपर चूडन्त हुकुम सादर हओनेर पूर्व्व १७५७ लम्वरेर मकद्दमा वावत इंरेजि १८२१ शालेर फेव्रओरि मासेर २ तारिखेर हओया रोवकारिर लिखित सओयालेर जवावे ए आदालतेर एइक्षणकार पण्डित हइते व्यवस्था लओन ओ इहा अवगत हओन ये ऐ लम्वरेर सरेर नथिते ३३ लम्वरे ग्रथित ए आदालतेर पूर्व्वेर पण्डितदिगेर व्यवस्था शास्त्रानुसारे यथार्थ वटे कि ना उचित हइल। अतएव हुकुम हइल ये एइ रोवकारि ओ इं १८२१ शालेर फेव्रओरि मासेर २ तारिखेर हओया ए आदालतेर रोवकारिर लिखित सओयाल ओ ताहार जवावे ए आदालतेर पूर्व्वेर पण्डितगणेर व्यवस्था ओ रष्पाडण्टेर दाखिल करा दुइ किता व्यवस्था सहित ए आदालतेर एइक्षणकार पण्डितके समर्पण करा जाय, जे इं १८२१ शालेर फेव्रओरि मासेर २ तारिखेर हओया रोवकारिर लिखित सओयालेर ओ समर्पित व्यवस्था सकर मजमुनसकलेर अनुमोदने चलित शास्त्रानुसारे व्यवस्था एइ कैफियत सम्वलित, ये पूर्व्वेर पण्डितगणेर व्यवस्था शास्त्रेर आज्ञानुसारे कि, ताहार किछु विपर्य्यय वटे, लिखिया दुइ सप्ताह मध्ये दाखिल करेण इति।

जवावव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतालियमनशाटरसाहेवधर्म्माधिकरणलिखितैतदब्दीयजुनमासीयतृतीयदिवसीयविचारपत्रान्तर्गताज्ञापितं तद्विचारपत्रम् एवमङ्गरेजीशब्दप्रतिपाद्यैकविंशत्यधिकाष्टादशशताब्दीयफेवर(अरि)मासीयद्वितीयदिवसीयैतद्धर्म्माधिकरणलिखितविचारपत्रलिखितप्रश्नप्रतिरूपपत्रं तदुत्तरञ्चैतद्धर्म्माधिकरणनियुक्ताभ्यां पूर्व्वपण्डिताभ्यां लिखितं व्यवस्थापत्र-

मेवमेतद्धर्म्माधिकरणप्रत्यर्थिनिविष्टं व्यवस्थाद्वयञ्च यत्तन्मासीयैकादशदिने घटिकात्रयाधिकयामद्वये मया प्राप्तं तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यद्यपि कस्यचित्[1] साधारणसराजकरस्थावरस्य कतिचिदंशिनः क्रयकर्त्तारश्च, येषामुपरि तत्स्थावरसम्बन्धराजकरदानसंरक्षणावेक्षणादिकर्तृत्वभारः स्थितस्ते, तावदप्राप्तव्यवहारेष्वंश्यन्तरेषु विद्यमानेष्वेवं तेषामनुमतिं विना[2] राजकरदानार्थं कस्यचिन्निकटे तस्यैव सराजकरस्थावरस्य विक्रयं कृतवन्तः स्युस्तदा स विक्रयः सिद्धो भवितुं प्रचलितुञ्च न शक्नोति, प्रभुकृतप्रश्नलिखि(ता)यामवस्थायां सत्यां साधारणस्थावरधने सर्व्वेषामंशिनामनुमतिं विना एकस्य द्वयोर्बहूनां[3] वा स्वस्वांशयोग्यस्य समुदायस्य वा दानाधमनविक्रयानधिकाराद्, इदानीं वेहारदेशप्रचलितग्रन्थेषु प्रभुसमर्पितवाराणस्यधिकरणकपाठशालास्थपण्डितलिखितव्यवस्थापत्रे कलकत्ताख्यमहानगरसंबन्धि[4]-पाठशालास्थपण्डितलिखितव्यवस्थापत्रे चाप्राप्तव्यवहारेषु अंश्यन्तरेषु सत्सु प्राप्तव्यवहारैरंशिभिः साधारणसराजकरस्थावरसमुदायस्य[5] स्वस्वांशयोग्यस्य वा राजकरदानार्थं विक्रयः कर्त्तुं शक्यते, तैश्च कृतो विक्रयः सिद्धो भवितुं शक्नोतीत्येतद्विधायकस्य प्रमाणस्यालिखितत्वाच्च, शास्त्रानुसारेण बालकानामर्थादप्राप्तव्यवहाराणां धनस्य सर्व्वतोभावेन राज्ञो रक्षकत्वेन राजकरदानार्थमप्राप्तव्यवहाराणां विक्रयस्य भवितुमशक्यत्वाच्च[6]—इति वेहारदेशचलितमनुमिताक्षरामिताक्षराटीकासुबोधिनीवीरमित्रोदयव्यवहारमाधवव्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था ।

एवञ्चैतद्धर्म्माधिकरणनियुक्ताभ्यां पूर्व्वपण्डिताभ्यां पूर्व्वं या व्यवस्था दत्ता सा वेहारदेशचलितशास्त्रसिद्धैव । नहि तस्यां व्यवस्थायां कश्चित्तद्व्यतिक्रमोऽप्यस्ति —इति अगस्तिमासस्य चतुर्थदिने घटिकैकाधिकयामद्वये मयेयं व्यवस्था दत्तेति ।

---

१. कस्यचित—व्यप० । २. तेषामनुमतिम्विना०—व्यप० ।
३. बहूनां—व्यप० । ४. संबधि—व्यप० ।
५. स्थावरस्य—व्यप० । ६. °मशक्यत्वा ०—व्यप० ।

अत्र प्रमाणम्—

स्थावरस्य समस्तस्य गोत्रसाधारणस्य च ।

नैकः कुर्य्यात्क्रयं दानं[1] परस्परमतं विना ॥—इति वीरमित्रोदयादि-(वी० मि० ख० पृ० ५८६) ग्रन्थधृतव्यासवचनम् ॥ १ ॥

अविभक्तेषु द्रव्यस्य मध्य[1]*गत्वादेकस्यानीश्वरत्वात्सर्वाभ्यनुज्ञा अवश्यं कार्य्या, विभक्तेषु तूत्तरकालं विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञा, न पुनरेकस्यानीश्वरत्वेन । अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्ध्यत्येव*—इति मिताक्षरा (पृ० २००) ग्रन्थलिखनम् ॥२॥

अत्रापि त्वविभक्तानुज्ञामन्तरेण दानाद्यसिद्धिः साधारणत्वाद्[3] *द्रव्यस्य । विभक्तानुमतिव्यतिरेकेणापि दानादिकमुपपद्यते*—इत्यादि मिताक्षराटीकासुबोधिनी (पृ० ६११) ग्रन्थलिखनम् ॥ ३ ॥

बालदायादिकं रिक्थं[4] *तावद्राजानुपालयेत्*[5] *।*

यावत्स स्यात् समावृत्तो यावच्चातीतशैशवः ॥ —इति मनु(८।२७)-वचनञ्चेति ॥ ४ ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

नं० २५५३

७६—रोवकारि मिसिल आदालत देओयानि सदर तारिख ४ माह आगस्त सन १८२९ इं मतावक २१ माह श्रावण सन १२३६ वाङ्गला रोज मङ्गलवार ऐ आदालतेर हाकिम श्रीयुत वावरट हालडन राटरि साहेवेर वैठके ॥—

---

१. मध्यस्थत्वात्—मिता० । २. दायं—व्यप० ।

३. साध्यकत्वात्—व्यप० । ४. ऋकथम्—व्यप० ।

५. राज्ञा—व्यप० ।

जयरामधामि स्वयं उक्ति प्रकारे मृत वखेरि-
धामिर स्त्री दिपु धामिनिर अप्राप्तव्यवहार पुत्र
रामचन्द्रधामिर पक्षे— आपिलाण्ट—
मुशनधामि— रेष्पाडण्ट—

आपिलाण्ट स्वयं ओ रेष्पाडण्टेर उकिल मौलवि गोलाम एजदानि हाजिर आसिल। एइ सनेर जुन मासेर ३० तारिखेर हओया जेला वेहारेर जजसाहेवेर एक किता रिटरण, ताहार सम्वलित रोवकारि प्रभृति पौंचिया अद्य एइ मकद्दमार नथि सम्वलित रोवकार हइया जिलार आदालतेर कागजसकल १ लम्वर हइते तथाकार फयशला पर्य्यन्त ओ प्रविनशन कोर्टेर कागजात फयशला सहित ओ ए आदालतेर समस्त कागज इंराजि १८२७ शालेर आगस्त मासेर २५ तारिखेर हओया एइ आदालतेर पूर्व्वेर द्वितीय हाकिम श्रीयुत कोरटनि इषमिट साहेवेर ओ इं० १८२८ शालेर १५ सेतम्वर मासेर लिखित ए आदालतेर हाकिम श्रीयुत कटवरट थरलेन सिली साहेवेर रायसकलेर सम्वलित पडागेल। ये हेतुक ए मकद्दमाते स्त्रीलोकेर पक्ष हइते पोष्यपुत्र राखा जाओन विशये जेलार आदालतेर नथिर गृथित व्यवस्थासकल ओ ए आदालतेर पण्डितगणेर व्यवस्थार मध्ये एइ प्रकार अनैक्य हइयाछे ये जिला वेहारेर आदालतेर नथिर व्यवस्था लेखा आछे ये स्त्रीलोके स्वामिर विना अनुमतिते पोष्यपुत्र राखनेर क्षमता राखे ओ ए आदालतेर पण्डितगणेर व्यवस्थाय लेखागियाछे ये स्त्रीलोक स्वामीर अनुमति व्यतीत पोष्यपुत्र राखार क्षमता[1] हवेक ना। अतएव चूडान्त हुकुम सादर हओनेर[2] पूर्व्व वेहारदेशेर चलित शास्त्र ओ धामिदिगेर वंसेर[3] डाँडा ओ व्यवहार ये यद्यपि कोन स्त्रीलोके पतिर अनुमति व्यतीत पोष्यपुत्र राखिया थाके, ऐ पोष्यपुत्र शास्त्रानुसारे उहारदिगेर वंशेर डाँडा ओ व्यवहार दृष्टे सिद्ध हइ-

१ क्षमता ना हवेक—व्यप०। २ हओनेर—व्यप०। ३ वंसेव डाँडा—व्यप०।

याछे कि ना—अवगत हओन आवश्यक हइया हुकुम हइल ये एइ रोवकारिर नकल एइ हुकुमे ये ऐ जिलार जजसाहेब साकिम ऐ जिलार तिन चारि जन प्रधान पण्डितगणेर द्वाराय तथाकार चलित शास्त्रेर आज्ञा सकल ओ धामिगणेर वंशेर डाँडा ओ व्यवहार उपरेर लिखित प्रकारे तहकिकात् करिया ये साव्यस्त हय ताहार-कैफीयत लओयाजिमा कागजसकलेर सम्वलित, ओ यद्यपि कखन ओ धामिरदिगेर पोष्यपुत्र विषय याहा पतिर अनुमति व्यतीत राखियाछे, अन्य कोन एक मकद्दमा ऐ जिलार आदालते उपस्थित ओ निष्पत्ति हइयाथाके सेइ मकद्दमार आशल रोयदाद-ओ पाठाएन एक मास मेयादे परिसिष्टेर लेफाफा जेला वेहारेर जजसाहेवेर निकट पाठान याय, ओ एइ रोवकारिर द्वितीय नकल एइ कारण ए आदालतेर पण्डित वैद्यनाथमिश्रेर हाओयाला कराजाय ये ऐ पण्डित एइ कथासकलेर जवाव ये एइ मकद्दमा वावत ताहान दाखिल करा व्यवस्था ओ जेला वेहारेर आदालतेर नथिर गृथित व्यवस्थासकले ये ये ग्रन्थेर नामसकल लेखा आछे, ऐ सकल व्यवस्था ऐ सकल ग्रन्थेर वचनसकलेर मते वटे कि ना, एइ रोवकारिर नकल पाओनेर तारिख हइते एक सप्ताह मध्ये दखिल करेण इति ।

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरावरटहालडनराटरीसाहेवधर्म्माधिकरणलिखितैतदब्दीयागस्तिमासीयचतुर्थदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तन्मासीयचतुर्विंशतिदिने घटिकैकाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

अस्मल्लिखितव्यवस्थाया वेहारदेशीयजिलाख्यावान्तरधर्म्माधिकरणीयव्यवस्थाभिः सह विरोधे इदमेव कारणम्—दत्तकमीमांसादत्तकचन्द्रिकादत्तकदीधितिदत्तकदर्पणदत्तककौमुदीवीरमित्रोदयव्यवहारमयूखादिदत्तकविषयकग्रन्थमात्र एव 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद् भर्त्तुः' इति स्त्रियाभर्त्रनुमतिं विना दत्तकपुत्रग्रहणाधिकारनिषेधकवशिष्ठवचनस्य लिखितत्वात् कस्मिंश्चिदपि वेहारदेशचलितग्रन्थे कस्यचिदपि मुनेरेतादृशं वचनं

लिखितं नास्ति तद्वचनानुसारेण स्त्रियाभर्त्रनुमतिं विनापि दत्तकपुत्रग्रहणाधिकारो भवेत्। यद्विषयस्य मुनिवचनेन ग्रन्थमात्र एव निषेधो लिखितः[1] स विषयः शास्त्रानुसारेण सिद्धो भवितु न शक्नोति। एवं जिलाख्यधर्म्माधिकरणीयपत्रजातान्तर्गताश्चतस्रो व्यवस्थास्तासां प्रतिरूपाणि,[2] एवञ्च मिलित्वा सप्तव्यवस्थासु च वहोरभट्टलिखितपञ्चविंशत्यङ्काङ्कितव्यवस्थायां द्वात्रिंशदङ्काङ्कितव्यवस्थायां च भर्त्रनुमतिं विनापि स्त्रिया दत्तकत्वेन गृहीतः पुत्रस्त्यक्तुं न शक्यत इति यत्तेन पण्डितेन लिखितं तन्न शास्त्रसम्मतं भवति। यस्मिन् विषये यस्याः स्त्रियाः सामर्थ्यं नास्ति तया कृतः स विषयो निवृत्तो भवितुं न शक्नोत्यर्थात् सिद्धो भवितुं शक्नोतीत्येतद्विधायकशास्त्राभावात्। एवं याज्ञवल्क्यस्य मुनेरिदं वचनं "यदि काचित् स्त्री पत्यनुमतिं विना कस्यचिद्दत्तकपुत्रत्वेन ग्रहणं कृतवती[3] स्यात्तदा सा स्त्री स्वयं तं दत्तकपुत्रं त्यक्तुं न शक्नोति। अनुमत्यभावेन यदि यस्याः पतिस्त्यक्तुमिच्छति तदा स दत्तकपुत्रस्त्यक्तो भवितुं शक्नोति"—इति पञ्चविंशत्यङ्काङ्कितव्यवस्थायां यत्तेन पण्डितेन लिखितं तदतीवनिर्म्मूलं याज्ञवल्क्यस्य मुनेरन्यस्य कस्यचिद्वा मुनेरेतादृशार्थप्रतिपादकवचनाभावात्।

अथ च पञ्चविंशत्यङ्काङ्कितलीलाधरपण्डितलिखितव्यवस्थायां पूर्व्वं यत् प्रभुप्रश्नस्योत्तरे पतिपुत्रविहीना[4] स्त्री रीत्यनुसारेण शास्त्राज्ञानुसारेण[5] (च) दत्तकपुत्रं ग्रहीतुं[6] शक्नोति स[7] सिद्धो भवति इति यल्लिखितं तत्र शास्त्राज्ञाया अयमर्थो विवादचन्द्रविवादचिन्तामणिकल्पतरुप्रभृतिग्रन्थेषु लिखितः—स्त्री पत्युरनुमत्या, यदि पतिर्नास्ति तदा ज्ञात्यनुमत्या, दत्तकपुत्रं कर्त्तुं शक्नोति स सिद्धो भवति-इति यत्तेन पण्डितेन लिखितं तदतीवाशुद्धं मिथिलादेशचलितविवादचन्द्रविवादचिन्तामणिकल्पतरुप्रभृतिग्रन्थेष्वपि "न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद् वा" इत्यत्र "अनुज्ञानाद्भर्त्तुः" इति स्त्रिया भर्त्तृनुमतिं विना दत्तकपुत्रग्रहणाधिकारनिषेधकवशिष्ठवचनस्य लिखितत्वात्। पत्युरभावे ज्ञात्य-

---

१. लिखित—व्यप०। २. प्रतिरूप—व्यप०। ३. कृतं—व्यप०।
४ विहिना—व्यप०। ५. ०ज्ञानानु०—व्यप०। ६. गृहीतुं—व्यप।
७. सः—व्यप०।

नुमत्या स्त्रिया दत्तकपुत्रो ग्राह्य इत्यस्यालिखितत्वाद् वरं तदन्तर्गतमिथिला-देशचलितविवादचिन्तामणिग्रन्थे दत्ताप्रदानिकप्रकरणे "विशेषेण भर्त्तनुमतौ सत्यामपि स्त्रिया दत्तकपुत्रग्रहणे नाधिकारस्तदङ्गव्याहृतिहोमबाधादितिवर्त्तुलार्थः" इति लिखितत्वाच्च । एवं जिलाख्यधर्म्माधिकरणीयपत्रजातान्तर्गतव्यवस्थासु यद्यद्ग्रन्थानां नामानि लिखितानि सन्ति ताः सर्व्वा एव व्यवस्थास्तत्तद्ग्रन्थधृतमुनिवचनानां सम्मता न भवन्ति; यतस्तत्तद्ग्रन्थेषु सर्व्वेष्वेवान्येषु ग्रन्थजातेष्वपि विशेषेण "न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद् भर्त्तुः" इति स्त्रिया भर्त्रनुमतिं विना दत्तकपुत्रग्रहणाधिकारनिषेधकवशिष्ठवचनस्य लिखितत्वात् । कस्मिंश्चिदपि वेहारदेशचलितग्रन्थे वेहारदेशीयजिलाख्यावान्तरधर्म्माधिकरणीयव्यवस्थासु वा कस्यचिदपि मुनेरेतादृशं वचनं लिखितं नास्ति यद्वचनानुसारेण स्त्रिया भर्त्रनुमतिं विनापि दत्तकपुत्रग्रहणाधिकारो भवेदिति ।

अत्र प्रमाणम्—

न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्त्तुः—इतिदत्तकमीमांसा(पृ० ७)दत्तकचन्द्रिका(पृ० ३)दत्तकदीधितिदत्तकदर्पण(पृ० १ क, पं० १२)दत्तककौमुदी(पृ० १ क, पं० १२)वीरमित्रोदयव्यवहारमयूखविवादचन्द्रविवादचिन्तामणिकल्पतरुप्रभृतिग्रन्थधृतवशिष्ठवचनम् ॥ १ ॥

अत्र[1] च निमित्तं भर्त्रनुज्ञानं, ततश्च विधवाया भर्त्तभावेनानुज्ञानासम्भवान्निर्निमित्तकप्रतिप्रसवाप्रवृत्त्या प्रापकान्तराभावाच्च नाधिकारः इति सर्व्ववादिसम्प्रतिपन्नमेव—इति दत्तकमीमांसाग्रन्थलिखनम् (पृ० १२-१३) ॥ २ ॥

भर्त्रनुज्ञानेऽपि स्त्रिया न ग्रहणाधिकारः, तदङ्गव्याहृतिहोमबाधादिति वर्त्तुलार्थः। ननु 'अन्यत्रानुज्ञानाद्भर्त्तुः' इत्यविशेषेण श्रवणाद् भर्त्तनुज्ञादानवत् ग्रहणेऽपि स्त्र्यधिकारसिद्धौ तदङ्गविद्याप्रयुक्तिरपि तस्याः कल्पते, इति चेत्, सत्यं सहत्वेन तस्या अधिकार इष्टिवन्न पृथक्त्वेन बाधसापेक्ष्यविध्यापत्तेः—इति विवादचिन्तामणिग्रन्थलिखनञ्चेति ॥ ३ ॥

---

१ तत्र—दत्तमी० ।

शीतम्बरमासस्योनविंशतिदिने घटिकैकाधिकयामद्वये मयेयं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

७७—रोवकारि मिसिल आदालत देओयानि सदर तारिख १८ माह आगस्त शन १८२६ इं मतावक ३ माह भाद्र शन १२३६ वाङ्गला रोज मङ्गलवार ऐ आदालतेर हाकिम श्रीयुत रावरट हालडन राटरी साहेवेर वैठके ।

सिओवकसमिछर वनाम देविप्रसादपाडे प्रभृति

साएलेर उकिल मुनशी होसेन आलि हाजिर आसिल । परगणे घेसुवार मौजे पलाश एडिहार अद्धेकेर उपर आमल ओ दखल देयाइया पाओनेर मकर्दमार तृगुण सदर जमा ९०३ टाकार शंख्याय खास आपिल मञ्जुरिर प्रार्थनाय ५० टाकार मूल्येर इष्टम्प कागजेर उपर सायेलेर सओयाल, याहा ऐ उकिलेर नामिक उकालतनामा इं १८२७ सालेर माइ मासेर १५ तारिखेर लिखित वारानशेर प्रविनशन कोटेर फयशलार नकल सहित, याहा ऐ सनेर अक्तुवर मासेर २९ तारिखे दुइ टाकार मूल्येर फेहरस्त द्वाराय दाखिल हइयाछिल, अद्य दृष्टे आसिल । हुकुम हइल ये एइ रोवकारिर नकल एखने आपिलेर सम्पकिय कागजसकल एइ हुकुमे ए आदालतेर पण्डित वैद्यनाथमिश्रेर हाओला करा जाय—ये ऐ पण्डित ऐ कागजसकलेर ए दौहित्र मातामहेर दत्त कता सिद्धि हओन सम्वलित कोट आपिलेर पण्डितेर व्यवस्था ये ताहार खोलासा मजमुन कोटेर फयसलार लिखा आछे, अनुमोदने ऐ ऐ व्यवस्थार सिद्धता ओ असिद्धता लिखेन, ओ पण्डितेर व्यवस्था दाखिल हओन पर्य्यन्त सैयद रहमत आलिर खास आपिलेर

सओयाल मञ्जुर ओ नामञ्जुर हओनेर चूडन्त हुकुम सादर हओन स्थकित थाके इति ।

श्रीर्ज्जयतितराम् ।

जवावव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरावरटहालहनराटरिसाहेवधर्म्माधिकरणलिखिताङ्करेजीशब्दप्रतिपाद्योनत्रिंशदधिकाष्टादशशताब्दीयागस्तिमासीयाष्टादशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं यत्तदब्दीयदिसम्बरमासीयाष्टाविंशतिदिवसीयप्रभ्वाज्ञान्तरानुसारेण[1] तदब्दीयतन्मासीयत्रिंशद्दिने घटिकात्रयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

दौहित्रो मातामहस्य दत्तकः सिद्धो भवतीत्येतदर्थप्रतिपादककोटापीलाख्यधर्म्माधिकरणनियुक्तपण्डितलिखिता व्यवस्था, यस्याः तात्पर्यार्थः कोटापीलाख्ये धर्म्माधिकरणीयजयपत्रे लिखितः, सा व्यवस्था शास्त्रसिद्धा न भवति । प्रभुसमर्पितपत्रजातैरर्थिप्रत्यर्थिनो[2]र्द्वयोरेव ब्राह्मणजातीयत्वनिश्चयेन ब्राह्मणजातौ दौहित्रो मातामहस्य दत्तको भवितुं न शक्नोतीति शास्त्रे निषेधाद्—इति वाराणस्यादिप्रचलितदत्तकमीमांसादत्तकचन्द्रिकादत्तकदीधितिदत्तकदर्पणदत्तकनिर्णयादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

दौहित्रो भागिनेयश्च शूद्रैश्च[3] क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥ इति दत्तकमीमांसा(पृ० ५६)दत्तकचन्द्रिका (पृ० ७)दत्तकदीधितिप्रभृतिग्रन्थधृतशौनकवचनम् ॥ १ ॥

तथा च भागिनेयपदं दौहित्रस्याप्युपलक्षणमेव—इति दत्तकमीमांसा(पृ० ६६–६७)ग्रन्थलिखनम् ॥ २ ॥

---

१. प्रभोराज्ञा०—व्यप० । २. प्रत्यर्थिनौ०—व्यप० । ३. शूद्राश्च—व्यप० ।

तथापि भागिनेयदौहित्रवर्ज्जं विरुद्धसम्बन्धापत्त्या पुत्रत्वबुद्ध्यनर्ह-भ्रातृपितृव्यमातुलवर्ज्जं च त्रयाणां वर्णानां स्वसमानवर्ण एव—इति दत्तक-दीधितिग्रन्थलिखनञ्चेति ॥ ३ ॥—

त्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयोनविंशतिदिने घटिकात्रया-धिकयामद्वये मयेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

नं० २८२२

७८—रोवकारि मिसिल आदालत देओयानि सदर तारिख १६ माह सितम्वर सन १८२९ ई मतावक १ माह आश्विन सन १२३६ वाङ्गला रोज वुधवार ऐ आदालतेर हाकिम श्रीयुत कटवरट थरलेन[1] सिली साहेवेर वैठके ।

आनन्दनाथराय आप्राप्तव्यवहारेर उछिगन भवानीप्रसाद-चौधुरि ओ विश्वनाथ चक्रदार—

आपीलाण्टान—

राणी जगदम्बा— रष्पाडण्ट—

आपिलाण्टगणेर उकिल मुनशी होसेन आलि, रष्पाडण्टेर उकिल सदासुख पण्डित हाजिर आसिल । ए मकद्दमा पूर्व्वे एइ मासेर ७ ओ ८ ओ ९ ओ १० ओ १५ तारिखसकले रोवकार ओ प्रविनशन कोटेर कागजसकल १ लम्वर हइते तथाकार फयशला पर्य्यन्त ए आदालतेर आरजी मजुवात ओ जवाव पडागिया दिवा अवसान प्रयुक्त स्थकित छिल, पुनराय अद्य उपस्थित हइया ए आदालतेर वाकी समस्त कागज एइ शनेर आगस्त मासेर १५ तारिखेर हओया ए आदालतेर हाकिम श्रीयुत मान्तेगिओ हेनरि

---

१. थरलेल—व्यप० ।

टरम्वल साहेवेर राय संवलित पडागेल। तत्परे रष्पाडण्टेर उकिल चारि टाका मूल्येर फेहरेस्तेर द्वाराय विश्वनाथशर्म्मा चङ्गदार ओ भैरवनाथशर्म्मार जवावेर १ किता नकल ओ वाङ्गला अक्षर ओ मजमुणेर एक किता दस्तावेजेर नकल लम्वरे दाखिल करिल, दृष्टे आसिल। यथा चूडन्त हुकुम सादर हओनेर जवाव लओया उचित हइल, अतएव हुकुम हइल ये एइ रोवकारिर नकल एइ मकद्दमा वावत दुइ आदालतेर समुदय कागच एइ हुकुमे ए आदालतेर पण्डितके समर्पण क(र)ा जाय ये ऐ पण्डित समस्त कागजेर दृष्टे ओ अनुमोदने एइ विषयेर सओयालेर जवाव ये यद्यपि विरोधीय ग्रामसकल देवसेवा वावत ओ ताहार उपर सरकारेर खाजाना मकरर थाके, ऐ प्रकारे देवतार सेवाइत व्यक्तिके ऐ सकल ग्राम विक्रय करार क्षमता आछे कि ना, ओ वङ्गदेश चलित शास्त्रानुसारे एमत विक्रय सिद्ध ओ यथार्थ वटे कि ना, एइ रोवकारिर नकल पाओनेर तारिख हइते पञ्च दिवसेर मध्ये लिखिया दाखिल करेण इति।

जवावव्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरलेनसिलीसाहेवधर्म्माधिकरणलिखितैतदब्दीयसितम्वरमासीयषोडशदिवसलिखितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं यत्तन्मासीयाष्टादशदिने यामद्वयानन्तरं मया प्राप्तं, तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यद्यपि विवादास्पदीभूताः सर्व्वे ग्रामा देवतानां सराजका भवन्ति, तदा देवतायाः सेवाइतव्यक्तिशब्दवाच्यस्य व्यक्तिविशेषस्य तेषामेव ग्रामाणां विक्रयकरणे क्षमता नास्ति, एवमेतादृशविक्रयो वङ्गदेशचलितशास्त्रानुसारेण यथार्थो भवितुं सिद्धो भवितुञ्च न शक्नोति। प्रभुसमर्पितपत्रजातैर्विवादास्पदीभूताः सर्व्वे ग्रामा एतादृशविक्रयात् पूर्व्वमेतदर्थमेव नियमिता स्थिताः—यथा एतेषां ग्रामाणां राजग्राह्यकरं राज्ञे दत्त्वा अवशिष्टैरेतद्ग्रामोत्पन्नैर्देवतानां

सेवा भविष्यतीत्यवगमादेतादृशवृत्तान्ते सति देवतायाः सेवाइतशब्दवाच्यस्य तत्र संरक्षणावेक्षणादिकर्त्तृत्वं विना राजग्राह्यकरस्य राज्ञे समर्पणञ्च विना किञ्चिदपि स्वत्वाभावात् तत्तद्ग्रामाणां दानविक्रयकरणक्षमताया दूरापास्तत्वाद्, अथ च शास्त्रानुसारेणास्वामिकृतविक्रयस्य दानस्य वा राज्ञा परावर्त्तनीयत्वाच्च—इति वङ्गदेशचलितमनुकुल्लूकभट्टकृतमन्वर्थमुक्तावलीदायभागविवादभङ्गार्णवविवादार्णवसेत्वादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।

स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥—इति मनुवचनम् (११।२६) ॥ १ ॥

प्रतिमादिदेवतार्थमुत्सृष्टं[2] *धनं देवस्वम्*—इति मन्वर्थमुक्तावल्यां[1] कुल्लूकभट्टलिखनम् (पृ० ४३०) ॥ २ ॥

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।

अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इति मनुवचनम् (८।१९९) ॥ ३ ॥

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेत्—इति विवादार्णवसेतु (पृ० १३४)विवादभङ्गार्णवादि(१ विवाभ पृ० ३१७ ख)ग्रन्थधृतकात्यायन(कास्मृ० पृ० ७६)वचनञ्चेति ॥ ४ ॥

सितम्बरमासस्य पञ्चविंशतिदिने मयेयं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

परमात्मने नमः—

महामहिमश्रीयुक्तगवनरमेण्टसंस्कृतपाठशालास्थ

पण्डितवर्गेषु—

---

१. मुक्तवली—व्यप० ।

२. ०देवतातदर्थं०—व्यप० ।

७९—कोनो व्यक्ति आपन सकर तालुकेर मध्ये कोन कोन ग्राम देवसेवार्थ देवतार नामे नियमित करिया, किञ्चित्काल देवसेवादि कारिया, कनिष्ठ पुत्रके ऐ देवसेवार्थ सकर स्थावर अर्पण पूर्व्वक देवसेवार्थ अनुमति करिया परलोकगामी हयेन। परे ऐ कनिष्ठ पुत्र बहुकाल देवसेवक रूपे प्रसिद्ध थाकिया, ऐ स्थावरेर करग्रहण राजस्वदान देवसेवादि करिया, ऐ स्थावर देवनाम सम्वलित आपन नामे दस्तखत करिया विक्रय करेन। ऐ विक्रय सिद्ध हय कि ना। इहार व्यवस्था गौडदेश प्रचलित शास्त्रानुसारे लिखिते आज्ञा हय इति।

देवनाम्ना नियमितस्य सकरस्थावरस्य तद्देवसेवकेन देवनामसंवलितस्व[1]-नामाङ्कितपत्रं कृत्वा कृतो विक्रयः सिद्ध एव। किन्त्वियान् विशेषः—विक्रेतुर्यथा करग्रहणराजस्वप्रदानादिसम्पादकं लोकसिद्धं स्वत्वं तत्रासीत् क्रेतुरपि तादृशमेव लौकिकं स्वत्वं तत्र जातं देवस्वत्वस्य विजातीयक्रेतृस्वत्वं प्रत्यबाधकत्वात्, स्वकरोपादानाय राजकृतविक्रये देवस्वत्वस्य क्रेतृस्वत्वाबाधकत्ववत् स्वपितृकृतदानाद् विक्रेतृकनिष्ठपुत्रस्वत्ववद् विक्रयमकृत्वा तस्मिन् मृते तदुत्तराधिकारिस्वत्ववच्च—इति गौडदेशप्रचलितश्रीकृष्णतर्कालङ्कारकृतदायभागटीकामिताक्षराग्रन्थविदाम्परामर्शः ॥ ० ॥

राज्यान्तराधिकारिणः सकाशान्नृपतिना क्रीतेऽपि राज्यान्तरादौ विक्रेतृस्वत्वसजातीयकरग्रहणोपयोगिस्वत्वमेव तत्रास्य जायते, न तु दायप्रतिगृहीतभूम्यादिवृत्तिस्वत्वसजातीयस्वत्वं तत्रत्यानां तत्र तत्र भूम्यादौ तथाविधस्वत्वसत्त्वेन तद्विरोधात् तादृशस्वत्वोत्पत्त्यसम्भवात् समानजातीययोः स्वत्वयोर्व्विरोधादिति[2]। तथा स्वत्वधारावारणाय सजातीयस्वत्वं प्रतिस्वत्वं विरोधीति सजातीयमितिकरणात् क्रीतप्रतिगृहीतराज्यान्तर्व्वर्त्तिनि तादृशस्थावरादौ क्षेत्रादेः क्रयाद्यधीनस्वत्वोत्पादे न व्यभिचार इति च दायभागटीकाकृच्छ्रीकृष्णतर्कालङ्कारलिखनम्। अनेन यस्मिन् द्रव्ये यस्य यादृशं स्वत्वं तेन तद्द्रव्यविक्रये क्रेतुस्तस्मिन् द्रव्ये तादृशमेव[3] स्वत्वं जायते इति स्फुटमव-

१. सम्वलित—व्यप०। २. स्वत्वयोः—व्यप०। ३. ०मेवमेव—व्यप०।

गम्यते। उच्यते—लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वाद् व्रीह्यादिवद्, अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वस्वव्यवहारो दृश्यते, क्रयविक्रयादिदर्शनात्। किञ्च नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते इत्यादि मिताक्षरालिखनम् (पृ० १९७)। एतेन स्वत्वस्य लौकिकत्वात् (देव)सेवकस्यापि तत्र स्थावरे विजातीयस्वत्वमस्त्येव। अन्यथा उदासीना अपि तत्स्थावरस्य करग्रहणादिकं देवमेवाश्च कुर्य्युरिति।

परमात्मने नमः—

श्रीरामचन्द्रशर्म्मणाम्।

श्रीहरिः शरणम्।

नवद्वीपस्थ—

महामहिमश्रीयुक्तपण्डितवर्गेषु[१]—

८०—तत्तद्देवसेवार्थं तत्तद्देवनाम्ना नियमितस्य सकरस्थावरस्य बहुकालकृततत्तद्देवसेवकेन तत्तद्देवतानामसंवलितस्वनामाङ्कितपत्रं कृत्वा कृतो विक्रयः सिद्ध एव। तत्र विक्रेतृनिरूपितकरग्रहणोपयोगिराजस्वदानसम्पादकलौकिकस्वत्वसजातीयक्रेतृस्वत्वोत्पत्तौ बाधकाभावात्स[२]जातीयस्वत्वं प्रति स्वसजातीयस्वत्वप्रतिबन्धकतया देवस्वत्वादेर्व्विजातीयतया तादृशस्वत्वम्प्रत्यबाधकत्वाद्—इति विदुषाम्परामर्शः ॥ ० ॥—

अत्र प्रमाणम्—

गौडदेशचलितदायभागटीकाकृच्छ्रीकृष्णतर्कालङ्कारभट्टाचार्य्यलिखनम्—राज्यान्तराधिकारिणः सकाशान्नृपतिना[३] क्रीतेऽपि राज्यान्तरादौ विक्रेतृस्वत्वसजातीयकरग्रहणोपयोगि स्वत्वमेव तत्रास्य जायते, न तु दायप्रतिगृहीतभूम्यादिवृत्तिस्वत्वसजातीयस्वत्वं तत्रत्यानां, तत्र तत्र भूम्यादौ तथाविधस्वत्वसत्त्वेन तद्विरोधात् तादृशस्वत्वोत्पत्त्यसम्भवात् समानजातीययोः स्वत्वयोर्व्विरोधादिति (दाभाटी० पृ०१०), तथा स्वत्व-

१ यथा ७९ अङ्किते व्यवस्थापत्रे तथा इहाप्यासीदित्यनुमीयते।

२ •स्वजातीय०—व्यप०। ३ सकाशान्नृप०—व्यप०।

धारा(वा)रणाय सजातीयस्वत्वं प्रति स्वत्वं विरोधीति सजातीयमिति करणात्। क्रीतप्रतिगृहीतराज्यान्तर्व्वर्त्तिनि तादृशस्थावरादौ क्षेत्रादेः क्रयाद्यधीनस्वत्वोत्पादेऽपि न व्यभिचारः (दाभाटी० पृ० ६) इति च ॥०॥

श्रीहरिः—	**श्रीजगदीशो जयति**
श्रीरामलोचनशर्म्मणाम्	**श्रीकालिकाप्रसादशर्म्मणाम्**
श्रीहरिः—	**श्रीहरिः—**
श्रीराममोहनशर्म्मणाम्	**श्रीरघुनाथशर्म्मणाम्**
श्रीहरिः शरणम्	**श्रीहरिः—**
श्रीरामचन्द्रशर्म्मणाम्	**श्रीकाशीनाथशर्म्मणाम्**
श्रीहरिः—	**श्रीहरिः—**
श्रीरामशर्म्मणाम्	**श्रीभोलानाथशर्म्मणाम्**
श्रीहरिः—	**श्रीहरिः—**
श्रीकालीप्रसन्नशर्म्मणाम्	**श्रीराधानाथशर्म्मणाम्**
श्रीहरिः—	**श्रीहरिः—**
श्रीकालीदासशर्म्मणाम्	**श्रीहरिश्चन्द्रशर्म्मणाम्**

श्रीरामः—

श्रीरामसुन्दरशर्म्मणाम्

विद्यामन्दिरस्थपण्डितवर्गेषु—

८१—कश्चन स्वाधिकृतसकरग्रामान्तर्वर्त्तिकियद्ग्रामान् देवसेवार्थं नियम्य, देवतानाम्ना विख्याप्य, कियत्कालं देवसेवादिकं कृत्वा कनिष्ठ-पुत्रं तद्देवसेवार्थं तद्ग्रामाधिकारित्वेन संस्थाप्य, लोकान्तरं गतः। अनन्तरं तत्कनिष्ठपुत्रो देवसेवकत्वेन प्रसिद्धिमवलम्ब्य, तद्ग्रामसम्बन्धिकरग्रहण-

नियमितराजस्वप्रदानदेवसेवादिकं बहुकालं कृत्वा, तद्ग्रामान् देवनामसंवलितस्वनामाङ्कितपत्रेण विक्रीतवान्। तत्कृततद्विक्रयः स्वस्वत्वास्पदद्रव्यसम्बन्धितया सिद्ध्यत्येवेति विदुषां परामर्शः—

अत्र प्रमाणम्—

अत्रोच्यते। "लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत्" इत्युपक्रम्य, "अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते, क्रयविक्रयादिदर्शनात्। किञ्च नियतोपायकं स्वत्वं लोकसिद्धमेवेतिन्यायविदो मन्यन्ते" इत्यादि मिताक्षराकृद्भिः (पृ० १९७) स्वत्वस्य लौकिकत्वेन स्थिरीकृतत्वात्, लोके देवसेवार्थनियमितसकरस्थावरस्य स्वस्वत्वसंग्रहीतृस्वत्वजनकदानादिदर्शनात्[1] च स्वस्वत्वध्वंसपरस्वत्वोत्पादनरूपदानान्यथानुपपत्त्या, सकरभूमिदेवसेवार्थनियामकदेवसेवकस्यापि तत्र स्वत्वमिति स्थितम्। स्वत्वस्य च यथेष्टविनियोगप्रयोजकत्वेन द्रव्ये स्वकीयं यादृशं स्वत्वं तादृशस्वत्वजनकदेवसेवककर्त्तृकविक्रयसिद्धिर्निराबाधेति युक्तिः। तादृशस्थावरस्य करग्रहणराजस्वप्रदानदेवसेवादिप्रयोजकतादृशविक्रेतृस्वत्वसक्रेतृस्वत्वोत्पत्तौ[2] तु "पराजितनृपतिराज्यान्तर्वर्तितत्तत्पुरुषीयक्रमागतस्थावरादौ जयादिना जेतुर्नृपतेः करग्रहणोपयोगिस्वत्वोत्पादे तथा क्रीतप्रतिगृहीतराज्यान्तर्वर्त्तिनि तादृशस्थावरादौ क्रेत्रादेः क्रयाद्यधीनस्वत्वोत्पादेऽपि न व्यभिचारः"-इति श्रीकृष्णतर्कालङ्कारलिखनं (पृ० ६) तुल्यस्थानीयत्वेन प्रमाणम् ॥०॥

श्रीहरिर्जयति—
श्रीरामरत्नशर्म्मणाम्

श्रीहरिः—
श्रीपार्व्वतीचरणशर्म्मणाम्

श्रीगुरुर्जयति—
श्रीहरनाथशर्म्मणाम्

श्रीहरिः—
श्रीजगन्मोहनशर्म्मणाम्

श्रीहरिः—
श्रीनाथुरामशर्म्मणाम्

श्रीहरिः—
श्रीयोगध्यानमिश्राणाम्

---

१. ०समगृहीतृ०—व्यप०। २. ०समक्रेतृ०—व्यप०।

श्रीहरिःशरणम्— श्रीशङ्करोजयति—

श्रीलक्ष्मीनारायणशर्म्मणाम् श्रीशम्भुचन्द्रशर्म्मणाम्

श्रीहरिः— श्रीविष्णुर्जयति—

श्रीजयगोपालशर्म्मणाम् श्रीनिमाइचन्द्रशर्म्मणाम्

श्रीहरिः— श्रीहरिः—

श्रीहरिप्रसादशर्म्मणाम् श्रीगंगाधरशर्म्मणाम्

श्रीहरिर्जयति—

श्रीपीताम्बरशर्म्मणाम्

८२—प्रथमप्रश्न—

यद्यपि कोन व्यक्ति जामि सम्पच्च[1] कोन वस्तु ओ एक स्त्री ओ दुइ कन्या राखिया मृत्यु हय। परे ऐ स्त्री ऐ दुइ कन्यार प्रतिपालन ओ आविश्वक खरचेर निमित्ते ऐ जमिर मध्ये किछु विक्रय करिया मृत्यु हय। परे ऐ दुइ कन्यार अवशिष्ट जमि विभाग करिया लइया एक कन्या आपन अंश आपन भग्निके विक्रय करे। आर ऐ भग्निर तिन सन्तान। ताहार मध्ये एक वय-प्राप्त, आर दुइ नावालग। एमत स्थले ऐ वेक्त्या आपन नावालग पुत्रदेर भरण-पोषण ओ आवश्यक खरचेर जन्य आपन वयप्राप्त ओ नावालग ओ स्वामी सकले एकान्ने थाकिया स्वामि ओ वयप्राप्त पुत्रेर सन्मतिते ऐ दुइ पुत्र नावालग थाकिते उपरेर लिखित वस्तु वन्धक किम्वा विक्रय करिले शास्त्र सम्मत सिद्ध हइते पारे कि ना इति।

द्वितीय प्रश्न—

कोन नावालग व्यक्तिदिगेर पिता ओ माता थाकिते नावालग वेक्तिदेर मालिक शास्त्र सम्मत अन्य केह हइते पारे कि ना।

---

१. समपक्ष—साधीयान् पाठः।

एइ दुइ प्रश्नेर प्रत्युत्तर वचन ओ तस्य भाशा इहार पार्श्वे लिखिवेन इति। शन १८२९ तारिख १० जुन मो शन १२३६ साल वां तां २९ ज्यैष्ठ ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम्

यवावव्यवस्था

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्योनत्रिंशदधिकाष्टादशशताब्दीयलवम्बरमासीयद्वितीयदिनसम्बन्धिसोमवासरे सार्द्धघटिकात्रयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

यदि कश्चिद्व्यक्तिविशेषः कांचिद्[1] भूमिमेकां पत्नीं द्वे कन्ये च संरक्ष्य मृतः स्यात्, तदनन्तरं सैव मृतस्य पत्नी तयोरेव द्वयोः कन्ययोः[3] प्रतिपालनार्थं स्वकीयावश्यकव्ययार्थं च तस्या भूमेः किञ्चिद्विक्रयं कृत्वा मृता स्यात्, तदनन्तरं ते एव द्वे कन्येऽवशिष्टां भूमिं विभज्य, गृहीत्वा तयोर्म्मध्ये एका कन्या, प्रभुसमर्पितविचारपत्रावगतो यस्तदीयावश्यकव्ययस्तदर्थं स्वांशं स्वभगिन्या निकटे विक्रीतवती स्यात्, एवं क्रयकर्त्र्या भगिन्यास्त्रयः सन्तानाः[2], तेषां मध्ये एकः प्राप्तव्यवहारो द्वावप्राप्तव्यवहारौ, एतादृशवृत्तान्ते सति सैव क्रयकर्त्री अप्राप्तव्यवहारेण स्वपुत्रेणाप्राप्तव्यवहाराभ्यां स्वपुत्राभ्यां च स्वपतिना च सहैकान्ने स्थिता सती, स्वपत्यनुमत्या प्राप्तव्यवहारस्वपुत्रानुमत्या च सतोर्द्वयोरप्राप्तव्यवहारयोः स्वपुत्रयोरुपरिलिखितवस्तुनो बन्धकं विक्रयं वा कृतवती स्यात्, तदा स बन्धको विक्रयो वा शास्त्रतः सिद्धो भवितुं शक्नोति। यथा पुत्रपौत्रप्रपौत्रपर्य्यन्तरहितस्य मृतस्य धने पत्न्या उत्तराधिकारित्वेनाधिकारे जातेऽपि पत्न्या स्वभरणपोषणार्थं स्वकीयावश्यकव्ययार्थ च तद्धने दानाधमनविक्रयाधिकारः तथा पत्न्यभावे दुहितुरुत्तराधिकारित्वेनाधिकारे जातेऽपि

१. काचिद्—व्यप०। २. सन्ताना०—व्यप०। ३. कन्यया—व्यप०।

तस्या अप्यावश्यकव्ययार्थं स्वभरणपोषणार्थं च तद्धने दानाधमनविक्रयाधिकारोऽस्त्येव, सत्यां पुत्रवत्यां दुहितरि दौहित्रस्यानधिकारादिति ।

अत्र प्रमाणम्—

स्त्रीणां स्वपतिदायस्तु उपभोगफलः स्मृतः ।

नापहारं स्त्रियः कुर्य्युः पतिवित्तात् कथञ्चन ॥—इति दायभागा(दाभा० पृ० १७२)दिग्रन्थधृतभारतवचनम् (मभा०–१३।४७।२४) ॥ १ ॥

नापहारं स्त्रियः कुर्य्युः पतिवित्तात्कथञ्चनेति भारतादपहारशब्दार्थेन यथेष्टदानविक्रयाद्यनधिकारः—इति दायरहस्यग्रन्थलिखनम् ॥२॥

अतएव वर्त्तनाशक्तौ आधानमप्यनुमतम् । तत्राप्यशक्तौ विक्रयणमपि—इति दायभाग(पृ० १७३)ग्रन्थलिखम् ॥ ३ ॥

यद्वा पत्नीत्युपलक्षणं, स्त्रीमात्राधिकारेऽयमर्थो बोद्धव्यः—इति दायभाग(पृ० १८४)ग्रन्थलिखनम् ॥ ४ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादि(दाभा० पृ० १५१)ग्रन्थधृतयाज्ञवल्क्य (यास्मृ० २।१३५)वचनम् ॥ ५ ॥

द्वितीयप्रश्नस्योत्तरम्—

जीवति पितरि जीवन्त्यां च मातरि अप्राप्तव्यवहाराणां धनस्य प्रश्नपत्रलिखितमालिकशब्दवाच्योऽर्थात् संरक्षणकर्त्ता, अन्यः कश्चिच्छास्त्रतो भवितुं नार्हति, अप्राप्तव्यवहाराणां पित्र्यपेक्षया मात्र्यपेक्षया चान्येषां सुहृत्तरत्वाभावात्—इति वङ्गदेशचलितदायभागदायरहस्यविवादभङ्गार्णवव्यवहारतत्त्वव्यवहारमातृकादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

अभावे बीजिनो माता तदभावे तु पूर्व्वजः ।—इति व्यवहारतत्त्वादि(पृ० ६५)ग्रन्थधृतनारद (नासं०–२।३५)वचनम् ॥ १ ॥

अङ्गरेजीशब्दप्रतिपाद्यत्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयनवमदिनसम्बन्धिशनिवासरे यामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

८३—रोवकारि मिसिल आदालत देओयानि सदर तारिख १४ दिशम्बर शन १८२६ इं० मताबक १ माह पौष शन १२३६ बाङ्गला रोज सोमवार ऐ आदालतेर हाकिम श्रीयुत मान्तकियु हेनरी टरम्बल साहेबेर बैठके—

कृष्णलोचन प्रभृति	आपिलाण्ट
तारामणिदास्या प्रभृति	रेस्पाडण्ट

आपिलाण्टगणेर उकिल सदासुक पण्डित, रेस्पाडण्टगणेर उकिल मुनशी गोलाम वतुल हाजिर आसिल। एइ मकर्द्दमा एइ मासेर ६ तारिखे आमार बैठके रोवकार हइया जिलार आदालतेर, ओ प्रविशन कोर्टेर फयसलासकल ओ इं० १८२७ सालेर जानेओरि मासेर १० ओ १८ तारिखेर लिखित ए आदालतेर रोवकारिसकल ओ खास आपिलेर दरखास्त याहा मजुवात करार देया जाय, ओ ताहार जवाव ओ ए आदालतेर दाखिल हओया अन्य कागजसकल पडागिया स्थकित छिल, अद्य पुनराय रोवकार हइया जिला ओ कोर्ट आदालतेर नालिसि आरजि प्रभृति कागजात पडागेल। ये उभयेर पूर्व्वाधिकारि आदित्यराम चारि पुत्र राखिया मरे। प्रथम रामदुलाल ओ राधामोहन ओ गोविन्दप्रसादेर पिता कृष्णप्रसाद; द्वितीय ए मकर्द्दमार आसल मुद्दाआलेहेगण गङ्गाधरनाग ओ गदाधरनागेर पूर्व्वाधिकारि देविप्रसाद; तृतीय मुद्दइगणेर पूर्व्वाधिकारि कालिकाप्रसाद; चतुर्थ शम्भुनाथः ओ चारि भ्रातागण आपनारदिगेर पूर्व्वाधिकारिर मृत्युर पर पृथक हइया पितृत्यक्त वस्तु कण्टक[1] करिया दखिल हइलेन। ये कालिन कालिकाप्रसाद राधाकान्त नामे एक पुत्र ओ अन्नपूर्णा नामे एक स्त्री, ओ मुद्दइगणेर माता राजेश्वरी नामे एक कन्या राखिया मरे। ताहार परे ऐ राधाकान्तह अप्राप्तव्यवहार समये मरिल। ओ ताहार मृत्युर पर रामदुलाल प्रभृति कालिकाप्रसादेर उच्छि-

१. वण्टक—इति साधीयान्पाठः।

यत ओ ऐ राधाकान्तेर हेवार एजहारे मृत कालिकाप्रसादेर समस्त पैतृक ओ कृत[1] वस्तुसकलेर उपर दखिल हइलेन। तत्कालिन-प्रथमत गङ्गाधरनाग प्रभृति मृत कालिकाप्रसादेर त्यक्त वस्तुर-मध्ये तृतीय अंशेर दाविते, ओ ताहार परे मृत व्यक्तिर स्त्री मुशम्मात अन्नपूर्णा ओ कन्या मुशम्मात राजेश्वरि ऐ मृत व्यक्तिर समुदाय त्यक्त वस्तुते दखल पाओनेर जन्ये आपनाद्दिगेर सत्वेर एजहारे आदालते नालिश करिलेन, ओ इं० १८०६ शालेर दिशम्बर मासेर ३१ तारिखेर जिलार जज साहेवेर तजविजे रामदुला(ल)नाग प्रभृतिर एजहारि हेवा साव्यस्त हओन कारण दुइ मकद्दमार मुदइगणेर दावि डिसमिष हइल, ओ इं० १८१२ सालेर जुन मासेर ३० तारिखे अपिलेर आदालते गङ्गाधरनाग प्रभृतिर मकद्दमा सम्वन्धे जिलार फयशला वहाल थकिल. ओ राजेश्वरिर मकद्दमाय आदालतेर पण्डित हइते व्यवस्था लओन परे एइ साव्यस्थे, ये कालिकाप्रसादेर मृत्युर पर ताहार त्यक्त (धन) उहार-पुत्र राधाकान्तके अर्शे, ओ राधाकान्तेर मृत्युर पर मुदइगण हइते एक जन मुशम्मात राजेश्वरिर अाप्राप्तव्यवहार पुत्रगण, कृष्णलोचन प्रभृतिर स्वत्व हइया जिलार फयशला वद[2] ओ एइ हुकुमे डिकरि हइल ये राजेश्वरि आपिलाण्ट आपन अप्राप्तव्यवहार पुत्रगणेर स्वत्वे विरोधीय तालुकेर उपर दखल पाय, ओ मुशम्मात अन्नपूर्ना राधाकान्तेर त्यक्त वस्तु हइते भरण-पोषण पाइवेक इति। ओ ताहार खास आपिल पण्डितगण हइते व्यवस्था लओन परे ए आदालते नामञ्जुर हइल, ओ ए मकद्दमार नालिशेर एइ मूल ज्ञान हइल-ये यत्कालिन मुशम्मातान् अन्नपूर्णा ओ राजेश्वरि कालिकाप्रसादेर त्यक्त वस्तु दखल पाओनेर दाविते नालिश करिलेन। तत्कालिन एइ मकद्दमार मुद्दाआलेहगण गङ्गाधरनाग प्रभृति वाङ्गला १२१३ सालेर २० भाद्र मतावक इं०१८०६ शालेर ४ सेतम्वर मासेर लिखित ८४ लम्वरे गृथित गङ्गाधरनाग प्रभृतिर भग्नि-

१. क्रीत—इति साधीयान् पाठः। २. रद्द—इति साधीयान् पाठः।

पति दुर्गाचरण नामे ऐ मुशम्मातान हइते एइ खोलासा मजमुने एक किता एकरार लेखाइयाछे-ये मकद्दमाय[1] ये परिमान खरच हइवेक तोमरा दिवा, ओ आमरा आदालत हइते डिगरि पाइले कालिकाप्रसादेर त्यक्त हइते आमादिगेर सोल आना स्वत्व हइते ।=आनार कमेर विक्रय कवाला लिखियादिव, ओ ताहार पर यखन इं० १८१२ सालेर जुन मासेर ३० तारिखे आपिल आदालत हइते ऐ राजेश्वरिर अप्राप्तव्यवहार पुत्रगण कृष्णलोचन प्रभृतिर स्वत्वे डिकरि हइल एइ मकद्दमार मुद्दइगणेर माता मुशम्मात राजेश्वरि हइते वाङ्गला १२१६ शालेर १४ पौष मतावक इं० १८२२ सालेर दिशम्वर मासेर २७ तारिखेर लिखित ८५ लम्वरे गृथित विरोधीय रकम वावत कवाला, ओ ऐ तारिखेर लिखित मवलग १५०० टाका निर्व्वन्धे ८६ लम्वरेर रसिद लिखाइया ताहार द्वाराय विरोधीय वस्तुर उपर दखिलकार हइलेन, ओ आपिलाण्टान, अर्थात मुद्दइगण, ऐ छय आना रकमेर उपर दखल पाओनेर जन्ये एइ दलिले गङ्गाधरनाग प्रभृतिर नामे नालिस करियाछे ये उहार-दिगेर माता मुशम्मात राजेश्वरि शास्त्रानुसारे ताहारदिगेर स्वत्व हस्तान्तर करणेर क्षमता राखित ना,ओ रष्पाडण्टान ताहार जवावे जाहेर करे ये उहारद्दिगेर माता राजेश्वरि नष्ट उद्धार, अर्थात् उहा-द्दिगेर स्वत्व स्थिर राखन जन्ये ताहा हइते किछु विक्रय करिलेक; अतएव एमत विक्रय शास्त्रानुसारे सिद्धि थाकिवेक इति । ये हेतुक उपरेर लिखितसकल हइते पष्ट आछे ये अन्नपूर्णा ओ राजेश्वरिर पक्ष हइते कालिकाप्रसादेर त्यक्तेर सम्वन्धे उहाद्दिगेर स्वत्व दृष्ट ओ केवल आदालतेर खरचार जन्ये ८४ लम्वरेर एकरारनामा निदर्शन लिखित हइयाछे, ओ ऐ मुशम्मातेर नालिसि मकद्दमाय इं० १८१२ सालेर जुन मासेर ३० तारिखेर लिखित प्रविशन कोर्टेर डिकरि आपिलाण्टगणेर स्वत्व दृष्ट हइयाछे, ऐ मुशम्मा-तानेर स्वत्वे हय नाइ ओ इहाओ पष्ट आछे ये सरकारेर चलित

१. ये मकद्दमाय ये मक्कद्दमाय—व्यप० ।

आइनसकल अनुसारे ऐ मुशम्मातानेर मफलसिते नालिस करणेर दयमता छिल, ओ आदालतेर खरचार निमित्तकओ एवं आपिलाण्टगणेर प्रतिपालनार्थं उहादिगेर गुजराणेर कोनो हेतु ना थाकन प्रयुक्त ८५ लम्बरेर कवालार लिखित मुल्येर टाका देओन विषय ए मकद्दमार मुद्दाआलेहेगणेर एजहार विसिष्ट रूपे प्रतिपन्न नहे। केनना आपिलाण्टगणेर पिता रामलोचन वर्त्तमान थाकने उहादिगेर भरण ओ पोषणेर भार ताहार पर उचित छिल। उहादिगेर माता राजेश्वरिर पर छिलना। अतएव चूडन्त हुकुम सादर हओनेर पूर्व्वे ए आदालतेर पण्डित हइते व्यवस्था लओन उचित बोध हइया हुकुम हइल ये एइ रोवकारिर नकल मकद्दमार कागज सम्वलित ए आदालतेर पण्डितके एइ हुकुमे समर्पन कराजाय ये उपरे जे प्रकार लेखागेल मकद्दमार अवस्थार पर अनुमोदन परे एवं ८४ ओ ८५ लम्बरेर एकरारनामा ओ कवाला दस्तावेजात ओ साक्षिगणेर एजहारसकल दृष्टे याहा इं० १८२४ सालेर आगस्त मासेर १० तारिखेर हओया कोर्टेर हुकुम मते लओया गियाछे, ओ एइ दृष्टे ये कोनओ करार विक्रयेर दस्तावेज लिखित कालिन राजेश्वरिर स्वामी रामलोचन, अर्थात् मुद्दइगणेर पिता, जिवत्वान् छिल, ओ एवं पूर्व्वेर मकद्दमार विरोधीय वस्तु हरण कारक व्यक्तिर हस्त हइते निकालन जन्ये सरकारेर आइन मते पूर्व्वेर नालिश उपस्थित करणार्थे आदालतेर किछु खरचार आविश्वक[1] छिल नाइहार व्यवस्था एक सप्ताह मध्ये लिखेन—ये ऐ विक्रय वङ्गदेश चलित शास्त्रानुसारे सिद्धि वटे कि ना ? इति ॥—

श्रीर्ज्जयतितराम्

यथावद्व्यवस्था

एतद्धर्म्माधिकरणाधिपतिश्रीयुतमान्तकीयूहेनरीटरम्वलसाहेवधर्म्माधिक-

---

१. आवश्यक—इति साधीयान् पाठः।

रणलिखिताङ्गरेजीशब्दप्रतिपाद्योनत्रिंशदधिकाष्टादशशताब्दीयदिशम्बरमा-मीयचतुर्द्दशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवा-दविषयनिविष्टपत्रजातान्तर्गतचतुरशीत्यङ्काङ्कितसंवितपत्रं[1] पञ्चाशीत्यङ्काङ्कित-विक्रयपत्रं, साक्षिणां साक्ष्यपत्रजातं च यत्तदब्दीयतन्मासीयत्रयोविंशतितम-दिनसम्बन्धिबुधवासरे घटिकैकाधिकयामद्वये मया प्राप्तं तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रभुसमर्पितविचारपत्रलिखितवृत्तान्ते सति, मृतराधाकान्तत्यक्तधने तत्पितृदौहित्रत्वेनैतद्धर्म्माधिकरणार्थिनां कृष्णलोचनप्रभृतीनां स्वत्वे, एतद्ध-र्म्माधिकरणाज्ञायां जातायामपि तन्मातूराजेश्वर्य्यास्तद्धनस्वामित्वस्य सर्व्वथैव दूरापास्तत्वेन, तत्कृतैतादृशप्रभुकृतप्रश्नपत्रलिखितविक्रयः सिद्धो न भवति, प्रभुसमर्पितचतुरशीत्यङ्काङ्कितसंवितत्रे अन्नपूर्णया[2] राजेश्वर्य्या चेत्येव लिखितं —मदीयैतद्विवादे यावान् व्ययो भविष्यति,स भवता देयः,अस्माभिः षोडशाण-कपरिमितविवादास्पदीभूतसराञ्करस्थावरसमुदायात् षडाणकाः स्वस्वत्व-त्यागपूर्व्वकं तुभ्यं दत्ताः । अतएवैतादृशनियमलिखनमेवैतद्विक्रयस्य मूलम् । तत्र च शास्त्रानुसारेणान्नपूर्णायाः राजेश्वर्य्या वा तद्धनस्वामित्वस्याजातत्वेन, धर्म्माधिकरणविचारेणापि तथा पर्य्यवसानेन च, तत्कृततत्संवितपत्रस्य तन्नियमानाक्रान्तत्वाद्,अस्वामिकृतविक्रयस्य शास्त्रानुसारेण परावर्त्तनीयत्वा-च्च इति वङ्गदेशचलितमनुदायभागविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यव-स्था ॥ ० ॥ ० ॥ ० ॥

अत्र प्रमाणम्—

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।

अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इति मनु(पृ० ३०६) वचनम् ॥ १ ॥

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेत्—इति विवादभङ्गार्णवादि(१ विवाभ० पृ० ३१७ ख)ग्रन्थधृतकात्यायन (कास्मृ पृ० ७६)वचनञ्चेति ॥ २ ॥ ० ॥ ० ॥ ० ॥

---

१. सम्वित—व्यप० । २. वन्नपूर्णापा—व्यप० ।

अङ्गरेजीशब्दप्रतिपाद्यत्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयपञ्चमदिने मङ्गलवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

नं० ८ इं शन १८२७

८४—रोवकारि कोट आपिल, एलाका मरसिदावाद, तारिख ९ माहे जानेओरि, शन १८२९ इं, मतावक २७ माहे शन १२३५ वाङ्गला, रोज शुक्रवार काएममोकाम हाकिम श्रीयुत रावट हेनरि नेछवट साहेवेर बैठके।

वदनचन्द्रसिंह	मतालके मरशिदावाद
ओ अप्राप्तव्यवहार	
रामनारायणघोषेर पिता	
जिवनकृष्णघोष	आपिलाण्टान
राधानाथसिंह	रेष्पाडण्ट

तालुक कमलनयन वाटी प्रभृतिर हिस्याय दखल पाओन···· मवलग १२८। ८ गण्डा मकद्दमा।

एइ मकद्दमार मिछिल भिन्न २ तारिखसकले रोवकार हइया ए आदालतेर पण्डित हइते व्यवस्था लओन परे स्थकित[1] छिल, अद्य पुनराय आपिलाण्टेर उकिल रामप्रानराय, रेष्पाडण्टेर उकिल चैतन्यप्रसादरायेर हाजिरिते ए मकद्दमा उपस्थित हइल। यथा आपिलाण्टगणेर उकिल ए आदालतेर पण्डितेर व्यवस्थार पर अमत, ओ उचित मत आमारो विश्वास हइल ना। ओ मकद्दमार व्यवस्था एइ ये कृपानाथेर दुइ पत्र, प्रथम मुरलिमजुमदार, द्वितीय

१. स्थाकत—व्यप०

भवानीमजुमदार, ओ एक कन्या ओ दौहित्र राखिया मृत्यु हय ओ मुरलिर अंश ताहार दौहित्र पाइयाछे ओ भवानीमजुमदारेर चारि पुत्र, प्रथम हरगोविन्द, द्वितीय गङ्गाप्रसाद, तृतीय कालीप्रसाद, चतुर्थ रामप्रसाद छिल। ताहार मध्ये गङ्गाप्रसाद निःसन्तान ओ हरगोविन्द नफर नामे आपन एक पुत्र ओ तिन-कन्या राखिया पितार समक्षे मरे। ततपरे भवानीमजुमदारेर मृत्युर पर प्रथम कालीप्रसाद, ताहार पर रामप्रसाद निःसन्तान मरे। तदपरे ऐ नफरो निःसन्तान मरे। ततपरे प्रथम रामप्रसादेर स्त्री, ताहार पर हरगोविन्देर स्त्री मरे। ओ हरगोविन्देर दौहित्रगण वर्त्तमान ओ राधानाथ, ये रामप्रसाद ओ हरगोविन्द प्रभृतीर पितामह कृपानाथेर दौहित्र वटे, हरगोविन्देर दौहित्रगणेर नामे त्यक्त वस्तुर दाविदार हइल। अतएव उपरेर लिखित अवस्थाय त्यक्त वस्तु कोन व्यक्तीके अर्शे-इहार व्यवस्था शदर आदालतेर पण्डितगण हइते लओन आविश्यक। ए कारण हुकुम हइल ये एइ रोवकारिर नकल इङ्गरेजी चिठीर मध्ये कुरशीनामा ओ सओयाल सहित सदरेद रेजेष्टर शाहेवेर हुजुरे एइ प्रार्थनाय पाठान जाय जे साहेव मौसुफ शदरेर पण्डीतगण हइते ऐ सओयालेर जवाव लइया एइ आदालते पाठान, ओ ए मकद्दमा स्थकित थाके इति।

वदनचन्द्रसिंह ओ गयरह	आपिलाण्टा(न)
राधानाथसिंह	रष्पाडण्ट

एइ मकद्दमार विवरण एइ ये कृपानाथ आपन दुइ पुत्र, अर्थात् मुरलिमजुमदार ओ भवानी मजुमदार, आर एक कन्या ओ दौहित्र राखिया मृत्यु हय। मुरलिमजुमदारेर हिस्या ताहार दौहित्रे पाइयाछे, आर भवानीमजुमदार मजकुरेर चारि पुत्र, प्रथम हरगोविन्द, द्वितीय गङ्गाप्रसाद, तृतीय कालीप्रसाद, चतुर्थ रामप्रसाद छिल। ओ चारि जणेर मध्ये गङ्गाप्रसाद निःसन्तान, ओ हरगोविन्द नफर नामे एक पुत्र ओ तिन कन्या राखिया आपन पितार सम्मुखे मृत्यु हय। तदपरे ऐ भवानीमजुमदारेर मृत्युर पर प्रथम

कालीप्रसाद, ताहार पर रामप्रसाद निःसन्तान परलोक हय। तदपरे नफरेर मृत्यु हय। ताहार पर प्रथम रामप्रसादेर स्त्री, तदपरे हरगोविन्देर स्त्री मृत्यु हय, ओ हरगोविन्देर दौहित्ररा वर्त्तमान आछे। कृपानाथेर दौहित्र, अर्थात् रामप्रसाद ओ हरगोविन्द ओ गयरहेर पितामहेर दौहित्र राधानाथ तेज्य वस्तुर दावि हरगोविन्देर दौहित्रद्विगेर नामे राखे। ए जन्ये शदरेर पण्डितद्विगेर निकट शास्त्रानुसारे व्यवस्था एइ विषय लओया आवश्यक! ये उपरेर प्रकरणानुसारे एइ वस्तु के पाइते पारे। अतएव कुरसिनामा दृष्ट इहार आ ए शास्त्रानुसारे लिखेन इति। तारिख ६ जानेओरि। सन १८२६ इं०।

प्रभुसमर्पितप्रश्नपत्रमेवं वंशावलीपत्रञ्चावलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति गङ्गाप्रसादस्य द्वितीयपुत्रस्य निःसन्तानस्य भवानीमजुमदारे पितरि विद्यमाने सति मृतस्य पितृस्वत्वास्पदीभूतधने स्वत्वानुत्पादात्, तदनन्तरं मृतस्य भवानीमजुमदारस्यांशे जीवति पितरि मृतस्य प्रथमपुत्रस्य हरगोविन्दस्य पुत्रो नफरसंज्ञको भवानीमजुमदारस्य तदानीं विद्यमानौ तृतीयचतुर्थौ द्वौ पुत्रावर्थात् कालीप्रसादरामप्रसादौ च एते त्रय एव समानाधिकारिणो जातास्तत्रापि नफरसंज्ञकस्य मरणोत्तरं तत्स्वत्वास्पदीभूततत्पितृयोग्यतृतीयांशे तत्पितुर्हरगोविन्दस्य दौहित्राणामर्थाद् रामनारायणवदनचन्द्रदोलगोविन्दानामधिकारो, यतो नफरसंज्ञके स्वपितृयोग्य-तृतीयांशाधिकारिण्यनपत्ये पत्नीमारभ्य पितृपर्य्यन्तानपत्यधनाधिकारिरहिते मृते सति तन्मातुरुत्तराधिकारित्वेनाधिकारे जाते सति तन्मरणोत्तरं तद्धने तदुत्तराधिकारिणामेवाधिकारः, तत्र च तदुत्तराधिकारिणां मध्ये प्रभुसमर्पित-वंशावलीपत्रेण नफरसंज्ञकस्य पितुः प्रपौत्रपर्य्यन्तस्य पितृदौहित्रात् पूर्व्वमधिकारिणोऽसत्त्वावगमाद्। अथ च विशिष्टांशद्वये रामप्रसादस्य पितामहकृपानाथदौहित्रस्यार्थाद्राधानाथस्याधिकारो यतो रामप्रसादे भ्रातरि जीवति सति मृतस्य कालीप्रसादस्यांशे भ्रातृत्वेन रामप्रसादस्याधिकारे जाते सति तद्धनं रामप्रसादस्यैव जातम्। अतस्तस्मिन्ननपत्ये मृते सति तत्स्वत्वास्पदीभूत-

यावद्धने अर्थाद् भवानीमजुमदारस्यांशस्य त्रिधा विभक्तस्यांशद्वये रामप्रसादस्त्रियाः शास्त्रानुसारेण पतिस्वत्वास्पदीभूतधनाधिकारिण्या नफरसंज्ञके रामप्रसादभ्रातृपुत्रे मृते सत्यपि जीवन्त्यास्तस्या मरणोत्तरं तद्धने रामप्रसादस्य ये उत्तराधिकारिणस्तेषामेवाधिकारः, तत्र च तदुत्तराधिकारिणाम्मध्ये प्रभुसमर्पितवंशावलीपत्रेण रामप्रसादस्य पितामहप्रपौत्रपर्य्यन्तस्य पितामहदौहित्रात् पूर्व्वमधिकारिणोऽसत्त्वावगमाच्च—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवविवादार्णवसेत्वादिग्रन्थानुसारिणी व्यवस्था ॥ ० ॥—

अत्र प्रमाणम्—

पितुर्य्यूपरते पुत्रा विभजेयुर्धनं पितुः ।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते॥—इति दायभाग(पृ० १३), श्रीकृष्णतर्कालङ्कारकृतदायभागटीका,(पृ० १३) विवादभङ्गार्णव (२ विवाभ० पृ० ५ क) विवादार्णवसेत्वादिग्रन्थधृतदेवलवचनम् ॥ १ ॥

यथा पैतामहे धने पितुः स्वाम्यं तथैव तस्मिन् मृते तत्पुत्राणामपि, न तत्र सन्निकर्षविप्रकर्षाभ्यां कोऽपि विशेषः—इति दायभाग (पृ० २६) ग्रन्थलिखनम् ॥ २ ॥

किन्तु पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यः—इति दायभाग (पृ० २०८)ग्रन्थलिखनम् ॥ ३ ॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणात् क्षान्ता[1] दायादा ऊर्द्ध्वमाप्नुयुः ॥—इति दायभागादि(दाभा पृ० १७१)ग्रन्थधृतकात्यायन (कास्मृ० ९२१)वचनम्[2] ॥४॥

यद्वा पत्नीत्युपलक्षणम् । स्त्रीमात्राधिकारे अयमर्थो बोद्धव्यः—इति दायभाग (पृ० १८४) ग्रन्थलिखनम् ॥ ५ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतः—इत्यादि दायभागादि (पृ० १५१)ग्रन्थधृतयाज्ञवल्क्य (यास्मृ० २।१३५)वचनम् ॥ ६ ॥

---

१ क्षन्ता—व्यप० । २ चवनम्—व्यप० ।

एवं पितामहप्रपितामहसन्ततेरपि दौहित्रान्तायाः पिण्डप्रत्यासत्तिक्रमेणाधिकारो बोद्धव्यः—इति दायभाग(पृ० २०८)ग्रन्थलिखनम् ॥७॥

तदभावे पुत्रः पितृदौहित्रः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० २१८) रूपग्रन्थलिखनम् ॥ ८ ॥

तदभावे पितामहदौहित्रः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० २१८) रूपग्रन्थलिखनञ्चेति ॥ ६ ॥ ० ॥ ० ॥ ० ॥—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

प्रश्नः—

८५—यद्यपि कोन स्त्रीलोकेर स्वामी वायुग्रस्त अर्थात् वातुल हय। तत्कालीन ऐ वातुल व्यक्तिर पैतृक वस्तु विक्रयार्थे ऐ व्यक्ति आपन स्त्रीके अनुमति[1] देया, ना देया तुल्य। एमते ऐ स्त्रीलोक आपन श्वशुरेर श्राद्धेर देना परिशोध ओ ऐ वातुल स्वामीर चिकित्सा कारण आपन स्वामीर पैतृक कोन वस्तु ऐ स्वामीर विना अनुमतिते विक्रय करे। ताहा सिद्ध हइते पारे किना। इहार प्रत्युत्तर शास्त्रानुसारे वचन ओ ताहार भाषा एइ प्रश्नेर पार्श्वे लिखिवेन। इति शन १८२९ शाल, तारिख ९ मेई। मोतावक शन १२३६ शाल तारिख २८ वैशाख ॥—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यत्र कस्याश्चित् स्त्रियाः पतिर्वायुग्रस्तस्तत्समये तेनैव वायुग्रस्तेन पत्या स्वपैतृकधनविक्रयार्थं स्वपत्न्यै अनुमतिदानमदानञ्च तुल्यमिति मत्वा सा स्त्री[2]-

---

१. अनुमनु देया—व्यप०।

२. सात्मीय—व्यप०।

श्वशुरस्य आवश्यक[1]श्राद्धार्थर्णपरिशोधनार्थम्[2] एवं तस्यैव वायुग्रस्तस्य पत्युः चिकित्सार्थं तत्स्वत्वास्पदीभूतस्य तत्पैतृकस्य कस्यचिद्वस्तुनस्तस्यैव पत्युरनुमतिं विना विक्रयं कृतवती स्यात्तदा स विक्रयः सिद्धो भवितुं शक्नोति, यतः शास्त्रानुसारेण प्रेतश्राद्धकरणाद्यर्थं चिकित्सार्थं वा येन केनापि सम्बन्धिना दासेन वा कृतं तदुपयुक्तमृणं विक्रयादिकञ्च सिद्धयति—इति वङ्गदेशचलितमनुदायतत्त्वव्यवहारतत्त्वविवादभङ्गार्णवविवादार्णवसेत्वादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

कुटुम्बार्थेऽध्यधीनोपि व्यवहारं यमाचरेत् ।

स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥ इति मनु (पृ० ८ । १६७) वचनम् ॥ १ ॥

कुटुम्बार्थमशक्ते तु[3] गृहीतं व्याधितेऽथवा[4] ।

उपप्लवनिमित्तञ्च[5] विद्यादापत्कृतन्तु[6] तत् ॥ २ ॥

कन्यावैवाहिकञ्चैव प्रेतकार्य्येषु यत्कृतम् ।

एतत्सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥ इति व्यवहारतत्त्व(पृ० ६५)दायतत्त्व(पृ० ३०)विवादभङ्गार्णवादि(१ विवा १६६ ख)ग्रन्थधृतकात्यायन(का० स्मृ० ५४२-५४३)वचनम् ॥ ३ ॥

अत्रेदमवधेयम् । कुटुम्बभरणादिरूपयादृशयादृशकार्य्ये उपस्थिते दासकृतमृणं प्रभुणा शोधनीयमिति प्रतीयते, तादृशतादृशकार्य्यनिष्पत्त्यर्थं प्रभुधनविक्रयो सिद्धयति । तदतिरिक्त एव स्वाम्यनुमतपदेन बोध्यते— इति विवादभङ्गार्णवग्रन्थ(१ विवा २३० क)लिखनञ्चेति ॥ ४ ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१. आवस्यक—व्यप० । २. परिसोधन०—व्यप० ।

३. अशक्तेन इति पाठः व्यत० । ४. व्याधितेन इति पाठः व्यत० ।

५. निमित्ते—कास्मृ० । ६. कृते-तु—कास्मृ० ।

८६—रोवकारि आदालत देओयानि जिला यशर जिला मजकुरेर जज श्रीजान वित्रभ्यार्फटविष्ट साहेवेर वैठके सन १८२६ शाल ६ माइ मतावेक सन १२३६ शाल वाङ्गला २५ वैशाख रोज वुधवार।—

गङ्गागोविन्दसेन फरियादि
रामलोचनसाहा आशामि

मकद्दमा डिगरि जारि

अद्य फरियादिर उकिल वैद्यनाथ मजुमदार ओ मुनशी माहामुद छादक ओ वैद्यनाथ मुनशी ओ ओजरदार चित्रामणिर उकिल गोलकचन्द्र चौधुरी ओ गुरुप्रसाद मुनशी हाजिर हइलेन। हाल सनेर ७ आपरेल ओ २२ मार्च्च तारिखेर दाखिल हओा फरियादिर दरखास्त ओ माहा(जन) मजकुरेर १३ तारिखेर दाखिल हओया चित्रामणिर ओजरेर दरखास्त दृष्टि करागेल। यद्यपि ए मकद्दमार डिगरि जारिर कागज कलिकातार प्रविन्सियान कोर्ट आदालतेर पाठान गियाछे, किन्तु एइ आदालतेर प्रस्तुत कागजातेर द्वाराय जानागेल। ए मकद्दमार विवरण:—एइ ये, आसामि मजकुर फरियादिके जानिन[१] दिया कोर्ट आपवर्डेछेर सिरिस्तार कर्त्तार निकट राजा शशिभूषणदेवराय नावालगेर जमिदारि इजारा लइया, ताहार मालगुजारि परिशोध ना कराते फरियादिर तालुक निलाम हइया इजारार वाकि मालगुजारि ९६०० टाका उसुल हइयाछे। फरियादि ताहार नालिष करिया आसामि मजकुरेर पर मवलग मजकुरेर डिगरि पाइयाछे। सेइ डिगरि जारि करिया आसामिर कीर्तिनगरेर वसति वाटी ओ नीलेर कुटी ओ गरु ओ घोडा निलाम करिया, मवलगे १०२९५॥० टाका वझुया पाइयाछिल। आसामिर पिता रामजिसाहा विक्रिर वस्तुके आपनार वलिया, निलाम असिद्ध करिवार[२] दरखास्त करिया-

१. जामिन—साधीयान् पाठः। २. करियार—व्यप०।

छिल। ताहाते सदर देश्रोयानिर हाकिमेरदिगेर विचारे ऐ वस्तुर निलाम असिद्ध हइया फैरियादिके नालिष करिवार आज्ञा हइयाछिल। एमते फरियादि मजगुर नीलेर कुटी ओ वसती वाटीर दाविते दुइ लम्वरे रामलोचनशाहा ओ रामजिशाहा दुइ जनेर नामे एइ आदालते नालिष करिले। ए आदालतेर पूर्व्वकार जज साहेवेर विचारे नीलेर कुटी ओ वसति वाटीर अधिपति ओ कर्त्ता आशामि रामलोचनसाहाके-वोध हइया करियादिव-दुइ नालिप डिगरि हइयाछिल। परे आसामिर पिता रामजिसाहा साहेव मौछफेर फयशलाते नाराज हइया एइ ओजरे आपिल करियाछिल ये नीलेर कुटी, वसति वाटी, मजकुर आमार हक, आमार पुत्र रामलोचनसाहार सहित कोनो विपय नाइ। परे इङ्गरेजि शन १८२८ शालेर १७ सेतम्वर तारिखे कलिकातार क्रोट आपिलेर हाकिमेरदिगेर विचारे एइ हेतुक एइ आदालतेर दुइ फयशला असिद्ध हइयाछे। ये कुटि ओ वसति वाटीर प्रति डिगरिर टाकार देन्दार रामलोचनसाहार आधिपत्यता आदालते सुस्पष्ट प्रकाश हइलना। ओ रामजिसाहा आपन नामेर एक पाट्टा ओ मोनसफेर तिन केता फयशला कुटि मजकुरेर जायगा आपन साव्यस्त कारण दरपेष करिलेक। आर पितृ वर्त्तमाने पितृवस्तु पुत्रेर देनाय विक्रि हइते पारेना। एइ चणे फरियादि शन १२३५ शालेर फाल्गुण मासे रामलोचनसाहार पिता रामजि साहार मृत्यु हइयाछे, ओ रामलोचन मजकुर आपन पितार तावत विपयेर सत्वाधिकारि हइयाछे वलिया सेइसकल आपन पाओना डिगरिर टाका उसुलेर जन्य ऐसकल विषय क्रोक ओ निलामेर दरखास्त करियाछे। ताहाते क्रोटेर हुकुम हइले परे रामलोचन आसामिर स्त्री चित्रामणि दरखास्त गुजराइलेक जे आमार श्वशुर रामजिसाहार येकिछु जोतजमा ओ निष्कर भूमि ओ वसति वाटी समेत् एमारत् ओ नीलेर कुटी ओ तैजसादि ओ अलङ्कार आदि स्थावर ओ अस्थावर आपन स्वकृत ये करि-

याछिलेन ताहा आपन मृत्युर पूर्व्वे शन १२३५ शालेर १६ मार्च्च तारिखे आमाके दान करिया ऐ तारिख मजकुर दानपत्र लिखिया दियाछेन; आमार स्वामि रामलोचनसाहा आमार स्वशुरेर अबाध्य स्थिलेन। ताहार देनार जन्य आमार श्वशुरेर दत्त वस्तु आमार हक, ताहा क्रोक विक्रि हइते पारेना। परे तलवानुसारे चित्रामणिर उकिल शन १२३५ शालेर १६ माघ तारिखेर एक केता दानपत्र प्रकाश्य रामजिसाहा दातार लिखित चित्रामणि ग्रहीतार नामे वाङ्गला भाषा ओ अक्षरेते लिखित एइ अदालतेर रेजष्टर साहेबेर निशानिते दरपेष करिलेक। ताहा दृष्टे फरियादिर उकिल वैद्यनाथ मजुमदारेर स्थाने जिज्ञासा करागेल ये चित्रामणिर नामेर रामजिसाहार दानपत्रेर सत्यताते तोमार मश्रोकेलेर किछु आपत्य आछे कि ना। जवाव दिलेक ये एमत दानपत्र लिखित पडित हओयार सम्भव बटे। किन्तु एमत धारार दस्तावेज लिखिबार कारण केवल आमार मश्रोकेलेर डिगरिर टाका जीर्ण करिबेक। चित्रामणिर उकिलेर स्थाने जिज्ञासा करागेल ये रामलोचनसाहा व्यतिरेक रामजिसाहार आर पुत्र आछे कि ना। जवाव दिलेक ये रामलोचन भिन्न रामजिसाहार आर पुत्र नाइ इति। तजविज हइलो ये चूडन्त हुकुम प्रकाशेर पूर्व्वे ए मकद्दमाते एइ कथा ज्ञात हओया आवश्यक हइल ये चित्रामणिर दाखिल करा दानपत्र शास्त्रानुसारे सिद्ध हइबार योग्य बटे कि ना।

ए विषय शास्त्रज्ञदिगेर निकट तिन कथा प्रश्न करा उचित हइल। प्रथमता एइ—यद्यपि दानपत्रेर लिखित वस्तु रामजिसाहार स्वोपार्जित हय, आर रामजिसाहा ऐ वस्तुर दान विक्रयेर स्वत्वाधिकारि करिया पुत्र पौत्र वर्त्तमान थाकिते ऐ वस्तु आपन पुत्रवधूके दान करे, एमत सर्व्वस्वान्त दानपत्र यथाशास्त्र ग्राह्येर योग्य कि ना। ओ द्वितीयत्व—यद्यपि सेइ सकल वस्तु रामजि मजकुरार पैतृक हय, तबे एमत दान आपन पुत्रवधूके देया सिद्ध हइ कि ना। तृतीयत्व—यद्यपि दानेर वस्तुर मध्ये किछु पैतृक, ओ

किन्तु रामजिसाहार स्वकृत हय, ताहा हइले एमत दानपत्रेर द्वाराय ताहा हस्तान्तर करा सम्यक प्रकारे सिद्ध, कि असिद्ध, किम्वा कतो सिद्ध, कतो असिद्ध। एइ आदालतेर पण्डित श्रीश्रीराम तर्कालङ्कार विदाय हइया आपन वाटी गियाछेन। ए जन्य हुकुम हइल ये दानपत्र मजकुरेर नकल समेत रोवकारिर नकल सम्वलित ओ ताहार वाङ्गला तरजमा इङ्गरेजि लिपि समभिव्याहारे सदर देओयानि आदालतेर हाकिमेरदिगेर निकट पाठान जाय एइ प्रार्थनाय ये सदर देओयानि आदालतेर हाकिमेरा अनुग्रहपूर्व्वक कागजात मजकुरान् ऐ आदालतेर पण्डितेरदिगेर स्थाने दिया हुकुम करिवेन—ये एइ मकद्दमार तावत विषयेर पर दृष्टि करिया प्रश्नसकलेर उत्तर शास्त्रानुसारे लिखेन। लेखा हओनेर परे ताहार उत्तर एइ आदालते अनुग्रह करिया पाठान। आर आदालतेर नाजिरेर नामे परयाना लेखा जाय। नाजिर दोशरा हुकुम प्रकाश हओ। पर्य्यन्त आपन नाएव मपश्वलेर पाठाइया फरियादिर दरखास्तेर निचेर लिखित वस्तु माफिक यावेता क्रोक करिया, एक जन् पेयादा ताहार रक्षार्थ नियुक्त करे, ये क्रोकी वस्तु स्थानान्तर हइते ना पाय। पेयादार वेतन फरियादिर स्थाने लय।

आर एइ मकद्दमार डिगरि जारिर आसल कागजेर नकल ना राखिया क्रोट आपिल आदालते पाठान गियाछे. आर फरियादिर[1] नालिपि मकद्दमार आसल कागज ये ताहाते नीलेर कुटि ओ वसति वाटीते रामलोचनेर स्वत्व आछे—एइसकल कागज दृष्टि करा आवश्यक। ए जन्ये पुनराय हुकुम हइल ये एक प्रस्त चुम्वक रोवकारि सेइसकल कागज अनुग्रह मते पाठानेर प्रार्थनाय क्रोट आपीले पाठान जाय इति।

प्रभुसमर्पितविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं दानपत्रञ्चावलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

---

१. फरियादिर—साधीयान् पाठः।

प्रथमप्रश्नस्योत्तरम्—

यदि दानपत्रलिखितं वस्तु रामजीसाहासंज्ञकस्य स्वोपार्जितं भवति एवं रामजीसाहासंज्ञकः स्वपुत्रवधूं तद्वस्तुनो दानविक्रयस्वामिनीं कृत्वा पुत्रे विद्यमाने पौत्रेषु च विद्यमानेषु सर्व्वं धनं तस्यै दत्तञ्चेत्तदा तद्दानं प्रभुसमर्पितविचारपत्रदानपत्रोभयलिखितवृत्तान्ते सति शास्त्रानुसारेण छलकृतत्वेन क्रोधकृतत्वेन च सिद्धं भवितुं न शक्नोति, शास्त्रानुसारेण क्रोधकृतदानस्य छलकृतदानस्य च राज्ञा परावर्त्त्यत्वात् । प्रभुसमर्पितविचारपत्रदानपत्रोभयलिखितवृत्तान्ते सति एकमात्रपुत्रस्य पितुर्व्यवहारयोग्ये तस्मिन्नेकस्मिन् पुत्रे विद्यमाने अप्राप्तव्यवहारेषु कतिपयेषु पौत्रेषु विद्यमानेष्वपि तेषामन्नाच्छादनोपयुक्तं धनमसंरक्ष्य स्वपुत्रवध्वै व्यवहारिकैतादृशादेयसर्व्वस्वदानस्य छलादिकं विना असम्भवाच्च । अतएव तत्प्रमाणभूतं तद्दानपत्रमपि शास्त्रानुसारेण ग्राह्यं भवितुं न शक्नोतीति ॥—

अत्र प्रमाणम्—

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।

यत्र वाप्युपधिं पश्येत्तत्सर्व्वं विनिवर्त्तयेत् ॥—इति मनुवचनम् (८, १६५) ॥ १ ॥

अदत्तन्तु भयक्रोधशोकवेगरुगन्वितैः[1] ॥

तथोत्कोचपरीहासव्यत्यासछलयोगतः ॥ —इत्यादि विवादार्णवसेतु-(पृ० १५२) विवादभङ्गार्णवादि (१ विवाभ० पृ० ४८५ ख)ग्रन्थधृत-नारद(नाम सं० ६।८)वचनम् ॥ २ ॥

एवं यत्र धनिकादिप्रतारणार्थं स्वकीयद्रव्यमन्यत्रार्पयति अन्यस्मै दत्तमिति तत्रापि दानासिद्धिः—इत्यादि विवादभङ्गार्णव(१ विवा ४८७ ख) लिखनम् ॥ ३ ॥

---

१ °रुजान्वितैः—नामसं०, °रुगन्वितैः—व्यप० ।

स्वं कुटुम्बाविरोधेन देयं दारसुतादृते ।
नान्वये सति सर्व्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥—इति विवादार्णव-सेतु (पृ० १४८) विवादभङ्गार्णवादि(१ विवा० ४४५ ख)ग्रन्थधृतयाज्ञ-यल्क्य(याज्ञ० पृ० २४४)वचनञ्चेति २।१७५ ॥ ४ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि च तदेव सर्व्वं वस्तु रामजीसाहासंज्ञकस्य पैतृकं भवति तदा स्व-पुत्रवधूमुद्दिश्यैताद्दशदानं प्रथमप्रश्नोत्तरलिखितप्रकारेण छलकृतत्वात् क्रोध-कृतत्वात् पैतामहे स्थावरादौ पुत्रपौत्राद्यनुमतिं विना पितुरेताद्दशदाने प्रभु-त्वाभावाच्च सिद्धं भवितुं न शक्नोति ।

अत्र प्रमाणम्—

उपरिलिखितप्रमाणचतुष्टयम् ॥ ४ ॥

मणिमुक्ताप्रवालानां सर्व्वस्यैव पिता प्रभुः ॥
स्थावरस्य तु सर्व्वस्य न पिता न पितामहः॥—इति दायभागादि(पृ० ३३)ग्रन्थधृतयाज्ञवल्क्यवचनम्[1] ॥ ५ ॥

पितामहश्रुतेस्तद्धनविषयं वचनम् । मणिमुक्ताद्युपादाय पुनः सर्व-स्येति वचनात्[2] *सर्व्वेषां भूम्यादिव्यतिरिक्तानां दानादिषु पितुः प्रभुत्वं न स्थावरनिबन्धद्रव्याणाम्*—इति दायभाग (पृ० ३३) ग्रन्थलिखन-ञ्चेति ॥ ६ ॥

तृतीयप्रश्नस्योत्तरम्—

यदि दानकृतवस्तुषु किञ्चिद्रामजीसाहासंज्ञकस्य पैतृकं किञ्चित् स्वो-पार्जितं भवति तदैताद्दशदानपत्रद्वारा हस्तान्तरकरणं सर्व्वस्य वस्तुनस्तदन्त-र्गतस्य किञ्चिद्वस्तुनो वा प्रथमद्वितीयप्रश्नोत्तरलिखितप्रकारेण सिद्धं भवितुं न शक्नोति—इति वङ्गदेशचलितमनुदायभागविवादभङ्गार्णवविवादार्णवसेत्वादि-ग्रन्थानुसारिणी व्यवस्था ॥—

---

१ नेदं याज्ञवल्क्यवचनम्, १६६ तमे पृष्ठे मिताक्षरायां चेदं लभ्यते ।

२ सर्वस्येत्युपादानात्—दाभा० ।

अत्र प्रमाणान्युपरिलिखितान्येवेति ॥ ६ ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

—०—

सओयाल—

८७—फरियादियान नन्दकुमारगोस्वामी ओ रामचन्द्र-गोस्वामी दिगर असामी वैष्णवानन्दगोस्वामिदिगरेर नामे हिस्या वावति ५८७ टाकार दाविते १०२९ लम्बरे नालिष करियाछेन। फरियादियान् आपन आरजिते लिखेन ये फरियादियान श्रीश्री-नित्यानन्दजिउठाकुरेर परिवार तावत देशीय वैष्णवसकल श्रीश्री-नित्यानन्दजिउठाकुरेर परिवारेर सासित वैष्णव हओन कालीन माला चन्दन इत्यादि जाहा प्रथा आछे उहारा वैष्णव दिग्येदेर, आर ऐ महालेर नाम भावकमहाल। अत्र विषये हाकिमेर विना दलिले नित्यानन्द जिउर परिवारे साम्यक भावे साध्य आछे, ओ एइ महाल राजदत्त नय। ये ये स्थाने नित्यानन्दजिउर परिवार-सकल वास करिया आछेन, सेह २ स्थाने जे जे प्रकारेर हिन्दुलोक ओ वैष्णवलोक वास करेण। ताहादेर मध्ये ये केह नित्यानन्देर उपर देशीय हन तेँहा नित्यानन्देर परिवारेर निकट हाजिर हन इति। आसामि लेखेन जे एइ महाल राजगुरुर शासन। राजदत्त विशयसकलेर एइ महाल राजा हइते राजगुरुके अर्पण आछे, ओ भावक महाल कोन समय हइते आछे, ओ कि प्रकारे नित्या-नन्देर परिवारके अर्शिछे, एवं एइ महालेते किम्वा हाकिमेर द्वाराय कोन प्रकारे किछु सम्पर्क आछे कि ना। यदि भेकाश्रित वैष्णव हइते चाहे से व्यक्तिके नित्यानन्दजिउर परिवार व्यतिरेक अन्य केह सेवक करिते पारेन कि ना। एवं यदि स्यात् तावत् देशीय भावकमहाल नित्यानन्देर परिवारसकलेर अंश हइया थाके, आर नित्यानन्दजिउर परिवारेर मध्ये एक स्थानेर परिवार कोन व्यक्ति

अन्य स्थानेर परिवारेर सेवक हइते चाहिले सेवक हइते पारे कि ना, ओ ऐ परिवारेर भिन्य स्थानवासी ऐ व्यक्तिके सेवक करिते पारेन कि ना, एवं नित्यानन्दजिउर परिवार ये ये स्थाने वास करिया आछेन ऐ जायगाय उह्हादिग्येर अधिकार कि। ये ये स्थाने नित्यानन्देर पन्थीय वैष्णवसकल आछेन ऐसकल स्थान उह्हादिग्येर शासन कि, तावतईससकल उह्हादिग्येर प्रत्यक्ष अंश आछे, अर्थात् नित्यानन्देर परिवार केह्हो सिंहभूमवासी एवं केह्हो वराह्भूमवासी, इह्हाते सिंहभूमनिवासी कोन व्यक्ति ऐ वराह्भूमनिवासी नित्यानन्देर परिवारेर स्थाने सेवक हइते पारे कि ना। एवं नित्यानन्देर ये परिवार सिंहभूमे वास करिया आछेन, ताह्हार अधिकार केवल सींहभूम कि वराह्भूमौ वटे। फलत तावत देशीय वैष्णवसकल नित्यानन्द जिउर तावत परिवारसकलेर साधारण मते अधिकार कि। ये ये स्थाने नित्यानन्देर ये परिवार वास करिया आछेन ताह्हार सेइ जायगाय अधिकार, तद्व्यतिरिक्त अन्य देशे नाइ। अत्र विशये शास्त्रते किमत विधि आछे ज्ञातो हओया अविश्वक। अतएव सदर देओयानि आदालतेर पण्डित एइ सओयालेर जवाव दक्षिण[1] पार्श्वे लेखेन इति। शान १८२९ साल तारिख २५ युन मतावक शान १२३६ साल १२ आषाढ।

श्रीर्ज्जयतितराम्

यत्रावव्यवस्था

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयागस्तिमासीयपञ्चविंशतिदिने घटिकात्रयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यज्जातीयानां यच्छ्रेणीनां वा यस्मिन् विषये विशेषतः शास्त्राज्ञा नास्ति तस्मिन् विषये तज्जातीयानां तच्छ्रेणीनां वा यथा पूर्व्वापरव्यवहारस्तदनुसारेणैव निर्णयो भवितुमर्हति। प्रभुसमर्पितप्रश्नपत्रलिखितविषयसमुदायस्यार्थाद्

१. पक्षिण—व्यप०।

भावकमहालसंज्ञकवस्तुविशेषः कस्मात् समयाद्वर्तते इत्यस्य, एवं केन प्रकारेण श्रीमन्नित्यानन्दस्य परिवारैस्तद्वस्तु प्राप्तमित्यस्यैवं तेषु[१] वस्तुषु सराजकरभूस्वामिनो राज्ञश्च वा केनापि प्रकारेण कश्चिदपि सम्बन्धो वर्तते न वेत्यस्य, एवं यदि कश्चिद्भेकाश्रितवैष्णवो भवितुमिच्छति तदा स श्रीमन्नित्यानन्दपरिवारव्यतिरिक्तेनान्येन केनचित् सेवकः कर्तुं शक्यते न वेत्यस्य, एवं तावद्देशीयभावकमहालसंज्ञकस्य विशेषो यदि श्रीमन्नित्यानन्दस्य परिवाराणामंशोऽभूद्, अथ च श्रीमन्नित्यानन्दपरिवाराणाम्मध्ये एकस्थानस्य कश्चित्परिवारः स्थानान्तरवासिपरिवाराणां सेवको भवितुमिच्छति चेत्तदा सेवको भवितुं (शक्नोति) न वेत्यस्य, एवं तत्परिवारवासस्थानाद्भिन्नस्थाननिवासी कश्चिच्छ्रीमन्नित्यानन्दपरिवारस्तं व्यक्तिविशेषं सेवकं कर्त्तुं शक्नोति न वेत्यस्य, एवं श्रीमन्नित्यानन्दस्य परिवारो यस्मिन् यस्मिन् स्थाने श्रीमन्नित्यानन्दस्य सम्प्रदाया वैष्णवाः सन्ति (तस्मिन्) तस्मिन्नेव स्थाने तेषामधिकारः, किंवा सर्व्वस्मिन्देशे तेषामंशोऽर्थात् श्रीमन्नित्यानन्दस्य परिवाराः केचित् सिंहभूमिवासिनः केचिच्च वराहभूमिवासिनः, तत्र सिंहभूमिनिवासी कश्चिद्व्यक्तिविशेषो वराहभूमिनिवासिनः श्रीमन्नित्यानन्दपरिवारस्य स्थाने सेवको भवितुं शक्नोति न वेत्यस्य, एवं श्रीमन्नित्यानन्दस्य ये परिवाराः सिंहभूमिनिवासिनस्तेषां केवलं सिंहभूमावधिकारः किं वा वराहभूमावपि, अर्थात् तावद्देशीयवैष्णवेषु श्रीमन्नित्यानन्दस्य परिवाराः वासं कुर्व्वन्ति तस्मिन् स्थान एव तेषामधिकारो नान्यत्रेत्यस्य चेदानीं प्रचलितास्मज्ज्ञातधर्म्मशास्त्रालिखितत्वात् प्रश्नपत्रलिखितश्रीमन्नित्यानन्दस्य परिवाराणाम्मध्ये प्रश्नपत्रलिखितविषयसमुदायेषु पूर्व्वापरं यथा व्यवहारस्तदनुसारेण निर्णयो भवितुमर्हति, इति मनुदायतत्त्व–कल्पतरु–विवादरत्नाकर–व्यवहारमातृकाव्यवहारतत्त्व–वीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

जातिजानपदान् धर्म्मान्छ्रेणीधर्म्मांश्च धर्मवित् ।

समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपालयेत् ॥–इति मनुवचनम् (८। ४१॥) ॥ १ ॥

---

१. तस्मिन—व्यप० ।

देशस्य जातेस्संघस्य धर्म्मो ग्रामस्य यो भृगुः ।
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत् ॥—इति दायतत्त्व(पृ० ७)कल्पतरुविवादरत्नाकरप्रभृतिग्रन्थधृतकात्यायनवचनम्(कास्मृ० ८८४) ॥ २ ॥

व्यवहारो हि बलवान्धर्मस्तेनावहीयते[1]—इति व्यवहारमातृका(पृ० २८२)व्यवहारतत्त्वादि(पृ० ४)ग्रन्थधृतनारदवचनम् (नास्मृ० पृ०१७) ॥ ३ ॥

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।
युक्तिहीनविचारेण धर्म्महानिः प्रजायते ॥—इति व्यवहारमातृका(पृ० २८२)वीरमित्रोदय(पृ० १८)व्यवहारतत्त्वादिग्रन्थधृतबृहस्पतिवचनम् (बृस्मृ० पृ० १९) ॥ ४ ॥

कीनाशाः कारुकाः शिल्पिकुसीदिश्रेणिनर्त्तकाः ।
लिङ्गिनस्तस्कराः कुर्य्युः स्वेन धर्म्मेण निर्णयम्[2] ॥—इतिवीरमित्रोदय-(वीमि० ख पृ० ३०)व्यवहारमातृकादि(व्यमा० पृ० २८१)ग्रन्थधृत-बृहस्पतिवचनम् (बृस्मृ० पृ० १२) ॥ ५ ॥

युक्तिर्ल्लोकव्यवहारः—इति व्यवहारमातृका (२८२) व्यवहारतत्त्व-(पृ० ४) ग्रन्थलिखनञ्चेति[3] ॥ ६ ॥

दिसम्बरमासस्य प्रथमदिने यामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

१. तेनापचीयते—इति पाठान्तरम् ।

२. °कारुका मल्लाः कुसीदश्रेणिवर्तकाः ।
लिङ्गिनस्तस्कराश्चैव स्वेन धर्मेण निर्णयः ॥ (बृस्मृ ०पाठः)

३. युक्तिर्न्यायः । स च लोकव्यवहारः—इति व्यवहारमातृका—व्यप० ।

सओयाल—

८८—यदि दुइ अथवा अधिक भ्राता थाके। एक जन ताहार वयप्राप्त। एवं अन्यसकल नावालग। एवं ताहारदिगेर कोन गारडियेन् अर्थात् रक्षक विशेष रूपे मोकरर ना हइया थाके। एवं ताहारदिगेर ज्येष्ठ भ्राता, ये प्राप्तव्यवहार हइयाछे, स्थावर वस्तु हस्तान्तर करे, ये स्थावर वस्तुते ताहार भ्रातारदिगेर अंश आछे। ऐ स्थावर वस्तु विभाग करणे ताहार दिगेरके अंशी वोध करा जाय। एमत हस्तान्तर करण शास्त्रमते नावालगेर पक्षे सिद्ध हइते पारे कि ना ?

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयनवम्बरमासीयैकविंशतिदिने यामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यदि द्वौ ततोऽप्यधिका वा भ्रातरस्सन्ति, तेषां मध्ये एकः प्राप्तव्यवहारोऽन्येऽप्राप्तव्यवहारास्तेषामप्राप्तव्यवहाराणां विशेषतो रक्षकः कश्चिन् नियुक्तो नाभूत्स्यादेवं तेषां ज्येष्ठो भ्राता यः प्राप्तव्यवहारोऽभूत् स यदि एवंभूतं स्थावरं हस्तान्तरं कृतवान् स्यात्, यत्र स्थावरे तद्भ्रातॄणामंशोऽस्ति, एवं तत्स्थावरविभागकरणे तेषामप्राप्तव्यवहाराणामंशित्वेन ज्ञानं भवति, एतादृशवृत्तान्ते सति एतादृशहस्तान्तरकरणं शास्त्रतोऽप्राप्तव्यवहाराणामंशे अस्वामिकृतत्वात् सिद्धं भवितुं न शक्नोति। शास्त्रानुसारेणास्वामिकृतविक्रयस्य निवर्त्तनीयत्वात्—इति वङ्गदेशचलितमनुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

अस्वामिना कृतो यस्तु दायो विक्रय एव वा।

अकृतस्स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इति मनुवचनम् (८।१९९) ॥ १ ॥

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेत्—इति विवादभङ्गार्णवादि (१ विवाभ० पृ० ३१७ ख)ग्रन्थधृतकात्यायनवचनम् (कास्मृ० ६१२) ॥ २ ॥ ० ॥ ० ॥ ० ॥

विभक्तस्येवा[1]*विभक्तस्थावरस्यापि स्वामिकृतदानादि सिद्ध्यत्येव, अक्षपातादिना पश्चादंशपरिचयसम्भवादितिभावः*—इति श्रीकृष्णतर्कालङ्कारकृत-दायभागटीका (पृ० ३५) लिखनम् ॥ ३ ॥

अत्र साधारणद्रव्यस्य समुदायस्यैकेन[2] *विक्रये परांशयोग्येऽसिद्धिः स्वांशयोग्ये तु सिद्धिः*—इत्यादि विवादभङ्गार्णव (१ विवाभ० पृ० ३०५ क) ग्रन्थलिखनञ्चेति ॥ ४ ॥

दिसम्बरमासस्य द्वादशदिने शनिवासरे यामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

प्रथम सओयाल—

८९—यदि कोन हिन्दु जाती एक स्त्री, ओ कएक जन पुत्र वर्त्तमान थाकिते आपन पैतृक स्थावर वस्तु, याहा आपन पितार मृत्युर पर उत्तराधिकारित्व प्रकारे उहाके आर्शियाछिल, ताहा समुदाय, किम्वा ताहा हइते किञ्चित विक्रय करियाथाके, तवे एमत विक्रय सिद्ध हइवेक कि ना, ओ विक्रयकर्त्ता किम्वा ताहार मृत्युर पर उहार पुत्रगणेर द्वाराय क्रयकर्त्ताके दखल देओयानेर, आज्ञा देओयार क्षमता आदालतेर हाकिमगणेर आछे कि ना ?

द्वितीय सओयाल—

यद्यपि क्रयकर्त्ताके दखल दिया उहाके वेदखल करियाथाके तवे हाकिमगण क्रयकर्त्ताके दखल देओयानेर आज्ञा दिते पारेन कि ना ?

---

१ विभक्तस्यैव—व्यप० ।   २ समुदायस्यैकेन—व्यप० ।

तृतीय सओयाल—

यदि क्रयकर्त्ता दखल ना पाइयाथाके तवे हाकिमगण क्रय-कर्त्तार सद्‌मन्धे दखल देओयार आज्ञा दिते पारेन कि ना ?

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम्—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति प्रश्नपत्रलिखितप्रकारकं समुदाय-स्थावरं तदन्तर्गतकिञ्चित्स्थावरं वा कुटुम्बभरणपित्रादिश्राद्धाद्यावश्यक-कर्म्मकरणार्थं पुत्रेषु विद्यमानेष्वपि यदि पित्रा विक्रीतं तदा पुत्राणामनुमतिं विनापि स विक्रयः सिद्धो भवितुं शक्नोति । यद्युपरिलिखितकुटुम्बभरणाद्या-वश्यककर्म्मकरणार्थं पित्रा न विक्रीतं किन्तु स्वेच्छया स्वाभिप्रायेण वा विक्रीतं तदा पुत्राणामनुमतिश्चेत् सिद्ध्यति, नोचेन्न सिद्ध्यति । एवञ्च सति तद्‌वि-क्रयस्य सिद्धत्वपक्षे विक्रयकर्त्तारं प्रति तन्मरणानन्तरं तत्पुत्रान् प्रति वा क्रयकर्त्तुरायत्तत्वसम्पादिकाया आज्ञाया दाने क्षमता धर्म्माधिकरणाधिपती-नामस्त्येव, सिद्धेन तद्विक्रयेण विक्रयकर्त्तुः स्वत्वविनाशेन तत्पुत्राणामपि तत्र स्वत्वानुत्पादात् क्रयकर्त्तुः स्वत्वोत्पत्तेश्चेति ।

अत्र प्रमाणम्—

मणिमुक्ताप्रवालानां सर्व्वस्यैव पिता प्रभुः ।

स्थावरस्य तु सर्व्वस्य न पिता न पितामहः ॥ —इति दायभागा-दिग्रन्थ (दाभा० पृ० ३३) धृतयाज्ञवल्क्यवचनम्[1] ॥ १ ॥

पितामहश्रुतेस्तद्‌धनविषयकं[2] *वचनम् । मणिमुक्ताद्युपादाय पुनः सर्व्वस्येति वचनात्*[3] *सर्व्वेषां भूम्यादिव्यतिरिक्तानां दानादिषु पितुः प्रभुत्वं न स्थावरनिबन्धद्रव्याणाम्*—इति दायभाग(पृ० ३३)ग्रन्थलिखनम् ॥ २ ॥

---

१. वचनमिदं याज्ञवल्क्यस्मृतौ न दृश्यते । २. °द्दानविषयं—व्यप० ।

३. उपादानात्—दाभा० ।

यदि पुनः सर्व्वस्थावरादिविक्रयमन्तरेण कुटुम्बवर्त्तनमेव न भवति तदा सर्व्वस्यापि विक्रयणादिकमर्थात् सिद्ध्यति—इति दायभाग(पृ० ३३)-ग्रन्थलिखनम् ॥ ३ ॥

विक्रीय पण्यं मूल्येन क्रेतुर्यो[1] न प्रयच्छति ।
स्थावरस्य क्षयं[2] दाप्यो जङ्गमस्य क्रियाफलम् ॥

इति विवादभङ्गार्णवविवादार्णवसेत्वादि(पृ० १७८) ग्रन्थधृतनारद-(नामसं० ९१, ४) वचनम् ॥ ४ ॥

मूल्यग्रहणपूर्व्वकस्वत्वनाशकव्यापारस्यैव विक्रयपदार्थत्वाद्—इति विवादभङ्गार्णवलिखनम् ॥ ५ ॥

सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥—इति मनुवचनञ्चेति (१०।११५) ॥ ६ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि क्रयकर्त्तुरायत्तत्वं सम्पाद्यायत्तत्त्वमुत्थापितवान् स्यात्तदा क्रयकर्त्तुरायत्तत्त्वसम्पादिकामाज्ञां धर्म्माधिकरणाधिपतयो दातुं शक्नुवन्तीति ।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणान्तर्गतचतुर्थप्रमाणम् ।

यदि क्रयकर्त्रा नायत्तत्वं प्राप्तं तदा धर्म्माधिकरणाधिपतयः क्रयकर्त्तुरायत्तत्वसम्पादिकामाज्ञां दातुं शक्नुवन्ति--इति वङ्गदेशचलितमनुदायभागविवादभङ्गार्णवविवादार्णवसेत्वादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

द्वितीयप्रश्नोत्तरलिखितप्रमाणमेवेति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

१. यन्न--नामस० ।   २. क्रयं—व्यप० ।

श्रीहरिः शरणम् ।

२६ नम्बर दरखास्त खास आपिल—

सन १८२९ साल—

प्रश्नः[1]—

९०—यद्यपि कोन व्यक्ति आपन सुपार्जित[2] ओ पैतृक कोन वस्तु आपन स्वर्गार्थे काहाकेओ दान करे आर ऐ दाता व्यक्ति दानपत्रे एमत सरत राखे ये आपन जीवद्दशा पर्य्यन्त खोरपोष पाइबेक, अतएव ए प्रकार सरतेर दान ये ताहाते केवल दाता व्यक्तिर जीवद्दशा पर्य्यन्त खोरोपोष सरत लेखा थाके-शास्त्र सम्मत सिद्ध बटे कि ना—इहार प्रतिउत्तर एइ प्रश्नेर पार्श्वे, ओ तस्य भाषा लिखिबेन । इति १८२९ साल ता २६ नबम्बर मो० शन १२३६ साल ता० १२ अग्रहायन ।

श्रीर्जयतितराम्

जवाबव्यवस्था

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यत्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयपञ्चमदिनसम्बन्धिमङ्गलवासरे घटिकात्रयाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यदि कश्चिद् व्यक्तिविशेषः स्वोपार्जितं पैतृकं च कियद्वस्तु स्वस्वर्गार्थं कस्मैचिद्दत्तवान्[3], अथ च तेनैव[4] दात्रा दानपत्रे एतादृशनियमो रक्षितः "स्वजीवनपर्य्यन्तमहं ग्रासाच्छादनं प्राप्नोमि"। अतएव यद्दानपत्रे केवलं दातुर्जीवनपर्य्यन्तं ग्रासाच्छादननियमो लिखितस्तद्दानं यदि दात्रा स्वजीवनपर्य्यन्तं ग्रासाच्छादनं प्राप्तं तदा सिद्ध्यति, नोचेन्न सिद्ध्यति, यतः सोपाधिदानमुपाधिसिद्धौ सिद्धम्, उपाध्यसिद्धावसिद्धं भवति—इति वङ्गदेशचलितदायभागविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ।

---

१. प्रश्नः— व्यप० । २. सुपार्जित—व्यप० स्वोपार्जित—इति साधीयान् पाठः ।

३. दत्तमथ०—व्यप० । ४. स एव दाता—व्यप० ।

अत्र प्रमाणम्—

स्वभागान्[1] यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्य्यथेष्टं तत्सव्वमीशास्ते स्वधनस्य वै ॥—इति दायभागादि-(दाभा० पृ० ३०)ग्रन्थधृतनारद(नामस० १४।४२)वचनम् ॥ १ ॥

सोपाधिदानमुपाध्यसिद्धावसिद्धम्—इति विवादभङ्गार्णव(१ विवाभ० पृ० ३०८ ख) ग्रन्थलिखनम् ॥ २ ॥

अत्रेदमवधेयम्—यदि कतिचिदुपाधयः यावज्जीवपर्य्यन्तं पोपणादयः कृताः कतिचिच्चौर्द्ध्वदैहिकक्रिया (कलाप[2])रूपा न कृतास्तत्र का व्यवस्था इति चेद् यावद्व्यापाराकरणेन सम्प्रदानप्रतिज्ञाभङ्गादुद्देश्यफलानां किञ्चिदंशे विसंवादाच्च न दानसिद्धिः—इति विवादभङ्गार्णवग्रन्थ(१ विवाभ० बृ० ४६५ क) लिखनञ्चेति ॥ ३ ॥ ० ॥ ० ॥ ० ॥

त्रिंशदधिकाष्टादशशताब्दीयफेवरवरीमासीयचतुर्थदिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीर्ज्जयतितराम्

८७ लम्बर
खास आपिल
शन १८२७
प्रश्नः—

९१—यद्यपि कोन व्यक्ति किछु भुमि आपन कन्यार विवाह

---

१. स्वानंशानिति नामसं० पाठः । २. कलाप—इति विवा० मूले पाठः ।

कालिन आपन जामाताके दान करिया थाके, आर ऐ कन्यार गर्भे सेओया एक कन्या श्रीमतीकुमारी नामे, पुत्र सन्तान ना हइया थाके; ए प्रकारे ऐ वस्तु यथाशास्त्र श्रीमतीकुमारीके कि ऐ ग्रहीता व्यक्तिर द्वितीय पक्षेर सन्तानद्विगके अर्शे—इहार प्रति उत्तर वचन ओ तथ्य ताहा एइ प्रश्नेर पार्शे लिखिवेन इति। शन १८२६ तारिख २२ दिशम्बर मोतावाक शन १२३६ तारिख ९ पौष।

श्रीर्ज्जयतितराम्

जवावव्यवस्था

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयफेवरवरीमासीयपञ्चमदिनसम्बन्धिशुक्रवासरे घटिकात्रयाधिक्यामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यत्र कश्चिद्व्यक्तिविशेषः किञ्चिद्भूमिं स्वकीयकन्याविवाहसमये स्वजामात्रे दत्तवान्, अथ च तस्या गर्भे श्रीमतीकुमारीनाम्नीमेकां कन्यां विना अन्यः कश्चित् पुत्रादिसन्तानो न जातश्चेत्तत्र तद्दानं यदि "कन्याया इदं भवतु" इत्यभिसन्धिना कृतं तदा तावदेव वस्तु श्रीमतीकुमारीनाम्नी प्राप्तुं शक्नोति, तन्मातुर्यौतुकस्त्रीधनत्वात्, यौतुकस्त्रीधने दुहितुरधिकारस्य निष्प्रत्यूहत्वात्। यदि च तद्दानं तादृशाभिसन्धिं विना कृतमर्थाद्, "जामातुरिदं भवतु" इत्यभिसन्धिना कृतं तदा तद्वस्तु जामातुरुत्तराधिकारिणामर्थात्तत्पुत्रपौत्रप्रपौत्रपत्नीदुहित्रादीनामेव भवति। प्रकृते तु प्रभुसमर्पितविचारपत्रलिखितार्थिलिखितवृत्तान्ततात्पर्य्यार्थेनार्थाद् राममण्या औरसपुत्राभावेन शास्त्रानुसारेणार्थिन एवोत्तराधिकारिण इत्यनेन विवादास्पदीभूतधनस्य राममणीमुद्दिश्य तत्पितृकृतदानावगमेन तादृशधनं राममण्या यौतुकं स्त्रीधनं भवत्येव, यौतुकस्त्रीधने विद्यमानायां दुहितरि सपत्नीपुत्राणामर्थादर्थिनामधिकारप्रतिपादकशास्त्राभावाद्—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

विवाहकाले यत्किञ्चिद्वरायोद्दिश्य दीयते।
कन्यायास्तद्धनं सर्व्वमविभाज्यं च बन्धुभिः ॥-इति दायभाग(पृ० ७५) दायक्रमसंग्रहादि(दाक्रसं० पृ० १३) ग्रन्थधृतव्यासवचनम् ॥ १ ॥

उद्दिश्येति कन्याया इदं भवत्वित्युद्दिश्य वराय यद्दानं न पुनरेतदभिसन्धिं विनापीत्यर्थः। अतएव विवाहकाल इति प्रदर्शनार्थम् न पुनरेतदेव प्रयोजकं दात्रभिसन्धिनिमित्तत्वात् स्वत्वस्य-इति दायभाग(पृ० ७५)ग्रन्थलिखनम् ॥ २ ॥

अत्र प्रथमं पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रः—इति श्रीकृष्णतर्कालङ्कारकृतदायभाग(पृ० २१८)लिखनम् ॥ ३ ॥

पत्नी दुहितरश्चैव-इत्यादि दायभाग(पृ० १५१)श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० १५१)नियमसङ्ग्रहविवादभङ्गार्णवादि (२ विवाभ० पृ० ३१४)ग्रन्थधृतयाज्ञवल्क्य(२।१३५) वचनम् ॥ ४ ॥

तत्र यौतुकधने प्रथमं कुमार्य्या अधिकारस्तदभावे वाग्दत्तायास्तदभावे चोढायाः पुत्रवत्याः सम्भावितपुत्रायाश्च युगपदधिकार इति। तदभावे वन्ध्याविधवयोरपि तुल्यवदधिकार इति च। सर्व्वदुहित्रभावे पुत्रस्याधिकारः—इति च दायक्रमसंग्रह(पृ० २३)ग्रन्थलिखनञ्चेति ॥५॥०॥०॥०॥

एतदब्दीयमाघमासीयत्रयोदशदिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्ता इति।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीर्ज्जयतितराम्

नं० २९५

९२—रोवकारि मिसिल आदालत देश्रोयानि सदर तारिख २१ माह जानश्रोरि शन १८३० इ० मतावक ९ माह माघ सन

१२३६ वाङ्गला रोज वृहस्पतिवार ऐ आदालतेर हाकिम श्रीयुक्त मान्तेगियु हेनरि टरम्बल साहेबेर बैठके।

गोपालचन्द्र प्रभृति आपिलाण्टगण

वावु कोङर सिंह रेष्पाडण्ट

आपिलाण्टगणेर उकिल मुनशी होसेन आलि ओ मौलवी न्यामत आलि, रेष्पाडण्टेर उकिल मुनशी दादार वकस ओ मुनशी हयदर आलि ओ मौलवी करमत[1] होसेन हाजिर हइल। ए मकद्दमा गत सनेर दिसम्बर मासेर ३० तारिखेर हुकुमानुसारे एइ मासेर ११तारिखे आमार बैठके रोवकार हइया जिला ओ कोर्टेर आदालतेर फयसलासकल ओ इं १८२७ सालेर मार्च मासेर ६ ओ २७ तारिखेसकलेर लिखित ए आदालतेर वाकि कागजसकल ओ खास आपीलेर दरखास्त, याहा मजुवात करियाछे, ओ ए आदालते दाखिल हओया ताहार जवाव ओ इ० १८२९ सालेर दिसम्वर मासेर ३० तारिखेर रोवकारिर विस्तिर्न्न ए आदालतेर हाकिम श्रीयुक्त उलियम नसष्टर साहेबेर राय ओ एवं मकद्दमार आविश्यकाय अन्य कागजात पुनराय पडागेल। यथा उभयेर ओजरसकल ओ एजहारसकलेर दृष्टे ए मकद्दमार सम्वन्धे चूडन्त हूकुम सादर हओनेर पूर्व्वे निचेर सओयालेर जवावे ए आदालतेर पण्डित हइते व्यवस्था लओन उचित हइल, अतएव हुकुम हइल जे मकद्दमा अद्य स्थाकत थाके, ओ एइ रावकारिर नकल एइ हुकुमे ए आदालतेर पण्डितके समर्पण कराजाय ये जिला साहावादेर चालित शास्त्रानुसारे निचेर लिखित सओयालेर जवावे एक सप्ताह मध्ये व्यवस्था दाखिल करेण।

सओयाल—यद्यपि हिन्दु जाति हइते केहो आपन पैतृकस्थावर वस्तुसकल हइते किछु व्राह्म जाति हइते एक व्यक्तिके दान करे। आ दान गृहीता आ ताहार मृत्युर पर उहार उत्तरा-

---

१. करम सोहन—व्यप०।

धिकारिगण दान करा वस्तुर उपर दखिल हइया थाके, ओ ताहार पर दाता व्यक्तिर पुत्रगणेर मध्ये एक जन आपन पिता वर्त्तमाने ऐ दान सिद्धि न हओयार एजाहारे आदालते नालिस करे। तवे एमत दान शास्त्रानुसारे सिद्धि ओ चलित हइवेक कि ना इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतमान्तकीयूहेनरीटरंवलसाहेबधर्म्माधिकरणलिखितैतदब्दीयजान(ओ)रीमासीयैकविंशतिदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत् फेवरवरीमासीयतृतीयदिनसम्बन्धिबुधवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि हिन्दुजात्यन्तःपाती कश्चित्स्वपैतृकस्थावरसमुदायात् किञ्चिद् ब्राह्मणजातीयायैकस्मै कस्मैचिद्दत्तवान्, अथ च दानग्रहीत्रा तन्मरणानन्तरं तदुत्तराधिकारिभिस्तद्दानकृतवस्तुनि आयत्तत्वं संपादितम्, तदनन्तरं दातुः पुत्राणां मध्ये एकः कश्चिद् विद्यमाने पितरि स्वपितृकृतदानं सिद्धं न भवतीति वदन् धर्माधिकरणेऽभियोगं कृतवान् स्यात्—तत्र विद्यमाने पितरि प्रश्नपत्रलिखितप्रकारकपुत्रकृताभियोगदृष्ट्या तद्दानं यदि पित्रा स्वेच्छया स्वाभिप्रायेण[1] वा प्रसन्नतया वा कृतम्, तत्र पुत्राणामनुमतिश्चेत् सिद्धं चलितं च भवितुं शक्नोति, नो चेन्न शक्नोति, पैतामहे स्थावरादौ पितापुत्रयोस्तुल्यस्वामित्वेन साधारणतया तद्दानविक्रयादौ पुत्राणामनुमतेरावश्यकत्वात्। यदि च तद्दानं पित्रा भयक्रोधादिषोडशप्रकारान्तर्गतेन केनचित् प्रकारेण कृतम्, ये षोडशप्रकाराः पञ्चमप्रमाणे स्वीकृतास्तत्र पुत्राणामनुमतावननुमतौ वा सिद्धं चलितं च भवितुं नार्हति। यदि च तद्दानं पित्राऽवश्यकर्त्तव्यपित्रादिश्राद्धादिषु यज्ञादिषु वा ब्राह्मणत्वेन धर्मार्थं वा, अर्थात् तत्तद्देशचलितपित्रादिश्राद्ध दिदक्षिणा यज्ञादिदक्षिणा वा ब्रह्मत्रं वा

---

१ स्वामिप्रायेण—व्यप०।

कृ(ता)र्पणं वा पादार्घ्यो वा संकल्पो[1] वा वृत्तिर्वा विष्ण्वादिदेवताप्रीत्यर्थं[2] वेत्यादिरीत्या कृतं तदा धर्म्मार्थत्वेन सिद्धं चलितं च भवितुमर्हति। धर्म्मार्थं किञ्चिद्दाने पुत्राणामनुमतिं विनापि पैतृकस्थावरेऽपि पितुरधिकारः। धर्मार्थं किञ्चिद्दानं यदि पित्रा स्वस्थेनार्त्तेन कृतं श्रावितं वा अदत्त्वैव मृतश्चेत्तथापि राज्ञा तद्धनं तत्पुत्रा दापनीयाः(?)-इति मिताक्षरादिग्रन्थेषु विशेषतो लिखितत्वात्-इति साहावादप्रदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

मणिमुक्ताप्रवालानां सर्व्वस्यैव पिता प्रभुः।
स्थावरस्य तु सर्वस्य न पिता न पितामहः॥—इति मिताक्षरा-(पृ० १६६)वीरमित्रोदय(पृ० ५२४)व्यवहारमाधव(पृ० ३३१)व्यवहारकौस्तुभादिग्रन्थधृतयाज्ञवल्क्य[3](पृ० १६६)वचनम्॥ १॥

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।
तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य (चैव हि)॥—इत्युपरिलिखितग्रन्थधृतयाज्ञवल्क्य(पृ० २०६, २।१२१)वचनम्॥ २॥

तस्मात् पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वं तथापि पितुरावश्यकेषु धर्म्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरण(पद्धि)मोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्रयमिति स्थितम्। स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव।—इत्युपरिलिखितग्रन्थ(मिता-पृ०२००)लिखनम्॥ ३॥

स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्।
असम्भूय सुतान् सर्वान् न दानं न च विक्रयः॥
ये जाता येप्यजाताश्च ये च गर्भे व्यवस्थिताः।
वृत्तिं तेऽपि हि कांक्षन्ति न दानं न च विक्रयः॥—इति चोपरिलिखितग्रन्थधृत(मिता० पृ० २००)व्यासवचनद्वयम्॥ ४॥

---

१. पादार्घ्यो वा संकल्यो वा—व्यप०। २. विष्ण्वयादिदेवताप्रत्यर्थम्—व्यप०।
३. याज्ञवल्क्यस्मृतौ वचनमिदं नोपलभ्यते।

अदत्तं तु भयक्रोधशोककेगरुगन्वितैः[1] ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितैः[2] ।
कर्त्ता ममेदं[3] कर्मेति प्रतिलाभेच्छया च यद् ॥
अपात्रे पात्रमित्युक्ते कार्ये चाधर्मसंज्ञिते[4] ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत्स्मृतम् ॥—इति चोपरिलिखितग्रन्थ-
(मिता० पृ० २४५)धृतनारद(नामसं० ६०)वचनम् ॥ ५ ॥

अस्यापवादः ॥
एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् ।
आपत्काले कुटुम्बार्थं धर्म्मार्थं च विशेषतः ॥—इत्युपरिलिखितग्रन्थ-
(मिता० पृ० २००)धृतमुनिवचनम् ॥६ ॥

स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात् ।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥—इति चोपरिलिखित-
ग्रन्थ(मिता पृ० २४६)धृतकात्यायन(कास्मृ० ५६६)वचनं चेति ॥७॥

मार्च्चमासस्य त्रयोदशदिनसम्बन्धिशनिवारे घटिकैकाधिकयामद्वये मये-
यं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीर्ज्जयतितराम्

९३—रोवकारि मिसिल आदालत देओयानी सदर तारिख
११ माह फेब्रुअरि शन १८३० इ० मताबक १ माह फाल्गुण

---

१. रुजान्वितैः—नामसं० । २. ०पवर्जितम्:—नामसं०, मिता० ।
३. ममायं—नामसं० । ४. संहिते—मिता०, नामसं ।
५. प्रकीर्तितम्—व्यप० ।

शन १२३६ वाङ्गला ऐ आदालतेर हाकिम श्रीयुक्त अलियम नशब्रर साहेवेर वैठके ।

अप्राप्तव्यवहार हरनाथसिंहेर माता मुसम्मात छधोविवि[1] वुद्ध्यप्त नेजामद्दिनेर माता मुसम्मात करिमन ओ अप्राप्तव्यवहार कालीचरणेर माता मुसम्मात पद्म ओ मुसम्मात वदासु ओ मुसम्मात उदाशी साएलगण। छधोविविर उकिलगण मौलवी गोलाम इजदानी ओ मुनसी महम्मद आलि खा ओ मुसम्मातान् करिमन ओ पत्व ओ उदाशीर उकिलगण सदासुकपण्डित ओ लाला वस्तिलाल हाजिर आसिल। इ० १८२६ शालेर सितम्वर मासेर २५ तारिखेर हुकुमानुसारे सायेलगणार सओयालसकल ओ ताहार सम्पर्कीय अन्य कागजात ओ सालिसगणेर फयसला ऐ तारिखेर विस्तिर्ण रोवकारि ए आदालतेर हाकिम श्रीयुत हालडन वावरट राटरि साहेवेर राय सम्वलित पडागेल। जेहेतुक कागचसकलेर द्वाराय वोध हइते छे ये सायेलगण, ये आपनादिगके मृत वावु जगन्नाथसिंहेर स्त्री ओ उत्तराधिकारिणी प्रकाश करितेछे, केह मृत वावुर स्वजाति ओ केह भिन्न जाति, ओ एवं ताहार मध्ये केह सन्तानवति वटे। अतएव ए मकद्दमार सम्मन्वे चुडन्त हुकुम सादर हओनेर पूर्व्व हुकुम हइल ये मकद्दमार कागजात एइ रोवकारिर नकल सहित एइ आदालतेर पण्डितके समर्पण कराजाय—ये ताहार दृष्टे एइ सओयालेर जवावे ये सायेलगणार मध्ये मृत वावुर कोन २ स्त्री ओ एवं ताहारदिगेर गर्भ हइते ये सन्तान हइयाछे शास्त्रानुसारे ऐ मृत व्यक्तिर पुत्र ओ उत्तराधिकारि हय, ओ यद्यपि ऐ सायेलगणार मध्ये केह किम्वा ताहादिगेर पुत्र ऐ मृत व्यक्तिर उत्तराधिकारि हय, तवे अन्य सायेलगण ओ ताहादिगेर सन्तान वा ऐ मृत व्यक्तिर त्यक्त वस्तु हइते भरण ओ पोषणेर किछु सत्वा राखे कि ना—ऐ

१. सद्धोविवि विक्षिप्त नेजामद्दिनेर माता मुसम्मात करीमन—इति साधीयान् पाठः ।

मृत व्यक्तिर याजिर[1] चलित शास्त्रानुसारे व्यवस्था लिखिया दाखिल करेण इति।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतअलियमनसहरसाहेवधर्माधिकरणलिखितैतदब्दीयफेवरवरीमासीयैकादशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं यन्मार्च्चमासीयचतुर्थदिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

अर्थिनीनां मध्ये वदामूविवीनाम्नी मृतस्य वावुजगन्नाथसिंहस्य पत्नी भवति, शास्त्रे पत्नीशब्दस्य विवाहसंस्कृतस्त्रीवाचकत्वात्, प्रभुसमर्पितपत्रजातान्तर्गतविज्ञिप्तनेजामअलीनमातुः करिमननाम्न्या अप्राप्तव्यवहारकालीचरणमातुः पद्दुनाम्न्याश्चोदासीनाम्न्याश्च निवेदनपत्रेणांगरेजीशब्दप्रतिपाद्योनत्रिंशदधिकाष्टादशशताब्दीयसितम्बरमासीयत्रयोविंशतिदिवसीयनृपाधिकृतकृतजयपत्रेण च वदामूविवीनाम्न्या मृतस्य वावुजगन्नाथसिंहविवाहितसजातीयस्त्रीत्वावगमात्। एवं वदामूविवीनाम्न्येवोत्तराधिकारिण्यपि भवति, उत्तराधिकारित्वेनेदानीं तज्जातिव्यव(हारानुसारेण) दत्तकृत्रिमपुत्राणां पुत्रपौत्राणां च मृतव्यक्तेरभावात्। एवं मृतस्य वावुजगन्नाथसिंहस्य सजातीया विवाहित(स्त्री)सद्धोविवीनाम्नीगर्भोत्पन्नस्याप्राप्तव्यवहारस्य हरनाथसिंहस्य शास्त्रोक्तद्वादशविधपुत्रान्तर्गतपौनर्भवपुत्रत्वेऽपि पौनर्भवपुत्रस्येदानीं[2] व्यवहाराभावात् शास्त्रनिषिद्धत्वाच्चोत्तराधिकारित्वं न सम्भवति। एवं भिन्नजातीयपद्दुनाम्नीगर्भोत्पन्नस्याप्राप्तव्यवहारस्य कालीचरणस्य शास्त्रोक्तद्वादशविधपुत्रानन्तर्गतस्य मृतस्य वावुजगन्नाथसिंहस्य शास्त्रानुसारेणावरुद्धपुत्रत्वेऽप्यर्थाद्दासीपुत्रतुल्यत्वेऽपि तस्य च क्षत्रियजातीयस्य मृतस्य वावुजगन्नाथसिंहस्य त्यक्तधने शास्त्रानुसारेणाधिकारित्वं न सम्भवति। एवं चोपरिलिखितप्रकारेण वदामूविवीनाम्न्या मृतस्य वावु-

१. जातिर-इति साधीबान् पाठः। २. पत्रस्य—व्यप०।

जगन्नाथसिंहस्य पत्नीत्वे उत्तराधिकारित्वे च सति अन्यासामर्थिनीनां तासां सन्तानानां[1] च तस्यैव मृतव्यक्तिविशेषस्य त्यक्तधनाद् ग्रा(सा)च्छादनस्य किञ्चित्स्वत्वे अयं विशेषः—या सजातीया विवाहिता[2] सद्धोविवीनाम्नी, सा या च भिन्नजातीया पद्दुनाम्नी[3] च यदि मृतस्य वाबुजगन्नाथसिंहस्योत्तराधिकारिणां प्रतिकूला व्यभिचारिणी वा न भवति तदा यावज्जीवं ग्रासाच्छादनभागिनी भवति नान्यथा। अथ च सजातीयविवाहितस्त्रीगर्भोत्पन्नस्याप्राप्तव्यवहारस्य हरनाथसिंहस्योपरिलिखितप्रकारेण पौनर्भवपुत्रस्य मृतव्यक्त्युत्तराधिकारिणामनुकूलत्वे प्रतिकूलत्वेऽपि वोभयथैव यावज्जीवं ग्रासाच्छादनभागित्वम्, भिन्नजातीयपद्दुनाम्नीगर्भोत्पन्नस्याप्राप्तव्यवहारस्य कालीचरणस्य मृतव्यक्त्युत्तराधिकारिणामनुकूलत्वे यावज्जीवं ग्रासाच्छादनभागित्वं नान्यथा, यवनजातीयस्य विद्दिसनेजामद्दीनस्य तन्मातुः करिमननाम्न्याश्च रजकजातीयोदासीनाम्न्याश्च मृतव्यक्तित्यक्तधनाद् ग्रासाच्छादनाधिकारानधिकारविधायकशास्त्राभावाद्—इति मृतस्य वाबुजगन्नाथसिंहस्य क्षत्रियजातीयस्य प्रचलितमनुमिताक्षरावीरमित्रोदयदत्तकमीमांसादत्तकचन्द्रिकादत्तकदीधितिदत्तकनिर्णयादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी विवाहसंस्कृता—इति मिताक्षरा(पृ० २१७)वीरमित्रोदयादि(वीमि० ख० पृ० ६२३)ग्रन्थलिखनम् ॥ १ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि मिताक्षरा(पृ० २१६)-वीरमित्रोदया(पृ० ६२३)दिग्रन्थधृतयाज्ञवल्क्य(२।१३५)वचनम् ॥ २ ॥

या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥ —इति मनु(पृ० ३७५)-वचनम् ॥ ३ ॥

पौनर्भवस्तु पुत्रोऽक्षतायां क्षतायां वा पुन(र्भ्वां) सवर्णादुत्पन्नः—इति मिताक्षरादि (मि० पृ० २१३)ग्रन्थलिखनम् ॥ ४ ॥

---

१ सन्ताना०—व्यप० । २ विभाहिता—व्यप० ।
३ ०नाम्नीणाच—व्यप० । ४ सजातीया०—व्यप० ।

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।
इमान्¹धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥—इति दत्तकमीमांसा-(पृ० ३०)दिग्रन्थधृतशौनकवचनम ॥ ५ ॥

निर्व्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥—इति मिताक्षरा-दिग्रन्थधृतयाज्ञवल्क्य (२।१४२) वचनम् ॥ ६ ॥

भर्त्तव्यास्त्वपरे सुताः—इति वीरमित्रोदयादि (वीमित्र० पृ० ६१४)-ग्रन्थधृतबृहस्पति(२०७)वचनम् ॥ ७ ॥

द्विजातिना दास्यामुत्पन्नः पितुरिच्छयाप्यंशं न लभते, नाप्यर्द्धं दूरत एव कृत्स्नम् । किन्त्वनुकूलश्चेज्जीवनमात्रं लभते—इति मिताक्षरा-(पृ० २१६)वीरमित्रोदयादि (पृ० ६२३ ग्रन्थलिखनम् ॥ ८ ॥

बन्धूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषामेव तज्ज्ञेयमेकरूपा हि ते स्मृताः ॥—इति मिताक्षरादिग्रन्थ-धृतौशनसवचनञ्चेति² ॥ ६ ॥

एतदब्दीयापरेलमासीयषड्विंशतिदिनसम्बन्धिसोमवासरे घटिकात्रया-धिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

६४—रोवकारि मिषिल आदालत देओयानि सदर तारिख २२ माह माइ सन १८३०इ० मोतावक १० माह ज्यैष्ठ सन १२३७ वाङ्गला रोज शनिवार ऐ आदालतेर हाकिम श्रीयुत मान्तगिओ हेनरि टरम्वल साहेवेर वैठके ।

वावु माधोस्वहाय ओ वेनिस्वहाय
अप्राप्तव्यवहारगणेर मोक्तार— आपिलाण्ट ।
वावु रामचरणलाल—
मोसम्मात वादामो प्रभृति— रस्पाडण्टान् ।

---

१. इमान्-मनीषिणः—दत्तकमीमासायां नोपलभ्यते ।
२. मिताक्षरायां औशनसस्मृतो च नोपलब्धम् ।

आपिलाण्टेर उकिल मुन्‌सि दादारवक्‌स हाजिर आइल। रस्पाडेण्टगण ए आदालते एयालास शमार[1] पृष्ठे रसिद लिखिया, ओ स्वयं किम्वा उकिलेर द्वारा हाजिर हइल ना। अतएव एइ मकद्दमा ताहारदिगेर असाक्ष्याते अद्य आमार वैठके रुवकार हइया नालिशि आरजि प्रभृति प्रविनशल कोटेर कागजसकल फयशला पर्य्यन्त ओ ए आदालतेर आपिलेर मौजुवात् पडागेल। तत् परे आपिलाण्टेर उकिल चारि टाकार मूल्येर एक केता फेरेस्तेर वराय[2] इंराजी अक्षर ओ एवारतेवइ[3] ....किता दस्तावेज लम्वरे दाखिल करिल,दृष्ट आसिल। जानागेल जे रस्पाडण्टान, सावेक मुद्दइगण, मृत वावु द्वारिकादासेर त्यक्तेर तृतीय अंश २५००००० टाका देयाइया पाओनेर जन्ये एइ एजहारे नालिस करिलेक—ये मृत वावुर दुइ स्त्री। प्रथमा स्त्रीर गर्भ हइते, ये ऐ वावुर साक्षाते मृत्यु हय, दुइ कन्या[4] ओ द्वितीया स्त्री, अर्थात् मुषम्मात् शितलवहुर गर्भ हइते एक कन्या जन्मे; ओ ऐ वा(वु)र मृत्युर (पर) मुषम्मात् शितलवहु आपन जीवद्दशा पर्य्यन्त त्यक्त धन ओ कुटीसकलेर उपरे कावेज थाकिया देना ओ लेना ओ कुटीर कर्म्म जारि करिया मृत्यु हय; ओ ताहार मृत्युर पर उहार कन्या मुसम्मात् नछमन् ओ नछमनेर पुत्रगणेर माधोस्वहाय ओ वेणिस्वहाय त्यक्त धन प्रभृतिते दखिल हइयाछे। ये हेतुक शास्त्र ओ देशेर व्यवहारमते मृत वावुद्वारिकादासेर कन्यागणेर पुत्रगण व्यतित अन्य केह उत्तराधिकारी नहे, ओ वावुद्वारिकादासेर प्रथमा स्त्रीर गर्भज कन्यागणेर मध्ये एक कन्या आमि[5] मुसम्मात वादामुर पुत्र जगन्नाथदास उत्तराधिकारी ओ हकदार वटे। अतएव नालिश करितेछि।

---

१. एजलासेर हुकुमनामार—इति साधीयान् पाठः।

२. द्वाराय—इति साधीयान् पाठः।

३. एवावतेरइ—इति साधीयान् पाठः।

४. कपा—व्यप०।

५. अर्थादित्यर्थः।

ओ जओयावेर खोलासा एइ ये यखन वावुद्वारिकादास आपन जीवद्दशार मुद्दैयार विवाह दिया, ये देना छिल ताहा दिया, विदाय करियाछेन हिन्दु जातिर व्यवहार ओ शास्त्र मते मुद्दैगणेर किछु स्वत्व ओ हिस्या दावि वाकि (रहि)ल ना, ओ यद्यपि मुद्दैगणेर किछु दावि थाकित तवे ऐ वावुर जीवद्दशाते अथवा ताहार मृत्युर पर शीतलवहुर उपर, ये १५ वत्सर पर्य्यन्त कावेज ओ दखिल थाकिया, आपन दौहित्रगणके उत्तराधिकारी ओ रासनसीन कराइया ओ तमलिकनामा लिखिया दियाछेन, आपत्ति करित। ओ जवाव मजवाव (ये)—मुसम्मात् शीतलवहु माधोस्वहायके, ये रामचरणलाल, अर्थात् मुसम्मात् नछमिर पतिर वड पुत्र वटे, रासनसीन् करण असिद्ध, ओ शीतलवहुर मृत्युर पर तमलिकनामा प्रस्तुत हओन ओ मृत वावुर सकल दौहित्रगण तुल्यांशे स्वत्वाधिकारि थाकन सम्वलित वटे, ओ कोर्टेर हाकिम वारानसेर पाठशालार पण्डितगण हइते व्यवस्था लओन परे मुद्दैगणेर दावि डिगरि करिलेन। यथा आपिलाण्ट एइ आपत्तिसकले ये—ऐ व्यवस्था शास्त्र-वहिर्भूत वटे आपिल करिलेक, ओ प्रकाश करिलेक, ओ प्रकाश करे ये उपरेर लिखित हेतु मते शास्त्रानुसारे विरोधीय वस्तुर उपर माधोस्वहाय ए वेनिस्वहायेर स्वत्वा साव्यस्थ ओ प्रामाण्य वटे।

अतएव एइ आदालतेर पण्डित हइते नीचेर सओयालेर जओवे व्यवस्था लओन उचित वोध हइया हुकुम हइलो—ये एइ रोवकारिर नकल ६५ लम्वरे ग्रथित आशल हेवानामा दस्तावेज सम्वलित, एइ आदालतेर पण्डितके अर्पण करा याय—ये वारानस देशेर चलित शास्त्रानुसारे नीचेर सओयालेर जवावे एक सप्ताहेर मध्ये व्यवस्था दाखिल करेन।

सओाल—यद्यपि आगरओयाला महाजन जाति हइते केह एक स्त्री ओ ताहार गर्भज एक कन्या ओ प्रथमा स्त्री, ये पतिर साक्षाते मृत्यु हइयाछे, ताहार गर्भेर दुइ कन्या ओ धनादि त्यक्त

वस्तु राखिया मरे, ओ ताहार पर द्वितीया स्त्री आपन जीवद्दशा पर्य्यन्त पतिर त्यक्त वस्तुते दखिलकार थाकिया आपन गर्भज कन्यार पुत्रगणके रासूनसिन् करिया ऐ समुदय वस्तुर तमलिकनामा व उहादिगके लिखिया दियाथाके तवे केवल द्वितीया स्त्रीर तमलिक मते ताहार कन्यार पुत्रगण मृत व्यक्तिर वस्तुर कर्त्ता हइवेक, किम्वा प्रथमा स्त्रीर, ये पतिर साक्षाते मरियाछे, कन्यागणेर पुत्रगणे कर्त्ता हइवेक, ओ मृत व्यक्तिर द्वितीया स्त्रीर आपन गर्भज कन्यार पुत्रगणके आपन पतिर अनुमति व्यतित रासूनसीन करण, ओ स्त्रीलोक आपनार पतिर त्यक्त स्थावर-किम्वा अस्थावर, सकल आपन गर्भज कन्यार पुत्रगणके तमलिक करण शास्त्रानुसारे सिद्ध बटे कि ना इति।

श्रीर्ज्जयतितराम्।

एतद्धर्म्माधिकरणाधिपतिश्रीयुतमान्तकिउहेनरिटरम्वलसाहेवधर्म्माधिकरणलिखितैतदब्दीयमाइमासीयद्वाविंशतिदिनसम्बन्धिविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं पञ्चषष्ट्यङ्काङ्कितदानपत्रञ्च यज्जुनमासीयचतुर्द्दशदिनसम्बन्धिचन्द्रवासरे पञ्चघटिकाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

/यद्यपि कश्चिदगरवालामहाजनो व्यक्तिविशेषो द्वितीयविवाहितां पत्नीं तद्गर्भजामेकां कन्यां तथा स्वाग्रे मृतप्रथमपत्नीगर्भजकन्याद्वयं हेमरूप्यकुप्यादिधनञ्च (सं)रक्ष्य दिवं गतः; तदनन्तरं सैव द्वितीया पत्नी स्वजीवद्दशापर्य्यन्तं पतित्यक्तसर्ववस्तुन्यायत्तत्वं सम्पाद्य स्वगर्भजकन्यायाः पुत्रं रासनसीनमर्थाद्दत्तकपुत्रं कृत्वा, अथ च तस्या एव पुत्राय[1] सर्व्ववस्तुनस्तमलिकनामा अर्थात् दानपत्रं लिखित्वा दत्तवती स्यात्, तथापि मृततद्व्यक्तेर्द्वितीयपत्नीकृतदानपत्रानुसारेण तद्गर्भजकन्यापुत्रयोः केवलयोर्मृतव्यक्तेः प्रथमपत्नीगर्भजकन्यापुत्रम(न)पेक्ष्य तस्मिन् सर्व्ववस्तुनि स्वामित्वं न सम्भवति, किन्तु सर्व्वेषामेव मृतव्यक्तेः प्रथमपत्नीगर्भजकन्यापुत्रस्य तथा द्वितीयपत्नी-

---

१. अथ च तस्या एव पुत्रायास्तस्यैव सर्व्व०—व्यव०।

गर्भजकन्यापुत्रयोस्तुल्याधिकारित्वात्, उत्तरोत्तराधिकारिक्रमबोधकशास्त्रे दौहित्रविशेषाश्रवणात् पत्यनुमतिव्यतिरेकेण स्त्रीकृतस्य कन्यापुत्राधनसीनकरणस्यार्थाद्दत्तककरणस्य, तथा स्वपतित्यक्तस्थावरास्थावरसर्व्ववस्तुनः स्वगर्भजकन्यायाः पुत्रद्वयसम्प्रदानकदानपत्रकरणस्य च शास्त्रासम्मतत्वाच्च—इति काशीप्रदेशचलितदत्तकमीमांसा-मिताक्षरा-वीरमित्रोदय-कृत्यकल्पतरु-विवाद-चिन्तामणि-प्रभृतिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

दुहित्रभावे दौहित्रो धनभाक्—इति मिताक्षरा(पृ० २२१)वीरमित्रोदय(पृ० ६६१)ग्रन्थलिखनम् ॥ १ ॥

अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः।

पिण्डोदकक्रियाहेतोर्नामसङ्कीर्त्तनाय च॥—इति दत्तकमीमांसा(पृ०५) धृतमनुवचनम्[१] ॥ २ ॥

अपुत्रे(णे)ति पुंस्त्वश्रवणात् न स्त्रिया अधिकार इति गम्यते इति।

अतएव वशिष्ठः—

न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः—इति दत्तकमीमांसा(पृ० ७) विवादचिन्तामणि[२]कल्पतरुप्रभृतिग्रन्थधृतवशिष्ठवचनम् ॥ ३ ॥

अनेन विधवाया भर्त्रनुज्ञानासम्भवादनधिकारो गम्यते—इति तद्ग्रन्थ(दमी० पृ० ७)लिखनम् ॥ ४ ॥

भारते (१३।४७।२४)स्त्रीणां स्वपतिदायस्तु उपभोगफलःस्मृतः।
नापहारं स्त्रियःकुर्युः पतिवित्तात् कथञ्चन॥

अपहारमैच्छिकदानविक्रयादिकम्।—इति विवादचिन्तामणि(पृ० २३८)ग्रन्थलिखनम् ॥ ५ ॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥—इति विवादरत्नाकर (पृ० ५११) कृत्यकल्पतरुवीरमित्रोदयादि(वीमि० पृ० ६२७)ग्रन्थधृतकात्यायन(कास्मृ० पृ० ११२)वचनञ्चेति ॥ ६ ॥

---

१. विचि० पुस्तके वचनमिदं न प्राप्तम्। २. वचनमिदं मनुस्मृतौ नोपलभ्यते।

जुनमासीयसप्तदशदिनसम्बन्धिगुरुवासरे घटिकाचतुष्टयाधिकयामद्वये दत्तेयं मया व्यवस्था।

श्रीज्जयतितराम्
श्रीहीरानन्दमिश्रेण

९५—रोवकारि मिसिल आदालत देओानि सदर तारिख २१ माह आगस्त सन १८३० इं० मतावक ६ माह भाद्र सन १२३७ वाङ्गला रोज शनिवार ऐ आदालतेर हाकिम श्रीयुत आलक सुन्दर रास साहेवेर वैठके।

कन्दर्पसिंह मोकशेल— आपिलाण्ट।

मृत राजामोहनलालखार स्त्रीगण राणी सुगन्धलता ओ राणी वङ्गलताप्रभृति— रस्पाडण्टान्।

आपिलाण्टेर उकिलगण मुनसि ददारवकस ओ मौलवि करम होसेन ओ स्वयं आपिलाण्ट ओ रष्पाडण्टगणेर उकिलगण मुनसि होसेनआलि ओ मुनसि गोलामवतुल ओ सदासुकपण्डित हाजिर आसिल। ए मकद्दमा एत्ताका कलिकातार प्रविनशल कोर्टेर रिटगण पौँचन मते ए मासेर १४ तारिखे आमार निकट पुनराय उपस्थित हइया ऐ तारिखेर रोवकारिर लिखित कागज-सकल पडागिया स्थकित छिल, अद्य पुनराय रोवकार हइया प्रविनशल कोर्ट आदालतेर वाकी कागजात् ओ ए आदालते दाखिल हओया कागजसकल पडागेल। ए मकद्दमार कागज-सकल ओ मोहनलालखाँ आपिलाण्ट आ राणी शिरोमणि रष्पा-डण्टेर ९५८ नं० मकद्दमा ओ रूपचरणमहापात्र मोफषेल आपि-लाण्ट आनन्दलालखाँएर भ्राता मोहनलालखाँ रष्पाडण्टेर ९५८ नं मकद्दमा वावत् ए आदालतेर फयशलासकलेर द्वारा आमार साव्यस्त हइल—ये राजा अजित्सिंह ओ राणी शिरोमणिर वंशे

दायभागशास्त्र चलित वटे, ओ ऐ शास्त्र ऐ फयशलासकलेर अनुसारे राजा अजित्‌सिंहेर स्त्री राणि शिरोमणिर मृत्युर पर, ये ऐ राजार त्यक्त जमिदारिर उपर उत्तराधिकारि प्रकारे दखिलकार छिल, राजा अजित्‌सिंहेर मातुलपुत्रगण उहार वलवान उत्तराधिकारि ओ उत्तराधि(कार)प्रकारे उहार मतरुकार स्वत्वाधिकार वटे। ओ इहा येओ स्पष्ट—ये मोहनलालखाँएर भ्राता आनन्दलालखाँर नामिक राणि शिरोमणिर लिखिया देओया हेवानामा. ताहाते राजा अजितसिंहेर उत्तराधिकारिगणेर अनुमति ना पाओने असिद्ध ओ मिथ्या हइयाछे, ओ रूपचरण आपिलाण्ट ओ मोहनलालखाँ रस्पाडण्टेर मकर्द्दमाय, ये आपिलाण्ट आपनाके लक्ष्मणसिंहेर भ्राता श्यामसिंहेर सन्तान करार दिया विरोधीय जमिदारिर कारण नालिष करियाछिल। दाखिल हओया व्यवस्था द्वाराय याहेर ये राणि शिरोमणिर मृत्युर पर यदि राजा अजित्‌सिंहेर कोन निकटस्थ उत्तराधिकारि ना थाकित, राजा अजित्‌सिंहेर मतरुकाते रूपचरणमहापात्रेर उत्तराधिकारि स्वत्व हइत। ओ एइ क्षण कन्दर्पसिंह लक्ष्मणसिंहके राजा अजित्‌सिंहेर आदिपुरुष ओ आपनाके ओ सप्तमपुरुषीय स्वगोत्र वलिया उत्तराधिकारिरूपे विरोधीय वस्तुर दाविदार वटे, ओ आपिलाण्टेर दाखिल करा कुरसिनामा ओ रूपचरणमहापात्र आपिलाण्टेर मकद्दमार आमलि ११८८ शालेर भाद्रमासेर १५ तारिखेर लिखित राणि शिरोमणिर दाखिल करा कुरसिनामा ओ मोहनलालखा आपिलाण्ट राणि शिरोमणि रष्पाडण्टर मकर्द्दमार दाखिल हओया ऐ राणिर दरखास्तेर नकल द्वाराय जाना याइतेछे ये कन्दर्पसिंह आपिलाण्ट ओ लक्ष्मणसिंह आदिपुरुषेर सहित नवम पुरुष आ अजितसिंह लक्ष्मणसिंहेर सहित सप्तम पुरुष वटे। आ दुइ व्यक्तिर तपसिल एइ ये।

आदि पुरुष लक्ष्मणसिंह

तस्य पुत्र पुरुषोत्तम

ज्येष्ठ पुत्र संग्राम	प्रतापनारायणमहापात्र
तस्य पुत्र रघुनाथ	द्वितीय तस्य पुत्र सुबुद्धि
तस्य पुत्र रामसिंह	तस्य पुत्र दुर्य्योधन
तस्य पुत्र यशोमन्तसिंह	तस्य पुत्र रसिक
तस्य पुत्र अजितसिंह	तस्य पुत्र वैष्णवचरण
	तस्य पुत्र समिर
	तस्य पुत्र कन्दर्पसिंह

ओ विरोधीय वस्तुर दखिलकार राजा मोहनलालखा राजा अजितसिंहेर सकल मातुलपुत्रगणेर लिखिया देया नादावि द्वाराय आपनाके विरोधीय जमिदारिर स्वत्वाधिकारिर करार देय। अतएव शास्त्र द्वाराय एइ कथार तहकिकात् - ये मातुलपुत्रगणेर लिखिया देओया नादावि मुद्दे, अर्थात् आपिलाण्टर, दाविर निषेधीय हइते पारे कि ना, आवश्यक बोध हइया, हुकुम हइल ये एइ रोवकारिर नकल रूपचरणमहापात्र आपिलाण्ट मोहनलालखा रष्पाडण्ट ओ मोहनलालखा आपिलाण्ट राणि शिरोमणि रष्पाडण्टेर मकद्दमार दाखिल हओया व्यवस्थासकल सहित एइ हुकुमे ए आदालतेर पण्डितेर हाओलात करा याय ये ताहार दृष्टे राजा अजितसिंहेर वंशेर चलित दायभागशास्त्रानुसारे नीचेर लिखित सओालेर जवाव सओयाल पाओनेर तारिख हइते चारि दिवसेर मध्ये दाखिल करे।

सओया(ल)—ऐ व्यवस्थासकल ओ ऐ मकद्दमासकलेर बावत् ए आदालतेर फयशलासकलेर द्वाराय साव्यस्थ आछे ये राजा अजितसिंहेर वंशेर चलित दायभागशास्त्रानुसारे राजा अजितसिंहेर स्त्री राणी शिरोमणिर मृत्युर पर ऐ राजा ओ राणिर त्यक्त विरोधीय वस्तु राजा अजितसिंहेर मातुलपुत्रगणके, ये उहार बलवान् उत्तराधिकारि वटे, अशिवेक, ओ ताहारा ताहार स्वत्वाधिकारि वटे; ओ उहादिगेर समीद्ये सगोत्र उत्तराधिकारि हइवेक ना; ओ कागजातेर द्वाराय साव्यस्थ ये ए आदालतेर

पूर्व्व पण्डितगणेर व्यवस्थासकल ओ फयशलासकलेर द्वाराय राणि शिरोमणिर मृत्युर पर मातुलपुत्रगण आपन विरोधीय वस्तुर स्वत्त्वाधिकार थाकनेओ विरोधीय वस्तुके मोहनलालखाँ-यर दखले छाडिया दिया, ताहार नादावि लिखिया दियाछे। अतएव जिज्ञासा याय ये नादावि लिखिया देओनिया मातुल-पुत्रगण, ये राणी शिरोमणिर मृत्युर पर राजा अजितसिंहेर बल-वान् उत्तराधिकारी ओ विरोधीय जमिदारिर स्वत्त्वाधिकारि वटे, अजितसिंहेर अतिवृद्धप्रपितामहेर भ्रातार सन्तान, ये स्व-गोत्र वटे, थाकनेओ ऐ सकल वस्तु हइते आपनादिगेर एक्तारे किछु ना राखिया, किम्वा श्राद्ध ओ आपनादिगेर निर्व्वाहार्थे ताहा हइते किछु राखिया, मोहनलालखाके, ये भिन्न व्यक्ति वटे, विरोधीय वस्तुर नादावि लिखिया देओयार क्षमता राखे कि ना, ओ ऐ नादावि आपिलाण्टेर स्वत्वेर ये स्वगोत्र वटे अपचय कारक हइवेक कि ना इति।

एतद्धर्म्माधिकरणाधिपतिश्रीयुतआलकसुन्दरराससाहेवधर्म्माधिकरण-लिखितखरामाष्टेन्दुमिताब्दीयागस्तमासीयैकविंशतिदिवसीयविचारपत्रान्तर्ग-तप्रश्नपत्रमेवमेतद्विवादनिविष्टपत्रजातान्तर्गतात्रत्यपूर्व्वधर्म्माधिकरणलिखित-द्वीन्द्वष्टेन्दुमिताब्दीयजनवरीमासीयद्वाविंशतिदिवसीयविचारपत्रसंवलितव्यव-स्थापत्रद्वयञ्च यदेतदब्दीयागस्तमासीयसप्तविंशतिदिनसम्बन्धिशुक्रवासरे न-वमिनटाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारे-णोत्तरं लिख्यते।

राज्ञिशिरोमण्या मरणोत्तरं राज्ञोऽजितसिंहस्य बलवदुत्तराधिकारिवि-वादास्पदीभूतसराजकरस्थावरस्वत्वाधिकार्य्यनभियोगपत्रलेखकमातुलपुत्रकर्तृ-काजितसिंहस्य सगोत्रवृद्धप्रपितामहभ्रातुष्पुत्रसन्ताने वर्त्तमान एव सति तस्मात् सराजकरस्थावरात् स्वायत्तं किञ्चिदप्यरक्षित्वाऽथवा श्राद्धार्थं तथा स्वीयनिर्व्वाहार्थं तस्मादेवसराजकरस्थावरात् किञ्चिद्रक्षित्वोदासीनमोहनलाल-खाँसम्प्रदानकविवादास्पदीभूतवस्त्वनभियोगपत्रदाने यद्यपि तस्मात्सराजकर-

स्थावरात् किञ्चिदप्यरक्षित्वेति[1] कल्पे शास्त्रासिद्धवृत्तिलोपात्मकत्वेन मृतधनिव्यक्तेरजितसिंहस्य श्राद्धार्थमर्द्धस्यारक्षणत्वेन तथान्वयसत्त्वप्रयुक्त[2]-निषिद्धसर्वस्वदानत्वेन लोकविरुद्धत्वादिना च सत्यसत्यपि वाऽर्थिन्येतादृश-सराजकरस्थावरविषयकानभियोगपत्रदानस्य शास्त्रानुसारित्वं नास्ति, तथापि राजाऽजितसिंहवंशचलितदायभागानुसारेण तु तैर्ज्ञानानुसारेण स्वेच्छापूर्व्वक-सम्मत्या दानासिद्धिसाधनबलभीतिच्छलादिविरहेण[3] पुत्रादिसम्मत्या च सत्यपि राज्ञोऽजितसिंहस्य सगोत्रे वृद्धप्रपितामहभ्रातुष्पुत्रसन्ताने उदासीन-मोहनलालखाँसम्प्रदानकैतादृशसराजकरस्थावरविषयकमप्यनभियोगपत्रं दातुं शक्यते, राज्ञोऽजितसिंहस्य बलवदुत्तराधिकारिमातुलपुत्राणां राज्ञोऽजि-तसिंहस्य वृद्धप्रपितामहभ्रातुष्पुत्रसन्तानस्यार्थिन उदासीनसदृशत्वेन तस्य तन्मातुलपुत्रकर्त्तृकानभियोगपत्रदाने प्रतिबन्धकत्वात्, तादृशस्य च विवादास्पदीभूतसराजकरस्थावरस्य तेषां तन्मातुलपुत्राणां दायरूपत्वाद्दाय-रूपेण तस्मिन् स्वाच्छन्द्यस्य लोकप्रसिद्धत्वात्। परन्तु एतच्छास्त्रानुसारेण दातुर्दोषो भविष्यति। तस्मात् किञ्चिद्रक्षित्वेति कल्पे श्राद्धार्थं तत्सराजकर-स्थावरस्यार्द्धं तथा तस्मादेव स्थावरात् स्वपोष्यवर्गभरणार्हं धनं रक्षित्वा तु ज्ञानानुसारेण स्वेच्छापूर्व्वकसम्मत्या बलभीतिच्छलादिविरहत्वेन पुत्रादि[4]-सम्मत्या च स्वाच्छन्द्येनोदासीनमोहनलालखाँसम्प्रदानकमनभियोगपत्रं दातुं शक्यते। यदि च किञ्चिदित्यनेन मानवर्द्धनमात्रं रक्षितं तथापि पूर्व्वो-क्तज्ञानानुसारेणेत्यादितद्दानरीत्यान्यसम्प्रदानकमपि तद्दातुं शक्यते; परन्त्वे-तद्रक्षणस्याप्यरक्षणसमत्वेन दातुर्दोषो भविष्यति। राज्ञोऽजितसिंहस्य बल-वदुत्तराधिकारिमातुलपुत्रकर्त्तृकाजितसिंहस्य त्यक्तस्वदायरूपसराजकरस्थाव-रविषयकोदासीनमोहनलालखाँसम्प्रदानकानभियोगपत्रदानेनाजितसिंहस्य स-गोत्रवृद्धप्रपितामहभ्रातुष्पुत्रसन्तानस्यार्थिनोऽपचयो नास्ति, तत्पूर्व्वमुपचया-भावात्तन्मातुलपुत्रसत्त्वे सगोत्रस्य तस्य स्वत्वाभावात्—इति तद्वंशचलित-दायभागादिग्रन्थानुसारिणी व्यवस्था।

---

१. ०त्वे सति—व्यप०।
२. ०त्रय०—व्यप०।
३. ०सिसिसाधन०—व्यप०।
४. पुत्रगामादि०—व्यप०।

अत्र प्रमाणम्—

ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।

वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः ॥—इति (दाभा॰ २४)मनुवचनम्[1] ॥ १ ॥

समुत्पन्नाद्धनादर्द्ध[2] तदर्थं[3] स्थापयेत्पृथक् ।

मासषाण्मासिके श्राद्धे वार्षिके च प्रयत्नतः ॥—इति दायभाग(पृ॰ २०६।२१०)धृतबृहस्पति(पृ॰ २१६)वचनम् ॥ २ ॥

निःक्षेपः पुत्रदारांश्च सर्वस्वञ्चान्वये सति ।

आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना ॥

अदेयान्याहुराचार्याः—इत्यादि विवादभङ्गार्णव(पृ॰ १-पृ॰ ४२१ ख)धृतनारद(नास्मृपृ॰ १३७)वचनम् ॥ ३ ॥

बलाद्दत्तं बलाद्भुक्तं बलाद् यच्चापि लेखितम् ।

सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत् ॥—इति मनु(पृ॰ १६८)-वचनम् ॥ ४ ॥

स्वग्रामज्ञातिसामन्तदायादानुमतेन च ।

हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी ।—इति दायतत्त्व(पृ॰ १७६)धृतमुनिवचनम् ॥ ५ ॥

पूर्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र (द्रव्ये) स्वत्वं तत्र निरूढो दायशब्दः—इति दायभाग(पृ॰ ५)ग्रन्थलिखनम् ॥ ६ ॥

भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।

नरकं पीडने तस्य[3] तस्माद् यत्नेन तं भरेत् ॥—इति दायभाग(पृ॰ ३३)ग्रन्थधृतमनुवचनम् (?) ॥ ७ ॥

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।

युक्तिहीनविचारे तु धर्महानिः प्रजायते ॥—इति व्यवहारतत्त्व-(पृ॰ ४)धृतबृहस्पति(पृ॰ १६)वचनम् ॥ ८ ॥

---

१. व्यासवचनमिति हारीतवचनमिति वा पठनीयम् ।—तत्र च चतुर्थे पादे—वृत्तिदानं न सिद्ध्यति—इति हारीतपाठः, न दानं न च विक्रयः—इति व्यासपाठः । २. तदर्थे—दाभा॰।

३. चास्य—दाभा॰ ।

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै ॥—इति दायभाग(पृ० ३५)-धृतनारद(नामसं० पृ० १५७)वचनम् ॥ ९ ॥

*व्यासवचनं तु (स्वामित्वेन दुर्वृत्तपुरुषगोचरविक्रयदानादिना) कुटुम्बविरोधादधर्म्मभागिताज्ञापनार्थं निषेधरूपं न तु विक्रयाद्यनिष्पत्त्यर्थम्—इति तत्करणाद्विध्यतिक्रमो भवति, न तु दानाद्यनिष्पत्तिः—*इति च दायभाग(पृ० ३४-३५)ग्रन्थलिखनम् ॥ १० ॥

तदभावे मातुलपुत्रपौत्राणां क्रमेणाधिकारः तदभावे चाधस्तनसकुल्यानां धनिभोग्यलेपदातॄणां प्रतिप्रणप्तृप्रभृतिपुरुषत्रयाणां क्रमेणाधिकारः । तदभावे पुनरूर्द्ध्वतनसकुल्यानां धनिदेयलेपदातॄणां[1] वृद्धप्रपितामहादिसन्ततीनामासत्तिक्रमेणाधिकारः—इति श्रीकृष्णतर्कालङ्कारकृत-दायभागटीकाग्रन्थ(पृ० २१८)लिखनञ्चेति ।

शैतम्बरमासीयसप्तदिनसम्बन्धिभौमवासरे सार्द्धघटिकत्रयाधिकयामद्वये दत्तेयं मया व्यवस्था ।

श्रीज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

९६—सओयाल आदालत देओयानी कमिसनरी आतराक मुसरक जिला रङ्गपूर वनामे पण्डितान् सदर देओयानी आदालत सन् १८३० इंरेजी तारिख १० जुन मोताबक १२३७ वाङ्गला तारिख २९ ज्यैष्ठ ।

विष्णुराम	**मुदइ**
	पापड
धीरचन्द्रवडुया जमिदार	**मुद्दायाले**
परगणे घूणर्या ओ गयरह	**दावि १५०० टाका**

---

१. धनिदेयलेपदातॄणां वृद्धप्रपितामह०—व्यप० ।

बावत् लओयाबाद
कउरि[1] परगणार उपस्वत्वे

मुद्दै मजकुर आपन मातुल मेघनारायण चौधुरिर वित्तेर पर दखिलकार थाका, आर मुद्दायाले परगणा मजकुरेर कएक मौजा जबरदस्तीते दखल करा एजहारे उपरेर लिखित मवलग मजकुरेर दायाते मुद्दायालेर नामे नालिष करे। तजविजकालीन जाना-गियाछे—ये शिवनारायण नामे एक व्यक्ति परगणे लओयाबाद कओरिर जमिदार छिल। ताहार मृत्यु हओयार पर तस्य पुत्र शम्भुनारायण आपन पितृवित्तेते दखिलकार हइया निःसन्तान रूपे मृत्यु हय। ए प्रयुक्त शिवनारायणेर दौहित्र मेघनारायण ऐ स्थावर वित्तेर अधिकारी हइयाछिल। कथक दिवस पर से निःसन्तान मृत्यु हइयाछे। मुद्दै मेघनारायण मजकुरेर भागिनेय हय। से मते सओयाल करा जाइतेछे—ये मेघनारायण निःसन्तान मृत्यु हओयाते शिवनारायणेर स्थावर वस्तुते, ये ताहार पुत्रे अधिकारी हइया परे मेघनारायणेर हस्तगत हय, शास्त्रानुसारे मुद्दै ताहा पाओयार स्वत्ववान् हय कि ना। यदि मुद्दै के ना अर्शे एवं मेघनारायणेर अथवा ताहार पूर्व्वाधिकारीर उत्तराधिकारी केह नाथाके, तवे ऐ स्थावर वस्तु काहाके अर्शिते पारे इति।

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयजुलाइमासीयपञ्चमदिनसम्बन्धिसोम-वासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यद्यपि शिवनारायणस्य मृतस्य तत्त्यक्तस्वसम्बन्धिस्थावरवस्तुनि शिव-नारायणस्य पुत्रः शम्भुनारायण उत्तराधिकारित्वेनाधिकारं संपाद्य निःसन्तान एव स्वर्गतः, तदनन्तरं तद्भागिनेयो मेघनारायणस्तदेव वस्तु हस्तगतं (सं)रक्ष्य निःसन्तानो मृतस्तथापि तन्मरणोत्तरं वङ्गदेशचलितशास्त्रानुसारे-णाप्यर्थान्मेघनारायणस्य भागिनेय एव तद्ग्रहणे स्वत्ववान् भवति—यत उपलिखितशास्त्रे मृतव्यक्तेर्भ्रातुष्पौत्रपर्य्यन्तोत्तराधिकार्य्यभावे तत्त्यक्तधने

1. कउवि—व्यप०

पितृदौहित्रस्यार्थान्मृतव्यक्तेर्भागिनेयस्याधिकारोऽभिव्यक्तोऽतः सुतरां मृतव्यक्तेस्तद्व्यतिरिक्तो उत्तराधिकारिसामान्याभावस्य तथा मृतव्यक्तेः पूर्व्वाधिकारिणोऽर्थाच्छम्भुनारायणस्योत्तराधिकारिसामान्याभावस्य च सद्भावात्—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायक्रमसंग्रहविवादभङ्गार्णवविवादार्णवसेतुप्रभृतिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

किन्तु पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्राधिकारो बोद्धव्यः—इति दायभाग(पृ० २०८)ग्रन्थलिखनम् ।। १ ।।

तदभावे पितृदौहित्रः—इति श्रीकृष्णतर्कालङ्कारकृतदायभाग(पृ०२१८) ग्रन्थलिखनम् ।। २ ।।

भ्रातृपौत्रस्याभावे पितृदौहित्रस्याधिकारः, धनिपित्रादित्रयपिण्डदातृत्वात्—इति दायक्रमसंग्रहादि(पृ० ७)ग्रन्थलिखनञ्चेति ।। ३ ।।

अगस्तमासीयदशमदिनसम्बन्धिभौमवासरे घटिकैकाधिकयामद्वये दत्तेयं मया व्यवस्था इति—

श्रीश्रीर्ज्जयतितराम्
श्रीहीरानन्दमिश्रेण

सदर देओयानि आदालतेर पण्डितेर प्रति प्रश्नः—

९७—सओयाल :—एक व्यक्ति युगि परामाणिकी मर्य्यादार कउडिर दावि करे। अतएव एमत् प्रकार मर्यादार कउडि देया ओ लओया शास्त्रसम्मत कि; उहादिगेर जातिर ओ समाजस्थ लोकेरा स्वेच्छाते विभाग हय—इहार प्रत्युत्तर यथाशास्त्र लिखिबा इति ।

यत्र कश्चिद्‌युगी व्यक्तिविशेषः परामाणिकीमर्य्यादासम्बन्धिकपर्द्दिकाद्यामेकद्रव्यविषयकस्वत्वाभियोगं कुर्य्यात्, तत्र यद्यपि विशेषेण युगीमुपलक्ष्य मर्य्यादाद्रव्यस्य दानग्रहणे कुत्रापि शास्त्रे न लिखिते तथापि तत्र यदि तज्जातीयै राज्ञा वा केनचित् संविद्विशेषेणार्थात् समूहैः कैश्चिद्भिः कृतसंकेतेन

समूहकार्यचिन्तनाद्यर्थः प्रधानत्वेन व्यवस्थाप्य वृत्तिरुपकल्पिता, अथवैवं तज्जातीयानां पारम्परिकाचारोपि वा भवेत् ,अथवा तज्जातीयानां तच्छ्रेणीनां वा धर्म्मो भवेत् , तदैतादृशद्रव्यस्य दानादानयोस्तज्जातितच्छ्रेणितत्समूहस्य वा व्यवहारसिद्धत्वात् तद्दानादानयोर्निष्प्रत्यूहमेव शास्त्रसिद्धत्वम् , यतो यच्छ्रेणीनां यज्जातीयानां वा यथापूर्व्वापरव्यवहारस्तदनुसारेण यस्मिन् विषये विशेषतः शास्त्राज्ञा नास्ति तस्मिन् विषये तच्छ्रेणीनां तज्जातीयानां वा यथा पूर्व्वापरव्यवहारस्तदनुसारेणैव निर्णयस्य शास्त्रसम्मतत्वात्— इति वङ्गदेशचलितमनुदायभागव्यवहारतत्त्वव्यवहारमातृकाविवादचिन्तामणिविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ।

परन्त्वेतद्विवादमूलन्तु नृसिंहपरामाणिके रामकृष्णनयनयोः सहोदरत्वम् , तथा च प्रभुसमर्पितैतद्विवादनिविष्टपत्रजातान्तर्गतार्थिप्रत्यर्थिसम्मतसाक्षिभाषापत्रान्नृसिंहोऽपि कश्चिदासीत् , अनयोरर्थाद्रामकृष्णनयनयोर्भ्रातेति नावगम्यत इति तु विभावनीयम्—

अत्र प्रमाणम्—

तथा च यस्य कस्यचिद् गणस्य या संवित् सैव प्रतिपाल्या । तेन नापितादीनां प्रामाणिकत्वेन ख्यातस्य वचनातिक्रमे दोषो व्यवहारसिद्धः सङ्गच्छते—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥ १ ॥

यो धर्म्मः कर्म्म चैवैषामुपस्थानविधिश्च[1] *यः ।*
यच्चैषां वृत्त्युपादानमनुमन्येत तत्तथा ॥ (नास्मृ० १३।३)

धर्म्मः पारम्परिकाचारः कर्म्म जीवनानुकूलोचितव्यापारः वृत्त्युपादानमुपादीयमाना वृत्तिः—इति (विवाद)रत्नाकरः (पृ० १७६) ।

अनुमन्येत राज्ञा इति शेषः । तथा चैषां पारम्परिकाचारादीन् कोऽप्यन्यथाकर्त्तुं न शक्नुयात् इत्यभिहितम्—इति च तद्ग्रन्थलिखनम् ॥२॥

जातिजानपदान् धर्म्मान् श्रेणीधर्म्मांश्च धर्म्मवित् ।
समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपादयेत् ॥—इति मनु(पृ० २८१)वचनम् ॥ ३ ॥

---

१ कर्म यच्चैषाम्०—नार० ।

व्यवहारोऽपि बलवान् धर्म्मस्तेनावहीयते—इति व्यवहारमातृका-(पृ० २८२)-व्यवहारतत्त्वादि(पृ० ४)ग्रन्थधृतनारद(नामसं० पृ० ८)-वचनम् ॥ ४ ॥

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।
युक्तिहीनविचारेण धर्म्महानिः प्रजायते ॥—इति व्यवहारमातृका-(पृ० २८२)वीरमित्रोदयादि(वीमि० ख—१८)ग्रन्थधृतबृहस्पति(पृ०१६)-वचनम् ॥ ५ ॥

युक्तिर्लोकव्यवहारः—इति व्यवहारमातृका (पृ० २८२)—व्यवहार तत्त्व(पृ० ४)ग्रन्थलिखनञ्चेति ॥ ६ ॥

श्रीर्ज्जयतितराम्
श्रीहीरानन्दमिश्रे

४२—लं खास आपिल। सन १८२६ शाल इं० सदर देओ-यानि आदालतेर पण्डितेर प्रति सओाल।

९८—यद्यपि कोन व्यक्ति दुइ पुत्र राखिया लोकान्तर हय, आर ऐ दुइ पुत्रेर मध्ये एक जन महाव्याधिग्रस्त ओ अपुत्रक, ओ द्वितीय जन सुस्थशरीर थाके, तबे पितार धने ऐ दुइ पुत्र अधिकारी हय कि ना। आर ऐ महाव्याधिग्रस्त व्यक्ति आपन अंशेर दान विक्रयेर क्षमता राखे कि ना। शास्त्रानुसारे इहार व्यवस्था लिखिबा। सन १८३० शाल, तारिख १० जुन।

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयजुलाइमासीयपञ्चदशदिनसम्बन्धिगुरुवासरे घटिकैकाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि कश्चिद्व्यक्तिविशेषः पुत्रद्वयं (सं)रक्ष्य स्वर्गलोकमगमत्। एकश्च[१] तयोर्द्वयोः पुत्रयोर्म्मध्ये एको महाव्याधिग्रस्तः, अथ च निःसन्तानो द्वितीयश्च स्वस्थशरीरो भवेत् तथापि पितृत्यक्तधने निरुपाधिकपुत्र एक एवाधिकारी, नहि महाव्याधिग्रस्तशरीरोऽपि, यतः शास्त्रेऽन्धत्वपङ्गुत्वक्लीबत्वा-

---

१० अन्यच्च—व्यप०।

दिनानोपाध्यायव्यतनोः भक्ताच्छादनातिरेकेण धनांशाभावप्रतिपादनात् । सिद्धे चांशाभावे सुतरां तद्दानविक्रययोः क्षमताभावः—इति वङ्गदेशचलित-मनुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः ।

अन्धोऽचिकित्स्यरोगाद्या भर्त्तव्याः स्युर्निरंशकाः ॥—इति दायभागादि-(पृ० १०२)ग्रन्थधृतयाज्ञवल्क्य(२।१४०)वचनम् ॥ १ ॥

अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ।

उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥—इति मनु(९।२०१) वचनम् ॥ २ ॥

मृते पितरि न क्लीबकुष्ठ्युन्मत्तजडान्धकाः ।

पतितः पतितापत्यं लिङ्गी दायांशभागिनः ॥

तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते ॥—इति दायभाग (पृ० १०२) विवादभङ्गार्णव(२ विवा० पृ० २११ ख)दायतत्त्वादिग्रन्थ(दात० पृ० १७२)धृतदेवलवचनम् ॥ ३ ॥

अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयुः ।

अन्धजडक्लीबव्यसनिव्याधितादींश्चाकर्म्मिणः । पतिततज्जातवर्ज्जम्-इति दायभागादि(दाभा० पृ० १०२)ग्रन्थधृतबौधायवचनञ्चेति ॥४॥

आगस्तमासीयैकविंशतिदिनसम्बन्धिशनिवासरे घटिकत्रयाधिकयामद्वये दत्तेयं मया व्यवस्था—

श्रीर्ज्जयतितराम्

श्रीहीरानन्दमिश्रेण

सदर देओयानि आदालतेर पण्डितेर प्रति सओयाल—

९९—कालीप्रसादरायघोषाल-आपिलाण्ट-कोर्ट कालिकाता दुर्गाप्रसाद-रस्पाडण्ट-मार्ष्टसाहेब—

७--लम्बर । आपिल सन १८२७ साल--

यद्यपि एक व्यक्ति एक स्त्री ओ एक पुत्र ओ एक कन्या राखिया मृत्यु हय, आर ऐ पुत्र आपन माता ओ भगिनीर संमुखे अविवाहित लोकान्तर हय; ताहार पर ऐ कन्यार एक पुत्र जन्मिया आपन मातामही ओ मातार जीवद्दशाय ओ महाव्याधि ओ यक्ष्मा काश ग्रस्त हइया, एक स्त्री ओ दुइ कन्या राखिया, आपन मातार संमुखे मृत्यु हय। अतएव ऐ व्यक्ति ये ताहार लोकान्तर हइले, ताहार पुत्र आपन मातार संमुखे लोकान्त(र) हय, ताहार पितार उत्तराधिकारिरा थाकिते उहार स्थावरास्थावर धन काहाके अर्शे, एवं दौहित्रेर स्त्री ताहा पत्तनि पुरते विक्रय करिते पारे कि ना-शास्त्रानुसारे इहार प्रत्युत्तर भाषाय एइ सओयालेर पार्शे लिखिवेन इति। सन १८१० शाल तारिख १५ जुलाइ।

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयागस्तमासीयपञ्चमदिनसम्बन्धिगुरुवासरे घटिकाद्वयाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि कश्चिद्व्यक्तिविशेषः एकां पत्नीमेकं पुत्रं कन्याञ्चैकां (सं)रक्ष्यैनं लोकमत्यजत्, अथ च स बालोऽपि मातृभगिन्योरग्रेऽविवाहित एव स्वर्लोकमगमत्, तदनन्तरञ्च तस्याः कन्यायाः पुत्रो भूत्वा स्वमातामहीमात्रोर्जीव[1]द्दशावधिमहाव्याधियक्ष्माकासग्रस्तः[2] सन्नेव स्वमातृसमक्षमेकां पत्नीं द्वे च कन्ये (सं)रक्ष्य मृतः स्यात्, तथाप्यविवाहितस्य मृतस्य तस्य मातृसंक्रान्ते स्थावरास्थावरधने, तस्यां मातरि मृतायां स्वमातामहीवर्त्तमानावधि वा कुष्ठयक्ष्माकासग्रस्तस्य पितृदौहित्रस्याधिकारो नास्ति, शास्त्रेऽचिकित्स्यरोगिणोऽनधिकारबोधनात्, यक्ष्माकासादिरोगेऽचिकित्स्यत्वस्यायुर्व्वेदसिद्धत्वात्, चिकित्सयाप्यनुपशमेन मरणपर्यन्तस्थायित्वाच्च, शास्त्रे कुष्ठिनोऽप्यनधिकारबोधनात्, कुष्ठयक्ष्माकासरोगग्रस्तस्य तु सुतरामनधिकारः। यदन्यतरसत्त्वे अनधिकारस्तत्समुदायसत्त्वेऽनधिकारस्य लोकव्यवहारप्रसिद्ध-

१—व्यप०। २. यक्ष्माकाशग्रस्थः—व्यप०।

त्वात्। एवञ्च सति तत्सत्त्वस्याप्यसत्त्वसमत्वाद्दौहित्रान्तपितृसन्तानाभावे पितामहसन्ताना(ना)मेवाधिकारो, न तु भगिन्यादीनाम् इति। मातुलधनेऽधिकारिण्यास्तु पत्न्याः कीदृशेऽपि पतिमातुलधनस्य विक्रये क्षमता नास्ति, पतिसत्त्वेऽसत्त्वेऽपि वा; स्वसंक्रान्तपतिस्थावरस्यापि स्त्रीकर्तृकविक्रयनिषेधोऽस्ति यतोऽतः सुतरां पत्युर्यद्धनेऽनधिकारः, तस्यास्तद्धने पतिद्वारमन्तरेणाधिकारित्वप्रतिपादकशास्त्राभावेनानधिकारित्वनिश्चयात्, अनधिकारिणो विक्रयासामर्थ्यस्य लोकप्रसिद्धत्वात्—इति वङ्गदेशचलितदायभागविवादभङ्गार्णवदायतत्त्वव्यवहारमातृकादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः।

अन्धोऽचिकित्स्यरोगार्त्तो भर्तव्याः स्युर्निरंशकाः॥—इति दायभागादि(दाभ पृ० १०२)ग्रन्थधृतयाज्ञवल्क्य(पृ० २२६)वचनम्॥१॥

अचिकित्स्यरोगः अप्रतिसमाधेययक्ष्मादिरोगग्रस्तः।—इति मिताक्षरा(पृ० २२७)ग्रन्थलिखनम्॥ २॥

महाशनं महाक्षीणमतीव(च) निपीडितम्।

शूलशुष्कोदरंश्चैव यक्ष्मिणं परिवर्जयेत्॥—इति आयुर्वेदीयवचनम्॥३॥

मृते पितरि न क्लीबकुष्ठ्युन्मतजडान्धकाः।

पतितः पतितापत्यं लिङ्गी दायांशभागिनः॥—इति दायभागादि-(पृ० १०२)ग्रन्थधृतदेवलवचनम्॥ ४॥

किन्तु पितुरपि प्रपौत्रपर्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यः धनिदौहित्रस्येव एवं पितामहप्रपितामहसन्ततेरपि दौहित्रान्तायाः पिण्डप्रत्यासत्तिक्रमेणाधिकारो बोद्धव्यः—इति दायभाग(पृ० २०८)ग्रन्थलिखनम्॥ ५॥

पत्नी च भर्तृधनं भुञ्जीतैव, परं न नु तस्य दानाधानविक्रयान् कर्त्तुमर्हति—इति दायभाग(पृ० १७१)ग्रन्थलिखनम्॥ ६॥

अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥—इति च तद्ग्रन्थ-(दाभा०पृ० १७१)धृतकात्यायन(कास्मृ पृ० ११२)वचनम्॥ ७॥

व्यवहारोऽपि बलवान् धर्मस्तेनावहीयते ।
युक्तिहीनविचारेण धर्महानिः प्रजायते ॥--इति व्यवहारमातृकाधृत (पृ० २८२)वचनञ्चेति ॥ ८॥

द्विजम्बरमासीयाष्टमदिनसम्बन्धिबुधवासरे घटिकात्रयाधिकयामद्वये दत्तेयं मया व्यवस्था—

श्रीर्ज्जयतितराम्
श्रीहीरानन्दमिश्रेण

१००—रोवकारि कोर्ट आपिल एलाके कलिकाता तारिख ५ माह मार्च्च सन १८३० इं मतावक २३ माह फाल्गुण सन १२३६ वाङ्गला रोज शुक्रवार ऐ आदालतेर हाकिम श्रीयुत गेलव वटकाओएटरि माष्टर साहेवेर वैठके ।

मतालके जिलेय शहर
मुषम्मात चित्रादासी शाएला

इंराजी १८२९ सालेर शेतम्बर मासे दाखिल हओया साएलार सओयाल । ऐ तारिखेर लिखित ए अदालतेर हुकुमानुसारे यजसाहेवेर पाठान कागजात ओ गङ्गागोविन्द तरपसानिर सओयाल ओ अनुमति ओ चन्द्रमुखिदास्यार मजाहेमदाराणेर सओयालात ओ इं १८१२ शालेर नवम्बर मासेर १० ओ २४ तारिखेर लिखित ७५८ लम्वरेर मकद्दमा वावत सदर देओयानि अदालतेर दुइ किता रोवकारि, ये ताहाते रामकुमारन्यायवाचस्पति आपिलाएट, कृष्णकिङ्करतर्कभूषण रष्पाडएट छिल, ऐ आदालतेर पण्डितगणेर दुइ किता व्यवस्था ओ इं १८२५ शालेर माइ मासेर २ ओ ३० तारिखेर लिखित सदर अदालतेर २ किता रोवकारिर नकल ये ताहाते साएलार श्वशुर रामजयसाहा साएल छिल ओ साएलार उकिलगण रसिकलालदत्त ओ

शिवनारायणचट्टोपाध्यायेर अद्य दाखिल[1] पण्डितगणेर व्यवस्था सम्वलित अद्य ताहारदिगेर ओ गङ्गागोविन्दसेनेर उकिल रूपचन्द्रसेन ओ मजाहेमदाराणेर उकिल राजनारायणदत्तेर समीत्ते दृष्ट आसिल। जानागेल ये गङ्गागोविन्दसेन म० ९६०० टाकार दाविते ये शाएलार पति रामलोचनसाहार इजारा लभ्य बावत ताहार तालुक निलम हइया उसुल हइयाछिल। ऐ रामलोचनेर नामे नालिष करिया डिगरि हासिल करिया डिगरि जारिते डिगरिर देइनदारेर जायदाद करारे नीलेर कुटी ओ वास्तु वाटी प्रभृति वस्तुसकल निलाम कराइयाछे। ओ देइनदारेर पिता रामजयसाहार दरखास्त मते ऐ जायदादके आपन जायदाद जाहिर कराइया छिल। सदर देओयानि आदालत हइते ऐ निलाम वद्ध हइया ऐ सेन(?)प्रति नालिसेर अनुमति हय। तत परे ऐ सेनेर नालिष मते रामलोचनसाहा ओ ताहार पिता(र) नामे १ लम्बरे नीचेर कुटिर डिगरि ओ २ लम्बरे वास्तु वाटीर डिगरि जिलार आदालते हासिल हइल। ए आदालते ऐ जायदादसकल रामजयसाहार थाकन हेतुक जिलार दुइ डिगरि वद्ध हइल, ओ एइ क्षणे ऐ रामजयसाहार मृत्युर पर ऐ डिगरिदार रामजयसाहार त्यक्त समुदय वस्तु देइनदारेर स्वत्व करार दिया ताहा विक्रय द्वाराय डिगरि(र) टाका आदाय हओयार जन्ये जिलार आदालते[2] दरखास्त दाखिल करिलेक, ओ ताहार रोवकारिर हुकुम सादर हओनेर परे साएला एइ एजहारे एक किता दरखास्त दाखिल करिलेक ये रामजय मजकुर अनेक दिव(स) हइते आपन पुत्र रामलोचनके आज्ञावाहक ना थाकन प्रयुक्त पुत्रत्व हइते दूर करियाछे। रामलोचन मजकुर पितार वस्तु हइते नैरास हओनेर पर मेहनत ओ मशमत ओ इजारा प्रभृति द्वाराय दिन जापन करित, ओ वाङ्गला १२३५ शालेर १६ वैशा-

१ अद्य दाखिल अद्य प०—व्यप० । २ आदालतेर—व्यप० ।

खे रामजय मजकुर आपन वृद्धावस्थार दृष्टे साएलार नावालक पुत्रेर, ये उहार पौत्र वटे, ओ प्रतिपालन ओ तरवियतेर करा आपन स्वकृत समुदय स्थावर ओ अस्थावर वस्तु साएलाके हेवा करियाछे। जिलार यजसाहेव ऐ हेवा सिद्धि कि असिद्धि-ताहा सदर देओयानि आदालतेर पण्डितगण हइते ज्ञात हओनार्थे ऐ आदालते आपन रोवकारि पाठाएन। सदर आदालतेर पण्डितगणेर व्यवस्था पौछिल। परे ऐ हेवानामाके असिद्ध ज्ञान करिया ऐ जायदाद विक्रयेर हुकुम एइ हेतुते सादर करिलेन-ये रामलोचनसाहा व्यतित मृत रामजयसाहार अन्य सन्तान नाइ। अतएव ताहार स्वत्वार प्रमाण तलव करार आविश्वक हइल ना। ओ रामकुमारन्यायवाचस्पतिर मकर्द्दमा वावत सदर आदालतेर इनफशालि रोवकारिर नकलेर द्वाराय जानागेल ये ऐ मकर्द्दमाते ऐ आदालतेर हाकिमगणेर मध्ये हुजुर हइते पण्डितगणेर निकट ए विषयेर सओयाल हइल—ये यद्यपि कोन ब्राह्मण ज्येष्ठ पुत्र विद्यमान राखिया थाकने आपन पैतृक ओ स्वकृत स्थावर ओ अस्थावर समुदय विषय कनिष्ठ पुत्रके दान करे, से दान वङ्गदेशचलित शास्त्रानुसारे सिद्ध वटे कि ना।

ऐ आदालतेर पण्डितगण ताहार जवावे लिखिलेन—ये यद्यपि कोन ब्राह्मणजाति ज्येष्ठपुत्र वर्त्तमान थाकनेओ पैतृक ओ स्वकृत समुदाय स्थावर वस्तु ज्येष्ठ पुत्रके हेवा करे से हेवा सिद्ध वटे। किन्तु ये हेतुक पैतृक स्थावर समुदाय वस्तु दान करण शास्त्रनिषिद्ध वटे, अतएव पैतृक समुदाय वस्तु दान करणे पाप हय—वङ्गदेशचलित शास्त्रानुसारे ए व्यवस्था वटे इति।

सदर आदालतेर पण्डित ए मकर्द्दमार यवावे लिखेन—ये यद्यपि हेवार लिखित वस्तुसकल रामजयसाहार स्वकृत हय, ओ साहा मजकुर आपन पुत्र ओ पौत्र मौजुद थाकनेओ ताहा समुदाय आपन पुत्रवधूके ताहा दान ओ विक्रय करणेर सम्वन्धे उहार क्षमता कर्त्तृत्व नियमे हेवा करिया थाके, एमत व्यवस्थार

अनैक्य हेतुक ये रोवकारिर समुदय वृत्तान्ते ओ हुजुरेर समर्पित हेवानामा[1] सठता ओ क्रोधमते हइयाछे, शास्त्रानुसारे सिद्ध हइते पारे ना। केन ना शास्त्रानुसारे हाकिमके उचित ये ये हेवा, सठता ओ क्रोध क्रमे हइछे, अकर्म्मण्य करेन। ओ रोवकारिर विस्तीर्ण मते पिता एक पुत्रके हेवाकरण, ओ आपन आप्राप्तव्य-वहार ओ अज्ञान पुत्र ओ अप्राप्तव्यवहार पौत्र थाकनेओ पुत्र ओ पौत्रेर भरण पोषणेर योग्य मिनाह ना दिया हेवार अयोग्य वस्तु हइते आपन पुत्रवधूके हेवाकरण शठता व्यतित हय ना। अतएव एइ दृष्टे ये आदालतेर फयशला ओ सदर देओयानि आदालतेर रोवकारिर नकलेर अनुसारे ए मकर्द्दमाते साव्यस्थ नाइपे। रामजयसाहा हेवा करणेर पूर्व्व आपन पुत्र रामलोचनके त्याग करियाछे, ओ ऐ हेवानामा लिखन कालिन रामजयसाहा ऐ रामलोचनेर सम्वन्धे शठता ओ क्रोध क्रमे साएलाके हेवा करियाछे, वरं ऐ हेवानामाते शाएलार अप्राप्तव्यवहार पुत्रेर, ये रामजयेर पौत्र वटे, प्रतिपालनेर उल्लेख लिखा नाइ। ताहाते साएलार सम्वन्धे हेवानामार लिखित समुदय वस्तु विक्रय ओ दानकरार क्षमता नाइ। ओ काहारो पिता विना क्रोधे ओ अप-राधे पुत्र त्याग करे ना। ओ रामकुमारन्यायवाचस्पतिर मकर्द्दमार व्यवस्थार नकलेर द्वाराय जाहेर ये वड पुत्र थाकनेओ कनिष्ठ पुत्रके हेवा करा सिद्ध ओ ताहाते ज्येष्ठ पुत्रेर भरण-पोषणेर परिमाणेर किछु मिना लिखा नाइ। किन्तु से मकर्द्दमाते ब्राह्मण जाति शब्द लिखा गियाछे। ओ साएला अन्य पण्डितानेर व्यवस्था एइ कारण दरपेष करिलेक ये रामकुमारन्यायवाचस्पतिर मक-र्द्दमार व्यवस्था शास्त्रानुसारे ब्राह्मण ओ हिन्दु अन्य जाति स्वत्वे एक वटे; ये हेतुक रामकुमारन्यायवाचस्पति आपिलाण्ट ओ कृष्ण-किङ्करतर्कभूषण रष्पाडण्टेर मकर्द्दमा वावत सदर देओयानि आदालतेर पण्डितेर व्यवस्था ओ ए मकर्द्दमा वावत व्यवस्था,

१. हेवानामार—व्यप०।

যাহা আদালতের সওয়াল মতে ঐ পণ্ডিতগণ দিয়াছেন, অনৈক্য। অতএব উভয় ব্যবস্থার অনৈক্যতা পরিষ্কারার্থে, ও আরো এই যে রামকুমারন্যায়বাচস্পতির মকদ্দমার ব্রাহ্মণের স্বত্বে যে হুকুম আছে, তাহা সমস্ত হিন্দু জাতির মকদ্দমাতে সম্পর্ক রাখে না। হুকুম হইল যে এই রোবকারির নকল ও দুই ব্যবস্থার নকল সহিত ইঙ্গরেজী চিটীর সম্বলিত সদর আদালতের রেজষ্টর সাহেবের নিকট এই প্রার্থনায় পাঠান যায়—সহেব মৌপুফা তাহাকে পণ্ডিতগণের নিকট সমর্পণ করিয়া তাহার দৃষ্টে দুই ব্যবস্থার অনৈক্যতার পরিষ্কারের বিষয় এবং বাচস্পতির মকদ্দমার ব্যবস্থার আজ্ঞা সমস্ত হিন্দু জাতির মকদ্দমার সম্পর্ক রাখেন, না রাখেন বিষয়ে ব্যবস্থা দাখিল করেন—তাহা অনুগ্রহ পূর্ব্বক এ আদালতে পাঠাএন ইতি।

শ্রীশ্রীর্জয়তিতরাম্

প্রভুসমর্পিতপ্রশ্নপত্রপ্রতিরূপপত্রং সদরদেওয়ানীপদবাচ্যধর্ম্মাধিকরণাধিকৃতপূর্ব্বাপরপণ্ডিতব্যবস্থাদ্বয়ঞ্চ যদেতদব্দীয়জুলাইমাসীয়চতুর্বিংশতিদিবসীয়শনৌ ঘটিকৈকাধিকযামদ্বয়ে ময়া প্রাপ্তং তদবলোক্য যাদৃশবোধো জাতস্তদনুসারেণোত্তরং লিখ্যতে।

যদ্যপি রামকুমারন্যায়বাচস্পতীয়বিবাদসম্বন্ধিব্যবস্থায়াঃ শ্রীমতীচিত্রাদাসীয়বিবাদসম্বন্ধিব্যবস্থাতো ব্রাহ্মণব্রাহ্মণেতরভেদকর্ত্তৃকভেদো নাস্তি শাস্ত্রে এতদ্বিষয়ে জাতিবিষয়ে জাতিবিশেষাশ্রবণাৎ, তথাপি রামকুমারন্যায়বাচস্পতীয়বিবাদসম্বন্ধিব্যবস্থায়াঃ শাস্ত্রবহির্ভূতত্বাৎ শ্রীমতীচিত্রাদাসীয়বিবাদসম্বন্ধিব্যবস্থায়াশ্চ শাস্ত্রসম্মতত্বাৎ, শাস্ত্রাশাস্ত্রকৃতয়োস্তু ব্যবস্থয়োর্ভেদোঽস্ত্যেব। পৈতামহে স্থাবরাস্থাবরধনে পিতুঃ পুত্রস্য চ তুল্যস্বামিত্বেন বহুস্বামিকৈকপদার্থস্য পরস্পরানুমতিব্যতিরেকেণৈককর্ত্তৃকদানবিক্রয়াদৌ স্বাংশদানাদিসিদ্ধিব্যতিরেকেণ পরাংশদানাদ্যসিদ্ধেঃ, শাস্ত্রলোকব্যবহারোভয়সিদ্ধত্বাৎ, পৈতামহে স্থাবরধনে পিতুর্ব্বিশেষতঃ স্বচ্ছন্দবৃত্তিতায়া অপি নিষেধাচ্চ, শাস্ত্রে পুত্রাদ্যনুমতিব্যতিরেকেণ স্বোপার্জ্জিতসর্ব্ব-

स्थावरास्थावरधनदानस्यापि निषेधोऽस्ति, पोष्यवर्गस्यावश्यम्भरणीयत्वात्, तथान्वयस्वत्वप्रयुक्तसर्व्वस्वदानस्य[1] वृत्तिलोपस्य च निषेधात्। एवञ्च सति रामकुमारन्यायवाचस्पतीयविवादनिर्णयव्यवस्थाधृतप्रायश्चित्तबोधकवचनस्य प्रसक्तिस्तु[2] तत्रैव, यत्र केनचिद् दुर्वृत्तपुरुषेण[3] तादृशविधिमुल्लङ्घ्य[4] स्वोपार्जितसर्व्वधनस्य दानं कृतं स्यात्, विहितपोष्यवर्गभरणस्याननुष्ठाना-न्निन्दितस्य चान्वयस्वत्वप्रयुक्तसर्व्वस्वदानस्य वृत्तिलोपस्य च करणात्। न तु पैतामहस्थावरधनदाने तत्र पितुरेकस्य प्रभुत्वाभावात् शास्त्रानुसारात् किञ्चिदपि पुत्रवधूकर्त्तृकोपकाराश्रवणादुत्तराधिकारिकोटावनन्तर्भूतत्वात्, विना निमित्तं स्वभिन्नस्य कस्यापि कृतर्णानपाकरित्वाच्च तस्याः। तथा च कृते सत्यपि स्वाज्ञोल्लङ्घनकारित्वेन पुत्रत्यागे अप्राप्तव्यवहारत्वेनाविदितगुणदोषेष्वथ च मुख्योत्तराधिकारिषु, स्वस्यार्थाद्रामजीसाहस्य तथार्णग्रस्तस्य[5] स्वपुत्रस्यार्थाद्रामलोचनसाहस्य कृतर्णापाकर्त्तृषु सत्स्वेवाप्राप्तव्यवहारेषु पौत्रेषु, तेषामदत्त्वा स्वकुटुम्बादन्यमदत्त्वा च पुत्रवधूसम्प्रदानकदानपत्रस्य छलादिव्यतिरेकेणासम्भवात्। अथ च यद्यप्राप्तव्यवहाराणां तेषां भरणार्थमेव तद्दानपत्रं दत्तं स्यात्, अथ च तस्य छलादिकं नाभिमतं स्यात्, तदा पुत्रवधूमर्थात्तन्मातरं मध्यस्थां कृत्वैव पौत्रसम्प्रदानकं कुतो न दत्तम्-एतादृशरीत्याप्यदानात् छलादेः स्पष्टतया प्रतीतेः छलादिकृतव्यवहारे परावर्तनीयत्वस्य शास्त्रसिद्धत्वात्-इति वङ्गदेशचलितमनुदायभागदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था॥—

अत्र प्रमाणम्—

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।
तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥

इति दायभाग(पृ० २६)ग्रन्थधृतयाज्ञवल्क्य(२।१२१)वचनम्॥१॥

स्वभागान्[6] यदि दद्युस्ते विक्रीणीयुरथापि वा।
कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै॥

—इति तद्(दाभा० पृ० ३१)ग्रन्थधृतनारद(नामसं १४।४२)वचनम्।२।

---

१ °थान्वयस्वत्वप्रयुक्तसर्व्वस्व०—व्यप०। २ प्रसक्तिरतु—व्यप०। ३ पुरुषेता०—व्यप०।
४ °पुरुषैनादृश—व्यप०। ५. ग्रस्थस्य—व्यप०। ६. °स्वानशान्—नामसं०।

पिता चेत् पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे[1]। पैतामहे तु पितापुत्रयोस्तुल्यं स्वामित्वम् ॥ —इति तद्ग्रन्थ(दाभा० पृ० ३१) धृतविष्णुवचनम् ॥ ३ ॥

यदि पिता पुत्रान् विभजति तदा स्वोपार्जितेऽर्थे न्यूनाधिकविभागं स्वेच्छया पुत्रेभ्यो दद्यात् । पैतामहे तु नैतत्, यस्मात् तत्र तुल्यं स्वामित्वम्, न पुनः पितुः स्वच्छन्दवृत्तिता —इति तद्(दाभ० पृ० ३१)ग्रन्थलिखनम् ॥ ४ ॥

पूर्व्वोक्तगुणवत्त्वादिनिमित्तेनापि पितामहधनस्य भूमिनिबन्धद्विपद(न्यतम)स्वरूपस्य न्यूनाधिकदाने पितुर्न प्रभुत्वम् —इति दायक्रमसंग्रह(पृ० ४०)ग्रन्थलिखनम् ॥ ५ ॥

स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम् ।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः ॥—इति दायभागादि(दाभा० पृ० ३५)ग्रन्थधृतवचनम् ॥ ६ ॥

भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीडने चास्य तस्माद् यत्नेन तं भरेत् ॥ —इति मनु(?)वचनम् ॥ ७ ॥

निःक्षेपः[2]पुत्रदाराधिः सर्व्वस्वञ्चान्वये सति ।
आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना ॥
अदेयान्याहुराचार्य्याः—इत्यादि विवादभङ्गार्णवादि(विभ० पृ० ४२१ ख)-ग्रन्थधृतनारद(नामस० ५।५)वचनम् ॥ ८ ॥

ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः ॥
—इति व्यास[3](धको० पृ० १५८७)वचनम् ॥ ९ ॥

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति[4] ॥ इति प्रायश्चित्तविवेक(पृ० १०)धृतयाज्ञवल्क्य(३।२१९)वचनम् ॥१०॥

---

१. °मुपार्जित—थारमृ० ।   २. निक्षेपं पुत्रदारं च —नामस० ।
३. मनु०—व्यप० ।   ४. °मिच्छति—व्यप० ।

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥
एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः ॥ —इति दायभागादि(पृ० २५१ ग्रन्थधृतयाज्ञवल्क्य(२।१३५)वचनम् ॥११॥

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम् ।
स्वयं कृतं वा यहणं नान्यत् स्त्री दातुमर्हति ॥

—इति विवादभङ्गार्णवादि(१ विवा०पृ०२०६ क)ग्रन्थधृततद्(याज्ञ० २।४६)वचनम् ॥ १२ ॥

तत्र प्रथमं पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रः ।—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीका(पृ० २१८)ग्रन्थलिखनम् ॥१३॥

पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा ।
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम् ॥

इति विवादभङ्गार्णव (पृ०१७८ ख) धृतयाज्ञवल्क्य(२।५०)वचनम् ॥१४॥

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्तयेत् ॥-इति मनु (८।१६५)-वचनञ्चेति ॥ १५ ॥ ० ॥ ० ॥

द्विजम्बरमासीयैकत्रिंशद्दिनसम्बन्धिभृगुवासरे घटिक(ा)त्रयाधिकयामद्वये दत्तेयं मया व्यवस्था ॥ ० ॥

श्रीदुर्ज्जयतितराम्

श्रीहीरानन्दमिश्रेण

१०१—प्रभुसमर्पितैतद्धर्म्माधिकरणप्राचीनाधिपतिकृतस्य रामकुमारन्यायवाचस्पतीयविवादसम्बन्धिप्रश्नस्यैतद्धर्म्माधिकरणप्राचीनपण्डितद्वयलिखितव्यवस्थापत्रं कलिकाताख्यमहानगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणाधिपतिकृतस्य चित्रादासीयविवादसम्बन्धिप्रश्नस्यैतद्धर्म्माधिकरणपण्ड-

तस्थानाभिषिक्तहीरानन्दमिश्राख्यपण्डितलिखितव्यवस्थापत्रमन्यदप्यङ्गरेजी-लिपिसमभिव्याहृतविचारपत्रद्वयं तत्प्रेषितमेवं यशहरजिलाख्यावान्तरधर्म्माधिकरणाधिपतिकृतस्य चित्रादासीयविवादसम्बन्धिप्रश्नस्यास्मल्लिखितव्यवस्थापत्रं चावलोक्य यादृशबोधो जातस्तदनुसारेण निवेदनं क्रियते ।

रामकुमारन्यायवाचस्पतीयविवादसम्बन्धिव्यवस्थैतद्धर्म्माधिकरणे अङ्गरेजीशब्दप्रतिपाद्यद्वादशाधिकाष्टादशशताब्दे एतद्धर्म्माधिकरणप्राचीनपण्डिताभ्यां वङ्गदेशचलितशास्त्रव्यवहारोभयावलोकनेनैवोपस्थापिता । एतद्धर्म्माधिकरणप्राचीनाधिपतिभिस्तदनुसारेणाज्ञायां दत्तायां सत्यां वङ्गदेशे तादृशव्यवहारः शास्त्रतोऽपि दृढीभूतः । अतएव मुद्रायन्त्रालये मुद्रितः । एवञ्च सति वङ्गदेशचलितशास्त्रेऽपि प्रायशो मुनिवचनानां ग्रन्थानां वा परस्परमनैक्यमस्त्येव । तथापि यन्मतं यस्मिन् देशे पूर्व्वापरप्रचलितं भवति तस्मिन् देशे तदेव रक्षणीयम्, अन्यथा प्रजाप्रक्षोभः स्यात् । अथ च वङ्गदेशीयैः सर्व्वैरेव प्राचीनार्व्वाचीनैः ग्रन्थकारैः स्वस्वग्रन्थेषु जीवति पितरि पुत्राणां पैतृकधने पैतामहधने च किञ्चिदपि स्वत्वं नास्तीति लिखितम् । केषुचिद् ग्रन्थेषु विवादभङ्गार्णवप्रभृतिष्वर्व्वाचीनेषु पुत्रे विद्यमाने तदनुमतिं[1] विना पितुः स्वार्जितस्थावरस्य[2] पैतृकस्थावरस्य वा समुदायस्य दानविक्रयनिषेधकान्येतद्धर्म्माधिकरणपण्डितस्थानाभिषिक्तहीरानन्दमिश्राख्यपण्डितलिखितव्यवस्थालिखितवचनानि लिखित्वा इदमपि लिखितं पुत्रानुमतिं विना पितुः स्वार्जितस्थावरस्य पैतृकस्थावरस्य वा समुदायस्य दानविक्रयकरणं नोचितं भवतीत्येव । तादृशवचनानां तात्पर्य्यार्थः—यदि च पिता तदेव शास्त्रोक्ताज्ञाजातमुल्लङ्घ्य[4] स्वोपार्जितस्थावरसमुदायस्य पैतृकसमुदायस्य वा पुत्रानुमतिं विना दानं विक्रयं वा करोति, तदा तद्दानं विक्रयो वा सिद्ध्यत्येव, किन्तु पितुः शास्त्रोल्लङ्घनजन्यः प्रत्यवायो भवति । तत्रापि यदि छलादिना क्रोधादिना वा तादृशदानं विक्रयं वा करोति तदा न सिद्ध्यतीत्यपि लिखितम् । एवञ्च सति रामकुमारन्यायवाचस्पतीयविवादसम्बन्धिव्यवस्थायाः श्रीमतीचित्रादासीयविवादसम्बन्ध्यस्मल्लिखितव्यवस्थातो वास्तवमनैक्यं नास्त्येव । प्रकृते तु

१. सम्मति—व्यप० । २. अनुमतिम्विना—व्यप० ।
३. °र्वार्जित—व्यप० ४. शास्त्रीयं—व्यप० ।

यशहरजिलाख्यावान्तरधर्म्माधिकरणाधिपतिकृतांगरेजीशब्दप्रतिपाद्योनत्रिंशदधिकाष्टादशशताब्दीयमैमासीयषष्ठदिवसलिखितविचारपत्रान्तर्गतवृत्तान्ते सति, तत्समर्पितदानपत्रलिखितवृत्तान्ते च सति, एकमात्रपुत्रस्य पितुर्व्यवहारयोग्ये तस्मिन्नेकस्मिन् पुत्रे विद्यमाने अप्राप्तव्यवहारेषु कतिपयेषु पौत्रेषु च विद्यमानेषु तेषामन्नाच्छादनोपयुक्तमपि धनमसंरक्ष्य पुत्रवधूं दानविक्रयस्वत्वाधिकारिणीं कृत्वा व्यावहारिकैताद्दशसर्वस्वदानस्य छलादिकं विना असम्भव(त्वे)न ताद्दशदानस्य छलादिकृतत्वं क्रोधादिकृत(त्व)ञ्च (अतस्तस्माद्) दानासिद्धिप्रमाणीभूता व्यवस्था मया दत्ता। अत्र यद्यपि कलिकाताख्यमहानगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणीयविचारपत्रद्वये तद्दानपत्रे रामजीसाहसंज्ञकस्याप्राप्तव्यवहाराणां पौत्राणामर्थादर्थिन्याश्चित्रादास्याः पुत्राणां भरणपोषणं लिखितं नास्ति; अतएवार्थिन्याश्चित्रादास्या दानपत्रलिखितवस्तुनः समुदायस्य दानविक्रयादिकरणक्षमता नास्तीति लिखितमस्ति। परन्तु तद्दानपत्रे दात्रा रामजीसाहसंज्ञकेन लिखितम्—एतस्य दानविक्रययोः स्वत्वाधिकारोऽस्त्येव; एतद्विषये मया किंवा ममान्यैः कैश्चिदुत्तराधिकारिभिः प्रातीच्छा क्रियते चेत्तर्हि सा प्रातीच्छा न ग्राह्या नैव शुद्धा भवतीति। अतएव तद्दानपत्रे एताद्दशलिखनेनाप्यर्थिन्याश्चित्रादास्यास्तद्दानग्रहीत्र्या यदि तद्धने दानविक्रयादिकरणक्षमता न भवति। तर्हि तद्दानपत्रं तस्याः स्वत्वोत्पत्तेः प्रमाणं कथं भवति। तद्दानपत्रमप्रमाणञ्चेत् कथं तत् प्रमाणेन तद्दानसिद्धिरिति। एवञ्च सति यदि जिलाख्यावान्तरधर्म्माधिकरणाधिपतिकृततद्विचारपत्रलिखितवृत्तान्तेन तद्दानपत्रेण वा छलादेः क्रोधादेर्व्वा निश्चयो वास्तवं न भवति तदा चित्रादासीयविवादसम्बन्धिन्यस्मल्लिखितव्यवस्था सुतरां प्रचारणीया नैव भवति, किन्तु रामकुमारन्यायवाचस्पतीयविवादसम्बन्धिनी व्यवस्थैव प्रचारणीया भवति। यदि च तद्विचारपत्रेण दानपत्रेण वा छलादेः क्रोधादेर्व्वा वास्तवं निश्चयो भवति तदा चित्रादासीयविवादसम्बन्धिनी अस्मल्लिखितव्यवस्थैव प्रचारणीया भवति। एवञ्च सति एतद्धर्म्माधिकरणनियुक्तपण्डितद्वयसम्मता व्यवस्था चैतद्धर्म्माधिरणनियुक्तैकपण्डितसम्मतव्यवस्थया परावर्त्तनयोग्या न भवतीति। अतएव एतद्धर्म्माधिकरणपण्डितस्थानाभिषिक्तहीरानन्द-

मिश्राख्य पण्डितलिखितव्यवस्थालिखितेन रामकुमारन्यायवाचस्पतीय-विवादसम्बन्धिव्यवस्थायाः शास्त्रबहिर्भूतत्वादिति। अनेनापि रामकुमार-न्यायवाचस्पतीयविवादसम्बन्धिनी व्यवस्था परावर्त्तनयोग्या भवितुं न शक्नोति—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटी-कादायतत्त्वव्यवहारतत्त्वव्यवहारमातृकाविवादभङ्गार्णवविवादार्णवसेतुदायक्र-मसंग्रहादिग्रन्थानुसारेण निवेदनम्—इति

अत्र प्रमाणानि—प्रभुसमर्पितव्यवस्थात्रयलिखितानि चतुर्व्विंशति-संख्याकानि ॥ २४ ॥

स्थावरं द्विपदं चैव यद्यपि स्वयमर्ज्जितम्।
असम्भूय सुतान् सर्व्वान् न दानं नच विक्रयः॥
इत्येवमादिकम् तदप्येवमेव वर्णनीयम्।
तथापि कर्त्तव्यपदमवश्यमत्राध्याहार्य्यम्॥

तेन दानविक्रयकर्त्तव्यतानिषेधात् तत्करणाद्विध्यतिक्रमो भवति, न तु दानाद्यनिष्पत्तिः, वचनशतेनापि वस्तुनोऽन्यथाकरणाशक्तेः—इत्यादि दायभाग(पृ० ३५)ग्रन्थलिखनम् ॥ २५ ॥

देशजातिकुलानाञ्च[१] *ये धर्म्माः प्राक्प्रवर्तिताः*[२]।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा—इति विवादभङ्गार्णव-ग्रन्थधृतबृहस्पति(पृ० २१)वचनम् ॥ २६ ॥

देशस्य जातेः सङ्घस्य धर्म्मो ग्रामस्य यो भृगुः।
उदितः स्यात् स तेनैव दायभागः प्रकल्पयेत्॥—इति दायतत्त्वादि-(दात० पृ० १६५)ग्रन्थधृतकात्यायन (पृ० १०७)वचनम् ॥ २७ ॥

(लोक) धर्म्मशास्त्र(यो) स्तु विरोधे लोकव्यवहार एवादरणीयः—इत्याह स एव—

धर्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः।
व्यवहारो हि बलवान् धर्म्मस्तेनावहीयते।
हीयते अवगम्यते, हीगताविित्यस्माद्धातोः। अतएव बृहस्पतिः—
केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः।
युक्तिहीनविचारे तु धर्म्महानिः प्रजायते॥

---

१. कुलादीनाम्—बृस्मृ०। २. तत्प्रवर्त्तिताः—बृस्मृ०।

युक्तिर्न्यायः, स च लोकव्यवहारः—इतिव्यवहारमातृका (पृ० २८२) इति व्यवहारतत्त्वादि(व्यत० पृ० ४)ग्रन्थलिखनम् ॥ २८ ॥

पितर्य्युपरते पुत्रा विभजेयुर्धनं पितुः ।

अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते—इति दायभागादि-(दाभा० पृ० १३)ग्रन्थधृतदेवलवचनम् ॥ २९ ॥

यदि च परस्वस्वोत्पत्तिफलकत्यागरूपं दानमेव करोति तदा उदासीनवत् सिद्ध्यत्येव स्वार्जिते पैतामहेऽपि स्थावरादौ धने । परन्तु पुत्रानुमतिं विना पैतामहस्थावरं ददतः पितुर्दुरदृष्टमेव भवतीत्येव तत्त्वम्—इति विवादभङ्गार्णवग्रन्थ(पृ० ४८ क)लिखनम् ॥ ३० ॥

नहि यः पुत्रादिशरीरदाने प्रभुः स स्थावरदाने पुत्राद्यनुमतिं विना न प्रभुरिति वक्तुं युज्यते—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥ ३१ ॥

एवञ्च यः कश्चित् पिता शास्त्रमुल्लङ्घ्य कस्मैचित् पुत्राय अन्यस्मै वा स्वपैतृकं स्वार्जितं वा समस्तमर्द्धं वा स्थावरमन्यस्मै ददाति तत्तु दानं सिद्ध्यत्येव । इदं कामक्रोधच्छलादिविभक्तत्वे सत्येव । परन्तु शास्त्रोल्लङ्घनजन्यं दुरदृष्टं भवति । इति विवादभङ्गार्णवग्रन्थ(२ विवा० पृ० ६४ ख)लिखनम् ॥ ३२ ॥

द्वैधे बहूनां वचनम्—इत्यादि व्यवहारतत्त्वादि (व्यत० पृ० ३३) ग्रन्थधृतयाज्ञवल्क्य (२।७८) वचनञ्चेति ॥ ३३ ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

श्रीर्जयतितराम्

सदर नेजामतेर आदालतेर पण्डि(ते)र प्रति प्रश्नः—

(प्रथम) प्रश्नः—

---

२. व्यवहारतत्त्वे गौतमवचनमिति पठितम् । १. अत्यत-२६१०

१०२—ब्रजनाथ नामे व्यक्तिर आपन सन्तान माडडशाहाके वर्त्तमान राखिया मृत्यु हय। तत् पर माडडसाहा आपन खुल्ल पितामही श्रीमतिराममणि ओ आपन पितृस्रया श्रीमति अलकमणि ओ आपन मातुल[1] गौरहरिसाहाके वर्त्तमान राखिया मृत्यु हय। ओ माडडसाहार उपरेर लिखित तृतीय व्यक्तिर वेतिरेक अन्य कोन अधिकारि(र) अभाव। एमत स्थले शास्त्रानुसारे ताहार पित्रेर ओ स्थावर अस्थावरादी त्यज्य वस्तुर उपरेर तृतीय व्यक्तिर मध्ये के अधिकारि हय इति ॥०॥०॥०॥

द्वितीय प्रश्नः—

यद्यपि स्यात् उपरेर लिखित तृतीय व्यक्तिर केह माडडशाहार वस्तुते अधिकारि ना हय, एमत स्थले भूस्वामि अर्थात् कम्पानि वाहादुर ऐ वस्तुर अधिकारि हयेन कि ना। यथाशास्त्रानुसारे उपरेर लिखित प्रश्नद्वयेर व्यवस्था संस्कृत ओ भापा वचने लिखिवेन। इति सन १२३६ साल तारिख।

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयमार्च्चमासीयचतुर्थदिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

यदि व्रजनाथनामा कश्चिद् व्यक्तिविशेषो माडडसाहानामानमेकं पुत्रं संरक्ष्य मृतः(स्यात्)तदा व्रजनाथनाम्नस्त्यक्तसमस्तधने तत्पुत्रस्य माडड[2] साहासंज्ञकस्योत्तराधिकारित्वेनाधिकारे जाते सति तद्धनं माडड[2]साहासंज्ञकस्यैव जातम्। अतस्तन्मरणानन्तरं तदुत्तराधिकारिणामेव तद्धनं भवति। तत्र यदि माडडसाहासंज्ञकः पितामहभ्रातृपत्नीं राममणीं पितृष्वसा(रम्) अलकमणीं मातुलं गौरहरिसाहानामानं च संरक्ष्य मृतःस्यात्, अथ च माडडसाहासंज्ञकस्योपरिलिखितव्यक्तित्रयव्यतिरिक्ताधिकार्य्यभावे तच्छ्राद्धपिण्डदाने तत्त्यक्तधने च तन्मातुलस्य गौरहरिसंज्ञकस्याधिकारः, पुत्रपौत्रप्र-

१. स्त्री—व्यप०। २. साडडसाहा—व्यप०।

पौत्ररूपापत्यपत्न्यादिमातामहपर्य्यन्तानपत्यधनाधिकार्य्यभावे एवं मातुलस्याधिकारित्वेन, मातुलातिरिक्तराजातिरिक्ताधिकारिसामान्याभावे मातुलाधिकारस्य निष्प्रत्यूहत्वात्, सति मातुले राज्ञोऽधिकारप्रतिपादकशास्त्राभावाच्च।

द्वितीयप्रश्नोत्तरमप्यर्थादत्रैव पर्य्यवसन्नमिति पृथ(ङ्न)लिखितम्—इति वङ्गदेशचलितशुद्धितत्त्वदायभागदायतत्त्वदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

पुत्रो भ्राता पिता वापि मातुलो गुरुरेव च।

एते पिण्डप्रदा ज्ञेया सगोत्राश्चैव बान्धवाः॥ इति शुद्धितत्त्वादि(पृ० ३८६)ग्रन्थधृतप्रचेतोवचनम्॥ १॥

मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च। इत्युपरिलिखितग्रन्थ(शुतत्त्व० पृ० ३८७)धृतशातातपवचनम्॥ २॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतो गोत्रजो बन्धुः—इत्यादि दायभागदायतत्त्वादि(दातपृ०१८८)ग्रन्थधृतयाज्ञवल्क्य(२।१३५)वचनम्॥ ३॥

प्रपितामहसन्तानस्य दौहित्रान्तस्य मृतभोग्यपिण्डदातुरभावे मृतदेयमातामहादिपिण्डदानेन पिण्डानन्तर्य्यान्मातुलादिग्रहणार्थं बन्धुरदं प्रयुक्तवान् याज्ञवल्क्यः—इत्यादि दायभाग(पृ० २०६)ग्रन्थलिखनम्॥४॥

तदभावे मातामहस्तदभावे मातुलस्तदभावे मातुलपुत्रस्तदभावे मातुलपौत्रः—इति दायक्रमसंग्रह (पृ० ६) लिखनम्॥ ५॥

दौहित्रान्तप्रपितामहसन्तानाभावे मृतदेयमातामहादिपिण्डभोक्तॄणां तद्दातॄणां चासत्तिक्रमेण मातामहमातुलतत्सुतगोत्रजमातामहतत्सुतगोत्रप्रपौत्राणां पूर्व्वपूर्व्वाभावे परंपरोऽधिकारी—इति विवादभङ्गार्णव(२ववा० पृ० ३६५ क)ग्रन्थलिखनं चेति॥ ६॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

एतदब्दीयापरेलमासीयद्वितीयदिनसम्बन्धिशुक्रवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

सओयाल—

१०३—शूद्रजातिर मध्ये एक व्यक्ति स्वोपार्ज्जित स्थावरादि धने अधिकार थाकिया परलोक हओयार पर ताहार पुत्र तद्विषये उत्तराधिकारिसत्वे अधिकारि हइया ऐ समस्त वस्तु आपन विमाताके हेवा करिया मृत्यु हइयाछे। ए स्थले ऐ हेवार वस्तु सकल विमातार स्त्रीधन हय कि ना। परे ऐ विमाता केवल आपना पतिर भागिनेय विद्यमाने हेवार स्थावरादि सम्यदाय वस्तु स्वजातीय एक जनके हेवा करियाछे। यद्यपि सपत्निर पुत्रेर हेवा अनुसारे ऐ वस्तु विमातार स्त्रीधन हइया थाके, तवे एमत् वस्तु ऐ विमातार दान करा सिद्ध हय कि ना—यथाशास्त्र इहार उत्तर लिखिवा इति।

जिलार जओयाव—

एइ सओयालेर उत्तर निवेदन करितेछि—यथा ऐ पुरुषे विमाताके पैतृक आपन धन हेवा अर्थात् दान करियाछे से दान एवं ऐ स्त्रीलोक ये सपत्निपुत्र हइते लब्ध धन दान करियाछे, से दान कि प्रकार व्यक्त लिखा नाहि मते ऐ हेवा-द्वयेर किरूप शब्द प्रयोग आछे, ताहा ना जानाते ऐ दान सिद्धि हयोया नाहओया दुइ प्रकार निवेदन करि। यथा दान सिद्धि ना हओयार ये २ हेतु आछे, ताहा विने ऐ पुरुष आपन सत्वे त्याग करिया विमाताके ऐ स्थावरादि सकल धन दिया थाके तवे ऐ सपत्निपुत्र देया धन भर्त्तृदत्त स्थावरातिरिक्त स्त्रीधन हय। एमत् सौदायिक स्त्रीधन दान सिद्धेर ये २ कारण आछे ताहा विने ऐ स्त्रीलोक आपन सत्व त्याग करिया दिया थाके, तवे से दान अर्थात् हेवा सिद्ध हय। आर ऐ पुरुष कि स्त्रीलोक दान सिद्धि नाहयोयार ये २ कारण आछे से कारणे दियाथाके, तवे दान सिद्धि हयना। दान

असिद्धेर कथक हेतु लिखि। यथा—कामे भये क्रोधे[1] पीडाते भ्रमे शोके रोगे अथवा प्रतिलाभेछाते अर्थात् कोण शरते अपात्रके पात्र शङ्काते एवं उन्मादादिते दिया थाके तवे से देया सिद्ध हयना। तार प्रमाण कथक लिखि। यथा—

अदत्तन्तु भयक्रोधकामशोकरुगन्वितैः।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः॥
प्रतिलाभेच्छया दत्तमपात्रे पात्रशङ्कया॥

इत्यादि नारद्–कात्यायन–मुनि प्रभृति लिखित नाना वचनादि। ताहासकल लिखाते अधिक हय। मते किछु लिखिलाम्। ऐसकल हेवाते कि २ शब्द प्रयोग आछे, कि अभिप्राय, ये हओया ताहा ना जानाते सिद्ध हओया नाहओया दुइ मतेरि कारण यथाशास्त्र निवेदन करिलाम्। साहेव कर्त्ता येमत् अभि प्राय निवेदनमेत(त्) इति।

प्रभुसमर्पितप्रश्नपत्रं व्यवस्थापत्रद्वयञ्च दानपत्रद्वयञ्च यदेतदब्दीयापरेलमासीयचतुर्विंशतिदिनसम्बन्धिशनिवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यदि शूद्रजात्यन्तःपाती कश्चिद् व्यक्तिविशेषः स्वोपार्जितस्थावरादिधने आयत्तत्वं सम्पाद्य मृतस्तदनन्तरं तत्पुत्रोऽपि स्वपितृत्यक्तधने उत्तराधिकारित्वेनाधिकारी भूत्वा तदेव सर्वं वस्तु स्वविमात्रे दत्त्वा मृतः, तदा तदेव दत्तं सर्वं वस्तु विमातुः स्त्रीधनं भवितुं न शक्नोति, देवीप्रसादसंज्ञकसपत्नीपुत्रलिखितचित्वासीसंज्ञकविमातृसम्प्रदानकदानपत्रे तेनैव देवीप्रसादेन लिखितं त्वया यथाशक्ति अस्माकं पुरुषानुक्रमेण धर्म्मार्थं ये क्रियाकर्म्मादयः प्रवर्त्तितास्तान् संरक्ष्य भुज्यताम्—इति। अत्र वैतादृशलिखनेन चितवास्यास्तद्धने दानविक्रयानधिकारः। यस्मिन् धने दानविक्रयानधिकारः स्त्रियास्तद्धनं स्त्रीधनं भवत्येतद्विधायकशास्त्राभावात्। एवं

[1] क्रोधे क्रोधे—व्यप०।

तद्दानात् परं सैव विमाता केवलं स्वपतिभागिनेये विद्यमाने सति दानकृत-स्थावरादि सर्वं वस्तु स्वजातीयायैकस्मै कस्मैचिद्दत्तवती स्यात् तत्रोपरिलिखित-प्रकारेण तदेव सर्व्वं वस्तु विमातुः स्त्रीधनं न भवति । अतएव तस्यैव वस्तु-नस्तया विमात्रा कृतदानं सिद्धं भवितुं न शक्नोति अस्वामिकृतत्वात्, अस्वामिकृतदानस्य विक्रयस्य च आधेश्च परावर्त्तनीयत्वात्—इति वङ्ग-देशचलितमनुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायक्रमसंग्रहवि-वादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।

अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इति मनु-(पृ० ८।१९९) वचनम् ॥ १ ॥

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेत्—इति विवादभङ्गार्णवादि-(१ विवा ३१७ ख)ग्रन्थधृतकात्यायन(पृ० ७९)वचनञ्चेति ।।२।।

एतदब्दीयमैमासीयअष्टाविंशतिदिनसम्बन्धिशुक्रवासरे घटिकैकाधिक-यामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१०४—रोवकारि मिसिल आदालत देओयानि सदर सन १८३१ इङ्गरेजि तारिख १५ जानेओरि मतावक सन १२३७ वाङ्गला तारिख ३माघ रोज शनिवार ऐ आदालतेर हाकिम श्रीयुत मान्तकीयू हेनरि टरम्वल साहेवेर वैठके ।

काशीनाथदत्त मतफार श्रीकरुणा(मयी) ओ गयरह—
आपिलाण्टान्

चन्द्रमाला मतफार स्वामी जयचन्द्रघोष—रस्पाडण्ट

आपिलाण्टदिगेर मध्ये एक जन रामकिशोरदत्तेर उकिल मुनशी दादारकूस ओ वङ्गचन्द्रदत्त, नवालगेर माता कालाचाँद-

दत्त मतफार स्त्री मसम्मात कृष्णप्रिया ओ काशीनाथदत्त ओ मसम्मात करुणामयी मतफारदिगेर नावालग पुत्र भैरवचन्द्र-दत्तेर अछिमदान नारायणघोष उकिल मुनशी गोलाम वतुल हाजिर हइल। आपिलण्टदिगेर मध्ये एक जन रामकिशोरदत्त ओ मसम्मात कृष्णप्रिया ओ गयरह सओयाल ए मकद्दमार तजविज सानि प्रार्थनाय, ताहार सम्पर्कर कागजात सहित, आर सन १८३० इङ्गरेजी नवम्बर मासेर २४ तारिखेर हओया ए आदालतेर हाकिम श्रीयुत अलियम नशग्नर साहेवेर हुकुम माफिक मकद्दमार कागज अद्य आमार वैठके उपस्थित हइया नालिसि, आरजि, ओ सन १८२७ इङ्गरेजि जुलाइ मासेर ३ तारिखेर ओ सन १८२८ इङ्गरेजि जानेओरि मासेर १७ तारिखेर लिखित ए मकद्दमार खास आपिल मञ्जुरिर रोवकारिसकल ओ सन १८३० इ० जुलाइ मासेर १५ तारिखेर हओया ए मकद्दमा आखेरि रोवकारि ओ अद्य जरूरि कागचसकल रस्पाडण्टेर उकिल सदासुकपण्डितेर समक्षे दृष्टे आशील। ए आदालतेर काएम-मकाम पण्डित हीरानन्दमिश्रेर एजाहार असिद्ध सम्व लित आपिलाण्ट ओजरातेर दृष्टे जे सेइ वुनियादे मकद्दमार तजविज हइयाछे, ए आदालतेर पण्डितेर स्थाने लिखित व्यवस्था लओन उचित वोध हइया हुकुम हइल-ये एइ रोवकारिर नकल आर जाहाङ्गिरनगरेर कोर्ट आपीलेर पण्डितेर आसल व्यवस्था ४४ लम्बर तथाकार नथीर सामिल, ओ ए आदालतेर नथिर सामिल रस्पाडण्टेर दाखिल करा व्यवस्था सहित ए आदालतेर पण्डित वैद्यनाथमिश्रेर हाओयाले करा-जाय, एइ हुकुमे जे उपरेर व्यवस्थासकल वेत्ता हइया सप्ताह मध्ये जवाव लिखेन-ये ऐ व्यवस्था वङ्गदेश चलित शास्त्रानुसारे सिद्धि कि असिद्धि मात्र। पण्डितेर व्यवस्था दाखिल हआयार पर आपिलाण्टेर तजविज सानिर सओयालेर सम्पर्के मनाशीव कुम काश पाइवेक इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतमान्तकीयूहेनरीटरम्वलसाहेवधर्म्माधिकरणलिखितैतदब्दीयजानवरीमासीयपञ्चदशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितजाहाङ्गिरनगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणनियुक्तपाण्डतलिखितव्यवस्थापत्रमेवमेतद्धर्म्माधिकरणप्रत्यर्थिसमुपस्थापितमेतद्धर्म्माधिकरणीयव्यवस्थापत्रञ्च यत्फेवरवरीमासीयसप्तमदिनसम्बन्धिसोमवासरे घटिकैकाधिकयामद्वये मया प्राप्तन्तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

उपरिलिखितव्यवस्थापत्रद्वयान्तर्गतजाहाङ्गिरनगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणनियुक्तपण्डितलिखितव्यवस्थापत्रोपरिलिखितात् प्रभात् कीर्त्तिनारायणदत्तस्य मरणोत्तरं तद्योग्यांशे शास्त्रानुसारेण तत्पुत्रस्याधिकारे जाते सति तन्मरणोत्तरमनुमानादूनविंशतिवर्षोत्तरं विंशतिवर्षोत्तरं वा कीर्त्तिनारायणदत्तस्यैको दौहित्र उत्पन्न इति ज्ञातम् । तथा सति कीर्त्तिनारायणदत्तस्याप्राप्तव्यवहारस्य पुत्रस्य मरणोत्तरं तस्यैवाप्राप्तव्यवहारस्य ये उत्तराधिकारिणस्त एव तद्धनाधिकारिणो भवन्ति । एवञ्च सति वङ्गदेशचलितशास्त्रे एतादृशं किमपि प्रमाणं लिखितं नास्ति यदनुसारेणोपरिलिखितप्रकारेण विवादास्पदीभूतधनस्वामिनः कीर्त्तिनारायणदत्तपुत्रस्याप्राप्तव्यवहारस्य मरणसमये तत्पुत्रमारभ्य पितृदौहित्रपर्य्यन्ताभावे तदानीं विद्यमानस्य तत्पितामहस्य तदभावे तदानीं विद्यमानायास्तत्पितामह्यास्तदभावे तदानीं विद्यमानानां तत्पि(तृ)व्यानां तदभावे पितृव्यपुत्राणां तदभावे पितृव्यपौत्राणां वा अवोलिखितप्रमाणैस्तत्क्षणादेवोत्पन्नं स्वत्वं नश्येत । अथवा तन्मरणादूनविंशतिवर्षोत्तरं विंशतिवर्षोत्तरं वोत्पत्स्यमानपितृदौहित्रार्थं तद्धनमस्वामिकमेव तावत्कालपर्य्यन्तं तिष्ठेत् । अथवा तत्पितृदौहित्रोत्पत्तेः प्राक् तद्धनं कोऽपि रक्षेत् । एवं प्रभुसमर्पितव्यवस्थापत्रद्वयान्तर्गतैतद्धर्म्माधिकरणप्रत्यर्थिसमुपस्थापितैतद्धर्म्माधिकरणीयव्यवस्थापत्रे दायभागलिखितं प्रमाणद्वयं लिखितमस्ति । तयोर्म्मध्ये प्रथमप्रमाणेन मातुलस्य मरणोत्तरं तदीयधने ऊनविंशतिवर्षोत्तरं विंशतिवर्षोत्तरं वोत्पन्नस्य भागिनेयस्य स्वत्व-

मुत्पद्यते इत्यर्थो न प्रतीयते। वरं मातुलस्य मरणानन्तरं तत्त्यक्तधने यदि तस्य पुत्रमारभ्य पितुःप्रपौत्रपर्य्यन्तो न स्यात्, पितृदौहित्रस्तु विद्यते, तदा स एवाधिकारी भवतीत्यर्थः प्रतीयते, प्रकृते तु पितृदौहित्रस्य तदानीं विद्यमानत्वाभावात्। यत्तु तद्व्यवस्थायां द्वितीयं प्रमाणं लिखितं, तस्य चायमर्थः—ये जाता उत्पन्नाः। येऽप्यजाताः भविष्यद्गर्भसम्बन्धाः। ये च गर्भे व्यवस्थितास्तेऽपि वृत्तिमाकाङ्क्षन्ति वृत्तिलोपस्तेषां विगर्हितो भवति—इत्यनेनापि तादृशभागिनेयस्य मातुलधने स्वत्वमुत्पद्यत इत्यर्थो न प्रतीयते, तद्वचनस्य स्वत्वोत्पत्तिकारणत्वाभावात्। अथच दायभागग्रन्थे(पृ०२५)-तद्वचनं विभागप्रकरणे लिखितम्। यदि पित्रा स्वेच्छया क्रमागतधनस्य विभागो विभागप्रतियोगिनां मातृरजोनिवृत्तिमन्तरा क्रियते तदा विभागोत्तरजातानां वृत्तिलोपापत्तिः,अतएवासौ विभागो न युक्त इति विभागप्रतियोगिनीं मातृरजोनिवृत्तिमन्तरा क्रमागतधनस्य विभागनिषेधार्थं तद्वचनं पञ्चमप्रमाणे स्पष्टीकृतं च। तत्रापि वृत्तिलोपो विगर्हित इत्यत्र वृत्तिशब्दस्यार्थो दायभागटीकाकृतश्रीकृष्णतर्कालङ्कारैर्दायभागटीकायां(पृ० २५)मेवं व्याख्यातः—वृत्तिलोपः पितामहधने निरंशकत्वमिति (दा०भा०टी०पृ० २५)। विवादभङ्गार्णवग्रन्थेऽपि तथैव वृत्तिशब्दस्य क्रमगतधनमित्यर्थो व्याख्यातः। अतएव मातुलधनं भागिनेयस्य वृत्तिर्न भवति, तस्य क्रमागतत्वाभावात्। किन्तु आकस्मिकमेव तत्प्राप्तिर्भागिनेयस्य। अथ च वृत्तिलोपो विगर्हित इत्यनेन यदि केनचित् विभागकरणेन दानविक्रयकरणेन वा कस्यचिद् वृत्तिलोपः क्रियते तदात्यसौ अपराधो भवति। प्रकृते तु विभागादिकरणेन वृत्तिलोपः केनापि न कृतः। अथ च वङ्गदेशचलितदायभागादिग्रन्थमते दायस्थले विशेषतः स्वत्वकारणं धनस्वामिसम्बन्धो धनस्वाम्युपरमश्च पूर्व्वपूर्व्वसम्बन्धिनामभावश्चेति त्रितयं भवति। अथ च केषाञ्चित् ग्रन्थानां मते जन्मैव पुत्रपौत्रप्रपौत्राणां स्वत्वकारणं भवति। तत्र जन्म द्विविधम्—यस्मिन् काले यस्य गर्भाधानं तदेकविधं यस्मिन् काले गर्भतो निर्गतस्तद्द्वितीयम्। प्रकृते तु कीर्त्तिनारायणपुत्रस्य कीर्त्तिनारायणमरणोत्तरं तद्योग्यांशस्वामिनोऽप्राप्तव्यवहारस्य मरणसमये तद्भागिनेयस्य गर्भसम्बन्धस्याप्यभावेन तत्सम्बन्धस्य दूरापास्तत्वात् तत्त्यक्तधने तत्स्वत्वोत्पत्तिर्भवितुमश-

क्यैव । अथ चोनषोडशवर्षवयस्कानां बालकानामर्थादप्राप्तव्यवहाराणां धनरक्षणे मुनिभिरुपायः कृतः । तस्मादपि क्लिष्टतमे प्रकृतस्थाने अनियमितकालेनोत्पत्स्यमानानां धनरक्षणे कोप्युपायो मुनिभिर्ग्रन्थकारैर्वा न कृतः । तस्मादपि अनुत्पन्नानां स्वत्वं भवितुं न शक्नोति । तस्मात्प्रभुसमर्पितव्यवस्थाद्वयं वङ्गदेशचलितशास्त्रानुसारेण सिद्धं भवितुमर्हतीति न प्रतिभाति—इति वङ्गदेशचलितमनुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुःशिष्यः सब्रह्मचारिणः ॥
एषाममभावेपूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः— इति दायभागादि(दात० पृ० १५१) ग्रन्थधृतयाज्ञवल्क्य (२।१३५) वचनम् ॥ १ ॥

तदभावे पुनः पितृदौहित्रः इति । तदभावे पितामहस्तदभावे पितामही, तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयस्तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रपितृसोदरपौत्रपितृवैमात्रेयपौत्राणां क्रमेणाधिकारः— इति च श्रीकृष्णतर्कालङ्कारकृतदायटीका (पृ० २१८) लिखनम् ॥ २ ॥

दौहित्रान्तपितृसन्तानाभावे पितामहो धनाधिकारी आसन्नत्वात्, तदभावे पितामही—इत्यादि विवादभङ्गार्णव(२ विवा० पृ० ३६४ ख) ग्रन्थलिखनम् ॥ ३ ॥

तदभावे पितामहाधिकारः दौहित्रान्तस्वसन्तानाभावे पितुरधिकारवत्—इति दायक्रमसंग्रह (पृ० ७) ग्रन्थलिखनम् ॥ ४ ॥

तस्मात् पतितत्वनिस्पृहत्वोपरमैः स्वत्वापगम इत्येकः कालोऽपरश्च सति स्वत्वे तदिच्छातइतिकालद्वयमेव युक्तम् । मातुर्निवृत्तेरजसीतितत् पितामहधनाभिप्रायम् । निवृत्तरजसि पुत्रान्तरसम्भावनाभावात् तदानीमपि पितुरिच्छयैव पुत्राणां विभागः । अनिवृत्ते रजसि क्रमागतधनविभागे पश्चाज्जातानां वृत्तिलोपापत्तेः । न चासौ युक्तः ।

ये जाता येप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः ॥—

इति मनुवचनात्, इति दायभागग्रन्थ(पृ० २४)लिखनम् ॥ ५ ॥

वृत्तिलोपः पितामहधने निरंशकत्वम्[१]—इति श्रीकृष्णतर्कालङ्कारकृत-दायभागटीका(पृ० २५)लिखनम् ॥ ६ ॥

जीमूतवाहनास्तु अनिवृत्ते रजसि क्रमागतधनविभागे पश्चाज्जातानां वृत्तिलोपापत्तेन चासौ युक्तः ।

ये जाता येप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः ।
इति मनुवचनादित्याहुः ।

क्रमागतजीवनोपाय एव वृत्तिशब्देनोच्यते - इति तेषामभिप्रायः इति विवादभङ्गार्णव(२ विवा० पृ० ७२ क)ग्रन्थलिखनम् ॥ ७ ॥

सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः—इत्यादि वचनम् (मनु० पृ० ४२२) ॥ ८ ॥

ततश्च पूर्व्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र-निरुढो दायशब्दः—इति दायभाग(पृ० ५)ग्रन्थलिखनम् ॥ ९ ॥

तथा च तावदन्यतमसम्बन्धाधीनं सद् यत् पूर्व्वस्वामिस्वत्वनाश-जन्यं स्वत्वं तद्वति धने निरूढो दायशब्द इत्यर्थः। न तु स्वत्वनाशानन्तरं चेत्स्वत्वोत्पत्तिरिति, तदा तत्क्षणेऽस्वामिकतया निध्यादिवदुदासीनस्या-प्युपादानात् स्वत्वापत्तिरितिचेन्न, तत्र पुत्रादिसत्ताया एव विरोधित्वस्य पुत्राद्यधिकारबोधकशास्त्रसिद्धत्वात्—इति श्रीकृष्णतर्कालङ्कारकृतदायभाग-टीका(पृ० ५)लिखनम् ॥ १० ॥

वस्तुतस्तु पितृस्वत्वमेव पुत्रस्वत्वोत्पत्तौ हेतुः । न चैवं पितृस्वत्वे विद्यमानेऽपि तद्धने पुत्रस्वत्वापत्तिः । तत्र पितृस्वत्वनाशकस्यापि सहका-रित्वात् । स्वत्वनाशकश्च मरणपातित्यादि । तेषां स्वत्वनाशकत्वेन स्मृति-प्रतिपादितानां मरणत्वपातित्यत्वादिविशेषरूपेणैवाव्यवहितोत्तराद्यन्त-

१. निरंशित्वम्—दाभाटी० ।

भविण पुत्रस्वत्वोत्पत्तौ हेतुत्वम्—इत्यादि श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० ५६) लिखनम् ॥ ११ ॥

ततश्च उत्पत्त्यैवार्थं स्वामित्वाल्लभेत इत्याचार्य्या मन्यन्ते–इति मिताक्षरा(पृ० १६६)धृतगौतमवचनम् । १२ ।

अमूलं समूलत्वे वा यस्मिन् गर्भस्थे पित्रादिर्मृतः तत्परम्–इत्यादि-श्रीकृष्णतर्कालङ्कारकृतदायभागटीका(पृ० १४)लिखनम् ॥ १३ ॥

पितृनिधनकालीनं वा जीवनमेव पुत्रस्यार्ज्जनं भविष्यति – इति दायभाग(पृ० १६)ग्रन्थलिखनम् ॥ १४ ॥

पुत्रजीवनमेव स्वत्वहेतुः । तत्र पितृनिधनकालः सहकारीत्यर्थः । इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीका(पृ० १६)लिखनम् । १५ ॥

बालदायादिकं रिक्थं तावद्राजानुपालयेत् ।

यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः ॥—इति मनुवचनमिति (पृ० ८,२७) ॥ १५ ॥

अथचैतद्धर्म्माधिकरणप्रत्यर्थिसमुपस्थापितैतद्धर्म्माधिकरणीयव्यवस्थालिखितद्वितीयप्रमाणस्य तद्व्यवस्थालिखितपारसिकप्रतिरूपेण यादृशार्थोऽवगम्यते तादृशार्थस्तु कस्मिन्नपि ग्रन्थे न लिखितः दायभागग्रन्थे तत्प्रमाणस्य यादृशार्थो व्याख्यातः स तु श्रीयुतहेनरीकुलब्रोरुकमाहेव प्रधानैतद्धर्म्माधिकरणप्राचीनाधिपतिकृतधर्म्मशास्त्रान्तर्गतवङ्गदेशचलितदायभागप्रतिरूपे इङ्गरेजीलिपिनिर्म्मिते विभागकालद्वयनिरूपणप्रकरणे विंशतिपत्रे एकविंशतिपत्रे च एतद्व्यवस्थायाः पञ्चमप्रमाणेऽपि च स्पष्टीकृतः इति निवेदनमिति ।

एतदब्दीयमार्च्चमासीयनवमदिनसम्बन्धिबुधवासरे घटिकैकाधिकयामद्वये दत्तेयं मया व्यवस्था ।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

१०५—रोवकारि मिसिल आदालत देओयानि सदर तारिख १० माहे माइ सन १८३१ इङ्गरेजि मतावक तारिख २९ माहे वैशाख सन १२३८ साल वाङ्गला बुधवार ऐ आदालतेर हाकिम श्रीयुत मान्तगीओ हेनरि टरम्बल साहेवेर वैठके।

शीउमलुकसिंह— आपिलाण्ट

रामप्रकाशसिंह— रेष्पाडण्ट

आपिलाण्टेर उकिलगण मौलवि नियामत आलि ओ सदासुख पण्डित रेष्पाडण्टेर उकिल मुनसि होमन आलि हाजिर हइल। आपरेल मासेर २७ ओ २८ ओ हाल मासेर ६ तारिखे ए मकद्दमा आमार वैठके उपस्थित हइया ऐ रोवकारिसकलेर विस्तुरण कागजसकल पडागिया स्थकिद स्थिल। अद्य पुनराय उपस्थित हइया एइ मासेर ६ तारिखे आपिलाण्टेर उकिलगण साक्षिदिगेर एजहारेर नकल समस्त जे दाखिल हइयाछिल ओ आवश्यकीय अनेक कागजात पुनराय पडागेल। वोध हइल जे तालुकजखनिर कर्त्ता उभयेर पूर्व्वपुरुष रामरुचसिंह तिन पुत्र राखित। एक जन आपिलाण्ट सिउमलुकसिंहेर पिता भुपनारायणसिंह, ओ द्वितीय पेमनारायणसिंह जे मुकुन्द नामे एक पुत्र ओ दुइ स्त्री एक जन वक्तकोङर, द्विनीय मकुन्दसिंह मजकुरेर माता नियत कोङरके राखिया मरियाछे। आर ऐ रामरुचसिंहेर तृतीय पुत्र हिङ्गलसिंहेर पिता ओ ए मकद्दमार मुद्दाजेहे रामप्रकाशसिंहेर पितामह देनजितसिंह, आर इहाओ प्रकाशजे ऐ प्रेमनारायन आपन जावदसाते जखनि तालुक हइते आपन तृतीय हिस्या वावत मुकुन्दसिंह पुत्र आ मसम्मात वखतकोङर ओ नियतकोङर आपन स्त्रागणेर नामे प्रत्येकेर अंशेर विना शङ्काय एक केता हेवानामा लिखियादेय, ओ प्रेमनारायणसिंहेर मृत्युर पर ताहार पुत्र मुकुन्दसिंह अप्राप्तव्यवहार कालिन ओ ताहार पर उहार स्त्री मसस्मात वखतकोङर ओ मसम्मात नियतकोङरेर मृत्यु पर मृत भुपनारायणसिंहेर पुत्र शीउमलुकसिंह ओ मृत

देनजीतसिंहेर पुत्र हिङ्गलसिंह वर्त्तमाने आछे। चुडन्त हुकुम हओनेर पूर्व्वे एइ मकद्दमाते ए आदालतेर पण्डित हइते निचेर सओयालसकलेर जवाव व्यवस्था लओन उचित वोध हइया हुकुम हइल जे मसम्मात वखतकोङर ओ नियतकोङर मुदइया वावु सीउमलुकसिंह ओ देनजितसिंह मुद्दालेहेदिगेर नालिसी मकद्दमाय हिजरि स(न) १२६१ सालेर सहर जमादिओओनेर २५ तारिखेर लेखा, मृत प्रेमनारायणसिंहेर लिखित एक केता हेवानामा ओ १८५४ सम्मत मिति काओयारा वदि सप्तमी तारिखेर लेखा, सीउमलुकसिंहेर लेखा, एक केता एकरारनामा लम्वर १३ ओ १५ सम्वलित एइ रोवकारिर नकल ए आदालतेर पण्डितेर स्थाने समार्पन कराजाय जे सप्ताह मध्ये ऐ सओयालेर जवावे व्यवस्था लिखेन।

प्रथम—एइ जे मुकुन्दसिंह पुत्र ओ मसम्मात वखतकोङर ओ नियतकोङर आपन स्त्रीगणके ताहारदिगेर प्रत्येकेर अंशेर विना शङ्काय ऐ प्रेमनारायण आपन पैतृक अंश हेवा करण शास्त्रानुसारे सिसि[1] वटि कि ना। ओ मसम्मात मजकुरा ऐ हेवा मते मुकुन्दसिंहेर मृत्युर पर हेवा करा तृतीय हिस्या हइते कि परिमाण अंशेर सत्वाधिकारि हइवेक।

द्वितीय—एइ जे मसम्मात मजकुरारा मुकुन्दसिंहेर मृत्युर पर स्थावर वस्तु हइते आपन स्वत्वेर समर्पके[2] ए हेवा अनुसारे दान ओ विक्रय ओ अन्य प्रकार हस्तान्तर करणेर क्षमता थाकिवेक कि ना।

तृतीय—एइ जे ऐ मुकुन्दसिंहेर मृत्युर पर ताहार माता नियतकोङर ओ विमाता वखतकोङर ओ ताहार खुडा देन[3]-जीतसिंह से कालिन वर्त्तमान छिल, ओ उहार खुडतात भ्राता शीउमलुकसिंह जिवद्दसाय थाकने प्रेमनारायणेर अंशेर स्वत्वाधिकारि के हइवेक।

१. सिद्ध वटे। २. सम्पर्के। ३. दलजीतसिंह।

चतुर्थ—एइ जे यद्यपि मृत मुकुन्दसिंहेर त्यक्त अंशेर दखल ओ कावेजेर सत्वाधिकारि ताहार माता मसम्माता वखतकोङर ओ नियतकोङर हवेक, नवे उहादिगेर मृत्युर पर ऐ प्रेमनारायण सिंहेर दान करा अंशेर सत्वाधिकारि कोण व्यक्ति, भुपनारायण सिंहेर पुत्र श्रीउमलुकसिंह किम्वा देनजितसिंहेर पुत्र हिङ्गल सिंह अथवा दुइ जनाइ तुल्यांश हइवेक इति ।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुत-मान्तकीयूहेनरीटरम्वलसाहेवधर्म्माधिकरणलिखितैतद्द्वीयमेमासीयैकादशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूप-पत्रमेतं तत्समर्पितत्रयोदशाङ्काङ्कितमृतप्रेमनारायणसिंहलिखितदानपत्रं पञ्चदशाङ्काङ्कितश्रीमनोगसिंहलिखितसंवित् ?) पत्रञ्च यत्तन्मार्गीयैकविंशतिदिनसंवन्धिशनिवासरे यामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रथमप्रश्नस्योत्तरम्—

यदि तेनैव प्रेमनारायणसिंहेन स्वपैतृकधनस्य स्वांशो मुकुन्दसिंहनाम्ने स्वपुत्राय वखतकुमरिनाम्न्यै नियतिकुमरिनाम्न्यै च स्वपत्न्यै तेषां त्रयाणां दानग्राहिणां मध्ये प्रत्येकमंशसंख्यामकृत्वैव दत्तः स्यात्तदा तद्दानं शास्त्रानुसारेण सिद्ध्यति, शास्त्रीयावश्यकदानादौ सामान्यतः पुत्राणामनुमतेरनावश्यकत्वेनाग्राह्यरूपाया अप्रासव्यवहारपुत्रानुमतेरनावश्यकत्वस्यार्थसिद्धत्वात्, पत्या पत्नीभ्यः स्त्रीधनदानस्यादत्तस्त्रीधनाभ्यस्ताभ्यो वा पुत्रसमानांशदानस्य च शास्त्रीयत्वात्, प्रभुसमर्पितत्रयोदशाङ्काङ्कितदानपत्रेण प्रेमनारायणसिंहस्य पैतृकस्वांशस्य भ्रात्रादिभिः साधारण्याभावावगमेनाभ्रात्रादीनां तत्रानुमतेरप्यनपेक्षितत्वात्, भ्रात्रादीनां साधारण्येऽप्यप्रतिषेधरूपायास्तेषामनुमतेरुन्नतत्वाच, पञ्चदशाङ्काङ्कितश्रीमनोगसिंह लिखितसंवित्(?)पत्रेण तथा पर्य्यवसानाच । एवं तद्दानानुसारेण पूर्व्वं प्रेमनारायणसिंहस्वत्वास्पदीभूतस्यांशस्य तृतीयांशाधिकारिणस्तत्पुत्रस्य मुकुन्दसिंहस्य मरणोत्तरं तन्माता नियतिकुमराख्या अंशद्वयाधिकारिणी, तद्विमाता वखतकुमराख्या च

तत्तृतीयांशरूपैकांशाधिकारिणी भवति। यतो यत्र दानादौ दानग्राहिणामंशनियमो न कृतस्तत्र शास्त्रानुसारेण ते दानादिग्राहिणः समानांशिनो भवन्ति। तत्र मुकुन्दसिंहस्य पुत्रमारभ्य दौहित्रपर्य्यन्तरहितस्य मृतस्य तद्दानानुसारेण साधारणधनांशे तन्मातुर्न्नियतकुमराख्याया अधिकारस्य शास्त्रसिद्धत्वाद् इति ॥ ० ॥ ० ॥ ० ॥

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनु(५।१५२)वचनम् ॥ १ ॥

अवश्यकर्त्तव्येषु[1] *पित्रादिश्राद्धादिषु*[2] *स्थावरस्य दानाधमनविक्रयमेकोऽपि समर्थः कुर्य्याद्*—इति मिताक्षरादिग्रन्थलिखनम् (पृ० २००) ॥ २ ॥

तत्र तद्विधानबलादेवाधिकारो गम्यते—इति मिताक्षरादिग्रन्थलिखनम् (मिता० पृ० २००) ॥ ३ ॥

पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्।
आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम् ॥—इति मिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् (याज्ञ० २।१४३) वचनम् ॥ ४ ॥

यदि कुर्य्यात् समानांशान् पत्न्यः कार्य्याः समांशिकाः।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥—इति मिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् (याज्ञ० २।११५) ॥ ५ ॥

अप्रतिषिद्धं परमतमप्यनुमतं[3] *भवति*—इति दत्तकचन्द्रिकादिग्रन्थलिखनम् (दत्तच० पृ० १२) ॥ ६ ॥

समं स्यादश्रुतत्वादशेषस्य[4]—इति वीरमित्रोदयादिग्रन्थलिखनम् (वी० मि० पृ० ५६५) ॥ ७ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः—इत्यादि मिताक्षरादिग्रन्थधृतयाज्ञवल्क्य(२।१३५)वचनम् ॥ ८ ॥

---

१. °षुच २. पितृश्राद्धादिषु इति मिता० ३. परमनुमतम्—दत्तच०।
४. अविशेषश्रवणे सति समं स्यादश्रुतत्वात्—इति वीमि० पाठः०

द्वितीयप्रश्नस्योत्तरम्—

मुकुन्दसिंहस्य मरणोत्तरं तन्मातुर्विमातुर्वा प्रथमप्रश्नोत्तरलिखितप्रकारेण स्वस्वत्वास्पदीभूतान्तर्गतस्थावरधने अदृष्टार्थं दृष्टादृष्टावश्यककार्यार्थं स्वस्वभरणपोषणार्थं वा दानप्रकारेण विक्रयप्रकारेण वा अन्यप्रकारेण वा हस्तान्तरकरणे क्षमता स्थास्यत्येव, अन्यथा न स्थास्यत्येव । यतश्शास्त्रानुसारेण भर्तृदत्तस्थावरे पत्न्या उपरिलिखितादृष्टार्थादिव्यतिरेकेण यथेष्टदानविक्रयादौ नाधिकारः, पुत्रादिदौहित्रान्तरहितस्य मृतस्य पुत्रस्य धने उत्तराधिकारित्वेन मातुरधिकारे जातेऽपि तस्या उपरिलिखितादृष्टार्थादिव्यतिरेकेण तद्धनेऽपि यथेष्टदानविक्रयाद्यनधिकारश्चेति ॥ ०॥

अत्र प्रमाणम्—

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत् ।
सा यथाकाममश्नीयाद् दद्याद्वा स्थावरादृते ॥

इति मिताक्षरा(पृ० १६६)वीरमित्रोदयादि(पृ० ६६१)ग्रन्थधृतनारद(नामसं० २।२४)वचनम् ॥ १ ॥

अदृष्टार्थे दाने दृष्टादृष्टावश्यककार्यार्थमाधौ विक्रये चास्त्येव पत्न्याः सकलभर्तृधनविषयोऽधिकारः—इति वीरमित्रोदय(पृ० ६३०)ग्रन्थलिखनम् ॥ २ ॥

एकत्र *निर्णीतः शास्त्रार्थो बाधकं विनाऽन्यत्रापि प्रवर्त्तते*—इति उपरिलिखितग्रन्थलिखितम् ॥ ३ ॥

तृतीयप्रश्नस्योत्तरम्—

यदि तस्यैव मुकुन्दसिंहस्य मरणोत्तरं तन्मातानियतकोमराख्या तद्विमाता बखतकोमराख्या च तदानीं जीवन्त्यासीत्, तत्पितृव्ये दलजीतसिंहे पितृव्यपुत्रे श्रीमनोगसिंहे च जीवति सत्यपि प्रेमनारायणसिंहस्य पूर्वस्वत्वास्पदीभूतांशस्य प्रथमप्रश्नोत्तरलिखितप्रकारेणाधिकारिण्यौ नियतिकुमरिबखतकुमर्य्याविव[1] भवतः, तयोर्जीवन्त्योः मुकुन्दसिंहपितृव्यस्य पितृव्यपुत्रस्य वा तत्र नाधिकारइति ॥

---

१ कुमार्यौ व्यप० ।

अत्र प्रमाणानि--प्रथमप्रश्नोत्तरप्रमाणानि सर्व्वाण्येवेति—

चतुर्थप्रश्नस्योत्तरम्—

यद्यपि मृतस्य मुकुन्दसिंहस्य त्यक्तधनांशस्य स्वत्वाधिकारिणी तन्माता नियतकुमराख्या प्रथमप्रश्नोत्तरलिखितप्रकारेण जाता, तदा तन्मरणानन्तरं तत्प्रेमनारायणसिंहकृतदानकृतस्यांशस्यान्तर्गतस्य प्रथमप्रश्नोत्तरलिखितप्रकारेण मुकुन्दसिंहस्वत्वास्पदीभूतस्य तत्तृतीयांशस्याधिकारी मुकुन्दसिंहस्य पुत्रमारभ्य पितामहपर्य्यन्तो नास्ति, तत्पितृव्यो भूपनारायणसिंहो दलजीतसिंहो वा कश्चिद् विद्यमानश्चेत्तदा स एव भवति। तौ द्वौ चेद् द्वावेव तुल्यांशिनौ[1] भवतः। पितृव्याणां मध्ये कस्यचिदपि एकस्य तदानीं विद्यमानत्वाभावे तत्पितृव्यपुत्रौ श्रीमनोगसिंहदिग्बलसिंहाख्यौ द्वावेव तुल्यांशिनौ भवतः। नियतकुमराख्याया बखतकुमराख्यायाश्च प्रत्येकं (?) मरणोत्तरं तयोः स्वस्वत्वास्पदीभूततृतीयांशस्याधिकारी। यदि तयोः प्रत्येकं दुहितृदौहित्रीदौहित्रपुत्रपौत्रप्रपौत्रभर्त्तृभर्तृपुत्रपौत्रप्रपौत्रदुहितृदौहित्रश्वश्रूश्वशुरपर्य्यन्तानां स्त्रीधनाधिकारिणां मध्ये कश्चिन्नास्ति तयोः पतिभ्राता भूपनारायणसिंहो दलजीतसिंहो वा कश्चित् तदानीं विद्यमानस्तदा स एवाधिकारी भवति, तौ द्वौ चेद् द्वावेव तुल्याधिकारिणौ भवतः। तयोर्म्मध्ये एकस्याप्यभावे तयोः पुत्रौ श्रीमनोगसिंहदिग्बलसिंहाख्यौ द्वावेव तुल्यांशिनौ भवतः—इति पश्चिमदेशचालितमनुमितात्तरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभदत्तकचन्द्रिकादिग्रन्थानुसारिणी व्यवस्थेति।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजा बन्धुः—इत्यादि मिताक्षरादिग्रन्थधृतयाज्ञवल्क्य-(२।१३५) वचनम्॥ १॥

तत्र च पितृसन्तानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः—इति मिताक्षराग्रन्थलिखनम् (पृ० २२३)॥ २॥

पूर्व्वोक्तं स्त्रीधनमप्रजस्यनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्र-

१ तुल्यांशिन्यौ—मू.प०।

प्रपौत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो वक्ष्यमाणा गृह्णन्ति – इति मिताक्षराग्रन्थलिखनम् (पृ० २२६) ॥ ३ ॥

अप्रजसः स्त्रियाः पूर्व्वोक्तरूपाया ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्य्यात्वं प्राप्ताया अतीतायाः पूर्व्वोक्तं धनं प्रथमं भर्त्तुर्भवति, तदभावे तत्प्रत्यासन्नानां सपिण्डानां भवति – इति मिताक्षरादिग्रन्थलिखनञ्चेति (पृ० २२६) ।

जूनमासीयद्वितीयदिनसम्बन्धिवृहस्पतिवासरे दत्तेयं मया व्यवस्था इति ।

श्रीदुर्जयतितराम्

श्रीवैद्यनाथमिश्रस्य

१०६ रोवकारि मिशिल सदर देओयानि आदालत तारिख १८ माइ सन १८३१ साल इङ्गरेजि मोताबक ६ ज्यैष्ठ सन १२३८ साल वाङ्गला रोज बुधवार ए आदालतेर हाकिम श्रीयुत कटबरट थर्लेन शिलि साहेबेर बैठके—

राजा गोविन्दनाथराय आपिलाण्ट
गोलालचन्द्र ओरफे लालकाबाबुगं रेस्पाण्डेण्ट

आपिलाण्टेर उकिल मुनशि होसेन आलि ओ रेस्पाण्डेण्टगणेर उकिल सक मुनशी गोलाम बतुल ओ सदाशुक पण्डित हाजिर आइलेन। एइ मकद्दमा एइ माहार १०।११।१२।१६।१७ तारिखसकले आमार बैठके रुबकार हइया नालिशि आरजि प्रभृति प्रेविनशेल कोर्टेर कागजसकल फयशला पर्य्यन्त ओ एइ आदालते दाखिलि हओया सओयाल जवाब ओ गयरह कायजात[1] पडागिया स्थकित छिल, अद्य पुनराय रुबकार हइया गत दिवसेर दाखिल हओया कागजात दृष्टे आसिल। यथा चूडन्तहुकुम प्रकाश हओनेर पूर्व्वे एइ आदालतेर पण्डितेर स्थाने एइ

१. कागजात।

विशय ज्ञात हओन उचित हइलये अछियतनामा अनुसारे ये तद्वाराय मुतिचन्द्रके पुष्य पुत्र विवेचना करणेर क्षमता राखे कि ना। अतएव हुकुम हइल ये एइ रुवकारिर नकल अछियतनामा सम्वलित एइ आदालतेर पण्डितेर स्थाने एइ हुकुमे समर्पण कराजाय ये निचेर लिखित प्रश्नशकलेर उत्तर जेइन शास्त्रानुसारे यद्यपि थाके नतुवा एतद्देशीय चलित शास्त्रानुसारे दुइ सप्ताह मध्ये लिखेन।

प्रथम प्रश्न—एइ ये विरोधिय लाटसकलेर कर्त्ता उत्तमचन्द्र ताहार पुष्य पुत्र विवेचना करण जैन्ये ओ उहार सत्व रक्षणार्थे मुतिचन्द्रके ओछि मकरर करिया अछियतनामा लिखियादिया मृत्यु हइल। ऐ मुतिचन्द्र मजकुरके आपन जीवत दशाय पुष्य पुत्रेर विवेचना करणेर सावकाश ना हइया प्राप्त हय। अतएव मुतिचन्द्रेर मृत्युर पर उत्तमचन्द्रेर स्त्री मुसम्मात मायाकोरुर पुष्य पुत्र विवेचना करणेर क्षमता राखे किना।

द्वितीय प्रश्न—यद्यपि जेइन शास्त्रे थाके तवे ऐ शास्त्रानुसारे ज्येष्ठ पुष्य पुत्र हइते पारे किना।

तृतीय प्रश्न—एइ ये जेइन शास्त्र मते कत वतसरेर पुत्र दत्तक हइते पारे, एवं ताहार संख्या कि।

चतुर्थ प्रश्न—एइ ये पुष्य पुत्र राखनेर एवं ताहार सिद्धि हओनेर जैन्ये कि कि नियम वटे इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरलेनसिलीसाहेवधर्म्माधिकरणलिखितैतदब्दीयमेमासीयाष्टादशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितमसीयतनामाख्यं पत्रं च यदेतदब्दीयजुनमासीयप्रथमदिनसम्बन्धिबुधवासरे सार्द्धघटिकात्रयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

विवादास्पदीभूतसराजक(र)स्थावरसमुदायस्य स्वामी उत्तमचन्द्रनाहारः स्वकीयपोष्यपुत्र[1]विवेचनाकरणार्थं मतिचन्द्रनाम्नोऽसीशब्दप्रतिपाद्यत्वेन नियोगं कृत्वा तस्मै चासीयन्नामाख्यं पत्रं लिखित्वा दत्त्वा मृतः स्यात्तस्यैव मतिचन्द्रस्य स्वजीवनदशायामुत्तमचन्द्रस्य पोष्यपुत्रविवेचनाकरणस्या[2]-वकाशेऽजाते सत्येव मरणेनोत्तमचन्द्रस्य पत्नी मायाकोमराख्या पोष्यपुत्र-विवेचनाकरणक्षमतां रक्षत्येव[3] जैनशास्त्रानुसारेण[4] पतिमरणानन्तरं पुत्र-वत्याः पत्न्याः पतिवत् कार्य्यमात्रकरणे स्वाच्छन्द्येन[5] पुत्रशून्यायाः[6] पत्यनु-मतौ सत्यामसत्यां वा ज्ञातीनाम्[7] आज्ञायां सत्यामसत्यां वा सर्व्वथैव पोष्य-[8] पुत्रकरणक्षमताया अर्थसिद्धत्वात् । तत्र चोत्तमचन्द्रनाहारेण स्वपितुः पाल-कपुत्राय मतिचन्द्राय स्वकीयपोष्यपुत्रविवेचनाकरणाज्ञायां दत्तायामपि दैवात् तदकृत्वैव मतिचन्द्रस्य मरणे[9] सत्यपि जैनशास्त्रानुसारेण पत्यनु-मतिमन्तरेणापि पोष्यपुत्रग्रहणाधिकारिण्याः पतिमरणानन्तरं पतिवत् स्वा-च्छन्द्येन, कार्यमात्राधिकारिणश्चोत्तमचन्द्रनाहारस्य पत्न्या मायाकोम-राख्या(या)स्तद्विवेचनाकरणक्षमतायामपि बाधकाभावाच्चेति ॥ ० ॥—

अत्र प्रमाणम्

यस्या स्त्रिया भर्त्ता[10] नास्ति सा यद् भव्यं तद्भावयतु-इति *गौतमप्रश्नी-यग्रन्थधृत*वर्धमानस्वामिवचनम् ॥ १ ॥

अस्मिन् जम्बूद्वीपे भरतक्षेत्रे कुरुजङ्गलदेशः स्थितः । तस्मिन् हस्तिनापुरे वज्रजङ्घाख्यो राजाऽभूत् । तस्य मह यवतीयतिदेवता वज्रमतीपट्टराज्ञी[11] आसीत् । तस्मिन्नेव नगरे कमलकान्ताख्यः कश्चि-देको धनी स्थितस्तस्य कमलाश्रीनाम्नी पत्नी बभूव । तस्य श्रेष्ठिनो

१. पौष्यपुत्र—व्यप० । २. पुष्पपुत्र—व्यप० । ३. रक्षत्येव—व्यप । ४. जेन—व्यप० । ५. स्वाच्छन्देन—व्यप० । ६. पुत्रशुन्यायाः—व्यप० । ७. यतीनाम्—व्यप० । ८. पौष्य—व्यप० । ९. मायो—व्यप० । १०. भत्ता—व्यप० ११. यट्ट०—व्यप० ।

द्वात्रिंशत्कोटिपरिमिता मुद्राः स्थिताः । तासु मध्येऽष्टकोटयो मुद्रा भूम्मध्ये निखाताः[1] पुनरष्टौ[2] कोटयो मुद्रास्तरणीषु, व्यवहारार्थं स्थापिताः, पुनरष्टौ कोटयो मुद्राः देशान्तरे व्यवहाराय प्रेपिताः, तदनन्तरमष्टौ कोटयो मुद्राः गृहेषु स्थापिताः । एवं त्रिंशत्सहस्रोत्तरद्विलक्षपरिमिता धेनवः स्थिताः । एवं तस्य पञ्चशतपरिमिता अधिकारिणः स्थिताः । तेषु मध्ये एको गाथापतिवंशोद्भवः सुमतिशिरोमणिनामधेयो[3] महामतिरासीत् । स तु धनिना कमलाकान्तेन पुत्रवन्मन्यते । स तु कमलाकान्तः किञ्चित्कालानन्तरं ज्वरातुरः सन् परलोकं गतवान् । ततः समर्पणानन्तरं स गाथापतिवंशोद्भवः सुमतिशिरोमणिर्विद्युत्पातेन[4] प्रणष्टः । तदनन्तरं कमलास्त्रियाः सहायाभावाद्धनरक्षाप्रमादो जातः । तदैकस्मिन् समये उदासीनतया मनस्येतद्विवेचितमिति । यदात्मीयं विना संसारादिरक्षा नो भवितुमर्हति, अत एकः पालकस्तु वा विधेयः । ततस्तस्मिन्नेव समये तदुद्यानपालेनागत्य श्रेष्ठिकां प्रति निवेदितम् । यदशोकवाटिकायां पञ्चदशशतपरिमितु[?]रश्चतुर्विधधर्मबोधशास्त्री(य)धर्मघोषसरितानामाचार्य्यस्समागतः[5] । तस्य दर्शनार्थं हस्तिनापुरवासिभिस्तत्रैव गम्यत इति । तत उद्यानपालाभिहित निशम्य कमलास्त्रिया श्रेष्ठिकया धनवत्या तद्दर्शनार्थं तत्रैवोपस्थितम् । (तत्र च) धर्म्मपुराणीयकथाश्चिशम्य तमाचार्य्यमञ्जलिं बद्ध्वा "भो भगवन्, मम स्वामिनाशरक्षा धनरक्षा आत्मनोऽपि रक्षा कथं भवेदिति" पृष्टम्[8] । तदा श्रेष्ठिकाभिहितं श्रुत्वा आचार्य्येण वक्तुमारब्धम्[9] । "वरं यदद्य[10]प्रभृति मासाभ्यन्तरेऽशोकवाटिकायां खलु पर्शोरालये[11] क्षत्रियजातयो द्वात्रिंशद्वर्षवयस्कवृद्धदेवराजसप्तविंशतिवर्ष-

---

१. निखाता:—व्यप० ।
२. अष्टौ० व्य० प० ।
३. नामधेयो—व्यप० ।
४. विद्युत्पातेन—व्यप० ।
५. मनसे—व्यप० ।
६. चतुर्विधबोधशास्त्रीधर्म्मघोष—व्यप० ।
७. °स्तनागतः—व्यप० ।
८. पष्टम्—व्यप० ।
९. वक्तुं—व्यप० ।
१०. यद्दद्य—व्यप० ।
११. पर्शो—व्यप० ।

वयस्कद्वितीयहंसराजद्वाविंशतिवर्षवयस्कतृतीयधनराजषोडशवर्षवयस्कचतुर्थधर्मसंज्ञाख्या एकमातृका महाजना आगमिष्यन्ति। तन्मध्ये अभिलषितमेकं कञ्चित् पुत्रत्वेन स्वीकुर्विति'' तदनन्तरमाचार्य्यमुखात् श्रेष्ठिका तेषां वार्तां श्रुत्वा सुप्रसन्नेव तन्नमस्कृत्य पुनः पृच्छति। ''यतः किं कृत्वा स्वे······· इति।'' तदभिहितं निशम्याचार्यो वदति स्म। ''यदग्रे ऋषभदेवस्य नवाङ्गानि पूज्यानि, तदनन्तरं गुरुपुस्तकयोः पञ्चोपचारेण, षोडशोपचारेण वा पूजा कार्य्या'' इत्युक्तम्। एवं गुरुभक्तिर्विधेया, पश्चाद् गुरुमुखान्मङ्गलवाक्यं श्रुत्वा पश्चान्निजकुलदेवीं प्रपूज्य तदनन्तरं चतुर्विधसिंहसान्निके एवं देशाधिपतिसमीपे पुत्रं गृहीत्वा निजज्ञातीयभोजनाय भक्तिर्विधेया इत्य······· दम्पतीर्भोजयित्वा एवं शुभमुहूर्त्तं दृष्ट्वा 'नमो अरिहंताणम्' इत्युक्त्वा तं स्वपदं निवेश्य चन्द्रोलीतिलकबिन्दुमुक्तादामतृणफुलफलचूर्णानि तस्मै दातव्यानि एवं शङ्खध्वनिर्भेरी(ध्वनिः) पुनर्नानावाद्यनृत्यादिकं कर्त्तव्यम्। एवं प्रकारेण पुनः सौभाग्यवतीभिः स्त्रीभिः सहगीतध्वनिः[१] स्वीयस्वीयमुखेन नानाविधमङ्गलाचारो विधेयः। एवं श्रद्धया निजज्ञातिभ्य एवाथवाऽन्येभ्यो[२] द्रव्यमथवा श्रीफलादि दातव्यम्। एवं निर्द्धनश्चेत्तेन[३] पुगी[४]फलमेव दातव्यम्। रात्रिजागरणमपि विधेयम्। तम्बूलादिकमपि प्रत्येकं प्रत्येकं दातव्यम्। अधिकं तु आचारादि आकरे द्रष्टव्यम् (?)। अत्र किंचिन्मात्रमुक्तम्[५]। श्रीवर्द्धमानस्याभिहितं वाक्यं श्रुत्वा पुनर्वदति[६] ''भगवन्, कदाचिदसौ धर्म्मे न स्थास्यति, यतः स्वे (?) ··· पुत्रो यदि मम सेवानिरतो न भवेदेवं कुव्यसनेन धनक्षयं कुर्य्यात्, तदा मया किं कर्त्तव्यम्'' इति। तदीयं वाक्यमाचार्य्येण श्रुत्वा पुनरुक्तं ''यद्यप्यसौ धर्म्मे न स्थास्यति तदा त्याज्यो यथा अहिना दष्टमङ्गुष्ठं जनैस्त्यज्यते, तथा यः पोष्यपुत्रस्तं[७] कथं न त्यजेत्'' इति तदीयाभिहितं श्रुत्वा पुनस्तमाचार्य्यं नमस्कृत्य निजगृह-

१. ध्वनिः—व्यप०। २. निजज्ञातिभ्यरेवमथवा अन्यद्रव्यमं—व्यप०।
३. निर्धनश्चेतेन—व्यप० ४. श्चेतेन पुंगाफलम्—व्यप०।
५. किञ्चिन्मात्रेण—व्यप०। ६. पुनःर्वदति—व्यप०।
७. सो पुष्पपुत्रम्—व्यप०।

मागत्य तत्राशोकवाटिकायां[1] चत्वारः सेवका नियोजिताः। यदा[2] मासः पूर्णो जातस्तदा आचार्य्यनिर्दिष्टाश्चत्वारो महाजनास्तस्यामशोकवाटिकायामागताः। तेषामागमनं दृष्ट्वा श्रेष्ठिकानियोजिता आगत्य कमलाश्रियं प्रति तेषामागमनवृत्तान्तं विज्ञापितवन्तः। कमलाश्रीरपि तद्वृत्तान्तं[3] श्रुत्वा तांश्चतुरो[4] गृहमानीय आचार्य्याज्ञया पुत्रत्वेन तेषां ज्येष्ठं देवराजाख्यं स्वीकृतवतीति गौतमप्रश्नीयग्रन्थलिखनम् ॥१॥

श्रीसिंहपुरनगराधिपतेः सिंहसेनस्य सिंहावतीनाम्नी महिष्यासीत्। तया सह सुखेन राज्यं कृतम्। तत्रानन्दपरमानन्ददेवानन्दाः क्षत्रियवंशोद्भवाः दुःखिनस्त्रयो भ्रातरः। तेषु मध्ये आनन्दाभिधान एको भ्राता धेनुं जुगोप। परमानन्दाभिधानो द्वितीयो भ्राता विविधकाष्ठमानीय विक्रयामास। देवानन्दाभिधानस्तृतीयो भ्राता शिशुः स्थितः। तदा सर्व्वैर्न्नगरस्थैर्ज्जनैरानन्दस्य गोपाल इति नाम कृतम्, द्वितीयस्य परमानन्दस्य काष्ठजीवीत्यभिधानं कृतम् परन्तु ते त्रयो भ्रातर एकस्मिन्नेव स्थाने स्वकीयं स्वकीयं कार्यं कृतवन्तः। तत्रैकं यतिं विलोक्य त्रिभिर्भ्रातृभिर्मिलित्वा तं यतिं नत्वा स्थितम्। तदा स यतिस्तान् प्रति धर्म्ममुपदिष्टवान्। तदा ते मुनिधर्म्मोपदेशं निशम्य प्रीतिरता बभूवुः। पुनः साध्याननात् परिमितं वाक्यं श्रुत्वा तेनाभ्यस्तं रात्रौ जलं न पातव्यमिति। तत्र कानने पुनश्च धेनुं पालयता तत्रैव निम्नगाकूले श्रीऋषभदेवस्य मृन्मयीं[5] प्रतिमां विधाय[6] तत्रैवैकं गृह कारयित्वा तन्मध्ये श्रीभगवतः प्रतिमा स्थापिता। तत्र प्रतिदिनं तेन तदर्च्चनं कृतम्। तत एकस्मिन् समये ऋषिमुखात् भक्तामरस्य माहात्म्यं शुश्राव। ततः ऋषिरानन्दं भक्तामरं पाठयित्वा जगाम। तदनन्तरमानन्दाख्यः श्रीभगवतोऽग्रे प्रतिदिनं भक्तामरं स्मरतिस्म[7]। तदेकस्मिन् दिने चक्रेश्वरीनाम्नी देवी प्रत्यक्षमागत्या[8]-

---

१. तत्रानेकवाटिकायम व्यप०। २. तदा व्यप०।
३. तद्वृत्तान्तम्० व्य० प०। ४. ताश्चतुरो व्यप०।
५. मृरामयीं व्यप०। ६. प्रतिमामभिधाय व्यप०।
७. स्मृति स्म व्यप०। ८. प्रत्यक्ष प्रागत्य व्यप०।

स्मिन्नगरेऽधिपति (स्त्वं) भविष्यसीति वरं दत्त्वा अन्तरहिता[1] जाता। ततः किञ्चित्कालानन्तरं तन्नगरस्याधिपतिर्मृतःतस्यात्मजो न स्थितः। तदनन्तरं तस्य महिषी सिंहावती नाम्नीपुत्रशोकातुरा षण्मास[2]...र्द्धदिन पर्य्यन्तं राज्यं कृतवती। तदैकस्मिन् समये वनयात्रार्थं माहषी सखीभिः[3] सह मिलित्वा वनं जगाम। तत्र कानने निम्नगाकूले एक स्थानं दृष्टवती। सिंहावतीनाम्नी राज्ञी तत्रालये गत्वा श्रीऋषभदेवस्य मृन्मयीं[4] प्रतिमां विलोक्य तस्याः प्रतिमायाः स्तुतिं चकार। पुनस्तस्याग्रे आनन्दो भक्ता-मरं[5] स्मरति[6]स्म। तत्रैव परमानन्ददेवानन्दौ स्थितौ। तान् त्रीन् भ्रातृन् विलोक्य मनस्येतद्विवेचितम्—यतो मम पुत्रा[7] न स्थिताः किन्त्वद्य भगवता ऋषभदेवेन त्रयः पुत्रा मह्यं दत्ताः, अद्यैव मदीयं सर्व्वं दुःखं गत-मिति" महिषी विचार्य्य आनायितान् तान् पुनः पुनर्विलोक्य पृच्छति स्म "हे वत्साः, युष्माकं किमाख्यास्तद् युष्माभिः प्रकाशनीयाः।" तदा त्रयो भ्रातरोऽञ्जलिं बद्ध्वा, तन्मध्ये आनन्दाभिधेयो ज्येष्ठभ्राता वदति स्म "हे अम्ब, वयं त्रयः सहोदराः, मम आनन्द इत्यभिधानम्, द्वितीयस्य परमानन्द इत्यभिधानम्, तृतीयस्य देवानन्द इत्यभिधानम्। तन्मध्ये ज्येष्ठ आनन्दाभिधानः श्रीऋषभदेवस्याग्रे सिंहवत्या महिष्या पुत्रत्वेन स्वीकृतः। तस्मात् काननात् कश्चिदेको भृत्यः स्वग्रामे प्रेषितः 'त्वया तत्र गत्वा[8] सुमत्यधिकारिणं प्रति वक्तव्यम् भवता-चन्द्रशेखर-कर्णलोचन-रूपसेना-ख्यैरमात्यैः सह पञ्च द्रव्याणि शङ्खादीनि गृहीत्वा तत्र गन्तव्यमिति'। तत्रैव तस्मिन् समये श्रीसिंहकेशरसूरि[9]नामाचार्य्यस्समागतः। तत्रै-वानन्दाख्येन पुत्रेण सह महिषी धर्म्मोपदेशमाकर्ण्य तमाचार्य्यं पृच्छतिस्म "भगवता पोष्यपुत्रोत्सवो वक्तव्यः" तदीयाभिहितं निशम्य वक्तुमारब्धम् "यतो[10] गोतमप्रश्नीयवत् श्रीमज्जिनेश्वरस्य नवाङ्गीं पूजां कृत्वा पश्चाद्

---

१. अहिता—व्यप० ।
२. षड्मास—व्यप० ।
३. सखिभिः—व्यप० ।
४. मृरामयीं०—व्यप० ।
५. भक्तारमरम्—व्यप० ।
६. स्मृतिस्म—व्यप० ।
७. म प्रपुत्रान—व्यप० ।
८. गत्रा—व्यप० ।
९. ०सरि—व्यप० ।
१०. पतो—व्यप० ।

गुरुपुस्तकज्ञानोपकरणवस्त्रद्रव्यादिपूजा पञ्चोपचारेण पोडशोपचारेण वा कार्य्या'' इत्युक्तम् ''औरस पुत्र जन्मोत्तरसमयोत्सववत् पालकपुत्रोत्सवः कर्त्तव्यः । तदनन्तर चतुर्व्विधसिंहसाक्षके निजकुलदेवी पूजनीया, तदनन्तरं स्वकीयज्ञातिभ्यो भोजनं मिष्टान्ने रससंयुक्तैर्दद्यात् । तदनन्तरं ताम्बूलवस्त्रद्रव्यश्रीफलपूगीफलानि[1] च प्रत्येकं दातव्यानि एतदपेक्षया धर्मपत्रोत्सवादाचाराचारादनकरे द्रष्टव्यः'' । एतत् सिंहकेसरसूरिणाचार्य्येणोक्तम् तदा पूजाद्रव्यं गृहीत्वा अमात्यैः सह सुमितिराजगाम । पुनः सिंहावती राज्ञी आनन्देन सह श्रीऋषभदेवस्य मृन्मयीं प्रतिमां विधाय षोडशोपचारेण प्रतिमां प्रपूजितवती । तदनन्तरं तस्य स्तुतिसमये श्रीऋषभदेवस्य सकाशात् पुष्पमानन्दस्य[2] शिरसि पपात । तदा आकाशात् ''जय जय'' इति शब्दो जातः । इत्याश्चर्य्यम् तदा सुमतिना चन्द्रशेखरकर्णलोचनरूपसेनाख्यैर्मन्त्रिभिः सह ५(अ) तद्द्रव्याणि गृहादानीय तस्य आनन्दस्याग्रे स्थापितानि । तदनन्तरं तैः पञ्चद्रव्यैःतत्तत्कार्य्याणि तेन कृतानि । तदनन्तरं तस्मात् काननात् अमात्यैः सह शङ्खवादित्रभेरीनानाप्रकारादिध्वानगीतादिज्ञातिसोभा(ग्यवती[3]) दिभिः सह महामहोत्सवमानीय स्वगृहमागत्य आनन्देन राज्यसिंहासने स्थिता । तस्य परमानन्दो द्वितीयो भ्राता युवराजः कृतः । तस्य देवानन्दस्तृतीयो भ्राता भटपतिः कृतः । किञ्चित् कालानन्तरं तद्देशाधिपतिभिः सह तस्य युद्धमभूत् । पुनस्तान् जित्वा सुखेन राज्यं कृतवान् । इति भक्तामरस्तुतिग्रन्थलिखनम् ॥ ३ ॥

द्वितीयप्रश्नस्योत्तरम्—

जैनशास्त्रानुसारेण ज्येष्ठपुत्रः पोष्यपुत्रो भवितुं शक्नोति, जैनशास्त्रे ज्येष्ठपुत्रस्य पोष्यपुत्रताया निषेधाभावात्, तच्छास्त्रे पूर्व्वेषां तच्छास्त्रानुसारेण व्यवहरतां राज्ञां वणिजां च स्त्रीणां ज्येष्ठपुत्रस्य पोष्यपुत्रकरणस्य लिखितत्वेनेदानीन्तनानामपि जैनशास्त्रानुसारेण व्यवहर्त्रीणां स्त्रीणां तथा व्यवहारस्य भवितु शक्यत्वाच्चेति —

---

१. पूगीफलानि व्य० प० । २. प्रतिमामभिधा—व्यप० ।

३. ०भाचन्द—व्यप० ।

अत्र प्रमाणानि उपरिलिखितानि त्रीणि ॥ २ ॥

भो गौतम, अस्माकं मते ज्येष्ठकनिष्ठत्वे दत्तकः शिशुर्ग्राह्यः सर्व्वलक्षणसंयुतः––इति गौतमप्रश्नीयग्रन्थधृतवर्द्धमानस्वामिवचनम् ॥

तृतीयप्रश्नस्योत्तरम्—

जैनशास्त्रानुसारेण गर्भाधानदिवसमारभ्य द्वात्रिंशद्वर्षपर्य्यन्तवयस्कः पोष्यपुत्रो भवितुं शक्नोति ॥०॥०॥

अत्र प्रमाणम्—

कियद्वायनमितवयस्कः पुत्रो ग्राह्य इति गौतममुनेः प्रश्नः । *यदा तदा भगवता वर्द्धमानस्वामिनोक्तम् स गर्भमारभ्य द्वात्रिंशद्वर्षपारमितवयस्कः पुत्रोग्राह्यः* — इति गौतमप्रश्नीयग्रन्थलिखनम् ॥०॥०॥०॥

चतुर्थप्रश्नस्योत्तरम्—

जैनशास्त्रानुसारेण पोष्यपुत्ररक्षणार्थमेवं तत्सिद्ध्यर्थमेते[1] नियमाः । तथाहि––*ऋषभदेवाख्यस्य तद्देवस्य प्रथमतो नवाङ्गपूजनं तदनन्तरं गुरुपुस्तकयोःपञ्चोपचारेण षोडशोपचारेण वा पूजा कार्य्या एवं गुरुभक्तिर्विधेया, पश्चाद् गुरुमुखात् मङ्गलवाक्यं श्रुत्वा निजगुरुदेवीं प्रपूज्य गुरुगुरुपत्नीज्ञातिज्ञातिपत्नीनां चतुर्णामेवं ग्रामाधिपतेर्निवेदनं कृत्वा पुत्रं गृहीत्वा निजज्ञातीनां सपत्नीकानां भोजनं दत्वा शुभमुहूर्त्तं दृष्ट्वा[2] मन्त्रपाठपूर्व्वकं स्वस्थाने बालकमुपवेश्य रोलीयतिलकबिन्दुमुक्तबिन्दुं तण्डुलचूर्णानि वा तस्मै ललाटे दातव्यानि, एवं शङ्खध्वनिभेरीत्यादिनानावाद्यनृत्यगीतादि नानाप्रकारेण सौभाग्यवतीभिः स्त्रीभिः स्वीयस्वीयमुखेन नानाविधमङ्गलाचारो विधेयः । एवं श्रद्धया[3] स्वज्ञातिभ्यो वस्त्रद्रव्यताम्बूलश्रीफलपूगीफलानि दातव्यानि[4]; निधनश्चेत् पूगीफलमेव दातव्यम्, रात्रिजागरणमपि विधेयम्*-इति गौतमप्रश्नीयभक्तामरस्तुति-

---

१. सिद्धर्थम् व्यप० ।
२ दृष्टा व्यप० ।
३. श्रद्धया व्यप० ।
४. दालव्यानि व्यप० ।

सन्तनाथचरित्ररूपसेनचरित्रप्रश्नोत्तरसार्द्धशतकराजप्रश्नसूत्रसिद्धान्तादिजैनशास्त्रानुसारिणी व्यवस्था ।

अत्र प्रमाणानि प्रथमप्रश्नोत्तरलिखितप्रमाणान्येवेति—

एतदब्दीयजुलाइमासीयाष्टाविंशतिदिनसम्बन्धिबृहस्पतिवासरे[1] यामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रण

श्रीदुर्गा

१०७—रुबकारि आदालत देओानी सदर इंरसन १८३१ शाल तारिख ४ माहे जुन मोतावेक सन १२३८ शाल तारिख २३ ज्यैष्ठ रोज शनिवार एइ आदालतेर हाकिम श्रीयुत कटबरट थरनेल शिलां साहेबेर वैठके—

कमलाकान्तराय ओ शम्भुचन्द्रराय वनाम गङ्गाचरणसेन । साएलानेर उकिल मुनशी होशन आलि ओ सदासुकपण्डित, विपक्षेर उकिल मुनशी गोलाम वतुल ओ मुनशी फजर होसेन हाजिर आसिलेन । एइ आदालतेर हाल सनेर २१ आपरेलेर हुकुमानुसारे शाएलानेर खास आपिलेर सओयाल ओ ताहार सम्पर्कीय कागजातसकल अद्य आनार वेठके दरपेष हइया एइ आदालतेर हाकिम रावर्ट[2] हालडन राटरि साहेवेर ऐ तारिख मजकुरेर रुवकारि ओ आदालत मजकुरेर हाकिम हेनरि शिकिषपिएर साहेबेर हाल सनेर १४ मार्चेर रुवकारि सम्वलित मोलाहेजा हइवाते एइ मकद्दमार चूडान्त

१. शम्यान्ध—व्यप० ।

२. गावट—व्यप० ।

हुकुम प्रकाश हइवार पूर्व्वे एइ आदालतेर पण्डितेर द्वाराय ए विषय ज्ञात हओया आवश्यक हइलो —ये जगमोहनरायेर पुत्र महेशचन्द्ररायेर मृत्युर पर महेशचन्द्ररायेर भगिनी श्रीमती ऐ मृत्यु व्यक्तिर त्याज्य वस्तुते ओयारिष मते हिस्या पाइवार सत्व राखे कि, ताहार खुल्यतातगण कमलाकान्तराय ओ शम्भुचन्द्रराय। अतएव हुकुम देया याइतेछे—ये ऐ रुवकारिर सकल कागजात सम्वलित एइ हुकुमे एइ आदालतेर पण्डितेर स्थाने समर्पण करा जाय—ये कागचसकल दृष्टे करिया निचेर प्रश्नेर उत्तर ओ पाच दिवसेर मध्ये लिखेन।

प्रश्न :—

यदि स्यात् परगणे हावेलि शिलामावादेर ~१० देड आनार मालिक कृष्णकिङ्कररायेर पुत्र लक्ष्मीकान्तराय ओ जगमोहनराय ओ शम्भुचन्द्रराय, एइ चारि भ्राता पैतृक जमिदारिर उपर आपन २ हिस्या मते दखिलकार थाकेन। प्रथमत लक्ष्मीकान्तराय निःसन्तान, ओ ताहार पर जगमोहन आपन पुत्र महेशचन्द्रराय ओ श्रीमती कन्याके राखिया मृत्यु हय। महेशचन्द्रराय आपन पैतृक हिस्यार उपर दखिलकार थाकिया ओ श्रीमती भगिनी ओ कमलाकान्तराय ओ शम्भुचन्द्रराय खुल्यतातगण राखिया निःसन्तान मृत्यु हय, ओ ताहार स्त्री सहगामिनी हय। अतएव महेशचन्द्ररायेर त्यज्य वस्तु ताहार भगिनी श्रीमती, ये इक्षण ताहार एक नावालक पुत्र आछे, अर्शिवेक, कि ताहार खुड़ागण शम्भुचन्द्रराय ओ कमलाकान्तरायेके अर्षिवेक इति।०।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतकटवरटथरनेलसिलीसाहेवधर्म्माधिकरणलिखितैतद्वर्षीयजुनमासीयचतुर्थदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपप-

त्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं च यदेतदब्दीयजुलाइमासीय-नवमदिनसम्बन्धिशनिवासरे सार्द्धघटिकात्रयाधिकयामद्वये मया प्राप्तं तदव-लोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति महेशचन्द्ररायस्य मरणोत्तरं तत्-स्वत्वास्पदीभूतधने यदि तस्य पुत्रमारभ्य पितुः) प्रपौत्रपर्य्यन्तो न स्यात्, पितृदौहित्रो गर्भे व्यवस्थितो भूमिष्ठो वा तन्मरणसमये स्यात्, तदा तस्या-धिकारः। जाते च तस्याधिकारे पुनरुत्पत्स्यमानानां तद्भ्रात्रन्तराणा-मर्थान्महेशचन्द्रस्य पितृदौहित्रान्तराणामप्यधिकारः समान एव भविष्यति। सति च पितृदौहित्रे तत्पितृव्ययोः शम्भुचन्द्ररायकमलाकान्तराययोर्ना-धिकारः। यदि च महेशचन्द्ररायस्य पुत्रमारभ्य पितुः प्रपौत्रपर्य्यन्तरहि-तस्य पितृदौहित्रो गर्भे व्यवस्थितो भूमिष्ठो वा तन्मरणसमये नासीत्, तदा तत्पितृदौहित्राणां स्वत्वान्यथानुपपत्त्या तद्भगिन्याः श्रीमत्यास्तत्पितृ-दौहित्रोत्पत्तिमूलीभूतायास्तत्सम्बन्धमूलीभूतायाश्च स्वपुत्रोत्पत्तेः प्राक्काल-पर्य्यन्तं यथा पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य पितृधने दुहितुरधिकारस्त-था भ्रातृधनेऽप्यधिकारः। सति च महेशचन्द्रस्य पितृदौहित्रे स्वतो महेश-चन्द्रस्य पितुः पार्व्वणश्राद्धपिण्डदातरि स्वतो महेशचन्द्रस्य पितुः पार्व्वण-श्राद्धपिण्डदानानधिकारिण्यास्तद्भगिन्याः श्रीमत्या नाधिकारः। किन्तु तस्याः पुत्रस्यैव पुत्राणां वोपरिलिखितप्रकारेणाधिकारः—इति वङ्गदेशप्रच-लितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवादिग्रन्था-नुसारिणी व्यवस्था ॥१०॥

अत्र प्रमाणम्—

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनि-दौहित्रस्येव इति—दायभाग(पृ० २०८)ग्रन्थलिखनम् ॥ १ ॥

दृश्याद्वा तद्विभागः स्यादायव्ययविशोधिताद्—इति दायभागादि (दाभ भा. पृ० १३२)ग्रन्थधृतयाज्ञवल्क्य(२।१२२)वचनम् ॥ २ ॥

तदभावे पुनः पितृदौहित्र इति, तदभावे पितामहस्तदभावे पिता-मही, तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयः—इति च श्रीकृष्णतर्का-लङ्कारकृतदायभागटीका(पृ० २१८)लिखनम् ॥३॥

पत्नीदुहितरश्चैव—इत्यादि दायभागादि(दाभा. पृ० १५१)ग्रन्थधृतयाज्ञवल्क्य २।१३५ वचनम् ॥४॥

यद्यपि दुहित्रभावे दौहित्रस्येव भगिन्या एव प्रागधिकारो युक्तः तथापि तस्याः स्त्रीत्वेन पार्वणपिण्डदत्वाभावान्नाधिकारः, दुहितुस्तु दौहित्रात् पूर्व्वमङ्गादङ्गात् सम्भवति—इत्यादिविशेषवचनादेवाधिकारः इति भावः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटोका(पृ० २१०) लिखनम् ॥५॥

एतदन्दीय-अगस्त्यमासीयप्रथमदिनसम्बन्धिसोमवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्ता इति ।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१०८ गोवकारि मिछिल सदर देओयानि आदालत हेनरि शिकशीपियर साहेव आदालत मजकुरेर हाकिमेर बैठके तारिख ७ शेनम्बर इ० सन १८३१ मोतावाक २३ भाद्र वाङ्गला सन १२३८ साल रोज बुधवार ।

आनन्दमर्य्यादेवी छाएला

छाएलार उकिल मुनशी गोलाम वतुल ओ राधामोहनमिश्रिर उकिल मुनशी होशन आलि ओ श्रीमन्तमिश्रि ओ रामनायण आचार्य्येर उकिलान् मुनशी दादार वकुशी ओ मौलुवि करम होशन हाजिर आइल । एइ आदालतेर हाकिम माण्टेकु हेनरि टरम्वल साहेवेर शन हालेर १६ आगष्ट तारिखेर हुकुम मोतावक एइ मोकद्दमार शओयाल ओ गयरह कागजात एइ आदालतेर हाकिमान् रावट हालदन राटरि शाहेव ओ आलकसुन्दर रास साहेव ओ माण्टेकु हेनरि टरम्वल साहेवेर सन हालेर ३० जुन ओ १९ जुलाइ ओ १६ आगष्टेर लिखित[1] राय सम्वलित

---

१. लिलित—व्यप० ।

हइछे आइल । तत परे छांयेलार उकिल मुनशी गोलाम वतल आपेलार तरफ हइते एक केता सओयाल दाखिल करिलेक, पडा-गेल । यथा ए विषय ये नाबालकेर मृत्युर पर प्रथमतो शास्त्रानु-जाइ कोन व्यक्तिके ताहार उत्तराधिकारित्व, अर्शिबे, आर कि प्रकारे मोल्लुमात आनन्दमयी ओ राधामोहन नाबालकेर उत्तरा-धिकारि ओ हकदार हइबेक, अनुमोदन करा उचित हइल । अतएव हुकुम हइल ये—आनन्दमयी ओ राधामोहनमिश्रेर आइल दुइ दरखास्त, जाहा एइ आदालतेर हाकिमानेर राय ले-खार पर दाखिल हइयाछे, एइ आदालतेर पण्डितके एइ हुकुमे समर्पण करा जाय-ये पण्डित मजकुर उपरेर लिखित विशेर जओयाब ततक्षणात लिखिया दाखिल करे, एवं मोकद्दमा मुलतवि थाके इति ।

श्रीर्जयतितराम्

———

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकसपीयरसाहेबधर्म्माधिकरण-लिखितैतःब्दीयसितम्बरमासीयसप्तमदिवसीयचित्रपत्रान्तर्गतप्रश्नप्रतरूप-पत्रमेतं तत्समर्पितमानन्दमयीदेव्या निवेदनपत्रं राधामोहनमिश्रस्य निवेदन-पत्रञ्च यत्तन्मासीयसप्तदशदिनसम्बन्धिशनिवासरे पादानघटिकाचतुष्टया-धिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारे-णोत्तरं लिख्यते ।

पुत्रमारभ्य पितुः प्रपौत्रपर्य्यन्तरहितस्याप्राप्तव्यवहारस्य[1] मरणोत्तरं प्रथमतस्तत्पितृदौहित्रस्याधिकारः, यदि च तत्पितृदौहित्रस्तस्यैवाप्राप्तव्यव-हारस्य मरणसमये गर्भे व्यवस्थितो भूमिष्ठो वा न भविष्यति, तदा तत्पितृ-दौहित्राणां स्वत्वान्यथानुपपत्त्या तद्भगिन्योरर्थाद् हल्यारुक्मिण्योः तत्पितृ-दौहित्रोत्पत्तिमूलीभूतयोस्तत्सम्बन्धमूलीभूतयोश्च[2] तत्पितृदौहित्रोत्पत्तेः प्राक्कालपर्य्यन्तं यथा पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य पितुर्धने दुहितु-

१. °रहितस्य०—व्यप० । २. °सम्बन्ध०—व्यप० ।

रधिकारस्तथा भ्रातृधनेऽप्यधिकारः। सत्सु चाप्राप्तव्यवहारस्य पितृदौहित्रेषु स्वतोऽप्राप्तव्यवहारस्य पितुः पार्व्वणश्राद्धपिण्डदातृषु स्वतोऽप्राप्तव्यवहारस्य पितुः पार्व्वणश्राद्धपिण्डदानानधिकारिण्योरप्राप्तव्यवहारस्य भगिन्योरर्थादहिल्याकामरण्योर्नाधिकारः; किन्त्वप्राप्तव्यवहारस्य भगिन्योः पुत्राणामेवाधिकारः तत्पितृदौहित्राभावे तत्पितामहस्य, तदभावे तत्पितामह्या अर्थादानन्दमय्यास्तदभावे तत्पितुः सोदरभ्रातुस्तदभावे तत्पितुर्वैमात्रेयभ्रातुस्तदभावे सोदरभातृपुत्रस्य तदभावे तत्पितुर्वैमात्रेयभ्रातृपुत्राणामर्थाद्रामामोहनप्रभृतीनामधिकारः—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवविवादार्णवसेतुदायक्रमसंग्रहादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतः—इत्याद्युपरिलिखित(दाभा. पृ० १५१ ग्रन्थधृतय ज्ञवल्क्य २।१३५ वचनम् ।१।।

पितृगामपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनदौहित्रश्चैव—इति दायभाग पृ० २०८ ग्रन्थलिखनम् ।।२।।

यद्यपि दुहित्रभावे दौहित्रस्येव भगिन्या एव प्रागधिकारो युक्तस्तथापि तस्याः सोतेन पार्व्वणपिण्डदत्वाभावान्नाधिकारः, दुहितुस्तु दौहित्रात् पूर्व्वमनुक्तत्वात् सम्भवात इत्यादिविशेषवचनादेवाधिकार इति भावः—इतिश्रीकृष्णतर्कालङ्कारकृतदायभागटीका पृ० २१०)लिखनम् ।।३।।

तदभावे पुनः पितृदौहित्र इति। तदभावे पितामहस्तदभावे पितामही तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयस्तदभावे पितृसोदरःपुत्रःपितृवैमात्रेयपुत्रःपितृसोदरपौत्रःपितृवैमात्रेयपौत्राणां क्रमेणाधिकारः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनञ्चेति ।।४।।

एतदब्ददीयसतम्बरमासीयषड्विंशतितिदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१०९ रोवकारि मिसिल आदालत देओयानि सदर तारिख २२ माह नवम्बर शन १८३१ इ० मतावक ८ माह अग्रहायण शन १२३८ वाङ्गला रोज मङ्गलवार ए आदालतेर हाकिम श्रीयुत मान्तेगिओ हेनरि टरम्वल साहेवेर वैठके।

मृत काशीनाथदत्तेर स्त्री करुणामयी प्रभृति—आपीलाण्टान्

चन्द्रमालार पति जयचन्द्र घोष— रेष्पाडण्ट

आपीलाण्टगणेर उकिलगण मुनशि दादार वकस ओ मुनशी गोलाम वतुल, रेष्पाडण्टेर उकिल सदासुक पण्डित हाजिर आसिल। ए मकद्दमा एइ शनेर माइ मासेर २५ तारिखेर हुकुमानुसारे अद्य आमार वैठके उपस्थित हइया एइ मकद्दमा वावत आदालतेर पण्डितेर व्यवस्था ओ कोर्टेर फयशला ओ छानि तजविजेर दरखास्त ओ इ० १८३० शालेर जुलाइ मासेर २५ तारिखेर लिखित ए मकद्दमार इनफशालि रोवकारि ओ कमलाकान्तराय प्रभृति वनाम गङ्गाचरणसेनेर मकद्दमा वावत ए आदालतेर पण्डितेर व्यवस्थार नकल याहा रेष्पाडण्टेर उकिले दुइ टाका मुल्लेर एक किता फेहरेस्त द्वाराय अद्य लम्वरे दाखिल करिलेक दृष्ट आसिल। ताहार पर आदालतेर पण्डितके हुजुरे तलव दिया (जिज्ञा)सा करागेल—ये तोमार दाखिल करा व्यवस्थाय चन्द्रमालार स्वत्वेर उल्लेख केन छुटीयाछे, एइ क्षण तोमार अन्य व्यवस्थार द्वाराय, याहा रेष्पाडण्टेर उकीले अद्य दाखिल करिलेक, जाना जाइतेछे ये चन्द्रमाला ओ श्रीमतिर न्याय ये दौहित्रगणेर उतपत्तिर करण वटे, गोराचान्देर त्यक्तेर स्वत्वाधिकारिणि वटे। ताहार उत्तर निवेदन करिलेन ये हजुर हइते एइ परिमाण सओयाल हइयाछिल ये शास्त्रानुसारे कोर्टेर पण्डितेर व्यवस्था यथार्थ वटे कि ना, ओ ऐ व्यवस्थाय कोर्टेर पण्डिते चन्द्रमालार पुत्रके स्वत्वाधि(कारि) लिखियाछिल, ओ ततकालिन अर्थात पूर्व्वाधिकारिर मृत्युर पर लालमोहनेर, ये ताहार माता अप्राप्त व्यवहारा स्थिल, जन्म हइयाछिल ना, ओ ये व्यक्तिर उत्पत्ति

ना थाके ताहार स्वत्व कोथा हइते अर्शिबेक। एइ हेतुक ताहाके अयथार्थ लिखियाछिलाम; ओ फलितार्थ गोराचान्देर मृत्युर-पर ताहार अन्य उत्तराधिकारिगण वर्त्तमान ना थाकने गोराचान्देर भग्नि मुसम्मात चन्द्रमाला, ये से गोराचान्देर पितृदौहित्र गणेर उत्पत्तिर कारण वटे, आपन भ्रातार मिलकीयतेर स्वत्वाधिकारिणि हइवेक; एवं ए विशयेर विस्तारित एइ व्यवस्थाय याहा अद्य रष्पाडण्टेर उकिले दाखिल करिलेक, लिखा आछे इति। ऐ पण्डितेर एजहार दृष्टे उचित हइल ये निचेर सओयाल एइ आदालतेर पण्डितेर पर करा जाय।

सओयाल—यद्यपि पूर्व्वाधिकारि निलकण्ठ तिन पुत्र, प्रथम कृष्णप्रसाद, द्वितीय प्रतापनारायण, तृतीय किर्त्तिनारायणके, राखिया मरे; ओ कृष्णप्रसादह तिन पुत्र रामराजा ओ रामकृष्ण ओ काशीनाथके राखिया मरिलेक; ओ प्रतापनारायण ओ एक पुत्र कालाचादके राखिया मरिल ओ कीर्त्तिनारायणह पुत्र गोराचान्द आ चन्द्रमाला कन्याके राखिया मरिलेक; ओ ततपरे गोराचान्दह निस्वन्तान मरिलेक। अतएव शास्त्रानुसारे किर्त्तिनारायणेर त्यत्य, याता ताहार पुत्र गोराचन्द्रके अर्शियाछिल, चन्द्रमालाके अर्शे, किम्वा कोन व्यक्तिके। उचित ये ताहार जवाव तिन दिवसेर मध्ये दाखिल करण इति ॥०॥

एतद्धर्म्माधिकरणाधिपतिश्रीयुतमान्तकीयूहेनरीटरम्वलसाहेवधर्म्माधिकरणलिखितैतब्दीयलवम्बरमासीयद्वाविंशतिदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयचतुर्व्विंशतिदिनसम्बन्धिबृहस्पतिवासरे घटिकाचतुष्टयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति कीर्त्तिनारायणस्य मरणानन्तरमुत्तराधिकारित्वेन प्राप्तपतृधनस्य तत्पुत्रस्य गोराचाँदसंज्ञकस्य मरणोत्तरं तत्स्वत्वास्पदीभूतधने यदि तस्य पुत्रमारभ्य पितुः प्रपौत्रपर्य्यन्तो न स्यात्

तद्भगिन्याश्चन्द्रमालायाः कश्चिदेकोऽपि पुत्रोऽर्थाद्[1] गोराचाँदसंज्ञकस्य पितृदौहित्रो गर्भे व्यवस्थितो भूमिष्ठो वा तन्मरणसमये स्यात्तदा तस्याधिकारः। जाते तस्याधिकारे पुनरुत्पत्स्यमानानां तद्भ्रात्रन्तराणामर्थाद् गोराचाँदसंज्ञकस्य पितृदौहित्रान्तराणामप्यधिकारः समान एव भविष्यति। स त च पितृदौहित्रे तत्पितृव्यपुत्राणां प्रभुसमर्पितप्रश्नपत्रलिखितानां मध्ये तदानीं विद्यमानानां नाधिकारः। यदि च गोराचाँदसंज्ञकस्य पुत्रमारभ्य पितुः प्रपौत्रपर्य्यन्तरहितस्य पितृदौहित्रो गर्भे व्यवस्थितो भूमिष्ठो वा तन्मरणसमये नासीत्तदा तत्पितृदौहित्राणां स्वत्वान्यथानुपपत्त्या तद्भगिन्याश्चन्द्रमालायास्तत्पितृदौहित्रोत्पत्तिमूलीभूतायास्तत्सम्बन्धमूलीभूतायाश्च स्वपुत्रोत्पत्तेः प्राक्कालपर्य्यन्तं यथा पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य पितुर्द्धने दुहितुरधिकारः तथा भ्रातृधनेऽप्यधिकारः। सति च गोराचाँदसंज्ञकस्य पितृदौहित्रे स्वतो गोराचाँदसंज्ञकस्य पितुः पार्व्वणश्राद्धपिण्डदातरि स्वतो गोराचाँदसंज्ञकस्य पितुः पार्व्वणश्राद्धपिण्डदानानधिकारिण्यास्तद्भगिन्याश्चन्द्रमालाया नाधिकारः, किन्तु तस्याः पुत्रस्यैव, पुत्राणां चोपरिलिखितप्रकारेणाधिकारः[2]—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनिदौहित्रस्येव इति दायभाग पृ० २०८) ग्रन्थलिखनम् ॥ १ ॥

दश द्वा तद्विभागः स्यादायव्ययविशोधितात्— इति दायभागादि (दा० भा० १३२ ग्रन्थधृतयाज्ञवल्क्य पृ० २।१४२) वचनम् ॥२॥

तदभावे पुनः पितृदौहित्र इति, तदभावे पितामहस्तदभावे पितामही, तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयस्तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रः—इत्यादि च श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० २१८) लिखनम् ॥३॥

पत्नी दुहितरश्चैव। इत्यादि दायभागादि(दाभा०पृ० १५१ ग्रन्थधृत याज्ञवल्क्य २।१३५) वचनम् ॥ ४ ॥

---

१. ०र्थाद्गोरा—व्य५० । २. ०धाप.र०—व्य५० ।

यद्यपि दुहित्रभावे दौहित्रस्यैव भगिन्या एव प्रागधिकारो युक्तस्तथापि तस्याः स्त्रीत्वेन पार्व्वणपिण्डदत्वाभावान्नाधिकारः, दुहितुस्तु दौहित्रात् पूर्व्वम्—"अङ्गादङ्गात् सम्भवति" इत्यादिविशेषवचनादेवाधिकार इति भावः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीका (पृ० २१०) लिखनं चेति ॥ ५ ॥

एतदब्दीयनवम्बरमासीयषड्विंशतिदिनसम्बन्धिसोमवासरे मयेव व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

११०—रोवकारि मिछिल शहर दिओयानि आदालत मजकुरेर हाकिम हेनरि सिकसपीयेर साहेबेर बैठके तारिख ५ डिसेम्बर इ० शन १८३१ साल मोताबक २१ अग्रहायण बाङ्गला शन १२३८ साल रोज सोमवार—

दलमर्द्दनसाहि　　　　　　　　　　　　आपीलाण्ट

राजा पृथ्वीपतिसाहि ताहार मृत्युर पर खड्गबाहादुरेर अलि ओ माता राजेश्वर कोङर ओ मोछम्मात् मदनकोङर—

रेस्पाण्डाण्टान्—

आपीलाण्टेर उकिल सदासुख पण्डित ओ रेस्पाण्डाण्टानेर उकिल मुनशी हाशन आलि हाजिर हइल । तारिख १५ ओ २१ ओ २२ ओ २९ माह नवम्बरे एइ मोकद्दमा रोवकारि ओ प्रोविन्शीयाल कोर्टेर समुदाय कागजात ओ एइ मकद्दमार बाबत एइ आदालतेर दाखिल करा साबेक कागजात पाठ हइया स्थगित छिल, अद्य पुनराय रोवकार हइल । आमार रायेते राजा दलमर्द्दनसाहि राजा पृथ्वीपतिसाहिके पुष्यपुत्र राखनेते इच्छा ये प्रकार उचित साक्षीगणेर साइदेर द्वाराय कवार ओ याकफाइ शाहद पौंछिल । एवं इहाओ तहकित हइल ये राजा मजकुर आपन

হোস বহালে ও স্থির বুদ্ধিতে হেবানামা সকল রাজা পৃথ্বীপতি সাহির নামে লিখিয়া দিয়াছিল। কিন্তু এতদভিন্ন ও গোরক পুরের জাহাতে উভয় বিবাদি বসতি রাখে, তাহার সর্ব্বদার রেওয়াজ[১] মতে এবং শাস্ত্রের দাড়াতে ও সমুদাইক শরত শফামতে রাজা পৃথ্বীপতিসাহির পুষ্যপুত্রতা সর্ব্বতোভাবে সাব্যস্থ আসিয়াছিল। সে হেবানামা সকল শাস্ত্রের আজ্ঞানুসারে উচিত বটে কি না? দ্বিতীয়ত্ব যে তাহার তজবিজ নিতান্ত শাস্ত্রের দাড়াঁতে এলাকা হইতেছে ইতি। আর অজিমাবাদের প্রীবিণশীয়ান কোর্টের আদালতের পণ্ডিতের এই মোকদ্দমার মিছিলে দাখিল করা ব্যবস্থার দ্বারায় প্রকাশ হইতেছে—যে রাজা পৃথ্বীপতিসাহির পুষ্যপুত্রতা উচিত বোধ হইল, আর শন হালের ২২ শেতম্বর তারিখের হওয়া এই আদালতের হাকিম মাণ্টেকু হেনরি টরম্বল সাহেবের রোবকারির লিখিত এই আদালতের পণ্ডিতের জবানি জওয়াবেতে স্পষ্ট বোধ হয় না যে পণ্ডিত মজকুরের ঐ ব্যবস্থাতে অক্যতা হইয়াছে কি না। আর যদি স্যাত্ না হইয়াথাকে কি জন্য হয় নাহি। আর হাকিম মৌছফের রোবকারির লিখিত পণ্ডিত মজকুরের জওয়াবেতে বোধ হয় যে জ্যেষ্ঠ পুত্র পুষ্যপুত্র হইতে পারে। এই শরততে যে উভয় পুষ্যপুত্রদাতা ও ত্রিহিস্যা (?) এই বিষয়ে স্বীকৃত হয়—যে পুত্র মজকুর উভয় দুই ব্যক্তির শ্রাদ্ধ পিণ্ডদান করিবেক। কিন্তু ইহাতে সস্পষ্ট হয়না—যে পুষ্যপুত্রতার নির্দ্ধারিতের পূর্ব্ব যে রূপ এই মোকদ্দমায় প্রকাশ আছে, আর পিতার মৃত্যুতে ঐ প্রকার শরত বহাল থাকে কি না। এই সকলের প্রতি দৃষ্টে আমার নিকট সন্দেহ ভঞ্জনার্থে[২] উচিত যে মোকদ্দমার কাগজাত এই আদালতের পণ্ডিতের নিকট এই হুকুমে—যে পণ্ডিত মজকুর কোর্ট আ গয়রহর ব্যবস্থা ও সাক্ষীগণের এজহার ও মিছিলের কাগজাত অনুমোদনে নিচের লিখিত সওয়ালসকলের জওয়াব তত্ক্ষণাত লিখিয়া দাখিল করেণ পাঠান জায়।

---

১ বেওয়াজ—ব্যপ। ২. ভঞ্জনার্থে—ব্যপ০।

१. प्रथमतो एइ ये साक्षीगणेर साक्षीर द्वाराय राजा पृथ्वीपतिसाहिके पुष्यपुत्र देओया ओ लओया उभय उहार माता ओ राजा अरिमर्द्दनसाहि ओ रानी मदनकोङर ये रूप उचित शास्त्रानुजाइक आयान आशीयाछे कि ना।

२. द्वितीय—पुष्यपुत्रतार दाडासकलेर पूर्व्वे पृथ्वीपतिसाहिर आपन पीता रणबाहादुरसाहिर मरणेते ताहार सत्यतार किछु दर्यात हय कि ना। आर यदि ताहाते दर्यात बोध हय, एमत दर्यात रणबाहादुरसाहिर पद्य हइते पूर्व्व समये पुष्यपुत्रतार कबुल करणेर सबाब ये प्रकार मोछम्मात मदनकोङर एइ मोकद्दमार आर्पालेर जआयाबे लेखे दुर हइते पारे कि ना।

३तृतीय—ये स्त्रि सहगामिनी हय, सेइ स्त्री सहगामी हओयार पूर्व्वे आपन पुत्र अन्य कोन व्यक्तिके पुष्यपुत्र देओयाते यथाशास्त्र पष्ट रूप निषेध आछे कि ना।

४चतुर्थ—पृथ्वीपतिसाहिर छय वतसर वयक्रमे ताहार पुष्यपुत्रतार निषेध कि ना।

५पञ्चम ज्येष्ठ पुत्र हेतुक तस्य पुष्यपुत्रतार आपत्य जेलागोरकपुरेर प्रचलित दाडा ओ शाच्छादात ये प्रकार राजा उद्योतनारायणसिंह एवं द्वितीय राजासकलेर साक्षीते शाछद पौंछिल दुर हइते पारे कि ना।

६षष्ठ—राजा अरिमर्द्दनसाहिर लिखिया देओया हेबानामा सकल दोरस्त हय कि ना। आर यदि स्यात् दोरस्त हय, तबे राजा पृथ्वीपतिसाहि पुष्यपुत्रताभिन्य ताहार द्वाराय हेबार विषये हकदार हय कि ना।

७सप्तम—यदि स्यात् पुष्पपुत्रता ओ हेबानामासकल दुइ ना दोरस्त हय, राजा अरिमर्द्दनसाहिर स्त्री रानी[1] मदन कोङ-

---

१. वानी०—व्यप०

र ८५ लम्बरेर इ० शन १८८६ शालेर २८ मार्च्च तारिखेर लिखित एइ आदालतेर साबेक हाकिम कोर्टनि इस्मिट साहेबेर रोवकारिते ये प्रकार लेखा, आछे आपन जीवद्दशा पर्य्यन्त उहार स्वामीर विषये काबेज ओ दखिलकारिर हकदार हइते पारे कि ना इति ।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपति श्रीहेनरीसिकिसपीयरसाहेव-धर्म्माधिकरणलिखिताङ्गरेजीशब्दप्रतिपन्नैकत्रिंशदधिकाष्टादशशताब्दीयदिशम्बरमासीयपञ्चमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्वादविषयनिविष्टपत्रजातञ्च यत्तदब्दीयतन्मासीयपञ्चदशादिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

साक्षिणां साक्ष्यद्वारा राज्ञः पृथ्वीपतिसाहिसंज्ञकस्य पुत्रप्रतिनिधित्वेन दानं ग्रहणं चैतद्द्वयं[1] तस्य मातू राज्ञो अरिमर्द्दनसाहिसंज्ञकस्य चैवं राज्या मदनकोमराख्यायाश्च यथोचितं भवति तथा शास्त्रानुसारेण जातमिति ।

अत्र प्रमाणम्—

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥—इति मिताक्षरा (पृ० २१३) वीरमित्रोदयादि-(पृ० ६०८ ग्रन्थधृतमनु ९।१६८)वचनम् ॥ १ ॥

पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनस्य[2] मध्ये व्याहृतिभिर्हुत्वा[3] अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयादित्युपरिलिखित(मिता पृ० २१४)ग्रन्थधृतवशिष्ठवचनम् ॥ २ ॥

---

१ चैतद्द्वयम् व्यप० । २ °निवेशनम° मिता० ।
३ व्याहृति° व्यप० ।

द्वितीयप्रश्नस्योत्तरम्—

पुत्रप्रतिनिधिताया रीतीनां पूर्व्वं पृथ्वीपतिसाहिसंज्ञकस्य जनकपितृ रणबहादुरसाहिसंज्ञकस्य मरणात् पृथ्वीपतिसाहिसंज्ञकस्य पुत्रप्रतिनिधितासत्यतायाः क्षतिर्यद्यपि सन्देहविषयीभूता भवति तथाप्येतादृशी क्षती रणबहादुरसाहिसंज्ञकस्य सकाशात् पूर्व्वसमये पुत्रप्रतिनिधितायाः स्वीकारेणतद्विवादे एतद्धर्म्माधिकरणोत्तरपत्रे राज्ञ्या मदनकोमराख्यया लिखितेन दूरीभवितुं शक्नोति, रणबहादुरसाहिसंज्ञकस्य तादृशस्वीकारेण तत्रानुमतत्वगमादिति—

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रथमप्रमाणम् ॥ १ ॥

माता भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्त्तरि पित्रा वाभाभ्यां वा सवर्णाय यो[१] यस्मै दीयते स तस्य दत्तकः पुत्रः—इति मिताक्षरा (पृ० २१३) ग्रन्थलिखनम् ॥ २ ॥

तृतीयप्रश्नस्योत्तरम्—

या स्त्री सहगामिनी अनुगामिनी वा भवति सा स्त्री सहमरणात् पूर्व्वमनुमरणात्पूर्व्वं वा स्वकीयपुत्रस्य[२] पुत्रप्रतिनिधिकरणार्थमन्यस्मै समर्पणं कर्त्तुं न शक्नोतीति शास्त्रे निषेधो नास्तीति ।—

चतुर्थप्रश्नस्योत्तरम्—

पृथ्वीपतिसाहिसंज्ञकस्य षड्वर्षवयस्कत्वेन पुत्रप्रतिनिधिताया निषेधो नासीत् । तत्रायं विशेषः यदि तत्समये स नोपनीतः, अथ च तज्जनकेन पित्रा जनकपित्रभिप्रायेण तज्जनन्या मात्रा वा "आवयोरयं पुत्रः" इति सम्प्रतिपत्त्या ग्रहीत्रे दत्तः स्यात्तदा पुत्रप्रतिनिध्यन्तर्गतनित्यद्व्यामुष्यायणपुत्रताया अपि निषेधो नासीत्, जनकपुत्रतायास्तत्राक्षतत्वात् । यदि च तादृशसम्प्रतिपत्तिं विनैव दत्तः स्यादथ च चूडान्तैस्संस्कारैर्ज्जनकेन संस्कृतः प्रतिग्रहीत्रा चोपनयनादिभिस्संस्कृतस्तत्रापि तस्य पुत्रप्रतिनिध्यन्तर्गतानित्यद्व्यामुष्यायणपुत्रताया निषेधो नासीत्, तत्रापि जनकपुत्रतायास्तस्मिन् अक्षतत्वात् । किन्तु यदि षड्वर्षवयस्कः पृथ्वीपतिसाहिसंज्ञकस्तदानीमुपनीतः

---

१. यो इति मिताक्षरायां नास्ति । २. पुत्रस्य—व्यप ।

स्यात्तदा दत्तकपुत्रताया निषेध आसीन्नतु कृत्रिमपुत्रतायाः; यतः कृत्रिमपुत्र-करणे ज्येष्ठकनिष्ठयोर्न्नियमो नास्ति, उपनीतानुपनीतयोरपि नियमो नास्ति, दानस्याप्यावश्यकता नास्ति, केवलं सजातीयत्वपुत्रत्वकरणयोरेव प्रयोजकत्वम् । अथ च जनकपितुः पुत्रत्वं नैव गच्छति । अयञ्च सर्व्वथैव द्वयामुष्यायणः जनकपुत्रत्वकरयोर्द्वयोरपि श्राद्धादिकरः । अयमेव कृत्रिमपुत्रः पाटलिपुत्राख्यनगरसम्बन्धिकोर्टपीलाख्यधर्म्माधिकरणनियुक्तपण्डितेन लिखित इति ।

अत्र प्रमाणम्—

तथाहि द्विविधा दत्तकादयो नित्यवद्द्व्यामुष्यायणा, अनित्यवद्द्व्यामुष्यायणाश्चेति । तत्र नित्यद्व्यामुष्यायणा न म ये जनकप्रतिगृहीतृभ्यामावयोरयं पुत्र इति सम्प्रतिपन्नाः; अनित्यद्व्यामुष्यायणास्तु ये चूडान्त-(स्संस्कारै)र्ज्जनकेन संस्कृताः उपनयनादिभिश्च प्रतिगृहीत्रा, तेषां गोत्रद्वयेनापि संस्कृतत्वाद्द्व्यामुष्यायणत्वं परन्त्वनित्यम्—इतिदत्तकमीमांसादि (पृ० १३०) ग्रन्थलिखनम् ॥१॥

सदृशं यं प्रकुर्व्वीत[1] गुणदोषविचक्षणम् ।

पुत्रं पुत्रगुणैर्युक्तं सविज्ञेयस्तु[2] कृत्रिमः ॥—इति मनु (पृ० ३७४, ९।१७९) वचनम् ॥२॥

स च पुत्रत्वकरस्य पिण्डप्रदः, निजपित्रादीनां पिण्डप्रदत्वं तस्य तिष्ठत्येव—इतिशुद्धिविवेकग्रन्थ(३१ ख ६ पं०)लिखनम् ॥३॥

चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।

दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते॥—इतिदत्तकमीमांसा(पृ० ७४) दत्तकचन्द्रिकादि(द०च० पृ० १९)ग्रन्थधृतकालिकापुराणवचनम् ॥४॥

चूडाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः, शूद्रस्य तु विवाहादिलाभः—इति दत्तकचन्द्रिका(पृ० २१)ग्रन्थलिखनम् ॥५॥

वस्तुतस्तु यस्य पञ्चदशवर्षपर्यन्तं दैववशाच्चूडादिसंस्कारो न जातस्तस्य यथाविधि गृहणोत्तरं संस्कारा अतिपत्येरन्नित्यादिवचनात् प्रायश्चि-

---

१. तुप्रकुर्याद्यम्—इति मनुपाठः २. विज्ञेयश्चेति मनुपाठः ।

चात् महाव्याहृतिहोमं विधाय चूडादिसंस्कारे कृते दत्तकत्वं सिद्ध्यत्येव। न चोर्ध्वं त्वित्यादिवचनविरोध इति वाच्यम्, तस्येष्टिपदश्रवणात् साग्निक-परत्वात्। पञ्च च पञ्च च पञ्चेत्येकशेषात् पञ्च तेषां पूरणः पञ्चमः पञ्चदश इति यावत्, तस्मादूर्ध्वं न दत्ताद्याः सुता इत्यर्थाच्च। एवञ्च पञ्चमवर्षपदं स्वस्वजात्युक्तोपनयनकालोपान्त्यवर्षपरम्। उर्द्ध्वन्तु पञ्चमा-द्वर्षादित्यादिवचनारम्भस्तु ब्राह्मणादीनां षोडशादिवर्षव्यावर्त्तनाय-इति शुद्धिचन्द्रिकाग्रन्थलिखनम्॥ ६ ॥ (?)

पञ्चमप्रश्नस्योत्तरम्—

ज्येष्ठपुत्रत्वेन तस्य पुत्रप्रतिनिधिताया आयत्तिर्गोरखपुरप्रदेशचलि-तरीत्या राज्ञ उद्योतनारायणसिंहस्यान्येषां राज्ञां साक्षिणां साक्ष्येण च यथा निश्चित तेन दूरीभवितुं शक्नोति, तद्देशचलितरीतिसाक्ष्युपस्था-पितवृत्तान्ताभ्यां गोरखपुरप्रदेशे ज्येष्ठपुत्रस्य पुत्रप्रतिनिधीकरणस्य सिद्धत्वेन तद्देशीयव्यवहारविरुद्धाया ज्येष्ठपुत्रस्य पुत्रप्रतिनिधिताया आपत्तेः शास्त्रानु-सारेणापि दूरीकृतत्वस्यार्थसिद्धत्वात् तद्देशीयव्यवहारविरुद्धस्य कस्यचिदपि कर्मणः शास्त्रानुसारेण तस्मिन् देशे कदाचिदपि भवितुमशक्यत्वाच्चेति॥०॥

अत्र प्रमाणम्—

जातिजानपदान् धर्माञ्छ्रेणीधर्मांश्च धर्मवित्।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपालयेत्॥—इति मनुवचनम् (मनु-८।४१)॥१॥

देशजातिकुलानाञ्च ये धर्माः प्राक्प्रवर्त्तिताः।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा॥—इति वीरमित्रोदयादि-ग्रन्थधृतबृहस्पतिवचनम्॥२॥

यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः।
तथैव परिपाल्योऽसौ यदा वशमुपागतः॥—इति याज्ञवल्क्य-वचनम्॥३॥

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।

युक्तिहीनविचारे तु धर्म्महानिः प्रजायते ॥—इति वीरमित्रोदयादि-ग्रन्थधृतबृहस्पतिवचनम् ॥ ४ ॥ ० ॥ ० ॥ ० ॥

षष्ठप्रश्नस्योत्तरम्—

राज्ञा अरिमर्द्दनसाहिसंज्ञकेन लिखितं दानपत्रजातं तत्पत्न्या राज्ञ्या मदनकोमराख्याया यावज्जीवं तत्कुलोपयुक्तग्रासाच्छादनोपयुक्तावश्यकविधवाधर्म्माद्याचरणोपयुक्तातिरिक्तधने सिद्ध्यति, प्रभुसमर्पितपत्रजाते राज्ञोऽरिमर्द्दनसाहिसंज्ञकस्य चतुर्णां भ्रातॄणां मध्ये स्वकुलोचितव्यवहारानुसारेण ज्येष्ठत्वेनावशिष्टानां त्रयाणां भ्रातॄणां पृथक् पृथक् स्वकुलोचितग्रासाच्छादनोपयुक्तातिरिक्तराज्ये असाधारणस्वत्वेनासाधारणस्वत्वास्पदीभूतस्य राज्यस्य भ्रात्रन्तरसाधारण्याभावावगमेन तत्र भ्रात्रादीनामनुमतिं विनापि दानाद्यधिकारित्वेन सिद्धेर्निष्प्रत्यूहत्वात् । एवं तद्दानस्य सिद्धौ सत्यां राजा पृथ्वीपतिसाहिसंज्ञकः पुत्रप्रतिनिधितां विनापि दानानुसारेण दानकृतधनस्याधिकारी भवितुं शक्नोति । तद्दानेन ग्रहीतुः स्वत्वोत्पादात्सप्तमप्रश्नस्योत्तरमर्थादुपरिलिखितोत्तरजातैरेव पर्य्यवसन्नमिति पृथङ् न लिखितम्—इति गोरखपुरप्रदेशचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारकौस्तुभदत्तकचन्द्रिकाशुद्धिचन्द्रिकादत्तकदीधितिदत्तकनिर्णयादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते—इति वीरमित्रोदयादि (पृ० ३६४) ग्रन्थधृतबृहस्पति (पृ० १३७) वचनम् ॥ १ ॥

विभक्तेषु तूत्तरकाले विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्य्याय सर्वाभ्यनुज्ञा न पुनरेकस्यानीश्वरत्वेन, अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्ध्यत्येव—इति मिताक्षरा (पृ० २००) ग्रन्थलिखनम् ॥ २ ॥

स्वस्वत्वनिवृत्तिपूर्व्वकपरस्वत्वापादनं दानम्-इति मिताक्षरादि (सुबोधिनी पृ० ७४१) ग्रन्थलिखनम् ॥ ३ ॥

प्रदानं स्वाम्यकारणम्—इति मनुवचनञ्चेति ॥ ४ ॥०॥०॥०॥

---

१. रारा—४५० ।

अंगरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयस-समदिनसम्बन्धिशनिवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१११—रोवकारि सदर देओयानि आदालत ओयाके तारिख २६ दिजम्बर शन १८३१ साल मोतामेक शन १२३८ सालेर १२ पौष सोमवार श्रीयुत आलक सुन्दर राश साहेब ए आदालतेर हाकिमेर वैठके वदनचन्द्रहालदार ओ गायरह वनाम रामचाँद-मुखोपाध्याय साएलानेर उकिल मुनशी गोलाम वतुल ओ तरप-छानिर उकिल सदासुकपण्डित हाजिर अइल। सन १८३१ शालेर १५ शेतम्वर तारिखेर ए आदालतेर हाकिम श्रीयुत कटवरट थरनएल शेली साहेबेर हुकुमानुसारे सायेलानेर खास आपीलेर सओयाल ओ गायरह ऐ मोतालकेर कागचसकल अद्य आमार वैठके दरपेष हइया हाकिम मौछुफेर तारिख मज-कुरेर रोवकारिर लिखित राय ओ सन १८३१ सालेर २८ शेतम्वर तारिखेर दृष्ट करा तरफछानिर सओयालेर सहित दृष्ट आइल। तरफछानि जेलार मुद्दाइ जाहेर करे जे राधाकान्तहालदार मोत-ओकफार स्त्री मोछुम्मात सुभद्रादेव्या खासपुर परगनार कालीघाट ग्रामेर मोट सात विघा देवसेवार जमीर मध्ये एक विघा ओ खालियाना पाच दिवस पालार मध्ये एक दिवस पाला कालि-ठाकुरानिर सेवा सहित आपन स्वामीर सर्गार्थे मुद्दाइके दान-करियाछे। यद्यपि स्यात् जेलार फयछलार लिखित जेला चर्विष परगानार पण्डितेर व्यवस्थार मजमुने प्रकाश आछे—ये देव-सेवार जमी ओ सेवार पाला सेवा सहित अविरा स्त्रीर दान

करिवार क्षमता आछे, किन्तु जेलार मुद्दाआलेहोम बदनचन्द्र-हालदार ओ गायरह छाएलान् जाहेर करे ये अवीरा स्त्रीर ठाकुराणीर पाला ओ देवसेवार जमी दान करिवार क्षमता नाइ। ए जन्य हुकुम छादेर हओनेर पूर्व्वे ए आदालतेर पण्डितेर स्थाने व्यवस्था लओया उचित वोध हइया हुकुम हइल ये एइ रोवकारिर नकल ओ राजचन्द्ररायेर मोकद्दमार दाखिल हओया ए आदालतेर सावेक पण्डितेर व्यवस्थार नकल, ये एइ दरखास्तेर सामिल आछे, एइ हुकुमे ये निचेर लिखित सओयालेर जवाव व्यवस्था मजकुर दृष्ट करिया एक सप्ताह मध्ये दाखिल करेण, ए आदालतेर पण्डितेर हाओला करा जाय।

यद्यपि स्यात् अवीरा स्त्री मोट शात विघा देवसेवार जमीर मध्ये मओजी एक विघा जमी ओ सालियाना पाच दिवस पालार मध्ये एक दिवस पाला सेवा सहित स्वामीर स्वर्गार्थे कोन—वेक्तिके दान करे, ए प्रकार दान वाङ्गलादेसेर शास्त्रानुसारे यथार्थ वटे कि ना इति—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतअलकसुन्दरराससाहेवधर्म्माधिकरणलिखिताङ्गरेजीशब्दप्रतिपाद्यैकत्रिंशदधिकाष्टादशशताब्दीयदिशम्बरमासीयषड्विंशतिदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितराजचन्द्ररायसम्बन्धिविवादविषयनिविष्टव्यवस्थाप्रतिरूपपत्रञ्च यदेतदब्दीयजानवरीमासीयपञ्चमदिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

यदि काचिदवीरा स्त्री सप्तविघाशब्दप्रतिपाद्यदेवसेवासम्पादकभूमिसमुदायान्तर्गतैकविघाशब्दप्रतिपाद्यभूमिमेवं वार्षिकपञ्चदिवसीयपालाशब्दप्रतिपाद्यान्तर्गतैकदिवसीयपालाशब्दप्रतिपाद्यञ्च देवसेवासहितं स्वपत्युः स्वर्गार्थं कस्मैचिद्दत्तवती स्यात्तदा तद्दानं यथार्थमेव भवति, देवसेवायाः देवसेवापालाशब्दप्रतिपाद्यस्य च सेवाइतशब्दवाच्यस्यायत्तत्वेन सेवाइतशब्द-

वाच्यस्य पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य पत्युर्द्धने जाताधिकारिण्या उपरि-लिखितप्रकारकताहशदानकर्त्र्याः पत्न्यास्ताहशदानविषयीभूतदेवसेवायाः देवसेवापालाशब्दप्रतिपाद्यस्य च तत्सम्पादकदेवत्रभूमेः समर्पणं विना अनिष्पाद्यत्वेन तत्समर्पणरूपदानस्याप्यावश्यकत्वेन च यथोक्ताधिकारित्वेन सेवाइतशब्दवाच्यस्य पत्न्यास्ताहशदेवत्रभूमौ स्वत्वम्, अर्थात् तत्संरक्षणावेक्षणादिकर्त्तृत्वोपयुक्तं कारयितृत्वोपयुक्तं वा तदुत्पन्नोपस्वत्वेन च देव-सेवादिकर्त्तृत्वोपयुक्तं कारयितृत्वोपयुक्तं वा तथैव तया पत्न्या कृतदानेन ताहशं स्वत्वं प्रतिग्रहीतुरपि भवितुं शक्नोतीत्यत्र बाधकाभावाद्–इति वङ्ग-देशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहदायरहस्यव्यवस्थार्णवविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ १ ॥

अपुत्रधने पौत्रप्रपौत्राभावे साध्व्याः पत्न्या अधिकारः, तत्रापि भर्त्तृ-स्वर्गमुद्दिश्य दाने यथाकथञ्चिच्छरीररक्षार्थं भक्षणे चाधिकारः, एतदतिरिक्तयथेष्टाचरणे स्थावरविक्रयादौ च नाधिकारः—इति व्यवस्थार्णवग्रन्थ-लिखनम् ॥ २ ॥

स्वस्वत्वनिवृत्तिपूर्व्वकपरस्वत्वापादनं दानम्—इति विवादभङ्गार्णव-(१ विवा० ३१८ ख)ग्रन्थलिखनम् ॥ ३ ॥

विक्रेतुर्यादृशं स्वत्वं क्रेतुस्तादृशमेव स्वत्वं क्रयाज्जायते—इति श्रीकृष्णतर्कालङ्कारकृतदायभाग(पृ० १०)टीकालिखनञ्चेति।

एतदब्दीयजानवरीमासीयैकविंशतिदिनसम्बन्धिशनिवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

११२—सदर देओयानि आदालतेर पण्डितेर प्रति प्रश्न—
भरणार्थ प्राप्त व्यक्तीर मरणानन्तर ताहार उत्तराधिकारिगण बहुकालावधि ऐ वस्तुते भोगवान थाकिले भरणार्थ वस्तुते भरणार्थ प्राप्त व्यक्तीर उत्तराधिकारिगणेर सत्व लोप हय कि ना ? इति—

प्रभुसमर्पितप्रश्नपत्रमेवमेतद्विवादविषयनिविष्टपत्रजातं यदङ्गरेजीशब्दप्रतिपाद्यत्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयोनत्रिंशद्दिवसीयशुक्रवासरे घटिकाद्वयाधिकयामद्वये प्राप्तं तदवलोक्य विविच्य च यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि कयाचित् कन्यया स्वपितुः सकाशाद्भरणार्थं किञ्चित् स्थावरं धनं प्राप्तम्, तन्मरणोत्तरं तदुत्तराधिकारिभिर्बहुकालावधिकं तदेव वस्तुस्वभोगास्पदीभूतं कृतं स्यात्तत्र यदि तया व्यक्त्या तद्वस्तु केवलं स्वजीवनपर्य्यन्तमेव भरणार्थं प्राप्तं स्यादेवं तन्मरणोत्तरं तदुत्तराधिकारिभिः प्रभुसमर्पितपत्रावगतसम्बन्धेन प्रीत्या वा बहुकालपर्य्यन्तं तद्वस्तु भुक्तं चेदपि तेषां तत्र स्वत्वानुत्पादेन स्वत्वसामान्याभावस्य विद्यमानत्वात् स्वत्वध्वंसो दूरापास्त एव, एतादृशभोगस्य स्वत्वोत्पादकत्वाभावात् स्वत्वोत्पादकस्य[1] दानाद्यागमस्यात्राप्राप्तत्वाच्च, सम्बन्धप्रयुक्तभोगस्य प्रीतिप्रयुक्तभोगस्य वा स्वत्वे प्रमाणत्वाभावाच्च। यदि च तया व्यक्त्या तद्वस्तु[2] पुत्रपौत्रादिक्रमेण भरणार्थं प्राप्तं स्यात्तदा तन्मरणोत्तरं तदुत्तराधिकारिणामपि तादृशभरणार्थप्राप्तिरूपागमेन तादृशभरणोपयुक्तं स्वत्वमुत्पन्नं नष्टं भवितुं न शक्नोति, वरं बहुकालावधिकतादृशभोगेन तादृशभरणोपयुक्तस्वत्वोत्पादकस्तादृशभरणार्थप्राप्तिरूपागमो दृढीभूतः—इति वङ्गदेशचलितमनुव्यवहारमातृकाव्यवहारतत्त्वदायतत्त्वविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥ इति मनुवचनम् (पृ० ४२२, १०।११५)॥१॥

---

१. स्वत्वेत्पादकस्य—व्यप.। २. त्यत्तयाद्वस्तु—व्यप.।

अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणादिकम् ।

सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते ॥—इति दायतत्त्वव्यवहारतत्त्वादि(पृ० ५४)ग्रन्थधृतबृहस्पति(पृ० ७५)वचनम् ॥२॥

आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।

अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥—इति व्यवहारमातृकादि(पृ० ३४५)ग्रन्थधृतनारद(नास्मृ पृ० ७०)वचनञ्चेति ॥३॥

अत्र भरणार्थं तद्वस्तु तया व्यक्त्या केन प्रकारेण केन नियमेन वा प्राप्तमिति प्रभुसमर्पितपत्रजातैर्ज्ञातुमशक्य एव तत्पत्रजातेषु प्रमाणभूतं दानपत्रादिकं न प्राप्तमत एव व्यवस्थायां प्रकारद्वयं लिखितमिति निवेदनम् ॥

अङ्गरेजीशब्दप्रतिपाद्यैकत्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयैकविंशतिदिनसम्बन्धिशुक्रवासरे घटिकैकाधिकयामद्वये मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

११३—सदर देओयानिर पण्डितेर पर सओयाल—

जद्यपि एक वेक्ती हिन्दुर दुइ कन्या थाके । ताहाते एक कन्या । एक पुत्र आपन गर्भेर राखिया आपन पितार साक्षाते मृत्तु हए । ताहार पर ऐ वेक्ती आपनार द्वितीय कन्यार साक्षाते मृत्तु हए । से मते मृत वेक्तीर तेक्त वस्तु वर्तमान कन्याय अरसे, कि ताहार दौहित्रके, जे ताहार माता पुत्र राखिया आपन पीतार वर्तमाने मृत्तु हइयाछे, ताहाके मृत वेक्तीर तेक्त वस्तुर कीछु अरसे कि ना । जद्यपि अरसे तवे की प्रमाण ? ॥

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यत्रिंशदधिकाष्टादशशताब्दीयदिशम्बरमासीयाष्टमदिनसम्बन्धिबुधवासरे घटिकाद्वयाधिकयामद्वये प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

यद्येकस्य कस्यचित् हिन्दूजातीयस्य दुहितृद्वयमासीत्, तयोर्मध्ये एका दुहिता स्वगर्भोत्पन्नमेकं पुत्रं संरक्ष्य विद्यमाने स्वपितरि मृता, तदनन्तरं स एव व्यक्तिविशेषो परस्यां दुहितरि विद्यमानायां मृतस्तदा तस्यैव व्यक्तिविशेषस्य त्यक्तधनं विद्यमाना दुहिता, या प्रभुसमर्पितविचारपत्रेण पुत्रवत्यवगम्यते, सा प्राप्तुं शक्नोति, तस्यां पुत्रवत्यां दुहितरि विद्यमानायां सत्यां स च दौहित्रो यस्य माता विद्यमाने स्वपितरि मृता प्राप्तुं न शक्नोति, यतः शास्त्रानुसारेण पुत्रवत्यां दुहितरि जीवन्त्यां सत्यां कस्यचिदपि दौहित्रस्य विद्यमानमातृकस्य मृतमातृकस्य वा मातामहधने नाधिकारः—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्याद्युपरिलिखितग्रन्थधृतयाज्ञवल्क्य(पृ० २१६।२।१३५)वचनम् ॥ १ ॥

अपुत्रस्य मृतस्य कुमारी ऋक्थं गृह्णीयात्तदभावे चोढा—इत्युपरिलिखितग्रन्थधृत(दाक्र सं० पृ० ३)पराशरवचनम् ॥ २ ॥

कुमार्यभावे चोढायाः पुत्रवत्याः सम्भावितपुत्रा(या)श्च, (भगिन्याः) तुल्योऽधिकारः, तयोरेकतराभावे एकतराधिकारः—इति, *स्वपुत्रद्वारेण पार्व्वणपिण्डदातृतया तयोरुपकाराविशेषाच्च*—इति च, *सर्वदुहित्रभावे दौहित्रस्याधिकारः*—इति च *दायक्रमसंग्रह*(पृ० ४)ग्रन्थलिखनञ्चेति ॥ ३ ॥

इहार सओयाल पाठिते छिल, एइ निमित्ते एइ पत्र लेखा-गेल ना।

अङ्गरेजीशब्दप्रतिपाद्यैकत्रिंशदधिकाष्टादशशताब्दीयफेवरवरीमासीयचतुर्थदिनसम्बन्धिशुक्रवासरे घटिकैकाधिकयामद्वये मयेयं व्यवस्था दत्तेति ॥ ० ॥ ० ॥ ० ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

११४ सओआल—आमार ज्ञात हइवार कारण ए विसएर जिज्ञासा करा आविश्वक हइल जे जद्यपि एक वेक्ती हिन्दुर दुइ-पुत्र थाके। ताहाते एक पुत्र आपन पितार साक्षाते एक पुत्र जिवमान राखिया मृत्तु हय। ताहार पर ऐ वेक्ति आपन द्वितीय पुत्र ओ मृत पुत्रेर वालकेर साक्षाते मृत्तु हए। तवे ऐ मृत वेक्तीर तेक्त धन काहाके अर्शे इति।

प्रभुसमर्पितविचारपत्रे यत्प्रश्नान्तरं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

यदि कस्यचित् हिन्दूजातीयस्य व्यक्तिविशेषस्य पुत्रद्वयमासीत् तयोर्मध्ये एकः एकं पुत्रं संरक्ष्य विद्यमाने पितरि मृतस्तदनन्तरं सोऽपि व्यक्तिविशेषो द्वितीये पुत्रे विद्यमाने मृतपितृकपौत्रे च विद्यमाने सति मृतस्तदा तस्यैव धनिनो मृतस्य तद्धनस्य समं द्विधा विभक्तस्यैकोंऽशो विद्यमानपुत्रस्यापरोंऽशो मृतपितृकपौत्रस्य भवति। अत्र विशेषतः शास्त्रानुज्ञाया अधोलिखितप्रमाणेष्वेव स्पष्टीकृतत्वाद्—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

अविभक्ते मृते पुत्रे[१] तत्सुतं ऋक्थभागिनम्।
कुर्वीत जीवनं येन लब्धं नैव पितामहात् ॥

लभेतांशं स्वपित्र्यन्तु पितृव्यात्तस्य वा सुतात्।
स एवांशस्तु सर्व्वेषां भ्रातृणां न्यायतो भवेत् ॥

लभेत तत्सुतो वापि निवृत्तिः परतो भवेद्—इति दायतत्त्वविवादभङ्गार्णवादिग्रन्थधृतकात्यायनवचनम् (कास्मृ० पृ० १०३)

यथा पैतामहे धने पितुः स्वाम्यं तथैव तस्मिन् मृते तत्पुत्राणामपि, न तत्र सन्निकर्षविप्रकर्षाभ्यां कोऽपि विशेषः, पार्व्वणविधिना पिण्डदानेन

१ निजे प्रेते—इति धर्मकोशस्थःपाठः; अविभक्तेऽनुजे प्रेते, इति कात्यायनस्मृतिपाठः।

द्वयोरपि तदुपकारकत्वाविशेषाद्—इति दायभाग(पृ० २६)ग्रन्थलिखनम् ॥ २ ॥

मृतपितृकपौत्रमृतपितृपितामहकप्रपौत्रयोः पुत्रेण सह तुल्याधिकारः, तेषां पार्व्वणपिण्डदातृत्वेनोपकाराविशेषाद्—इति दायक्रमसंग्रह(पृ० २)-ग्रन्थलिखनञ्चेति ॥३॥

एहार सओयाल पार्षिते छिल, एइ निमित्ते एइ पत्रे लेखा-गेल ना ।

अङ्गरेजीशब्दप्रतिपाद्यैकत्रिंशदधिकाष्टादशशताब्दीयफेवरवरीमासीयचतुर्थदिनसम्बन्धिशुक्रवासरे घटिकैकाधिकयामद्वये मयेयं व्यवस्था दत्तेति ॥

श्रीदुर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

११५ सदर देओयानि आदालतेर पण्डित उपर सओयाल—
नं २ खास आपील शन १८३० साल—

मथुरराय ओ लक्षणराय	आपिलाण्टान
राजुपाइक	रेष्पाडण्ट

१ दफा

गुरुप्रसाद नामक एक व्यक्ति अपुत्रक कारण स्त्रि वर्त्तमाना थाकिते ओ आपनार सकल विषय दानपत्रेर लेखार सरत मते अन्य व्यक्तिके दान करिते पारे कि ना, आर दान करिले शास्त्रानुसारे से दान जथार्थ हइते पारे कि ना ?

२ दफा—

दानेर परे गुरुप्रसाद मजकुरेर मृत्यु हइले परे यद्यपि ये व्यक्ति दान पाय से दानपत्रेर लेखार सरत मते गुरुप्रसाद मजकुरेर अग्निकार्य्य ओ श्राद्धादि करिया आर उहार स्त्रिर अन्न-वस्त्र दिया थाके, तवे दान मजकुरा यथार्थ हइते पारे कि ना ?

३ दफा—

गुरुप्रसाद मजकुरार ऐ प्रकार दान करिले परे सेइ दानेर द्रव्यादि अन्य कोन व्यक्तिके कबालार द्वाराय विक्रय करिते पारे कि ना इति ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयमार्च्चमासीयोनविंशतिदिनसम्बन्धि-शनिवासरे यामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनु-सारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्--

कश्चिद् गुरुप्रसादनामा व्यक्तिविशेषो निःसन्तानत्वेन हेतुना विद्यमाना-यामपि पत्न्यां स्वस्वत्वास्पदीभूतसमुदायधनं प्रभुसमर्पितदानपत्रलिखितनि-यमेनान्यस्मै दातुं शक्नोति । अथ च कृते च दाने शास्त्रानुसारेण तद्दानं यथार्थं भवति, शास्त्रानुसारेणैतादृशदानसिद्धौ बाधकाभावादिति ॥—

अत्र प्रमाणम्—

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते ।--इति विवादभङ्गार्णवादिग्रन्थ-(१ विभ० ४४८ क)धृतबृहस्पति(पृ० १३७)वचनम् ॥ १ ॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ।—इति दायभागादिग्रन्थ-धृतनारदवचनम् ॥ २ ॥

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥ ३ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि दानानन्तरं तस्यैव गुरुप्रसादस्य मरणे सति दानग्रहीत्रा दानपत्र-लिखितनियमानुसारेण तस्यैव गुरुप्रसादस्य अग्न्यादि सम्पाद्य दाहादिकार्य्यं श्राद्धादिकार्य्यञ्च कृत्वा अथ च तत्पत्न्या ग्रासाच्छादनादिकं दत्तमभूत्, तदा तद्दानं यथार्थं भवितुं शक्नोति शास्त्रानुसारेण सोपाधिदानस्योपाधि-सिद्धौ सिद्धेर्निष्प्रत्यूहत्वादिति—

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरप्रमाणत्रयम् ॥३॥

सोपाधिदानमुपाध्यसिद्धान्तसिद्धम्—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥ २ ॥

तृतीयप्रश्नस्योत्तरम्

स एव गुरुप्रसादस्तादृशदानकरणानन्तरं तद्दानकृतद्रव्यादेः अन्यस्मै कस्मैचिद् विक्रयपत्रद्वारा विक्रयं कर्त्तुं न शक्नोति प्राथमिकतादृशदानकरणेन गुरुप्रसादस्य तद्द्रव्ये यावज्जीवं दम्पत्योर्भरणपोषणाद्युपयुक्तस्वत्वातिरिक्तस्वत्वस्यार्थाद्दानविक्रयाद्युपयुक्तस्वत्वस्याभावेन प्राथमिकदानानन्तरं तत्कृतविक्रयस्यास्वामिकृतत्वेन, अस्वामिकृतविक्रयस्यासिद्धेर्निष्प्रत्यूहत्वात्—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकामनुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—"

अत्र प्रमाणम्

तथा च पूर्व्वस्वामिस्वत्वनिवृत्तिपरस्वामिस्वत्वोत्पत्तिफलकत्यागत्वेन रूपेण त्यागशक्तस्य दाधातोः—इत्यादि श्रीकृष्णतर्कालङ्कारकृत(पृ० ४) दायभागटीकालिखनम् ॥ १ ॥

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥—इतिमनु(पृ० ३०६। ८।१९९)वचनम् ॥ १२ ॥

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेद्—इति विवादभङ्गार्णवादिग्रन्थ(१ विवा० ३१७ ख)धृतकात्यायन(कास्मृ० ६१२, पृ० ७६) वचनञ्चेति ॥ ३ ॥

आपरेलमासीयद्वितीयदिनसम्बन्धिशनिवासरे दत्तेयं मया व्यवस्था ॥०॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

— —

सदर देओयाणी आदालतेर पण्डितेर प्रति प्रश्नः—

११६—एक व्यक्ति अवीरा स्त्री आपन स्वामीर परकालेर क्रिया कर्म्मेर खरचेरदेना परिशोध प्रयुक्त स्वामीर उत्तराधिकारीगण वर्त्तमाने देवत्र भूमि देव सेवा समेत टाकार परिवर्त्त[1] दान करिते पारेकि ना। आर ताहा सिद्ध हय कि ना ? इति।

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रमेतद्विवादविषयनिविष्टपत्रजातं च यदेतदब्दीयमार्च्चमासीयोनविंशतिदिनसम्बन्धिशनिवासरे यामद्वयानन्तरं मया प्राप्त तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥ ० ॥

एका काचिदवीरा स्त्री स्वपत्युः पारलौकिककार्यार्थव्ययपरिशोधनार्थं पत्युरुत्तराधिकारिषु विद्यमानेषु देवत्रभूमिं राजतमुद्राविनिमये दातुं न शक्नोति, एवं तद्दानं न सिद्ध्यति, देवत्रभूमौ देवभिन्नानां केषाञ्चिदपि स्वत्वाभावेन दानायोग्यत्वात्। देवसेवायाश्च सेवायितशब्दवाच्यस्यायत्तत्वेन सेवायितशब्दवाच्यस्य पुत्रपौत्रप्रपौत्रराहितस्य मृतस्य पत्युरंशे उत्तराधिकारित्वेन जाताधिकारा पत्नी। यदि राजतमुद्राविनिमये स्वपतियोग्यांशदेवसेवादानमन्तरेण स्वपत्युः पारलौकिककार्य्यार्थव्ययपरिशोधनं कर्त्तुमशक्ता स्यात्तदा तदर्थं स्वपतियोग्यांशरूपाया देवसेवाया राजतमुद्राविनिमये दानं कर्त्तुं शक्नोति, तद्दानञ्च सिद्ध्यति। तत्र च द्रव्यसाध्यदेवसेवाया द्रव्यं विनाऽनिष्पाद्यत्वेन[2] स्वपतियोग्यांशदेवसेवानिर्वाहकदेवत्रभूमेः संरक्षणावेक्षणादिकर्तृत्वादेः कारयितृत्वादेर्व्वा तदुत्पन्नोपस्वत्वेन च देवसेवाकर्तृत्वादेः कारयितृत्वादेर्व्वोपरिलिखितप्रकारेणोत्तराधिकारित्वेन पत्न्या प्राप्तस्य देवसेवान्यथानुपपत्त्या समर्पणं भवितुमर्हति, यतः सेवायितशब्दवाच्यस्य तन्मरणानन्तरं तदुत्तराधिकारिणो वा देवसेवानिर्व्वाहकदेवत्रभूमेः संरक्षणावेक्षणादिकर्त्तृत्वादेः कारयितृत्वादेर्वा देवसेवान्यथानुपपत्त्या क्षमतास्त्येव। प्रकृते तु प्रभुसमर्पितपत्रजातान्तर्गतैकविंशत्यङ्काङ्कितदेवसेवार्पण—हेबावेल एओज—संज्ञकपत्रे अस्मत्स्वत्वे त्वं वर्त्तमानो भूत्वा-

१. पारवर्त्ते। २. विनाऽपिष्पा० व्यप०।

श्रीमत्याः परमेश्वर्य्याः सेवां भूमिसहितां स्वायत्तीकृत्य पुत्रपौत्राद्युत्तराधिकारिक्रमेण तद्भूमेरुपस्वत्वादिकमादाय श्रीमत्याः परमेश्वर्य्याः सेवां कुरु इति लिखनेन स्वपतियोग्यांशरूपाया देवसेवायास्तत्सेवासम्पादकदेवत्र-भूमिसहिताया राजतमुद्राविनिमये श्रीमत्याः परमेश्वर्य्याः सेवार्थं समर्पणमेव स्पष्टीकृतम्—इति वङ्गदेशचलितमनुकुल्लूकभट्टकृतमन्वर्थमुक्तावलीदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥०॥

अत्र प्रमाणम्—

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति—इति मनु(११।२६) वचनम् ॥ १ ॥

प्रतिमादिदेवतार्थमुत्सृष्टं धनं देवस्वम्—इति कुल्लूकभट्टकृतमन्वर्थमुक्तावली(पृ० ४३० ग्रन्थलिखनम् ॥ २ ॥

अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः—इति मनुवचनम् ॥३॥

पत्नी दुहितरश्चैव—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम्॥४॥

भर्त्तुरौर्द्ध्वदैहिकक्रियाद्यर्थं दानादिकमप्यनुमतम्—इति दायभागदायक्रमसंग्रहग्रन्थलिखनम् ॥ ५ ॥

विक्रेतुर्यादृशं स्वत्वं क्रेतुस्तादृशमेव स्वत्वं क्रयाज्जायते—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनञ्चेति ॥ ६ ॥

एतदब्दीयापरेलमासीयत्रयोविंशतिदिनसम्बन्धिशनिवासरे दत्तेयं मया व्यवस्था ।

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

श्रीर्ज्जयतितराम्

११७ प्रभुकृतप्रश्नमवगत्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते। यद्यप्येकस्यां पत्न्यामेकस्यां दुहितरि च विद्यमानायां विद्यमानयोर्द्वयोः सोदरभ्रात्रोः पुत्रपौत्रप्रपौत्ररहितो राधाकृष्णाख्य एतद्धर्म्माधिकरणनियुक्त-उकिलशब्दवाच्यो मृतः स्यात्तदा तत्त्यक्तधनं यदि सोदरभ्रातृभ्यां साधारणं न भवति तदा तत्पत्नी प्राप्तुं शक्नोति। यदि च तद्धनं सोदरभ्रातृभ्यां साधारणं भवति तदा तद्धने सोदरभ्रात्रोरेवाधिकारः, तत्पत्नी च यावज्जीव तद्धनाद् ग्रासाच्छादनभागिनी भवति—इति पश्चिमदेशचलितमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्था ॥ ० ॥

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतः—इत्यादि मिताक्षरावीरमित्रोदयादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ १ ॥

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्—इति मिताक्षराग्रन्थलिखनम् ॥ २ ॥

स्वर्य्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी।

अविभक्ते धनांशे तु प्राप्नोत्यामरणान्तिकम् ॥ —इति वीरमित्रोदयादिग्रन्थधृतकात्यायनवचनञ्चेति ॥ ३ ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

११८—प्रश्नः—

यद्यपि कोनह मृत व्यक्तिर अवीरा पत्नी आपन उत्तराधिकारि वर्त्तमाने आपन स्वामिर त्यक्त पैतृक अथवा निजेर अर्थात् स्त्री

धनरूप कोनइ बागान आपन मृत स्वामिर विषयान्तर प्राप्त हइया ताहार रक्षार्थे आदालतेर खरचार कारण विक्रय करे तवे सेइ विक्रय शास्त्र सिद्ध हय कि ना ?

प्रश्नः—

यद्यपि उत्तराधिकारिर लिखित दलिलेर द्वारा ऐ अवीरार उपरेर लिखित विषयेर दान विक्रयेर क्षमता वोध हय तवे सेइ विक्रय शास्त्र सिद्धहय कि ना? ॥०॥

श्रीर्ज्जयतितराम

प्रभुसमर्पितप्रश्नपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति तादृशविक्रयः शास्त्रसिद्धो भवति, यतः पुत्रपौत्रप्रपौत्ररहितस्योपरतस्य पत्युर्द्धनस्योत्तराधिकारित्वेन पत्नी-संक्रान्तत्वेऽपि तस्याश्च वर्त्तनाद्यशक्तौ तदुपयुक्तस्य तद्धनस्याधानं विक्रयणं (च) शास्त्रानुमतं भवति। अतएव वर्त्तनादिमूलीभूतस्य तद्धनरक्षणस्याप्या-वश्यकत्वेन तद्धनरक्षणार्थं तदुपयुक्तस्य तद्धनस्य शक्तावशक्तौ वाभय-थैव स्वकीयस्त्रीधनस्य चाधानं विक्रयणं (च) शास्त्रसम्मतं भवतीति निष्प्र-त्यूहमेव।

द्वितीयप्रश्नोत्तरमप्यर्थादत्रैव पर्य्यवसन्नमिति पृथङ् न लिखितम्—इति-वङ्गदेशचलितदायभागविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्थेति ॥•॥

अत्र प्रमाणम्—

अतएव वर्त्तनाशक्तावाधानमप्यनुमतम्। तत्राप्यशक्तौ विक्रयण-मपि—इति दायभागग्रन्थलिखनम् ॥ १ ॥

तथा च भर्त्ता जीवन् यथा यस्य पोषणादिकं यद् यद्वा कर्म्म करोति मृतभर्तृकापि स्वशक्त्यनुसारेण तथैव तस्य पोषणं तच्च कर्म्म कुर्व्वीत—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥ २ ॥

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् ।

विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥—इति दायभागादि-(पृ० ७६)ग्रन्थधृतकात्यायन(पृ० ११०, ९०६)वचनञ्चेति ॥३॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

११९—आदालते देओयानि जङ्गल महाल सन १८३१ साल ता० १९ मेइ—

सओयाल जओयाव

कोनो कनज ब्राह्मण तिन चारि पुरुष वाङ्गला देसे वास करिया विवाह आदि क्रिया कलाप मिताक्षराशास्त्रानुसारे करिया आसिते-छिल, एवं वाङ्गला देसे किछु जमिदारि कालेकटरि खरिदा ओ दोषरा तालुक ओ गयरह् सोपार्जित करिया कथोक दिन भोगवान थकिया दस एगार वत्सरेर अधिक हइवेक अवर्त्तमान हइयाछे। ऐ चारि पुत्र आपन पितार मरणान्ते कथोक दिन एक अन्ने थकिया पृथक अन्ने हन। किन्तु यदि जमिदारि गयरह् एजमालिते थाकिया मालगुजारि ओ सरञ्जामि ओ सेवा ओ सदावर्त्त खरच पत्र वादे वाकि मुनफा चारि भ्रातातेे समान हिस्या लइया थाके, ओ चारि भ्रातार मद्धे एक भ्राता आपन नाओलद अर्थाद अविरा एक कविला राखिया अवर्त्तमान हय। तवे शास्त्र-मते फौती भ्रातार, अर्थात ये भ्राता मरियाछे, ताहार मतरुका वस्तु, जाहा चिन्हित ना हइया एजमालिते आछे, ऐ सकल वस्तुते धनाधिकारि फौति व्यक्तिर भ्रातारा, कि ताहार कविला हइते पारे॥

२—सओयाल—

यदि चारि भ्राता वर्त्तमाने जमिदारि गयरह् एजमालिते राखिया चारि चारि आना जमिदारिर खजनार टाका आपन

२ हिस्या प्रजागणेर पास उसुल तह्शील करियाथाके, तवे शास्त्रानुसारे उपरेर लिखित ओयारिसान मध्ये धनाधिकारि कविला कि भ्रातारा हइते पारे—इहार जओयाव शास्त्रानुसारे लिखिया ए आदालते पाठाइवेन॥—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयमेइमासीयाष्टाविंशतिदिनसम्बन्धिशनिवासरे पादोनघटिकाचतुष्टयाधिकयामद्वये मया प्राप्तन्तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम्—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति यदि चतुर्भिर्भ्रातृभिः कान्यकुब्जब्राह्मणजातीयैः पुरुषचतुष्टयावधि पञ्चपुरुषावधि वा वङ्गदेशनिवासिभिः पश्चिमदेशचलितमिताक्षरादिग्रन्थानुसारेण स्वकीयविवाहादिक्रियाकलापादिकर्म्म कुर्व्वद्भिः पृथगन्नैः साधारणपैतृकपैतामहसराजकरस्थावरधनैः साधारण्येन राजकरदानराजाज्ञयाऽऽवश्यकराजदण्डादिदानदेवसेवादि[1]सदाव्रतादिकर्म्म कुर्व्वद्भिस्तत्तत्कर्म्म व्ययितावशिष्टजङ्गमधनं विभज्य प्रत्येकं तस्य समानांशो गृहीतः स्यात्तेषां चतुर्णां भ्रातॄणां च मध्ये एकः कश्चित् पत्नीमेकां संरक्ष्य पुत्रपौत्रप्रपौत्ररहितो मृतश्चेत्तदा तदीयविभक्तपैतृकपैतामहधनांशे तदीयस्वोपार्जितासाधारणधने तत्पत्न्येवाधिकारिणी[2], न तु भ्रातरः। तदीयाविभक्तसाधारणसराजकरास्थावरधनांशे च तद्भ्रातर एवाधिकारिणो न तु तत्पत्नी। यदि च तदीयविभक्तपैतृकपैतामहधनेन स्वोपार्जितासाधारणधनेन वा तत्पत्न्या यावज्जीवं तत्कुलोपयुक्तस्य ग्रासाच्छादनादेरावश्यकविधवाधर्म्माद्याचरणस्य वा निर्व्वाहो भवितुं न शक्यते तदा मृतस्य तस्य पत्नी तदीयाविभक्तसाधारणसराजकरस्थावरधनांशादपि यावजीवं तत्कुलोपयुक्तस्य ग्रासाच्छादनोपयुक्तधनस्यावश्यकविधवाधर्म्माद्याचरणनिर्व्वाहोपयुक्तधनस्य च भागिनी भवतीति ॥—

---

१ राजकरत्वाव०—व्यप० । २ तत्पत्नेवा०—व्यप० ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥

तत्सुतः—इत्यादि मिताक्षरावीरमित्रोदयादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्—इति मिताक्षराग्रन्थलिखनम् ॥२॥

स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी ।
अविभक्ते धनांशे तु प्राप्नोत्यामरणान्तिकम्॥—इति वीरमित्रोदयादिग्रन्थधृतकात्यायनवचनम् ॥ ३ ॥

द्वितीयप्रश्नस्योत्तरम्—

यदि विद्यमानैश्चतुर्भिर्भ्रातृभिः सराजकरस्थावरादिधनं साधारणं रक्षित्वा प्रत्येकं तत्सराजकरस्थावरोपस्वत्वस्य राजतमुद्रात्मकस्य स्वस्वांशरूपश्चतुर्थांशः प्रजानां सन्निधौ गृहीतः स्यात्तेषां चतुर्णां भ्रातॄणां च मध्ये मृतस्यैकस्य पुत्रपौत्रप्रपौत्ररहितस्य विभक्तपैतृकपैतामहधनांशे स्वोपार्जितासाधारणधने च तत्पत्न्येवाधिकारिणी, न तु भ्रातरः; अविभक्तसाधारणसराजकरस्थावरधनांशे च तद्भ्रातर एवाधिकारिणो, न तु तत्पत्नी । यदि च तदीयविभक्तपैतृकपैतामहधनेन स्वोपार्जितासाधारणधनेन वा तत्पत्न्या यावज्जीवं तत्कुलोपयुक्तस्य ग्रासाच्छादनादेरावश्यकविधवाधर्म्माद्याचरणस्य वा निर्व्वाहो भवितुं न शक्यते तदा मृतस्य तस्य पत्नी तदीयाविभक्तसाधारणसराजकरस्थावरधनांशादपि यावज्जीवं तत्कुलोपयुक्तस्य ग्रासाच्छादनोपयुक्तधनस्यावश्यकविधवाधर्म्माद्याचरणोपयुक्तधनस्य च भागिनी भवति—इति पश्चिमदेशचलितमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्थेति ॥ ० ॥ ॥ ० ॥ ० ॥—

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणत्रयम् ॥ ३ ॥

विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु विषयतया व्यवस्थापनम्—इति मिताक्षरादि ग्रन्थलिखनञ्चेति ॥ ४ ॥

एतदब्दीयजुनमासीयदशमदिनसम्बन्धिशुक्रवासरे दत्तेयं मया व्यवस्थेति ।

श्रीज्जयतितराम्

श्रीवैद्यनाथमिश्रण

१२०—सओाल आदालत देओयानी कमिसनरि आतराफ मसरक जिला रङ्गपुर वनामे पण्डीताने सदर देओयानि आदालत शन १८३१ इङ्गरेज तारिख ३१ मार्च मोताबेक सन १२३७ शाल वाङ्गला तारिख १९ चैत्र—

रामप्रसादचक्रवर्त्ति	आपीलाण्ट
पेनका ओ पचिवेत्ता	रेष्पाडण्ट हय

दावि ३० टाका वावत दाश दाशीर मूल्य—

एइ मोकद्दमाते एइ विशयेर व्यवस्था लओा आविश्वक हइया सओाल करा जाइतेछे जे जादि कोन दास कि दाशी ताहार स्वामीर ताच्छल्य क्रमे अथवा अन्य कोन हेतुते पृथक थाकिया वहु काल पर्य्यन्त आपन उपार्ज्जित धन करणक दिन पात करे, तवे वहु काल परे ऐ स्वामिर कि स्वामिर उत्तराधिकारिर दाओा शास्त्रानुसारे ऐ दास कि दासिर प्रति अर्शिते पारे कि ना इति ॥

श्रीज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयापरेलमासीयषड्विंशतिदिनसम्बन्धि-मङ्गलवासरे यामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्त-दनुसारेणोत्तरं लिख्यते—

यदि कश्चिद्दासः काचिद्दासी वा स्वस्वामिनस्ताच्छील्यक्रमेणाथवान्येन हेतुना केनचित् पृथक् स्थित्वा बहुकालपर्य्यन्तं स्वोपार्ज्जितधनेन स्वनिर्व्वाहं कृतवान् कृतवती स्याद्वा, तत्र यदि स एव दासः सा दासी वा शास्त्रोक्त-

पञ्चदशदासान्तर्गतभक्तदासो भक्तदासी वा भवति तदा बहुकालानन्तरं तस्यैव स्वामिनस्तदुत्तराधिकारिणो वा शास्त्रानुसारेण तद्दासम्प्रति दासीम्प्रति वा तत्प्रातीच्छ्या भवितुं न शक्नोति, स्वामिनो भक्तत्यागादेव तयोर्भक्तदासदास्योर्दास्यमुक्तेः, तत्स्वामिनस्तदुत्तराधिकारिणो वा स्वत्वाभावात् । यदि च स एव दासः सा दासी वा शास्त्रोक्तपञ्चदशदासान्तर्गतभक्तदासो भक्तदासी वा न भवति एवं तयोर्दासदास्योः स्वस्वामिनस्ताच्छ(ी ल्यक्रमेणान्येन केनचिद्धेतुना वा पृथक् स्थित्वा बहुकालपर्य्यन्तं स्वोपार्जितधनकरणकनिर्व्वाहे सत्यपि बहुकालानन्तरमपि दास्यान्मुक्तिर्भवितुं न शक्नोति । अतएव तत्स्वामिनस्तदुत्तराधिकारिणो वा तयोः प्रातीच्छ्याभवितुं शक्नोत्येव, स्वस्वामिनस्ताच्छील्यक्रमेणान्येन केनचिद्धेतुना वा पृथक् स्थित्वा बहुकालपर्य्यन्तं स्वोपार्जितधनकरणकनिर्व्वाहस्य भक्तदासभक्तदास्यतिरिक्तानां चतुर्द्दशप्रभेदानां दासदासीनां दासमुक्तिहेतुत्वाभावेन पूर्व्ववत् तत्स्वामिनस्तदुत्तराधिकारिणो वा स्वत्वस्यानपायात्— इति वङ्गदेशचलितनारदस्मृतिविवादभङ्गार्णवविवादार्णवसेतुदायक्रमसंग्रहादिग्रन्थानुसारिणी व्यवस्था ।

अथ प्रमाणम्—

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥

मोक्षितो महतश्चर्णाद् युद्धेप्राप्तः पणेजितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥

भक्तदासश्च विज्ञेयस्तथैव वडवाभृतः ।
*विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥*इत्युपरि लिखितग्रन्थधृतनारदवचनम् (नास्मृ. पृ. ६६) ॥ १ ॥

एतेषां मध्ये तु गृहजातादिचतुर्णामात्मविक्रेतुश्च स्वामिप्रसादं विना न दास्यमोक्षः । अनाकालभृतस्तु दुर्भिक्षे यद्भक्षितं तद्गोयुगसहितं दत्त्वा मुच्येत । भक्तदासो भक्तत्यागात्—इति दायक्रमसंग्रहादि(पृ. ५२।५३)ग्रन्थलिखनञ्चेति ॥ २ ॥

आगष्टमासीयसप्तदशदिनसम्बन्धिबुधवासरे घटिकैकाधिकयामद्वयानन्तरं दत्तेयं मया व्यवस्था ।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

१२१—सदर देओयानि आदालतेर पण्डितेर प्रति प्रश्न—

सओयाल—

यदि कोन स्त्रीर स्वामि प्रायश्चित्त करे, एवं ताहार वाटीते ब्राह्मणसकले आहारादि करे, ओ आपन सरिकानेर सहित विषयादिर विभाग हइयाथाके, तवे ताहार मरणोत्तर ए विषये ताहार स्त्रि अधिकारिणी हय कि ना, एवं ए स्त्रिर साक्षिरा उहार स्वामिर प्रायश्चित्त करा एवं जाति पाओया ये प्रकार कहियाछे शास्त्रसम्मत यथार्थ वटे कि ना—मिछिलेर कागजात दृष्टे यथाशास्त्र व्यवस्था लिखिवा इति । १५ आपरेल इं १८३१ साल ॥

श्रीर्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातञ्च यदेतदब्दीयमेमासीयैकविंशतिदिनसम्बन्धिशनिवासरे यामद्वयानन्तरं मया प्राप्त तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

यदि कस्याश्चित् स्त्रियाः स्वामिना प्रायश्चित्तं कृतम्, एवं तद्गृहे ब्राह्मणैराहारादिकमपि कृतम्, अथच तत्स्वामिनः स्वांशिभिः सह धनस्य विभागोऽभूत् तदा तत्स्वामिमरणोत्तरं तत्त्यक्तधने तस्य पुत्रपौत्रप्रपौत्राभावे तत्पत्न्येवाधिकारिणी भवति । पत्न्यां विद्यमानायामन्येषां नाधिकारः । अथच तस्याः स्त्रियाः साक्षिभिस्तस्याः स्वामिनः प्रायश्चित्तकरणं यथोक्तं जातिप्राप्तिर्वा यथोक्ता तच्छास्त्रानुसारेण यथार्थमेव भवति—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वविवादभङ्गार्णवदायक्रमसंग्रहादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

पतितानामपि स्वधनसाध्यप्रायश्चित्तश्रुतेः पातित्येन स्वत्वनाशः प्रायश्चित्तवैमुख्ये बोध्यः—इति दायतत्त्व(पृ० १६२)ग्रन्थलिखनम् ॥१॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादि-ग्रन्थधृतयाज्ञवल्क्यवचनञ्चेति ॥ २ ॥

एतदब्दीयसितम्बरमासीयप्रथमदिनसम्बन्धिबृहस्पतिवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्
श्रीवैधनाथमिश्रेण

१२२—लं० २६ सन १८३० इङ्गरेजी

वहमव[१] फएज गञ्जर खोदाओन्द न्यामत श्रीयुत कमिशनर साहेव आदालत देओयानि कमिशनरि आतवाफ मशवक जेला रँपूर दाम एक वानहु ॥

आरजदास्त श्रीमोहनलाल सदर आमिन मतालके आदालत मजकुर गरिव परओर सेलामत। परगने पर्व्वत जोयारेर श्रीयुत राजेन्द्र नारायणचौधुरि जमिदार कृतनारायणचौधुरि[२] मोतफार =) आना जमिदारि पाओयार प्रार्थनाते परगना मजकुरेर जमिदारान् श्रीअमृतसिंहचौधुरि ओ शरणसिंहचौधुरि ओ जगदीश्वरीचौधुराणी जओजे अमृतनारायण चौधुरि मोतफार मादरे गौरीनारायणसिंहचौधुरि मोतफार नामे १६२॥-) १२॥ गण्डार दाविते[३] नालिस करे। नथिर कागजात विवेचनाते

---

१. वहथव अथवा वहअव अपि पठितुं शक्यते। २. कुडनारायण इत्यपि पठितुं शक्यते।

३. दारिते—व्यप०।

जानागेल जे परगणे पर्व्वत जोयारेर सावेक जमिदार कलपचन्द्रचौधुरिर ३ पुत्र। ताहार एक पुत्र किशोरिसिंह निःसन्तान मृत्यु हय, द्वितीय पुत्र फुलसिंहचौधुरिर २ पुत्र। ताहार १ एक पुत्र आजवसिंह निःसन्तान मृत्यु हय, आर १ पुत्र सुलतानसिंहचौधुरि। ऐ कलपचन्द्रेर पुत्र दलसिंहचौधुरि ताहार २ पुत्र अवनसिंह ओ किर्त्तीनारायाणसिंहचौधुरि। किर्त्तिनारायणेर २ पक्षे ४ पुत्र। एक पक्षे राजेन्द्रनारायणसिंह ओ सरलसिंह। ऐ सरलसिंह सुलतानसिंहेर पुष्यपुत्र हइया ॥० आना जमिदारिर अधिकारि हइयाछे। आर एक पक्षे अर्थात् प्रथम पक्षेर पुत्र अमृतसिंह ओ कृष्णनारायणसिंहचौधुरि। ऐ अमृतसिंह अवनसिंहचौधुरिर पुष्यपुत्र हइया ।० आना जमिदारिर अधिकारि हइयाछे, बाकि ।० आना, याहा कीर्त्तिनारायणसिंह मोतफार हक, ताहार मध्ये =) आना राजेन्द्रनारायण ओ =) आना कृष्णनारायणसिंह अधिकारि हइयाछे। कृष्णनारायण मजकुर निःसन्तान मृत्यु हय। ताहार माता रुद्रेश्वरी ओ वैमात्रेय भ्राता राजेन्द्रनारायण ओ सहोदर भ्राता अमृतनारायणसिंह, जे आपन पितृव्येर पुष्यपुत्र हइयाछे, आर सरलसिंह वैमात्रेय भ्राता, जे सुलतानसिंहेर पुष्यपुत्र हइयाछे, इहारा सकलि वर्त्तमान आछे। राजेन्द्रनारायण वैमात्रेय भ्राता विधाय ऐ कृष्णनारायण मोतफार =) आनार दाओया राखे। अमृतनारायणसिंह पूर्व्वसहोदर भ्राता विधाय ऐ कृष्णनारायणेर =) आना अंशे आपन सत्त्व वर्त्तीय, एवं हेवानामा राखा ओ श्राद्धादि करा जाहेर करे। हेवानामा दरपेश करिते पारिलना। अतएव ऐ कृष्णनारायणेर =) आना अंशे कोन व्यक्ति अधिकारि हय-यथाशास्त्र इहार व्यवस्था निमित्ते ओ पत्र बुझार जन्ये एक कुरशीनामा एइ आरजि सहकारे पठाइया उमेदोयार जे हजुरेर रोवकारिर द्वाराय कुरशीनामा सदर देओयानि आदालतेर पण्डितदिगेर निकट पाठाइया व्यवस्था आनाइया ए आदालते देलाइते मरजि हय।—इह'

आरज। इति सन १८३१ साल इंरेजी ता० ९ जुन मोतावेक सन १२३८ साल वाङ्गला तारिख २७ ज्यैष्ठ ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं वंशावलीपत्रं च यदेतदब्दीयजुलाइमासीयोनत्रिंशद्दिनसम्बन्धिशुक्रवासरे घटिकाद्वयाधिकयामद्वयान्तरं मया प्राप्तम् तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।—

प्रश्नपत्रवंशावलीपत्रोभयलिखितवृत्तान्ते सति कृष्णनारायणसिंहस्य मरणोत्तरं तत्यक्ताणकद्वयपरिमितांशे यदि तस्य पुत्रपौत्रप्रपौत्रपत्नीदुहितृदौहित्रापितृपर्य्यन्तो न स्यात्तदा तन्मातृ रुद्रेश्वर्य्या एवाधिकारः, तन्मातरि रुद्रेश्वर्य्यां विद्यमानायां तद्वैमात्रेयभ्रातृ राजेन्द्रनारायणसिंहस्य, तत्सहोदरभ्रातुरमृतनारायणसिंहस्य, अर्थात् स्वपितृव्यस्यावनसिंहस्य दत्तकपुत्रत्वेनेदानीं स्वपितृव्यपुत्रस्य च तद्वैमात्रेयभ्रातुः सवलसिंहस्य[1] अर्थात् स्वप्रपितामहकलपचन्द्रचातुर्द्धरिकपुत्रफुलसिंहचातुर्द्धरिकपुत्रसुलतानसिंहचातुर्द्धरिकस्य दत्तकपुत्रत्वेनेदानीं स्वपितामहप्रपौत्रस्य च नाधिकारः—इति वङ्गदेशचालतदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायक्रमसंग्रहविवादभङ्गार्णवविवादार्णवसेतुप्रभृतिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धुः—इत्याद्युपरिलिखितग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ १ ॥

एतदब्दीयसेप्टम्बरमासीयसप्तमदिनसम्बन्धिबुधवासरे घटिकैकाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

१ सबल:सिंहस्य—व्यप० ।

१२३—सओयाल--यदि एक विधवार कन्या थाके, तबे सेइ विधवा आपन स्वामिर पैतृक धनेर अधिकारिणी हइते पारे कि ना. अथवा सेइ कन्या माता वर्त्तमाने आपन मृत पितार पैतृक धनेर अधिकारिणी हइते पारे कि ना इति ॥—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयागस्तिमासीयविंशतिदिनसम्बन्धिशनिवासरे प्रटिकैकाधिकयामद्वये मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि कस्याश्चिद् विधवायाः स्त्रियाः कन्या तिष्ठति । सा विधवा यदि पत्युः पुत्रपौत्रप्रपौत्राणां मध्ये कश्चिन्नास्ति तदा तादृशस्य पत्युः पैतृकधनस्याधिकारिणी भवितुं शक्नोति । तस्यां विधवायां मातरि विद्यमानायां सा दुहिता मृतस्य स्वपितुः पैतृकधनस्याधिकारिणी भवितुं न शक्नोति, पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य धने शास्त्रानुसारेण पत्न्याः प्रधानाधिकारित्वात्, पत्न्या अभाव एव दुहितुरधिकाराच्च-इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव-इत्याद्युपरिलिखितग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

अनपत्यधनं पत्न्यभिगामि, तदभावे दुहितृगामि-इत्यादि तत्तद्ग्रन्थधृतविष्णुवचनञ्चेति ॥२॥—

एतदब्दीयदिशम्बरमासीयपञ्चमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१२४—प्रश्न—

कोन अपुत्रक स्त्रिलोक, ये ताहार चारि कन्या वर्त्तमाना, ओ ताहार मध्ये एक कन्या निःसन्ताना थाके, यद्यपि आपन स्वामिर परलोक प्राप्त हओनेर परे स्वामिर स्थावर वस्तु पुत्रवति तिन कन्यार मध्ये एक कन्यार स्वामिके, ये सेइ व्येक्ति ऐ वस्तु नष्टोद्धार ओ स्त्रीलोकेर सेवा सुश्रुषा एवं पति पालनेर निमित्त आपन अर्थ व्यय ओ परिश्रम करे, ताहारि परिवर्त्ते एक कन्यार सन्मति पूर्व्वक दान करे, एवं ततपरे द्वितीय कन्या ओ दौहित्र सकल ऐ दाने सन्मति लिखन देय—ए रूप दान शास्त्रोक्त सिद्ध हय कि ना इति ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयागस्तिमासीयविंशतिदिनसम्बन्धिशनिवासरे घटिकैकाधिकयामद्वये मया प्राप्तम्, तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति पतिमरणानन्तरं पुत्रपौत्रप्रपौत्ररहिता पत्नी यद्युत्तराधिकारित्वेन स्वसंक्रान्तपतिस्थावरधनं पुत्रवतीनां तिसृणां दुहितॄणां मध्ये कस्याश्चदप्येकस्याः पत्ये तत्स्थावरनष्टोद्धर्त्रे च स्वस्वत्वास्पदीभूतद्रव्यव्ययेन तस्याः स्त्रियाः सेवाशुश्रूषाप्रतिपालनादिपरिश्रमकर्त्रे च तादृशद्रव्यव्ययविनिमये स्वानन्तरोत्तराधिकारिणीनां दुहितॄणां दुहित्रनन्तरोत्तराधिकारिणां सर्व्वेषां दौहित्राणां च सम्मत्या दत्तवती स्यात्, तदैतादृशदानं शास्त्रानुसारेण सिद्धं भवति, पुत्रपौत्रप्रपौत्ररहितस्योपरतस्य पत्युर्धनस्योत्तराधिकारित्वेन पत्नीसंक्रान्तत्वेऽपि तस्याश्च वर्त्तनाद्यशक्तौ तद्धनसम्बन्ध्याधानविक्रयणादेः शास्त्रानुमतत्वेन वर्त्तनादिमूलीभूतस्य तद्धनसम्बन्धिनष्टोद्धारस्याप्यावश्यकत्वेन तादृशनष्टोद्धर्तृद्रव्यदानस्य तस्याः स्त्रियाः सेवाशुश्रूषाप्रतिपालनाद्युपयोगिद्रव्यविनिमयत्वेन च तत्सिद्धेः शास्त्रानुमतत्वस्यार्थसिद्धत्वात्, स्वाम्यनुमत्याऽस्वामिकृतदानस्य विक्रयस्य वा शास्त्रानुसारेण सिद्धेर्न्निष्प्रत्यूहत्वेन स्वानन्तरोत्तराधिकार्य्यनुमत्या स्वानन्तरोत्तराधिकार्य्यनन्तराधिकार्य्यनुमत्या च धनस्वामिपूर्व्वाधिकारिकृतदानस्य शास्त्रानुसारेण

सिद्धेर्निष्प्रत्यूहत्वस्यार्थसिद्धत्वाच--इति वङ्गदेशचलितदायभागश्रीकृष्ण-तर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा--इत्याद्युपरिलिखितग्रन्थ-धृतयाज्ञवल्क्यवचनम् ॥१॥

अतएव वर्त्तनाशक्तावाधानमप्यनुमतम्, तत्राप्यशक्तौ विक्रयण-मपि—इति दायभागग्रन्थलिखनम् ॥२॥

तथा च *भर्त्ता जीवन् यथा यस्य पोषणादिकं यद् यद्वा कर्म्म करोति मृतभर्त्तृकापि स्वशक्त्यनुसारेण तथैव तस्य पोषणं तच्च कर्म्म कुर्वीत* —इति विवादभङ्गार्णवग्रन्थलिखनम् ॥३॥

तथा च *स्वामिनोऽनुमतिसत्वे तु अस्वामिकृतविक्रयोऽपि सिद्ध्यति, व्यवहारोपि तथा*—इति विवादभङ्गार्णवग्रन्थलिखनञ्चेत ॥४॥

एतदब्दयदिशम्बरमासीयपञ्चमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१२५—सओयाल—आदालते आपिल कलिकाता बनामे पण्डित आदालते देओयानि सदर—

१ प्रथम सओयाल—

राममोहन तेओयारि आपन भ्राता ओ भ्रातुष्पुत्र, उपपत्नी ओ ताहार गर्भजात दुइ कन्या ओ एक पुत्र वर्त्तमाने आपन समुदय-विषय उपपत्नीर गर्भजात आपन औरस पुत्रके दान करिया लोकान्तर हइया थाके, तवे शास्त्रानुसारे ऐ दानपत्र सिद्ध हय कि ना, ओ ए विधाने ऐ मृत व्यक्तिर भ्राता ओ भ्रातुष्पुत्र मृत व्यक्तिर धनाधिकारि हय कि ना।

द्वितीय सओयाल—

यदि शास्त्रानुसारे ऐ दानपत्र सिद्ध ना हय, तवे ऐ मृत व्यक्तिर भ्राता ओ भ्रातुष्पुत्र ओ उपपत्नीर गर्भजात औरस पुत्र ओ दुइ-कन्यार मध्ये कोन व्यक्ति मृत व्यक्तिर धनाधिकारि हइते पारे— यथाशास्त्र इहार जओयाव लिखह इति ॥

श्रीर्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतद्दीयागस्तिमासीयत्रयोदशदिनसम्बन्धिशनिवासरे घटिकैकाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रथमप्रश्नस्योत्तरम्—

यद्यपि राममोहनत्रिवेदी स्वकीये सहोदरभ्रातरि भ्रातृपुत्रे च विद्यमाने सति स्वोपपत्न्यां च विद्यमानायां तद्गर्भजातयोर्द्वयोः कन्ययोर्विद्यमानयोरेवं तद्गर्भजाते चैकस्मिन् पुत्रे विद्यमाने सति स्वस्वत्वास्पदीभूतसमुदायधनं स्वकीयोपपत्नीगर्भजाताय स्वकीयौरसपुत्राय दत्त्वा मृतः स्यात्तत्र यदि तद्धनं भ्राता[1] भ्रा पुत्रेण वा सह साधारणं भवति, एवं तद्दाने साधारण्यप्रतियोगिनोऽर्थात्तद्भ्रातुर्भ्रातृपुत्रस्य वा अनुमतिस्तदा तद्दानं प्रभुसमर्पित-प्रश्नपत्रावगतस्य विवाहसंस्कृतपत्नीगर्भजातपुत्रपौत्रप्रपौत्ररहितस्य मृतस्य राममोहनत्रिवेदिनः प्रभुसमर्पितविचारपत्रावगतायाः विवाहसंस्कृतायाः-पत्न्याः सुगन्धानाम्न्या यावज्जीवं ग्रासाच्छादनोपयुक्तावश्यकतत्कुलोपयुक्त विधवाधर्म्माद्याचरणोपयुक्तातिरिक्तसमुदायधन एव वङ्गदेशचलितशास्त्रानुसारेण पश्चिमदेशचलितशास्त्रानुसारेण च सिद्धं भवितुं शक्नोति। तेषामनुमतत्वमसत्यामपि वङ्गदेशचलितशास्त्रानुसारेणोपरिलिखितविवाहसंस्कृतायाः पत्न्याः सुगन्धानाम्न्या उपरिलिखितप्रकारकग्रासाच्छादनाद्युपयुक्तातिरिक्तस्वांशयोग्ये सिद्धं भवितुं शक्नोति स्वेतरांशयोग्ये च सिद्धं भवितुं न शक्नोति। पश्चिमदेशचलितशास्त्रानुसारेण तु साधारण्यप्रतियोगिनो भ्रातु-

१. भ्राता—व्यप०।

भ्रातृपुत्रस्य वा अनुमतिं विना समुदाये स्वांशयोग्येऽपि वा सिद्धं भवितुं न शक्नोति, स्वेतरांशयोग्ये तत्सिद्धिर्दूरापास्तैव, पश्चिमदेशचलितशास्त्रानुसारेण साधारणधने विभागं विना अंश निर्णयाभावेन स्वांशयोग्येऽप्येकस्य स्वेतरांशयनुमतिमन्तरा दानाद्यनधिकारित्वात् । यदि च तद्धनं मृतस्य राममोहन-त्रिवेदिनाऽसाधारणं विभक्तं वा भवति, तदा वङ्गदेशचलितशास्त्रानुसारेण पश्चिमदेशचलितशास्त्रानुसारेण च मृतस्य राममोहनत्रिवेदिनः पत्न्याः सुगन्धानाम्न्या यावज्जीवमुपरिलिखितप्रकारकग्रासाच्छादनाद्युपयुक्तातिरिक्त-धनांशे सिद्धं भवितुं शक्नोति । एवञ्च सति तद्दानस्य सिद्धत्वपक्षे मृतव्य-क्तेर्भ्राता भ्रातृपुत्रो वा मृतव्यक्तेर्धनाधिकारी न भवति, तद्दानेन मृतस्य तस्य दातुः स्वत्वविच्छेदात्, प्रतिग्रहीतुः स्वत्वोत्पादाच्च । तद्दानस्यासिद्धत्व-पक्षे अर्थात्तद्धनस्य भ्रात्रा भ्रातृपुत्रेण वा सह साधारण्ये पश्चिमदेशचलित-शास्त्रानुसारेण तेषामनुमतिं विना तद्दानस्यासिद्धत्वे मृतस्य राममोहन-त्रिवेदिनः पत्न्यादीनाम्, अर्थात् सुगन्धानाम्नीप्रभृतीनां द्वितीयप्रश्नोत्तर-लिखितप्रकारकग्रासाच्छादनाद्युपयुक्तातिरिक्ताविभक्तसाधारणदायांशे मृत-व्यक्तेः पुत्रमारभ्य पितृपर्यन्तानाम्मध्ये यदि कश्चिन्नास्ति तदा तत्-सहोदरभ्राता भवत्यधिकारी, सहोदरभ्रातरि विद्यमाने भ्रातृपुत्रो नाधिकारी भवतीति ॥

अत्र प्रमाणम्—

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते—इति वङ्गदेशचलितविवादभङ्गा-र्णवादिग्रन्थधृतम्, पश्चिमदेशचलितधारमित्रादयादिग्रन्थधृतञ्च नारद-वचनम् पृ० ६६)॥ १ ॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।

कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥ इति वङ्गदेशचलितदाय-भागादिग्रन्थधृतनारदवचनम् ॥ २ ॥

साधारणद्रव्यस्य समुदायस्यैकेन विक्रये परांशयोग्येऽसिद्धिः । स्वांशयोग्ये तु सिद्धिः अन्यानुमत्या विक्रये तु तत्सिद्धिः—इति वङ्गदेश-चलितविवादभङ्गार्णवग्रन्थ(१ विवा० ३०५ क)लिखनम् ॥ ३ ॥

अविभक्तेषु द्रव्यस्य मध्यगत्वाद् एकस्यानीश्वरत्वात् सर्व्वाभ्यनुज्ञाऽवश्यं कार्य्या, विभक्तेषु तु विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्धत्येव—इति पश्चिमदेशचलितमिताक्षराग्रन्थलिखनम् ॥ ४ ॥

स्थावरस्य समस्तस्य गोत्रसाधारणस्य च ।

नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना ॥—इति पश्चिमदेशचलितवीरमित्रोदयादिग्रन्थधृतव्यासवचनम् ॥ ५ ॥

स्वस्वत्वनिवृत्तिपूर्व्वकपरस्वत्वापादनं दानम्—इति वङ्गदेशचलित विवादभङ्गार्णवादिपश्चिमदेशचलितमिताक्षरादिग्रन्थलिखनम् ॥ ६ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतः—इत्यादि पश्चिमदेशचलितमिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ ७ ॥

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्—इति पश्चिमदेशचलितमिताक्षराग्रन्थलिखनम् ॥ ७ ॥ ० ॥ ० ॥

द्वितीयप्रश्नस्योत्तरम्—

प्रथमप्रश्नोत्तरलिखितप्रकारेण तद्दानस्यासिद्धत्वपक्षे अर्थात् तद्धनस्य भ्रात्रा भ्रातृपुत्रेण वा सह साधारण्ये सति तेषामनुमतिं विना पश्चिमदेशचलितशास्त्रानुसारेण तादृशदानस्यासिद्धत्वपक्षे प्रभुसमर्पितविचारपत्रलिखितानां मृतस्य राममोहनत्रिवेदिनः पत्न्यादीनां सुगन्धानाम्नीप्रभृतीनां मध्ये धनाधिकारे अयं विशेषः । सुगन्धानाम्नी तत्पत्नी यावज्जीवं तत्कुलोपयुक्तग्रासाच्छादनोपयुक्तावश्यकविधवाधर्माद्याचरणोपयुक्तधनस्याधिकारिणी भवति । मृतस्य तस्योपपत्नी यदि मृतस्य राममोहनत्रिवेदिन उत्तराधिकारिणां प्रतिकूला व्यभिचारिणी वा न भवति तदा सापि स्वकुलोपयुक्तग्रासाच्छादनोपयुक्तावश्यकविधवाधर्म्माद्याचरणोपयुक्तधनस्य च यावज्जीवं भागिनी भवति । एवं तदुपपत्नी गर्भजातौरसपुत्रोऽपि यावज्जीवं ग्रासाच्छादनभागी भवति । एवं तदुपपत्नीगर्भजाते द्वे कन्येऽपि विवाहसंस्कारपर्य्यन्तं ग्रासाच्छादनस्य विवाहोपयुक्तधनस्य च भागिन्यौ भवतः—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकाविवादभङ्गार्णवदायक्रम-

संहादिग्रन्थानुसारिणी पश्चिमदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभादिग्रन्थानुसारिणी च व्यवस्था ॥—

अत्र प्रमाणम्—

स्वर्य्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी ।

अविभक्ते धनांशे तु प्राप्नोत्यामरणान्तिकम् ॥—इति उपरिलिखितग्रन्थधृतकात्यायनवचनम् ॥ १ ॥

निर्व्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ।—इति तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ २ ॥

भरणं चास्य कुर्व्वीरन् स्त्रीणामाजीवनक्षयात् ।

रक्षन्ति शय्यां भर्त्तुश्चेदाच्छिन्द्युरितरासु च—इति तत्तद्ग्रन्थधृतनारदवचनम् ॥ ३ ॥

भर्त्तव्यास्त्वपरे सुताः ।—इति तत्तद्ग्रन्थधृतबृहस्पतिवचनम् । ४॥

अपरिणीताजातस्य तु प्रतिषिद्धपुत्रत्वेनापकर्षान्न भागिता, किन्तु ग्रासाच्छादनमात्रार्हता इति वङ्गदेशचलितश्रीकृष्णतर्कालङ्कारकृतदायभागटीका(पृ० १४२) लिखनम् ॥५॥

सुताश्चैषाञ्च भर्त्तव्या यावन्नो भर्तृसात्कृताः । इति तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥६॥

कन्याभ्यश्चपितृद्रव्याद्देयं वैवाहिकं वसु—इति तत्तद्ग्रन्थ धृतदेवलवचनञ्चेति ॥ ७ ॥

अत्ररामभोहनत्रिवेदिनो वंशे वङ्गदेशचलितशास्त्रस्य पश्चिमदेशचलितशास्त्रस्य वा प्रचार इति अनवगमात् प्रभुसमर्पितविचारपत्रेऽपि वङ्गदेशचलितशास्त्रानुसारेण पश्चिमदेशचलितशास्त्रानुसारेण वा व्यवस्था दातव्येति आज्ञाया अलिखितत्वाच्च वङ्गदेशचलितशास्त्रानुसारेण पश्चिमदेशचलितशास्त्रानुसारेण च व्यवस्था लिखितेति निवेदनम् ॥

एतदब्दीयदिसम्बरमासीयत्रयोदशदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

१२६—अथ कश्चिद् ब्राह्मणो द्वौ पुत्रौ द्वे कन्ये पत्नीञ्च त्यक्त्वा मृतः। तदनन्तरमवशिष्टानाम्मध्ये ज्येष्ठोऽजातसन्तानको ममार। द्वयोर्दुहित्रोर्म्मध्ये एका पुत्रादिरहिता स्वभागिनेयं कृत्रिमपुत्रं विधाय ममार। एतदनन्तरं मूलपुरुषस्य……………। अविभक्तानां मध्ये एका दुहिता एको भ्राता चावशिष्टोऽस्ति। तयोर्म्मध्ये दुहिता स्वभ्रातुः सकाशादविभक्तायाः स्वजनन्या भागं याचते। अविभक्ताया मम मातुः भागस्त्वया भुज्यते, स मातुर्भागो दुहितुर्भवति, अतस्तद्भागं द्वेधा विभज्य तत्पुत्र्यै मह्यं मद्भगिनीकृतकृत्रिमपुत्राय च त्वया देय इति विवदते च।

एतादृशे विवादे समुत्थिते शास्त्रतो मातुर्भागो भवति नवेत्येकः प्रश्नः ॥१॥

मातुर्भागे दुहितुरधिकारोऽथवा पुत्रस्येति द्वितीयः प्रश्नः ॥२॥

पुत्रादविभक्तमृताया मातुर्भागाधिकारिण्या दुहित्रा तत्पुत्राद्विभज्य ग्रहीतुं शक्यते नवेति तृतीयः प्रश्नः ॥३॥

तत्र प्रथमप्रश्नस्योत्तरम्—

मातापि पितरि प्रेते पुत्रतुल्यांशहारिणी[1]।—इति कात्यायनवचनेन, *समांशहारिणी माता पुत्राणां स्यान्मृते पतौ*—इति नारदवचनेन च मातुरपि तुल्यांशभागित्वज्ञापनात् धनस्वाम्युपरमानन्तरं तदीयधने मातुः पुत्रस्य च तुल्याधिकारप्राप्तेः तद्धने पुत्रतुल्याधिकारो वर्त्तते। एवं

तदभावे तु जननी तनयांशसमांशिनी।
समांशा[2] *मातरस्त्वेषां तुरीयांशा तु कन्यका ॥*—इति बृहस्पतिवचनम्।

अस्यार्थः- *पितुरभावे अर्थात् पुत्रैर्विभागे क्रियमाणे जननी पुत्रवती मातरोऽपुत्रा विमातरः एताः सर्व्वाः पुत्रतुल्यांशभागिन्यः, एषां भागिनां भगिन्यश्चाविवाहिताविवाहार्थं स्वस्वभ्रातृशतुरीयांशभाजो विवाहोचितधनभागिन्या भवन्ति*—इति मदनरत्नविवादरत्नाकर(पृ० ४६६ ,विवादचिन्तामणि(पृ० १३१)दायक्रम(पृ० ४४)निबन्धकारैः कृतः। तथा याज्ञवल्क्योऽपि (२।१३२)—

---

१. °भागिनी इति पाठान्तरम्। २. समांसमा०—व्यप.

पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्—इत्याह ।

एवंविधनानामुनिवचनसत्त्वान्मातुर्भागो धर्म्मशास्त्रसिद्ध एवेति ॥

द्वितीयप्रश्नस्योत्तरम्—

मातुर्मरणानन्तरं पूर्व्वोक्तमातृभागे दुहितुरधिकारः ।

[1]पितर्य्यूर्ध्वं गते पुत्रा विभजेयुर्धनं पितुः ।

मातुर्दुहितरोऽभावे दुहितृणां तदन्वयः ॥ इति नारद(नामसं १४।२) वचनात् । अस्यार्थः—*मातृधनं दुहितरो भजेरन् । दुहितृणामभावे तदन्वयो दुहित्रन्वयो विभजेत्*—इति सामान्यतो दायभाग(पृ० ८३)प्रकरणे विवादरत्नाकरकृतः । न तु स्त्रीधनप्रकरणे समुच्चारितः, प्रत्युत मिताक्षराकृन्मते पूर्वोक्तमातृधनस्य स्त्रीधनत्वमेव । *स्त्रीधनशब्दश्च यौगिको, न पारिभाषिकः, योगसम्भवे परिभाषाया अयुक्तत्वात्* -इति तल्लिखनात् ।

स्त्रीधने च प्रथमं दुहितुरेवाधिकारः ।

अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः—इति याज्ञवल्क्यवचन-(२।१४५ व्याख्याने—

तत्पूर्वोक्तं स्त्रीधनमप्रजस्यनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्र-प्रपौत्ररहितायां स्त्रियामतीतायां(मृतायां) बान्धवा भर्त्रादयो वक्ष्यमाणा गृह्णन्ति-इति मिताक्षरा(पृ० २२६)लिखनादिति ॥

तृतीयप्रश्नस्योत्तरम्—

पूर्वोक्तधने मातृप्राप्यांशे भगिन्या भ्रातुः सकाशाद् ग्रहीतुं शक्यते । प्रथमोक्तगोकवटुंबवचनमतात्तादृशपितृधने मातुः स्वत्वसत्त्वात् । मातृप्राप्यांशे तादृशधने मातुर्मरणानन्तरम् ।

मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वये—

इति याज्ञवल्क्य (२।११७) वचनात्तस्या जाताधिकारत्वात् । एवं *विभक्तेषु सुतो जातः सवर्णायां विभागभाक् ।*

विभक्तेषु पुत्रेषु पश्चात् सवर्णायां भार्य्यायामुत्पन्नः पुत्रो विभागभाग् भवति । विभज्यत इति विभागः । पित्रार्यो विभागस्तं भजत इति

१. पितर्युपरते पुत्राः—नामसं० पाठः ।

विभागभाक्। पित्रोरूर्ध्वं स एव तयोरंशं लभते इत्यर्थः। मातृभागश्चा-सत्यां दुहितरि 'मातुर्दुहितरः शेषम्' इत्युक्तत्वात्—इति वदतो मिताक्षरा-(पृ० २०७)कारस्य सम्भावितमातृभागेऽपि दुहितुरधिकारस्य सम्मतत्वात् पितुर्धने पितुपरमानन्तरं मातुः स्वत्वाभावे मातुःपुत्रेण समं विभज्य ग्रहणासम्भवाद् अनंशप्रकरणेऽपाठाच्च। विभागात् पूर्व्वमपि मातुस्तद्धने स्वत्वे सिद्धे मातृधनाधिकारिण्या दुहित्रा भ्रात्रा सहाविभक्ताया मातु-रंशो विभज्य ग्रहीतुं शक्यत एवेति ज्ञातव्यम्। नहि मूलपुरुषस्य भागाग्रहणेन तदग्रिमाधिकारिभागो लुप्यत इति सताम्परामर्शः॥

समांशहारिणी माता पुत्राणां स्यान्मृते पतौ,

माताप्यंशं समं हरेत्, मातरश्च पुत्रभागानुसारेण भागहारिण्यः—

इत्यादिनानामुनिवचनैः पुत्रैः सह मातुः समांशग्रहणं प्राप्तम्। तच्च स्वत्वनिबन्धनमेवोचितम्, न तु विभागाधीनम् तदंशे मातुः स्वत्वं जायते, विभागस्य स्वत्वकारणत्वे प्रमाणाभावात्। तथा च पितरि मृते तद्धने यथा पुत्राणां स्वत्वं तथा मातुरपि स्वत्वमङ्गीकार्य्यम्, स्वत्वं विना अंशग्रहणानुपपत्तेः। अत एव केनापि मुनिना निबन्धकारेण च मातुस्तद्धने स्वत्वं नास्तीति नोक्तम्, प्रत्युत *समांशहारिणी, अंशं समं हरेत्, भागहारिण्यः* इत्यादिपदैः स्वत्वं प्रत्याय्यते[1]। किञ्च यदि तद्धने मातुः स्वत्वं न स्यात् तदा पुत्रा अनिच्छया मात्रे भागं न दद्युः। यत्र एकं पुत्रं पत्नीञ्चैकां रक्षित्वा धनी लोकान्तरमगमत् तत्र संजातधनाधिकारस्य विद्यमानपत्नीमात्रस्य तत्पुत्रस्य मरणानन्तरं तद्धने तत्पत्न्या एवाधिकारो जायते। एतादृग्विषये मातुः स्नुषया सह समांशित्वं न स्यात्। भक्ताच्छादनविधायकं वचनं सन्निबन्ध-वाक्यं च नास्ति। अतोऽत्र मातुः कीदृशी गतिः स्यात्। तस्मात् स्वत्व-निबन्धनमेव मातुरंशित्वम्। यद्यपि 'आधिवेदनिकाद्यञ्च आधिवेदनिकञ्चैव' इत्यत्र पाठनिश्चयो नास्ति, तथापि[2] मिताक्षरामते(पृ० २२८)स्त्रीधन-शब्दश्च यौगिको न पारिभाषिकः। योगार्थसम्भवे पारिभाषिकार्थस्यान्याय्य-त्वादिति तल्लिखनात्, आधिवेदनिकाद्यञ्चेति पाठस्य धृतत्वाद्, आद्यशब्देन

१. प्रत्याय्यते—व्यप०। २. तपि—व्यप०।

च ऋक्थक्रयसंविभागपरिग्रहाधिगमप्राप्तमितिव्याख्यानाच्च। मातृस्वत्वास्पदीभूतद्रव्यमात्रस्य निश्चितस्त्रीधनत्वेन मातुरूर्ध्वं तदुत्तराधिकारिदुहित्रादीनामेवाधिकारः। तत्र यदि अविभक्तैव माता मृता, तथापि तद्योग्यमंशं तदुत्तराधिकारिण्या दुहित्रा विभज्य ग्रहीतुं शक्यत एव। यथा काचिन्नारी दुहितृद्वयं रक्षित्वा स्वर्लोकमगमत्, तत्स्त्रीधने जाताधिकारयोर्दुहित्रोरविभक्तैवैका मृता, अनन्तरं तद्दुहित्रा स्वमातृयोग्यभागं मातृष्वसृतो विभज्य गृह्यत एव। दायभागमते तु तद्धनस्य संक्रान्तधनत्वेन स्त्रीधनत्वाभावात् विभक्ताविभक्तभेदानादरेणैव *मातुरुपरमे दायादा ऊर्ध्वमाप्नुयुः*—इति वचनेन पूर्वस्वामिधनाधिकारिणां पुत्रादीनामेवाधिकार इति विशेषः—

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति शास्त्रानुसारेण मातुर्भागो नैव भवति; प्रमाणाभावात्, एकपुत्रस्थले पितृधनविभागस्यासंभवाच्च। माता *"पितरि प्रेते पुत्रतुल्यांशहारिणी"*—इति कात्यायनवचनस्य *समांशहारिणी माता पुत्राणां स्यान्मृते पतौ*—इति नारदवचनस्य च *पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेद्*—इति याज्ञवल्क्यवचनस्य च मृते पितरि जीवन्त्यां च मातरि, यदि दुर्वृत्ताः पुत्राः पैतृकधनस्य विभागं कुर्व्वन्ति तदा मात्रे स्वस्वभागसमभागं दद्युरित्यर्थकतया मिताक्षरादिग्रन्थेषु व्याख्यातत्वाच्च।

तदभावे तु जननी तनयांशसमांशिनी।
समांशा मातरस्तेषां तुरीयांशा तु कन्यका॥

इति बृहस्पतिवचनस्य च विशेषत इति व्याख्यानेन। अर्थाद् अस्यार्थः-

पितुरभावे[1]......पुत्रैर्विभागे क्रियमाणे जननी पुत्रवती, मातरोऽपुत्रा विमातरः एताः सर्व्वाः पुत्रतुल्यांशभागिन्य इति। अनेन पुत्रैर्विभागे[2] क्रियमाणे एव मातुर्भागाधिकारित्वप्रतिपादकत्वावगमान्नान्यथा। यदि च बहुपुत्रस्थले पुत्राणां विभागोपक्रमं विनापि विभागसंभावनारहिते एकपुत्रस्थले वा पुत्रेण सह मातुस्तुल्याधिकारित्वं स्यात्तदा मातुः प्रथमाधिकार-

---

१. पितुरभावे—व्यप०। २. पुत्रैर०—व्यप०।
३. पुत्रैर्विभावे क्रियमाने—व्यप०।

(त्वात्) ·····त्वेन पुत्र-पौत्र-प्रपौत्ररहितस्य मृतस्य धने पत्नी-दुहितृ-दौहित्रादीनामधिकारप्रतिपादकस्य *पत्नी दुहितरश्चैव*–इत्यादि याज्ञवल्क्यवचनस्य,

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि––इत्यादि विष्णुवचनस्य दत्तजलाञ्जलि त्वा)द्––इति द्वितीयतृतीयप्रश्नयोरुत्तरञ्चा····· तत्रैव सर्व्वमन्नमिति पृथ ङ् न) लिखितमिति––

पूर्वप्रेषितव्यवस्थापत्रस्योत्तरमस्माभि(दृष्टम्), पाठशालास्थाशेषसर्व्वदर्शनाभिज्ञपण्डितानुमोदितादन्यद्दत्त···या । तत्र चत्वारो हेतव उपन्यस्ताः । तान् दृष्ट्वास्माभिर्निश्चितम् । अस्मद्दत्तशास्त्रार्थपत्रं[1] त्वया नादर्शि, यतो भवदुक्तहेतूनामाशङ्काकोटौ प्रविष्टानां समाधानस्य बहुशस्तस्मिन् शास्त्रार्थपत्रे कृतत्वात् । दृष्टं तत्पत्रं चेत्ततः···तादृशोत्तरदाने भवदुक्तहेतुखण्डनस्यापि खण्डनं भवता कृतं स्यात् । अतो बहुप्रकारकशङ्कासमाधानयुक्तं पूर्व्वलिखितशास्त्रार्थपत्रं पुनरपि प्रेष्यते । तत्पत्रस्य समाधानानां प्रत्येकं खण्डनं कृत्वा भवता उत्तरेण सह प्रेषिष्यते । तदा भवद्दत्तमुत्तरं पण्डितानां मनोरमं[2] स्यात् । तस्मात् सर्व्वेषां समाधानानां दूषणं विना भवदुत्तरमनुत्तरमिति । यद्यपि शास्त्रार्थपत्रे भवदुक्तचतुर्णां हेतूनां समाधानानि पूर्व्वमेव कृतानि पण्डितैस्तथापीदानीं पुनरपि समाधानान्तराणि चोच्यन्तेऽस्माभिः ॥ मातुर्भागो नैव भवति प्रमाणाभावादिति प्रथमो हेतुस्त्वया दत्तः स न शोभनः ॥०॥

माता तु पितरि प्रेते पुत्रतुल्यांशहारिणी–इति कात्यायनीय–*समांशहारिणी माता पुत्राणां स्यान्मृते पतौ*—इतिनारदीय—*पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेद्*—इति याज्ञवल्कीय–*समांशा मातरस्तेषान्तुरीयांशास्तु कन्यका*—इति बार्हस्पत्यवचनसाम्यसिद्धप्रमाणानां सत्त्वात् ॥ नन्वेवमेभिर्वचनैः पुत्रा यदि विभागं कुर्य्युस्तदा जनन्यै स्वभागसममेकं भागं दद्युरित्युच्यते, न तु विभागोपक्रममन्तरा तया भागं ग्रहीतुं शक्यते इति चेत् । एतादृशार्थकरणे प्रमाणाभावात् केनापि ग्रन्थकारेणालिखितत्वाच्च ॥ याज्ञवल्क्यवचःस्थवर्त्तमानार्थक ·· सशत्र(?)विभागं कुर्व्वतामित्यर्थकविभजतामितिपद-

---

१. अस्मा दत्तत्र । २. मनोगमं—व्यप० ।

मेव प्रमाणमिति न वचनीयम्। अनुवादविशेषणत्वेन लडर्थस्य विवक्षितत्वात्, कातीयादिवचस्सु तदभावाच्च॥ किञ्च हरेदित्यत्र विधौ लिङ्विधिनिमन्त्रणे- इति पाणिनिस्मरणात्। विधित्वं चात्यन्ताप्राप्ते प्रापकत्व···(म्) ॥ *ऊर्ध्वं पितुश्च मातुश्च*-- इत्यादिमन्वादिवचनैर्जनकमरणोत्तरं पुत्रकर्तृकविभागकालः पुत्रकर्तृकविभागश्चोभौ विधीयेते। एवञ्च तैरुत्पत्तिविधिभिर्भ्रातृणां परस्परं विभागे सिद्धे मातुर्भागो न प्राप्तः तावान् पूर्वोंशः *माताप्यंशं समं हरेत्*(या स्मृ० २।१२३)इत्यादिना च विधीयते। एवञ्च पतिमरणोत्तरं स्वेच्छया मात्रापि पुत्रसमांशस्वांशो हर्त्तव्य इति विधेः शरीरं निष्पन्नम्। तत्रायं फलितार्थः। यथा पित्रादुपरते तनयादिभिः पृथग्धर्म्मानुष्ठानाय व्यवहारे यथेष्टविनियोगार्हस्वत्वसम्पादनाय जन्मनैव स्वत्वमितिमूलको भागो गृह्यते, तथैव मात्रापि पुत्रैः सह पूर्व्वोक्ता ··· तासद्वये ·····विवाहजन्यस्वत्वमितिमूलको भागो ग्राह्य इति॥ भवदुक्तरीत्या तु पुत्रकर्तृकमंशदानं सम्प्रदानीभूतया मात्रा ग्राह्यमितिविधिशरीरं *माताप्यंशं समं हरेत्*(यास्मृ० २।१२३)इत्यादिना निष्पन्नं भवत्तच्च न शोभनम्। ईदृशस्य विधेः ऋषेरक्षरादनुत्पत्तेर्महर्षेरीदृशविधौ विवक्षिते *विभजन्तः पितुश्चोर्ध्वं दद्युर्मात्रे समांशकम्* इति —महर्षिणा पठितव्ये तथा पाठस्य कृतत्वाद्, भवदुक्तवचनार्थे विधित्वाभावापत्तेश्च। पितरि मृते संस्थितायां मातरि यदि दुर्वृत्तौ पुत्रौ भागं कुर्य्यातां तदा मात्रे भागं दद्यातामित्यत्र विभजतामित्यत्रस्थभवत्सम्मतबहुत्वाविवक्षैव लडर्थस्याविवक्षायां···श(?)पणेन भवदुक्तार्थे प्रमाणाभावस्य स्पष्टत्वात्। *विभक्तेषु सुतो जातः सवर्णायां विभागभाक्*--इति वचसो विभक्तेषु पुत्रेषु पश्चात्सवर्णायां जातो विभागभाग् भवति, मातृभागं चासत्यां दुहितरि···*मातुर्दुहितरः शेष* इत्युक्तत्वादिति मिताक्षराकारैरर्थकरणात्। एवं

भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तत्स्मृतम्॥

परस्परमितिशेष इति स्मार्त्तभट्टाचार्य्येण लिखित्वा यद्यपि जायापत्योर्विभागो न विद्यत इत्याद्यापस्तम्बीयेन जायापत्योर्विभागाभावप्रतिपादनात्- पूर्व्ववचने दम्पत्योरुपादानं न सङ्गच्छत इत्याशङ्क्य

यदि कुर्य्यात्समानांशान् पत्न्यः कार्य्याः समांशिकाः—इति याज्ञवल्क्य-वचसि पुत्रविभागकरणे प्रवृत्तस्य पत्न्या अपि विभागावगतेस्तदभिप्रायेण दम्पत्योरित्यभिधानमिति समादधे। एवं

विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते।

इति वचनं पुत्राणां भागग्राहकत्वं मातृद्वारेणैव बोधयति। तस्या भागाभावे तद्द्वारेण तद्ग्राहकाणां तद्ग्रहणानां पतिः स्यादिति मदा ... कोपः स्मृतीनाम्। तस्माद् बहुमुनिसिद्धान्तिते ग्रन्थकृद्भिर्विरोधी[1] कृते प्रमाणसिद्धे मातुर्भागे प्रमाणाभावादि तद्हेतुर्धर्मशास्त्रानभिज्ञतामाम् अ(?) दायकस्य प्रकटयति। इति मातुर्भागे प्रमाणाभावखण्डनम्। यदपि प्रलपितं मातु-र्भागो नास्ति एकपुत्रस्थलेऽपि विभागस्यासम्भवाद् इति द्वितीयं कारणम्, तदपि न। एकपुत्रस्थलेऽपि विभागसम्भवस्य शास्त्रोक्तत्वात्। तद्यथा यदा एकात्मजः पिता स्वेच्छया स्वोपार्जितधनस्य त्रीन् भागान् कृत्वा द्वावंशौ[2] प्रतिपद्येत *विभजन्नात्मनः पिते*त्यादिवचः(वचनात्पिता द्वौ भागौ स्वयं गृह्णाति पुत्रायैकम्भागं ददाति तदैकपुत्रस्थले विभागो न्याय्य एव। एता-दृशस्थले मिताक्षरादिमते स्वोपार्जितधने एव पितुरंशद्वयग्रहणम्भवति जीमूतवाहनादिमते तु पितामहाद्युपार्जितधने पुत्रोपार्जितधनं च[3] पितुरंशद्वय-ग्रहणम्, यतस्तेषां मते *भूर्या पितामहोपात्ता* इत्यादीनि वचनानि(या० स्मृ० २।१२१) पितृकर्तृकन्यूनाधिकविभागनिषेधकानि, न तु पितुरंशद्वय-ग्रहणाभावबोधकानीति विचारान्तरम्। परन्तु सर्वेषां निबन्धकाराणां मते एतादृशस्थले एकपुत्रस्वत्वे भागो जायते; यथात्र जनको भागद्वयमेकस्मात् पुत्रादुपाददाति तथा पत्यौ मृतेऽगृहीतस्त्रीधना माता तथाभूतात् पुत्राद्-भागं ग्रहीतुं शक्नोत्येव *समांशहारिणी माता*—इत्यादिवचनात्॥

नन्वेवं *द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता* इत्यादि(ना०स्मृ० पृ०१६२)कमपि वचनमेकपुत्रस्थलातिरिक्तविषयमिति वाच्यम्, शङ्खलिखित-वाक्यविरोधात्। तथा च शङ्खलिखितावाहतुः *स ह्येकपुत्रः स्याद्द्वौ भागावात्मनः कुर्यात्। न चैवं एकस्य पुत्र एकपुत्रः न पुनरेक एव पुत्रो यस्येति* बहुव्रीहि-

---

१. विरोदी व्यप. २. न्शो व्यप. ३. पितरश०—व्यप.

स्तस्यान्यपदार्थप्रधानत्वेन षष्ठीतत्पुरुषाद् दुर्बलत्वाद्—इति जीमूतवाहनाचार्य्यकृतेनानेनार्थेनैकपुत्रस्थलातिरिक्तविषय[1] एवं शङ्खलिखितौ बोधयतः *पितुर्द्विभागमिति वाच्यम्*। जीमूतवाहनतः प्राचीनानां नवीनानां च ग्रन्थकर्तृणां मध्ये[2] तु बहुव्रीहिरेव तत्र सिद्धान्तितत्वात्, वीरमित्रोदये दायभागप्रकरणे शङ्खवचनस्थैकपुत्रपदव्याख्यावसरे तत्पुरुषस्वीकारे दोषदानेन जीमूतवाहनोक्तेर्दर्शितत्वात् च ॥

अतएव शुद्धिचिन्तामणौ तीर्थचिन्तामणौ मुण्डनप्रकरणे—*मुण्डनं चोपवासश्च सर्व्वतीर्थेष्वयं विधिः*—इत्यत्र दूषणभयाद् बहुव्रीहितः प्रबलभूतौ तत्पुरुषकर्म्मधारयौ त्यक्त्वा बहुव्रीहिरेवाश्रितो[3] महामहोपाध्यायवाचस्पतिमिश्रैः, इति एकपुत्रस्थले भागाभावादिति हेतुखण्डनम् ॥ यच्च *माता तु पितरि प्रेते पुत्रः* इति कातीयस्य *समांशहारिणी माता* इति नारदीयस्य *पितुरूर्द्ध्वं विभजतां माता* इति योगीशवचनस्य च *मृते पितरि मातरि जीवन्त्याञ्च यदा दुर्वृत्ताः पुत्राः पैतृकस्य धनस्य विभागं कुर्व्वन्ति तदा मात्रे स्वस्वभागसमं दद्युः* इत्यर्थकतया मिताक्षरादिग्रन्थेषु व्याख्यातत्वादितिमातृभा[4]गे तृतीयो हेतुः सोऽपि न, मिताक्षरादिनिबन्धेषु एतादृशस्यार्थस्या[5]प्यलाभात्, भवत्कृतमिताक्षरादिनिबन्धस्याप्रमाणत्वादस्माभिरदृष्टत्वाच्च। अत्रेदं विचारणीयम्। यथा पुत्रादीनां जन्मनैव सामुदायिकं प्रादेशिकं वोत्पन्नमपि स्वत्वम् *ऊर्ध्वं पितुश्च मातुश्च* इत्यादि (मनु० ९।१०४) वचनानुरोधेन पितुरनिच्छया दाक्षिणात्यपाश्चात्यमैथिलसद्ग्रन्थकृन्मते पित्रार्जितधने, जीमूतवाहनाचार्य्यमते पितामहाद्यर्जितधनेऽपि विभागानर्हतां बोधयति। यथा वा *पत्यौ*[6] *जीवति जायापत्योर्विभागो न विद्यते पाणिग्रहणाद्धि सहत्वम्* इत्यापस्तम्बीयेन *पत्न्यः कार्य्याससमांशिकाः* इति याज्ञवल्कीयेन (या० स्मृ० २।११५) च पत्या सह भार्य्यया भागो न लभ्यते; तथा अत्र विवाहजन्यं मातुः स्वत्वं पुत्राणामनिच्छया मात्रा पुत्रेभ्यः स्वीयभागो

---

१. विशय—व्यप.। २. ते—व्यप.। ३. °श्रितो व्यप.।
४. मातुरभागे—व्यप. ५. °रप्यला०—व्यप. ६. °पत्यो—व्यप.

ना लभ्य इति न बोधयति, पूर्वस्थलवदत्र संकोचकव[1]चनाभावात् ॥ प्रत्युत मातुरग्रे पुत्राणामेवास्वातन्त्र्यम्, *ऊर्ध्वं पितुश्च*—इत्यादीनि (मनु० ६ १०४) वचांसि विदधति । अतएव तत्तन्निबन्धकारा *मातुरग्रे पुत्रकर्त्तृकविभागो न धर्म्योऽतदनुज्ञया*—इत्याहुः । अतोऽमाधारणं मातुः स्वत्वं पुत्राणां विभागोपक्रमं विना सङ्कोचकर्षिवाक्याभावेन मातृभागं बोधयतीति मात्रा पुत्रानिच्छया विभागो ग्राह्य इति । न चैवं *पिता रक्षति बाल्ये हि भर्त्ता रक्षति यौवने, पुत्रास्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति*—इत्यादि-नारदादि(ना० स्मृ० पृ० १६८)वचनेभ्यो मातुरप्यस्वातन्त्र्य[2]मितिविभागोपक्रमं विना तस्या न भाग इति वाच्यम् ॥ *अकार्य्यकरणाद्रक्षेत्*—इत्यर्थस्य महानिबन्धेषु दर्शनात् *स्त्रीणां स्वपतिदायस्तु*—इत्यादिवचनानुसारेण वृथादानादावस्वातन्त्र्य[3]बोधनात् *माताप्यंशं समं हरेत्*—इत्यादिवचनानुरोधेन भागग्रहणातिरिक्तस्थले तद्वचनेनास्वातन्त्र्यविधानाच्च ॥३॥ इति तृतीयहेतुखण्डनम् ॥

यच्च तदभावे तु जननी इति बार्हस्पत्यं वचः—अस्यार्थः······ । पितुरभावे पुत्रैर्विभागे क्रियमाणे जननी पुत्रवती मातरोऽपुत्रा विमातर एताः सर्वाः पुत्रतुल्यांशभागिन्य इत्यनेन पुत्रैर्विभागे क्रियमाणे मातुर्भागाधिकारित्वावगमादित्यनू[?]द्य विभागभावनारहिते एकपुत्रस्थले, विभागसम्भावनायुक्ते बहुपुत्रस्थले, पुत्राणां विभागोपक्रममन्तरा तनयैः सह मातुस्तुल्याधिकारित्वं चेन्मातुः प्रथमाधिकारि(णी माता धनिनः) पातित्वेन *पत्नी दुहितरश्चैव* इत्यादीनां दत्तजलाञ्जलिता स्यादिति तुरीयहेतुवर्णनम्, तदप्यतितुच्छम् । एतादृशार्थकरणे प्रमाणाभावाद् बार्हस्पत्यवाक्याक्षरादलाभात् स्वकपोलक(ल्पि तत्वात्, *तदभावे तु जननी* इत्यस्य-*माताप्यंशं समम्*-इत्येतत्समानार्थकत्वाद्, उत्तरार्द्धन्तु *पत्न्यः कार्य्याः समांशिकाः* इत्येतत्समानार्थकत्वाच्च । तदुक्तसिद्धान्तवदस्यापि सिद्धान्ति-(तत्वात्) अक्षरादलाभादेव श्रीकृष्णतर्कालङ्कारैरर्थादि(र)प्युक्तमबाधे··· ···न्यसाम्यादितिन्यायात्तस्यापि ऋषिभिन्नत्वात् ॥ १ ॥ यथा

---

१. चवना०—व्य.प. २. ०तन्त्र०—व्यप० । ३. ०नुच्च—व्यप० ।

स्वेभ्योऽंशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् ।

स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः,—इति मनु (९।११८)-वचने, *भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकम्*—इति याज्ञवल्क्य-(२।१२३)वचने च, प्रदद्युरित्येतस्य कर्त्तृतया भ्रातृणामन्वयात्तेषामभोग-स्ताभ्यो दानं तथा जननीग्राह्ये भागे परतन्त्रविधायकवाक्याभावाद्विभागो-पक्रमं विनापि बहुपुत्रस्थले विभागाभावस्थले एकपुत्रसत्वे स्वेच्छया मात्रा भागग्रहणं कार्य्यम् ॥ ० ॥

पत्नी दुहितरश्चैव—इति याज्ञवल्क्य (२।१३५) वचनम्, *अनपत्यस्य धनं पत्न्यभिगामि*—इति विष्णुवचस्तु पुत्रादिदौहित्रान्तररहितस्य मृतस्य यज्ञदत्तस्य धने मितात्तरादिमते पूर्वं माता समग्रधनाधिकारिणी, जीमूत-वाहनमते पुत्रादिपित्रन्तररहितयज्ञदत्तस्य समग्रधनं माताधिकारिणी भवति इत्यर्थं ब्रूते ॥

पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्—इत्यादि (या०स्मृ० २।१२३) मातृभागप्रापकवचनानि तु विष्णुमिश्रस्य पुत्रादिमत्त्वेऽपि मात्रा स्वभाग-ग्रहणं कर्त्तव्यमितिधनैकदेशग्रहण······दधने इति भिन्नविषयत्वव्यवस्था-पनेन चरितार्थानां वैयर्थ्याभावाद्दत्तजलाञ्जलितोपपादनमशक्यं कर्त्तुं त्वया । किञ्च भवतामेव विरोधः स यथा देवदत्तः पञ्चभ्यः पुत्रेभ्यो यथाशास्त्रं पञ्चभा-गान् दत्त्वा स्वयं द्वावंशौ प्रतिपद्येत *विभजन्नात्मनः* इति (ना०स्मृ०पृ०१६२) प्रभृतिशास्त्रानुरोधेन द्वावंशौ प्रतिपद्य विभक्तोऽभवत् । तत्र विभक्तेषु एकः पुत्रादिदौहित्रान्तररहितो मृतः । तद्धने *पत्नी दुहितरश्चैव*—इति याज्ञवल्कीय-*अनपत्यस्य धनं पत्न्यभिगामि*—इति वैष्णववचोभ्यां जीमूतवाहनमते पिता समग्रधनाधिकारी, तदन्यमते माता समग्रधनस्वामिनी भवति । यथा वा पितृमरणोत्तरं सर्व्वे भ्रातरो विभक्तास्तेष्वैकः कश्चन भ्राता पुत्रादिपित्रन्त-रहितो ममार । तद्धने भ्रातृणामधिकारोऽधिकारिक्रमबोधकेन शास्त्रेण बोधितो भवति । भवन्मते उक्तस्थलयोः पित्रोर्भ्रातुश्च प्रथमाधिकारिता)-न्तःपातित्वेन तेषामनधिकारः स्यात् । अस्मन्मते उक्तस्थलयोर्यथायथं पूर्व्वं पिता अंशद्वयाधिकारी, माता तु एकांशाधिकारिणी, भ्रातरस्तु स्वांशाधिकारिणः; पश्चादेतादृशस्थले पूर्व्वोक्ता मृतस्य समग्रधनाधिकारिणो

भवन्तीति विषययव्यवस्थापनेन भवदुक्तेरेव दत्ततिलाञ्जलिता याति । तस्माद् धनस्य कृतस्यैकदेशरूपा व्यवस्था त्वया कर्त्तव्या ॥ यच्च केनाप्युक्तम् ॥ *यत्र पतिपुत्रकर्तृको विभागः पत्या पुत्रेण वांशो दीयते, तत्रैव मातुर्भागो भवति ।* अत्र तु धनिना धनिपुत्रेण वा विभाग एव न कृतोऽतोमातुरंश एव नास्ति; कुतो दुहित्रादिभिर्लब्धव्यमिति । तदसमार्चीनम् । पत्या सह भार्य्याया भागग्रहणेऽस्वातन्त्र्येऽपि पत्युरिच्छयैव तया भागो लब्धव्य इति तावत् सर्व्वेषां निर्विवादेऽपि पुत्राणां पितुरग्र इव मातुरग्रेऽपि स्वातन्त्र्य(ा)-भावस्य सर्व्वदेशीयग्रन्थेषूपलभ्यमानत्वेन मातुर्भागादाने स्वेच्छया दाने च पुत्राणामनधिकार एव । किन्तु मात्रनुमत्या पितृधने दुहितृभावे सति जननीधने च पुत्रैर्भागो ग्राह्यः, मात्रा तु स्वेच्छयैव पुत्राणामनिच्छा-सत्त्वेऽपि भागो ग्राह्यः । *अनीशास्ते हि जीवतोः* —इत्यादि मन्वाद्युक्तेः *माताप्यंशं समं हरेत्*—इत्यादिविधिबोधकप्रत्ययाद्युदितस्मृतेः (?), एवं सम्भावितमातृभागेऽपि दुहितुरधिकारो तः । एतद्विचारस्तु तृतीयतुरीय-हेतुखण्डने बहुतरं विचारितस्तत एवावधार्य्यः ॥

एवंप्रकारकग्रन्थे भवद्दूषणगणे जाते पण्डितानां मातृग्राह्यभाग-विषयिणी अनुकम्पा बहुपुत्रस्थले विभागोपक्रमं विना सकृत्पुत्रस्थले (य)द्यपि मात्रा ग्राह्यम् भागं बोधयन्ती मातुर्भागो नैव भवतीति प्रवक्तुर्माता भगिन्योऽध्व(भागि)त्वं बोधयति; यतः शास्त्रासिद्धस्यार्थस्यापलपन(म् मृ)पा-ग्रहमूलकमेव भवति इत्याग्रहन्त्य(क्त्वा) कृतबुद्धिभिरन्यैः (२प)ण्डपातैः सह त्वयाऽवधार्य्यम् । भवद्दत्तोत्तरे शब्द(ा)शुद्धयोऽनन्वितपंक्तयश्चास्माभिर्न दूषि-तास्तद्दूषणे प्रयोजनाभावात् । अ(त्रत्यैः)⋯पाठशालास्थैरपाठशालास्थैश्च सर्व्वैरपि गतागतशास्त्रार्थो दृष्टः, गुणदोषश्चावधारितः । अत्र शास्त्रार्थे सर्व्वेषामनुमतौ भवतामप्यनु(म)तिरेव स्यात्, भूयसा व्यपदेश इति न्यायाद् इत्यस्माकं प्रतिभाति । किञ्च मूर्खाणामिव पण्डितानामपि व न पण्डितेन भवता न कार्य्या, यतः शास्त्रार्थपत्रं समालोच्य प्रतिवादिकृतशास्त्रार्थ-निराकरणपूर्व्वकं स्वमतं महद्भिर्लिख्यते इति मह(तां सर)णी तथा त्वया

---

१ रा। २ भवद्दूषणगणे—व्यय०।

न कृत इति पण्डितानामग्रे पाण्डित्यप्रयुक्तं गौरवं तत्तन्मतनिराकरणं विना कदापि न भवति। समाधानपूर्व्वपक्षादिकमस्मिन् शास्त्रार्थे बहूनि जातानि, तानि सर्व्वाणि विस्तरभयान्न लिखितानि। भवत्पूर्व्वपक्षाणां समाधानान्येव पण्डितैर्लिखितानि। शास्त्रार्थेनात्र पण्डितानां वर्षशतेनापि पराजयो न भवति इति श्रीमद्भिर्निश्चेयम्। सुहृद्भावेनोच्यते मया अयं शास्त्रार्थो भवते रोचते तर्हि व्यवस्थायां सम्मतिं कृत्वा पण्डिताना··· (?)भवे साहवाय देया इति सताम्परामर्शः शिवम् ॥ ० ॥ ० ॥ ० ॥

श्रीचन्द्रनारायणशर्म्मणः— सम्मतिरत्रार्थे—

अत्रार्थे सम्मतिस्सुकुशर्म्मणाम्।

अत्रार्थे सम्मतिर्विट्ठलशास्त्रिणाम्।

सदर्थे तदर्थजाते जातेप्रि(च)तु- र्व्वेदहरानन्दशर्म्मपण्डितस्य।

अत्रार्थे सम्मतिः श्रीकान्त-शर्म्मणाम्।

श्रीकृष्णदेवशर्म्मणां सम्मतिः।

सम्मतिरेतदर्थे काशीनाथ-शास्त्रिणः।

अत्रार्थे सम्मतिः श्रीलज्जाशङ्कर-शर्म्मणाम्।

अत्रार्थे सम्मतिः श्रीयदुनाथशुक्ल-शर्म्मणाम्।

सम्मति ·· ··· शर्म्मणाम्।

पूर्व्वप्रेपितापरिलिखितव्यवस्थया पुत्राणां पैतृकधनविभागोपक्रमे मातृभागो निश्चित एव। एवञ्च सति विभागमन्तरा मातृभागाभावप्रतिपादकहेतुखण्डने यो हेतुः—*माता तु पितरि प्रेते पुत्रतुल्यांशहारिणी* इति कात्याय—*समांशहारिणी माता पुत्राणां स्यान्मृते पतौ*—इति नारदीय—*पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्*—इति याज्ञवल्क्याय-*समांशा मातरस्तेषां तुरीयांशास्तु कन्यकाः*—इति बार्हस्पत्यवचसां प्रसिद्धप्रमाणानां सत्त्वादिति दत्त(:स)तद्दातृणां शुकवत्तद्वचनपाठपरायणपराणां धर्म्मशास्त्रार्थानभिज्ञानां विदुषां पुरः प्रकाशयति। तेषां चतुर्णामपि वचनानां सति विभागोपक्रम एव मातुः पुत्रभागसमभागप्रतिपादकत्वात्। नचैतादृशार्थेन सम्भवत्येतादृशार्थकरणे प्रमाणाभावात्, केनापि ग्रन्थकारेणालिखितत्वाच्चेति वक्तुं युक्तम्। तेषु प्रथमस्य—*माता तु पितरि प्रेते पुत्रतुल्यांश-*

हारिणी—इति कातीय (वचन)स्य *विभज्यते तदा मातुर्भागमाह* इत्यनेन दायतत्त्वे रघुनन्दनस्मार्त्तभट्टाचार्य्यैरवतारितत्वात्, विवादभङ्गार्णवविवादार्णवसेतुश्रीकृष्णतर्कालङ्कारादिकृतदायभागटीकासु बहुशः समुदितत्वाच्च, तेषु *समांशहारिणी माता*—इति द्वितीयस्य नारदवचनस्य, *पितरि चोपरते सोदरभ्रातृभिर्विभागे क्रियमाणे मात्रे पुत्रसमांशो दातव्यः*—इत्यर्थकतया जीमूतवाहनभट्टाचार्य्यैर्दायभागे व्याख्यातत्वात् ।

अथ तृतीयस्य—*पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्* इति याज्ञवल्कीयस्य *पितुरूर्ध्वं विभागेऽपि पत्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाह* इत्यनेन मिताक्षरायामेव श्रीविज्ञानेश्वरैरवतारितत्वात् । किञ्च *पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्*—इति याज्ञवल्कीयवचनस्य, *पितृद्रव्यविभागः स्यात् जीवन्त्यामपि मातरि । न स्वतन्त्रतया स्वाम्यं यस्मान्मातुः पतिं विना*— इति वीरमित्रोदयस्मृतिचन्द्रिकादिनिबन्धधृत-संग्रहकारी येन स्वतन्त्रतया *पितर्य्यपरते* तद्धनस्य विभागं कुर्व्वतां पुत्राणामस्वतन्त्रापि माता पुत्रांशसमांशं हरेन्नतु भ्रात्रादिव(त्) (पूर्णस्या) पीत्यर्थस्य सर्व्वसम्मतत्वा(त्) । अजीवद्विभागे मातुरंशक ॱॱ नामाहेत्यत्रम ॱॱकया याज्ञवल्क्यवचोऽवतार्य्य एतच्च स्त्रीधनस्याप्रदाने वेदितव्यमित्याद्य (परि व्या ख्यात एव । स्मृत्यन्तरे *जनन्यस्वधना पुत्रैर्विभागेऽशं समं हरेत्*—इति *अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैर्विभागे क्रियमाणे पुत्रांशसममंशं हरेत्*—इत्यर्थः—इति व्यवहारमाधवे माधवापरपर्य्यायश्रीविद्यारण्यपादैर्विशिष्य प्रतिपादनेनैवमेव स्मृतिचन्द्रिकायां श्रीदेवा(नन्द भट्टैः *तथाहि पतिद्वारागतं स्त्रीधनं नित्यं विभागानर्हमेव, लोके दम्पत्योर्धने विभागादर्शनात् जायापत्योर्न विभागो विद्यते*—इति हारीतस्मरणाच्च । एतेनात्र मातुः स्वत्वव्यवस्थापको दायविभागः । किन्तु यावदर्थमेवार्थहरणमिति मन्तव्यम् । अतएव स्मृत्यन्तरे निर्धनमातृविषयमेवांशहरणं न मातृमात्रविषयमिदमिति ज्ञायते, *जनन्यस्वधना पुत्रैर्विभागेऽशं समं हरेत्*—इतिस्मरणात्, *अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैरजीवद्विभागे क्रियमाणे पुत्रांशसममेवांशं हरेत्*—इत्यर्थः । जननीग्रहणं तत्स्वपत्न्यादेरुपलक्षणार्थम् । *मातरः पुत्रभागानुसारिभागहारिण्यः*—इति

विष्णुस्मरणात्। अस्वधनेति विशेषणोपादानात् स्वधनादेव स्वकीयजीवनस्य स्वानुष्ठेय ·····साध्यस्वकर्म्मणः सिद्धिसम्भवे जनन्यादीनां न भागग्रहणमिति गम्यते। तथा च स्वधने मात्रा तयोः सिद्ध्यसम्भवे जनन्यादीनां सधनानामपि न समभागहरणम्, किन्तु यथोपयोगं न्यूनभागस्यैव हरणमिति च गम्यते। तथा च विभा·····वसोरतिबहुत्वे निर्धनानामपि जनन्यादीनां न समांशहरणं किन्तु यथास्वोपयोगं समांशन्यूनस्यैवांशहरणमित्यपि गम्यते। अस्वधनेतिविशेषणोपयोगवशादंशहरणं जनन्या न पुनर्भ्रातृव (त्) (स्व)त्ववशादितिज्ञापनार्थत्वात्। सममिति विशेषणस्योपयोगवशादसमांशस्य हरणेप्यवैयर्थ्यम्। अल्पविभाज्यवसोरधिकपूरणस्य प्राप्तस्य निवृत्त्यर्थत्वादिति प्रतिपादनेन भवदभिमतार्थस्य विभागोपक्रममन्तरापि मातृभागप्रापकत्वस्य दूरा[.]स्तत्वात्। न च पुत्राणां पितृधनविभागस्वातन्त्र्ये *ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्*—इति मानवीयेन, पुत्र···बोधकेन विरोध इति वाच्यम्। *ऊर्ध्वं पितुः*—इति पितृधनविभागकालः *मातुरूर्ध्वम्*—इति मातृधनविभागकालः। ततश्चैतदुक्तं भवति पितुरूर्ध्वं मातरि जीवन्त्यामपि पितृधनविभागस्तथा मातुरूर्ध्वं-पितरि जीवत्यपि मातृधनविभागः कार्य्य एव, अन्यतरधनविभागे उभयोरूर्ध्वकालप्रतीक्षणानुपयोगादिति माधवीयव्याख्यानुपर्य्यालोचनया तथा अतएव *पितुरूर्ध्वम्*—इति पितृधनविभागकालः *मातुरूर्ध्वम्*—इति मातृधनविभागकालोऽभिहितः इत्यारभ्य, *अतश्चानीशास्ते हि जीवतोः* इत्यपि तत्तद्धने व्यवस्थाया अस्वातन्त्र्यप्रतिपादकं न स्वत्वप्रतिपादकं *जन्मना स्वत्वस्य पुत्राणां पितृधने व्यवस्थापनादि*त्यन्तेन वीरमित्रोदयस्मृतिचन्द्रिकादिनिबन्धनिबन्धनेन अणोरपि तद्दोषाप्रतीतेः। *युक्तं चैतज्जीवद्विभागावतं पितुः स्वातन्त्र्यात्*। *अजीवद्विभागे पुत्राणां स्वातन्त्र्यादि*त्यादिना विशेषतो वीरमित्रोदयादावजीवद्विभागे पुत्राणामेव स्वातन्त्र्यप्रतिपादनाच्च, अस्वातन्त्र्यप्रतिपादकानां च *जीवतोरस्वतन्त्रः स्यात्*—इत्यादिवचनानां सकलनिबन्धकारैः *सु[?]ोऽपि पितरि जीवन्त्यां च मातरि पुत्रकर्त्तृको यो विभागः (स?) धर्म्म्य* इत्येतत्परत्वव्यवस्थापनात्। अतएवास्मद्दत्तपूर्व्वव्यवस्थायां पुत्रे दुर्वृत्तत्वविशेषणं सार्थकमि(ति सूक्ष्मद)शावधातव्यम्। न चानुवादविशेष-

णीभूतस्य'''अर्थस्याविवक्षितत्वेन विभागोपक्रमे मृतेऽपि मातृभागप्रापकत्वसिद्धिरिति वाच्यम्। अविवक्षायां प्रमाणाभावात्। नह्यनुवादविशेषणत्वकथनेनैव सोऽर्थोऽपैति। यदपि पूर्वोक्तवचनद्वयैकरूप्यार्थं (? तथा (कथ) नमिति तदपि न, तयोरपि सकलनिबन्धकारैरेतद्वचनसमानार्थकत्वेनैवोपपादितत्वात्। किञ्च लडर्थस्याविवक्षितत्वेन विभागोपक्रममन्तरापि मातृभागप्रापकत्वस्यपितातपर्य्यविषयत्वे विभजतामिति विशेषणपदस्यैवानर्थक्यापत्तिः। *पितुरूर्ध्वं तु पुत्राणां माताप्यंशं समं हरेत्*—इत्येतावतैव भवदभिमतार्थस्यावगमात् अध्याहाराभावप्रयुक्तलाघवानुरोधेन तादृशवचनप्रणयनस्यैवोचितत्वाच्च। पितरि मृते सति पुत्रैः क्रियमाणे विभागेऽपि मातुः समांश एव। तथा च योगीश्वरः *पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्। पितुरूर्ध्वं पितृमरणानन्तरम्॥ अत्रापि न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा*—इति, *दानुरूर्ध्वं प्रकल्पयेत्*—इति च वचनद्वयं योज्यं समानन्यायत्वात्, प्रतिषेधाभावाच्च। *एवमेव विज्ञानेश्वरधारेश्वरादीनां मतम्*—इति मदनपारिजातलिखनात्। वीरमित्रोदयादौ *तदुपरमविभागेऽपि पुत्रैस्ताः स्वसमांशभागिन्यः कार्य्याः*—इत्याहितयाज्ञवल्क्यवचनस्यावतारितत्वाच्चेति सुबुद्धिचञ्चवश्चिरञ्चिन्तयन्तु॥ *न च वरेत्*—इति विधौ लिङ्विधित्वञ्चात्यन्ताप्राप्तप्रापकत्वम् तच्च न घटत इति वाच्यम्। *ऊर्ध्वं पितुश्च मातुश्च*—इत्यादिमन्वादिवचनैः पितृधने जाताधिकारैः पुत्रैर्विभागे क्रियमाणे मातुरपि तत्समांशभागित्वमित्यपूर्वबोधनेनैव कृतार्थत्वात्, एतेनेदृशस्य विधेर्न्नपरत्वरादनुतक्तेरित्यादिविधित्वाभावापत्तेश्चेत्यन्तं तद्वचनाशयमजानद्भिरुक्तमपास्तम्। मातृभागप्रापकस्य *समांशा मातरस्त्वेषां तुरीयांशास्तु कन्यकाः*—इत्यवशिष्टस्य तुरीयस्यापि पुत्रकर्त्तृकविभागप्रकरण एव सर्वैरुक्तत्वात्तस्यापि तदर्थबोधकत्वेन न तानि भवदर्थसाधकानीति सुधीभिराकलनीयम्॥ यदपि प्रलपितं *विभक्तेषु सुतो जातः सवर्णायां विभागभाग्* इति, *भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तत्स्मृतम्*—इति च तदतितुच्छम्। तयोर्विभक्तेष्वित्यस्य विभागोत्तरं जायमानस्यासत्यां दुहितरि भागप्रापकत्वात्, तदर्थस्य चाविभाज्यत्वात्। न च तत्र सम्भावितभागम(ा)दायैव वचनप्रवृत्तिरिति-

वाच्यम्, वचनात्तदर्थाप्रतीतेः। स्वकपोलकल्पितस्यार्थस्याप्रमाणत्वाच्च। द्वितीयस्य तु *भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि*—इति वचनस्य पितृकृतविभागविषयत्वात् पितृकृतविभागे मातृभागो भवति नवेत्यस्याविवाद्यत्वात्? यदपि *विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते*—इति वचनं तदपि वीरमित्रोदये यदपि व्यासबृहस्पतिवचसोरित्यादि कृतमभिकेनेत्यन्तेन ग्रन्थेन। तज्जीवनावधि तदाज्ञावशंवदतयास्थेयमिति समर्थितम्। अतस्तत एवावधातव्यमिति प्रथमहेतोस्समर्थनम्। यदपि एकपुत्रस्थले विभागासम्भवादित्यत्र दोपो ...वनं तदपि देवानां ...दानंददायकमेव। पितृकर्तृ(?)कविभागस्याविवाद्यत्वात् पितर्य्युपरते तदभावस्यास्मदभिप्रेतत्वाच्च विवादास्पदभूतस्थलाभिप्रायकमेव लिखनाच्चेत्यलमति[१] जल्पनेनेतिविज्ञेयमिति द्वितीयहेतुसमर्थनम्॥

यदपि तृतीयहेतुखण्डनेऽधिमिताक्षरमेतद्व्याख्यान...लाभादिति तदपि ग्रन्थार्थासूचकमेव मिताक्षरायां जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तम् *यदि कुर्य्यात् समानंशान्*—इत्यादिना पितुरूर्ध्वं विभागेऽपि पत्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाहेत्यवतरणिकया पितुरूर्ध्वं विभजतामित्यवतारित्वात्। अजीवद्विभागे मातुरंशकल्पनामाहेति याज्ञवल्क्यवचोऽवतार्य्य एतच्चेत्यादिना विशेषमुल्लिख्य *जनन्यस्वधना पुत्रैर्विभागेंऽशं समं हरेद्*—इति स्मृत्यन्तरवचनमुपन्यस्य अस्वधना प्रातिस्वकस्त्रीधनशून्या (?) जननीपुत्रैर्विभागेंऽशे क्रियमाणे पुत्रांशसमं हरेदित्यर्थः। इति माधवीयात्, *जीवत्पितृकविभागे पित्रा यथा पुत्रांशसमांशभागिन्यः स्वपत्न्यः कार्य्यास्तथा तदुपरमविभागेऽपि पुत्रैस्ताः स्वसमांशभागिन्यः कार्य्याः*—इति वीरमित्रोदयलिखनेन याज्ञवल्क्यः *पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्*, विष्णुः—*मातरः पुत्रभागानुसारिभागहारिण्यः*, स्मृत्यन्तरे—*जनन्यस्वधना पुत्रैर्विभागेंऽशं समं हरेत्, स्वधना तु यावता स्वधनस्य पुत्रांशसमभागता भवति तावदेव हरेत्*—इत्यर्थः। *अंशाधिकधनायास्तु नांश*—इति व्यवहारमयूखे नीलकण्ठभट्टलिखनेन च स्पष्टतया तदवगमाच्च। यत्रेदं विचा-

१. लिखनाच्चेत्यलमनातजल्पनेनातिविज्ञे।

रणीयमित्यादिभागग्रहणातिरिक्तस्थले तद्वचनेनास्वातन्त्र्यबोधनाच्चेत्) तदप्यत्यन्ताग्रहग्रस्तत्वाद्धेयमेव[1]। पुत्राणां जन्मनैव सामुदायिकस्य प्रादेशिकस्य वा स्वत्वस्य सत्त्वेऽपि जीवति पितरि तदनुमतिमन्तरा पितृधनविभागाभावस्य मैथिलगौडपाश्चात्यदाक्षिणात्यसकलनिबन्धकृत्सम्मतत्वेऽपि तदुपरमे *ऊर्ध्वं पितुश्च मातुश्च*—इत्यादिवचनेन परस्परं तेषां तद्धनविभागस्य सर्व्वसम्मतत्वेऽपि पाणिग्रहणनिबन्धस्य क्षीरनीरवदेकलोलीभावा... सहकारिकर्म्मोपयोगिनो मातृस्वत्वस्य सत्त्वेऽपि पत्न्याः भागप्रापकविवचनाभावाद् यथा पत्युः सकाशात्... पत्न्या भागो ग्रहीतुं शक्यते, तथा तत्प्रापकर्षिवाक्यमन्तरा सद्ग्रन्थकारकृतव्याख्यानमन्तरापि वा विना विभागापकम पुत्रेभ्योऽपि तद्ग्रहीतुमशक्यत्वात्, अस्वातन्त्र्यबोधकस्य निबन्धकारकृतव्याख्यानस्य तत्संकोचकस्य प्रत्युत सत्त्वात्। अतएव वीरमित्रादये *पत्न्याःपतिद्रव्ये स्वत्वं* क्षीरनीरवदेकलोलीभावापन्नसहकारिकर्म्मोपयोगिन...तु भ्रातृणामिव परस्परमतएव तेषां विभागो न जायापत्योरस्य युक्तं सङ्गच्छते। न च क्षीरनीरवदेकलोलीभावापन्नस्यैकस्यैव पाणिग्रहणनिबन्धस्य पत्न्याः स्वत्वस्य स्वीकारे पत्युरुपरमे स्वत्वप्रयोजकभूतदाम्पत्यभावाभावात् कथमपुत्रायाः कृत्स्नधनाधिकारबोधका अजीवद्विभागे पुत्रैःसमांशाधिकारबोधकाश्च ग्रन्थाः सङ्गच्छन्त इति वाच्यम्। *पत्नी दुहितरश्चैव*—इति *पितुरूर्ध्वंविभजताम्*—इत्यादि याज्ञवल्क्यादिवचनैः पृथगधिकारबोधनेनादोषात् मातुः स्वातन्त्र्यभावस्य पूर्वमेव बहुशःसमुदितत्वात् पुत्रेभ्यो भागग्रहणातिरिक्तस्थलेऽस्वातन्त्र्यमित्यर्थकल्पने प्रमाणाभावाच्च *समांशहारिणी माता*—इत्यादिवचनस्यान्यार्थत्वस्योक्तत्वाच्चेति मात्सर्य्यमुत्सार्य्य विचार्य्यमार्य्यैरिति तृतीयस्य हेतोः समर्थनम्।

यदपि चतुर्थहेतुखण्डने एतादृशार्थकरणे प्रमाणाभावाद् बार्हस्पत्यवाक्याद्वरादलाभाच्च कपालकल्पितत्वाच्चेति हेतुत्रयं तदतिफ...महामहोपाध्यायवाचस्पतिमिश्रकृतविवादचिन्तामणावेवैतादृशार्थस्य स्पष्टतरतया प्रतीतेर्भवदुक्तेर्गलोक्तिप्रायत्वान्मदुक्तेः सप्रमाणत्वाद् बार्हस्पत्यवाक्याद्वरादलाभादिति अस्योत्तरं तु भवद्दत्तपूर्वव्यवस्थायाम्। अस्यार्थः पितुरभावे अर्थात्

१. °च्चे तन्नदप्यतताग्रह० व्यय०।

पुत्रैर्विभागे क्रियमाणे जननी पुत्रवती मातरोऽपुत्रा विमातर एताः सर्व्वाः पुत्रतुल्यांशभागिन्यः, एषां भागिनां भगिन्यश्चाविवाहिता विवाहार्थं स्वभ्रात्रंशतुरीयांशभाजो विवाहोचितधनभागिन्यो भवन्तीति मदनरत्न-विवादरत्नाकरविवादचिन्तामणिदायक्रमनिबन्धकारैः कृत इति लिखनमेवेत्यलमाधिक्येन । एतेन स्वकपोलकल्पितत्वादित्यपि प्रत्याख्यातमित्यवधातव्यम् । यदपि भगिन्या भागे भ्रातॄणां स्वातन्त्र्यबोधकमनुयाज्ञवल्क्य-वचनवन्मातृभागे तदभावात्तया स्वेच्छया भागग्रहणं कार्य्यमिति तदप्यत्यन्ताग्रहग्रस्तत्वाद्धेयमेव । प्रसिद्धप्रमाणानि याज्ञवल्क्यादिवचांसि प्रथम-हेतुव्यवस्थापने लिखिततत्तन्निबन्धकारकृतव्याख्यानानि च युक्त्याभासैरपलाप्य प्रमाणगन्धशून्यस्वोक्त्या तदर्थस्य व्यवस्थापनेनाप्रमाणत्वादिति चतुर्थहेतुसमर्थनम् ॥

अथ भवन्मते विरोधो(द्भा)वनम् । कस्यचित् पुत्रिकाकरणान्तरमौरसपुत्रोऽजनि । तदनन्तरं पत्नीं पुत्रिकां च त्यक्त्वा स लोकान्तरमगमत् । तत्पत्न्यपि प(श्चा)दिमं लोकमजहात् । तयोर्निधनानन्तरं पुत्रिकापुत्र-योर्विभागसमुत्थानेऽस्मन्मते *समस्तत्र विभागः स्यात्*—इत्यादिवचनेन कृत्स्नधनस्य सम एव विभागः सकलनिबन्धसिद्धः । भवतां तु सा मातृभागं पूर्व्वं गृहीत्वा पश्चात् पुनरवशिष्टार्द्धं ग्रहीतुमर्हतीति तत्तद्दोषवचनव्याकोपो वर्षसहस्रैरपि दुर्न्निवार्य्य इति सूक्ष्मदृशाऽवधातव्यम् ॥ यत्तु दत्तजलाञ्जलितोपपादनमशक्यं कर्त्तुं त्वयेति तदाशयानवबोधतां बोधयति । विद्यमान-मातृकस्याजातपुत्रादेर्देवदत्तस्य मरणानन्तरं *पत्नी दुहितरश्च* - इति याज्ञवल्कीय-*अपुत्रस्य धनं पत्न्यभिगामि*—इति वैष्णववचनाभ्यां पत्न्या अधिकारित्व-बाधनेऽपि अविभक्तसंसृष्टभ्रातृतो भागाभावाय पूर्व्वोक्तवचनयोरविभक्तसंसृष्ट-धनान्यविषयत्वमित्यर्थस्य गौडातिरिक्तसकलमुनिवचनव्याख्यातृसम्मतत्वेन सत्यामपि मातरि तद्धनस्य अविभक्तसंसृष्टत्वेन मातृतः पूर्व्वं पत्न्यधिकार-बोधनस्य दत्तजलाञ्जलिता सहस्रास्यैरपि(दु)र्न्निवारा इति तन्त्रतत्त्वज्ञा विभावयन्तु ॥

१२७—रोवकारी मिछिल सदर देओयानि आदालत ओयाके सन १८३२ सालेर ५ जानेर मोताबक सन १२३८ सालेर

२२ पौष वृहस्पतिवार श्रीयुत हेनरी सिकिसपीयर साहेव ऐ आदालतेर हाकिमेर वैठके—

भैरवीदासी वनामे नवकृष्णवसु

साएलार उकिल मुनसी गोलाम आहम्मद हाजिर आइल। पूर्व्व सन १८३? सालेर १ दिजम्बर तारिखे साएलार खास आपीलेर दरखास्त दरपेष हइया जेलार फैसला दिष्टि करण जन्ये मूलतवि छिल, तदनुसारे गत कल्य साएलार द्वितीय दरखास्त फैसला आगैरह सम्वलित उपस्थित हइया साविक दरखास्तेर सम्वलित करिया उपस्थित करणेर हुकुम हइयाछिल। से प्रयुक्त अद्य साएलार खास आपीलेर दरखास्त तत्समभिव्याहारि कागजात सम्वलित उपस्थित ओ पाठ होइल। हुकुम हइल ये जिलार फैसला ओ साएलार ओकीलेर अत्रकार दाखिल करा व्यवस्था ए विषयेर यत्रात्र तलवे ये यद्यपि स्यात् उक्त फैसलार लिखित प्रकरण सकल सत्य अथवा फैसलार लिखित व्यवस्था अथवा साएलार उकिलेर दाखिल करा व्यवस्था—एहार कोन व्यवस्था यथार्थ ए आदालतेर पण्डितेर निकट एइ हुकुमे पाठानो जाय ये पण्डित मजकुर उपरेर लिखित प्रकरणेर उत्तर अति त्वराय लिखेन इति ॥

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरणलिखितैतदब्दीयजानवरीमासीयपञ्चमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितजिलाख्यावान्तरधर्म्माधिकरणीयजयपत्रमेतद्धर्म्माधिकरणार्थिनीनियुक्तोकीलशब्दवाच्येन तद्दिने निविष्टं व्यवस्थापत्रञ्च यत्तदब्दीयतन्मासीयैकविंशतिदिनसम्वन्धिशनिवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रभुसमर्पितजयपत्रलिखितप्रकरणानां मध्ये एतद्धर्म्माधिकरणार्थिन्या उत्तरपत्रलिखितप्रकरणानाँ सत्यत्वे सत्येतद्धर्म्माधिकरणार्थिनो नियुक्तोक

खशब्दवाच्यनिविष्टव्यवस्थैव शास्त्रसम्मता भवति । तदुत्तरपत्रलिखितप्रकरणानामसत्त्वे तज्जयपत्रलिखितव्यवस्थैव शास्त्रसम्मता भवतीति ॥

एतदब्दीयफेवरवरीमासीयचतुर्थदिनसम्बन्धिशनिवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१२८—रोवकारि मिछिल सदर देओयानि आदालत ओयाके तारिख ७ जानेर सन १८३२ साल मोताबेक सन १२३८ सालेर २४ पौष शनिवार श्रीयुत आलक सुन्दर राश साहेव ऐ आदालतेर हाकिमेर वैठके ॥

वदनचन्द्रसिंह वनाम मथुरामोहनपालीत ओ महेशचन्द्रसिंह

साएलेर उकिल मौलवि करम होछेन ओ तरफछानिर उकिल मुनशी गोलाम वतुल हाजिर आइल । सायेलेर सओयाल एक शत पञ्चाश टाका दामेर कागजेर पर दोस्तपुर आगयेरह तालुक विरोधि विषयेर दखल पाइवार मोकद्दमाय मवलगे पाँच हाजार टाका ऐ विषयेर दामेर तायदादे ओ उकिल मजकुरेर नामेर एक केता ओकालतनामा ओ रामकृष्णवन्धोपाध्यायेर नामेर एक केता मोक्तारनामा ओ शन १८२८ सालेर २१ जुन तारिखेर हुगलि जेलार देओयानि आदालतेर एक केता फयछलार नकल ओ सन १८३० सालेर १७ आगष्ट तारिखेर लिखित एलाका कलिकातार क्रोट आपीलेर एक केता फयशलार नकल ओ सन १८२९ सालेर २३ शेतम्वर तारिखेर लिखित कलिकातार क्रोट आपीलेर एक केता रोवकारिर नकल सहित ये, सन १८३० सालेर १६ दिजम्वर तारिखे दाखिल हइया छिल, अद्य तरफछानिर शन १८३१ सालेर १३ आपरेल तारिखेर दाष्ट कया सओयालेर सहित दृष्टे आइल,

बोध हइल ये पार्व्वतीचरण मोतओफफार तेज्य विषय लाट नारायण पाड़ा उहार चारि पुत्रेर मध्ये अर्थात् वदनचन्द्रसिंह प्राप्तव्यवहार ओ महेशचन्द्रसिंह ओ ईशानचन्द्र ओ हरिशचन्द्र अप्राप्तव्यवहार एकत्तर ओ साधारणे छिल, ओ वदनचन्द्रसिंह मजकुर ये मालिक ओ कारबारेर कर्त्ता एवं भ्रातामकलेर सहित एकान्ने छिल लाट मजकुरेर मोतालकेर मौजे दोस्तपुर ओगयरह विरोधि विषय द्वितीय भ्रातासकलेर अंश सहित तरफछानिर जेमार मुद्दाइ मथुरमोहनपालीतेर निकट बयवलओफार ? प्रकरणे दरपत्तनि तालुक विक्रय करिया जखन बयवलओफार मेयादेर मध्ये पानेर टाका आदाय करिलेक ना। मुद्दाइ सेइ ममय शन १२०६ शालेर १७ कानुनेर नियम आमले आनिया बयबात सम्पन्न हइवार जन्य एइ नालिष दरपेष करिया जेना ओ कोट हइते ईशानचन्द्र ओ हरिशचन्द्रेर अंशेर कत्तन वादे वदनचन्द्र ओ महेशचन्द्रेर अंश बयबातेर बाबत डिगरि हाशील करियाछे, ओ महेशचन्द्र जाहेर करे ये बयवलओफा हओनेर समय आमि अप्राप्तव्यवहार छिलाम, आमार पक्ष हइते वदनचन्द्र कओलाते दस्तखत करिया दियाछे. ओ वदनचन्द्रेर क्षमता छिल ना ये आमि अप्राप्तव्यवहारेर अंश बयवलओफा अथवा सम्पूर्न विक्रय करे। ए जन्य आमार निकट हुकुम प्रकाश हओनेर पूर्व्वे ए आदालतेर पण्डितेर निकट व्यवस्था लओया उचित बोध हइया हुकुम हइल ये एइ रोबकारिर नकल एइ हुकुमे ये निचेर लिखित सओयालेर जओयाब एइ रोबकारि पाओयार तारिख हइते एक सप्ताह मेयाद मध्ये दाखिल करेण—ए आदालतेर पण्डितेर हाओला करा जाय इति ॥

सओयाल—

यद्यपि स्यात् सहोदर दुइ भ्राता अथवा तिन चारि भ्राता आपनारा एकान्नभुक्त, ओ ताहार मध्ये एक जन प्राप्तव्यवहार, ओ द्वितीय सकल अप्राप्तव्यवहार थाके, ओ प्राप्तव्यवहार भ्राता

मौरुशी साधारण विशयेर मध्ये किछु अप्राप्तव्यवहारसकलेर अंश सहित हस्तान्तर करे, तबे ए प्रकार हस्तान्तर सिद्ध कि ना एवं प्राप्त-व्यवहार भ्रातार मौरुशी साधारण विशय अप्राप्तव्यवहार भ्राता सकलेर अंशसहित, ये एकान्ने थाके, कोन प्रकारे हस्तान्तर करणेर क्षमता बाङ्गलादेशेर चलित शास्त्रानुसारे आछे कि ना इति ॥—

श्रीर्जयतितराम

एतद्धर्म्माधिकरणाधिपतिश्रीयुतअलकसुन्दरराससाहेवधर्म्माधिकरणलिखितैतदब्दीयजानवरीमासीयसप्तमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयोनविंशतिदिनसम्बन्धिबृहस्पतिवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि सहोदरौ द्वौ भ्रातरौ त्रयश्चत्वारो वा भ्रातर एकपाकेन भोक्तारः; तेषां मध्ये एकः प्राप्तव्यवहारोऽन्ये चाप्राप्तव्यवहारा भवन्ति। एवञ्च सति प्राप्तव्यवहारो भ्राता क्रमागतसाधारणधनानाम्मध्ये किञ्चिद्धनमप्राप्तव्यवहाराणां सर्व्वेषामंशसहितं हस्तान्तरं कृतवान् स्यात्, तत्र यदि तादृशहस्तान्तरमधो लिखितहेतुसमुदायान्तर्गतैकस्मिन्नपि हेतौ सति कृतवान स्यात्तदा स्वांशयोग्ये स्वेतरांशयोग्ये च सिद्ध्यति, तादृशहेतुसमुदायान्तर्गतैकस्मादपि हेतोर्विना तादृशहस्तान्तरकर्त्तुर्भ्रातुरंशे सिद्ध्यति, तदितरांशे न सिद्ध्यति। एवमेकपाकेन भोक्तुः प्राप्तव्यवहारस्य भ्रातुः क्रमागतसाधारणधनस्याप्राप्तव्यवहाराणां सर्व्वेषां भ्रातृणामंशसहितस्य कुटुम्बभरणाद्यर्थं भगिन्यादिविवाहाद्यर्थं वा भ्रात्रादिविवाहाद्यर्थं वा रोगोपशमनाद्यर्थं वा पित्रादिकृतर्णापाकरणाद्यर्थं वा पित्रादिश्राद्धाद्यावश्यककार्य्यादिसम्पत्त्यर्थं वा हस्तान्तरकरणक्षमतास्त्येव। उपरिलिखितकुटुम्बभरणाद्यावश्यककार्य्यार्थं दासादीनामपि स्वामिधनस्य हस्तान्तरकरणक्षमतायाः शास्त्रीयत्वेन चतुर्णां सोदरभ्रातृणामेकपाकेन वसताम्मध्ये प्राप्तव्यवहारस्य ज्येष्ठभ्रातुरप्राप्तव्यवहाराणामवशिष्टानां त्रयाणां भ्रातृणां शास्त्रानुसारेण पितृवत्प्रतिपालनाद्यावश्यककार्य्यकरणक्षमस्योपरिलिखितकुटुम्बभरणाद्यावश्यककार्य्यकरणार्थं

साधारणक्रमागतधनानाम्मध्ये तत्तत्कार्योपयुक्तस्य धनस्य हस्तान्तरकरणाच्च-मताया अर्थसिद्धत्वात्-इति वङ्गदेशचलितसमुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वव्यवहारतत्त्वव्यवहारमातृकाविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥—इति दायभागादिग्रन्थधृतनारदवचनम् ॥१॥

अत्र साधारणद्रव्यस्य समुदायस्यैकेन विक्रये परांशयांशे असिद्धिः, स्वांशयांशे तु सिद्धिः अन्यानुमत्या विक्रये तु तत्सिद्धिः—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥२॥

कुटुम्बार्थेऽप्यधीनोऽपि व्यवहारं यमाचरेत् ।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥—इत्युपरिलिखितग्रन्थधृतमनुवचनम् ॥३॥

पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः ।
यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति ॥—इति तत्तद्ग्रन्थधृतबृहस्पतिवचनम् ॥४॥

कुटुम्बार्थमशक्ते[1] तु गृहीतं व्याधितेऽथवा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतं तु यत् ॥
कन्यावैवाहिकञ्चैव प्रेतकार्येषु[2] यत्कृतम् ।
एतत्सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥—इत्युपरिलिखितग्रन्थधृतकात्यायनवचनम् ॥५॥

पितर्य्युपरते पुत्रा ऋणं दद्युर्यथांशतः ।
विभक्ता अविभक्ता वा यो वा तामुद्वहेद्धुरम् ॥—इति विवादभङ्गार्णवादिग्रन्थधृतनारदवचनम् ॥६॥

---

१. कुटुम्बार्थमशक्तेन गृहीते व्याधितेऽथवा ।
उपप्लवनिमित्ते च विद्यादापत्कृते तु तत् ॥—कास्मृ०

२. प्रेतकार्ये च—कास्मृ० ।

अत्रेदमवधेयम् । कुटुम्बभरणादिरूपयाहशयाहशकार्य्ये उपस्थिते दासकृतमृणं प्रभुणा शोधनायमिति प्रतीयते ताहशताहशकार्य्यनिष्पत्त्यर्थं प्रभुधनविक्रयोऽपि सिद्ध्यति । तदतिरिक्तविषय एव स्वाम्यनुमतपदेन बाध्यते— इति विवादभङ्गार्णवग्रन्थलिखनम ।।७।

पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः ।
पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्म्मतः ।।—इति मनुवचनम् ।८।।
एकोऽपि स्थावरं कुर्य्याद्दानाधमनविक्रयम ।
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः ।।—दायतत्त्वादिग्रन्थधृतमुनिवचनञ्चेति ।९।।

एतदब्दीयफेब्रुवरीमासीयैकविंशतिदिनमङ्गलवासरे मयेयं व्यवस्था दत्तेति ।।

श्रीउज्जयिनिनगाम्
श्रीवैद्यनाथमिश्रेण

१२९—सेवकारी मिछिल मद्र हेआयानि आदालत ओयाके तारिख २ माह जानओयारि इं सन १८३२ साल मोताबक[1] १३ माघ वाङ्गला सन १२३८ साल रोज वुधवार श्रीयुत हेनरि सिकिमपीयर साहेवे आदालत् मजकुरेर हाकिमेर वैठके ।।

विश्वेश्वरीदेवी वनामे ताराचन्द्र वाडुर्य्या

छापेलार मोक्तार रामकानाइघोष हाजीर हइल छापेलार सओयाल इं सन १८३१ सालेर ९ माह शेनम्बर तारिखेर । एलाका मुरशीदावादेर प्रीविणसीयार कोर्टेर हाकिम फिलप इरनिष पाटल साहेवेर फयसला, जाहाते मुद्दाइ ताराचन्द्र वाडुर्य्यार हक्के डिगरि हइयाछे, ताहार नाराजीते एइ मोकद्दमाय माफीनर्शी आपील मञ्जुरि प्रार्थनाय मोजाहाय मुलुटी ओगयरह रकम दुइ आना

---

१. मोतारक—व्यप० ।

दुइ कडार दखल पाओयार बाबते ७७०१८९।२ टाकार ताइने। मोक्तार मजकुरेर नामे मोक्तारनामा सम्बलित ओ इं सन १८३१ सालेर ९ सेतम्बरेर लिखित एलाका मुरशीदाबादेर कोर्टेर फयसलार नकल अनैक्यता जे एइ माह जानओयारिर १६ तारिखे दाखिल हइया छत. पडागेल। यद्यपि स्यात्, एइ मोकद्दमार मोफनिशा सुरत् आपील नामञ्जुरि कि मञ्जुरिर हुकुम छादेर हओनेर पूर्व्वे एइ आदालतेर पण्डितेर द्वाराय निचेर लिखित विषय दरिआप्त करा उचित हइल। ए जन्य हुकुम हइल ये तत्स महबारि कागजात सओयाल ओगयरह एइ रोवकारिर नकल सम्बलित एइ आदालतेर पण्डितेर निकट एइ हुकुमे पाठान जाय-ये पण्डित मोछूप कोर्टेर फयसलार लिखित मवत्रसकलेर एवं ताहार लिखित कैफयत् अनुमोदने एइ विशयेर जओयाव तत्त्वगात् लिखेन ये लिखित फयसलार लिखित पण्डितेर व्यवस्था दोरस्त बटे किम्वा मोकद्दमार हालत अनुमोदने ताहार सत्यताय किछु सन्देह प्रकाश हइते पारे कि ना इति ॥

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेबधर्म्माधिकरणलिखितैतदब्दीयजानवरीमासीयपञ्चविंशतदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेव तत्समर्पितैतद्विवादविषयनिविष्टनिवेदनपत्रादिकञ्च यत्तदब्दीयफेवरवरीमासीयदशमदिनसम्बन्धिशुक्रवासरे घटिकात्रयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रभुसमर्पितजयपत्रलिखितप्रश्नत्रयस्योत्तरे तज्जयपत्रलिखितपण्डितदत्ता व्यवस्था शास्त्रसम्मता भवति। किन्तु देवचन्द्ररायेण स्वजीवनदशायां स्वस्वत्वास्पदीभूतधनमविवाहितायै स्वकन्यायै दासमन्यै दत्तमत्यर्थिन्या निवेदनपत्रे लिखितमस्ति-तत्सत्यं चेत्तदा दासमन्या मरणोत्तरं तद्दानानुसारेण तत्स्वत्वास्पदीभूतयौतकस्त्रीधने तद्दुहित्रभावे तत्पुत्रस्य सर्व्वचन्द्रस्य स्वत्वे जाते सति तन्मरणोत्तरं तन्मातामह्यां वेदवत्यां पूर्व्वधनस्वामिनो देवचन्द्ररायस्य पत्न्यां विद्यमानायामपि तस्य सर्व्वचन्द्रस्य पुत्रपौत्रप्रपौत्राभावे तत्पत्न्या विश्वेश्वरीदेव्या एवाधिकारो यतस्तज्जयपत्रे लिखितमस्ति। प्रत्यर्थिनीविश्वे-

शबरीदेवीनिर्द्दिष्टसाक्ष्युपस्थापितवृत्तान्तेन देवचन्द्ररायस्य मरणोत्तरं तत्कन्याया दासमन्या आयत्तं तत्स्वत्वास्पदीभूतं धनं यद्यपि जातम्, किन्तु दासमन्या मरणोत्तरं देवचन्द्ररायस्य पत्न्या वेदवत्या आयत्तमपि जातमिति । एतादृशलिखनेन देवचन्द्रस्य मरणोत्तरं तस्य पुत्रपौत्रप्रपौत्राभावे तत्स्वत्वास्पदीभूतधने शास्त्रानुसारेण प्रथमतस्तत्पत्न्या वेदवत्या एवाधिकारित्वेन विद्यमानां तां विहाय तत्कन्यायाा दासमन्या आयत्तं तद्धन कमप्येकं हेतुं विना भवितुं न शक्नोतीति । अतएवास्त्येव कश्चिद्धेतुरित्यवगमात् । एवञ्च सति तज्जयपत्रलिखितपाण्डतदत्तव्यवस्थैतद्विवादसम्पर्कशून्यैव[1] — इतिवङ्गदेशचालितमनुदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्रप्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥ १ ॥

ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा ।

भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदायिकं स्मृतम् ॥—इति दायभागादिग्रन्थधृतकात्यायनवचनम् ॥ २ ॥

विवाहकाले तत्पूर्व्वापरकाले वा स्त्रियै यद्धनं पित्रा दत्तं तत्र तु धने प्रथमं कुमार्य्यास्तदनन्तरमूढायाः पुत्रवतीसम्भावितपुत्रयोस्तदनन्तरं वन्ध्याविधवयोश्चाधिकारः । सर्वदुहित्रभावे पुत्रादेर्य्यौतुकधनवत् क्रमेणाधिकारः—इतिदायक्रमसंग्रहग्रन्थलिखनम् ॥ ३ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनञ्चेति ॥ ४ ॥

एतदब्दीयमार्च्चमासीयनवमदिनसम्बन्धिशुक्रवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१. °शक्नोति—व्यप० ।

२७६४लं—

१३०—रोवकारि मिच्छिल सदर देओयानि आदालत ओयाके तारिख ७ माह फिवरेल इं सन १८३२ साल मोतावक २६ माह माघ वाङ्गला शन १८३८ साल रोज मङ्गलवार श्रीयुत हेनरि सिकिशपीयेर साहेव आादालत मजकुरेर हाकिमेर वैठके—

दुर्गादत्त आपिलाण्ट

वुनियादसिंह रेष्पाडण्ट

आपिलाण्टेर उकिल मुनशी होशन आलि ओ सदासुद पण्डित, ओ रेष्पाडण्टेर उकिल मुनशी दादारवक्स हाजर आइल। इत पूर्व्व सन हालेर ३०।३१ माह जानओयारिते एइ मोकद्दमा आमार वैठके रोवकार ओ प्रथम आदालतेर वावत् प्रविनशीयान कोर्टेर साद्यक कागजात तथाकार फयछला पर्य्यन्त ओ एइ आदालतेर दाखिल हओया कागजात गतो शनेर ४ आपरेलेर लिखित रोवकारि पर्य्यन्त पडा हइया, दिवा अवसान प्रयुक्त मुलतवि छिल। अद्य पुनराय दरपेष एइ मोकद्दमार वावत् एइ आदालतेर सकल कागजात ओ एइ आदालतेर तलव करा त्रिपुरसुन्दरिदत्तेर स्त्री गङ्गाजलिर मोकद्दमाय वाजे कागजात पडागेल। तत्परे रेष्पाडण्टेर तरफ हइते मिरआकवर आलि एक केता मोक्तारनामा दाखिल करिलेक अनुमोदने आइल। जेलार जजसाहेवेर प्रेरित कागजातेर किरण इहाइ मालुम हय-जे जे समय जयदत्त ओ त्रिपुरसुन्दरिदत्तेर स्त्रिगणेर दाखिलकारिर तहकीकातेर कर्म्मजेर तजविजे छिल, रेष्पाडण्ट आदालतेर तलव मते चारि केता नकल छोनेनामा, जाहा कालेक्टरिते दाखिल हइयाछिल, दरपेष करे। एवं ताहार परे जजसाहेव ताहा ओ तहकीकातेर कागजात सम्वलित प्रोविणशीयान कोर्टे पाठान इति। यद्यपि स्यात् सत्यतार तहकीकातेर पूर्व्व एइ विषयेर दरियाप्त करा उचित हइल ये यद्यपि स्यात् पूर्व्व उक्त छोनेनामासकल सकलेर सम्मति मते लेखा हइयाथाके

तवे ताहार लिखित शरतसकल शास्त्रेर आ···रामते सत्य, ···ो आमले आना उचित बटे कि ना। ए जन्य हुकुम हइल ये ···ारि केता नकल छोनेनामा एइ हुकुमे ये अदालतेर पण्डित ···ाहार मजमुन अनुमोदने उपरेर विशयेर जओयाब दुइ सप्ताह मध्ये लिखेन–एइ आदालतेर पण्डितेर निकट पाठा··· जाय–एवं ताहार जओयाब आशा पर्य्यन्त मोकद्दमा मुलतवि थाके इति॥

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीमिकिमपीयरसाहेबधर्म्माधिकरण-लिखितैतद्देशीयफैवरवरीमासीयसप्तमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूप-पत्रमेवं तत्समर्पितसंवित्पत्रप्रतिरूपपत्रचतुष्टयं च यत्तदब्दीयतन्मासीयद्वा-विंशतिदिनसम्बन्धिबुधवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मया प्राप्तम् तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते॥

उपरिलिखितसंवित्पत्राणि यदि सर्व्वेषां संमत्या लिखितानि स्युस्तदा तत्तल्लिखितनियमाः शास्त्रानुसारेण यथार्था भवन्ति, एवं तत्तान्नियमानां स्वीकरणमुचितं भवति। यतस्तत्तत्संवित्पत्रेषु तत्संवित्कर्तृभिः सर्व्वैरेव लिखितं पूर्व्वकृतविभागोऽन्यथासिद्ध इति। अतएव तत्तत्संवित्पत्रलिखित-नियमैर्वास्तवं शास्त्रानुसारेण केषाञ्चिदपि काचिदपि स्वत्वहानिर्भवतीत्यन-वगमात्—इति मिथिलादेशचालितमनुविवादचिन्तामणिविवादरत्नाकर-विवादचन्द्रवीरमित्रोदयप्रभृतग्रन्थानुसारिणी व्यवस्था॥ ०॥

अत्र प्रमाणम्—

भ्रातरस्त्वविभक्ता ये स्वरुच्या तु परस्परम्।

विभागपत्रं कुर्व्वन्ति भागलेख्यं तदुच्यते॥—इति वीरमित्रोदयादि-ग्रन्थधृतबृहस्पतिवचनम्॥ ॥

पतितस्तत्सुतः क्लीबः पङ्गुरुन्मत्तको जडः।

अन्धोऽचिकित्स्यरोगार्त्तो भर्त्तव्यास्ते निरंशकाः॥—इत्युपरिलिखित-ग्रन्थधृतयाज्ञवल्क्यवचनम्॥२॥

पश्चादप्यौषधादिना दोषनिर्हरणे ऽस्त्येवांशभागिता—इति वीरमित्रोदयग्रन्थलिखनम् ॥३॥

मृते पितरि न क्लीबकुष्ठ्युन्मत्तजडान्धकाः ।

पतितः पतितापत्यं लिङ्गी दायांशभागिनः ॥

तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः—इति विवादचिन्तामणिविवादरत्नाकरादिग्रन्थधृतदेवलवचनम् ॥४॥

औरसाः क्षेत्रजाश्चैषां निर्दोषा भागहारिणः ।

सुताश्चैषां च भर्त्तव्या यावन्तो भर्तृसात्कृताः ॥

अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः ॥—इति तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥५॥

भरणं चास्य कुर्व्वीरन् स्त्रीणामाजीवनक्षयात्—इति तत्तद्ग्रन्थधृतशङ्खवचनञ्चेति ॥६॥

एतदब्दीयमार्चमासीयद्वाविंशतिदिनसम्बन्धिबृहस्पतिवासरे घटिकार्द्धाधिकयामद्वयानन्तरं मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१३१—गोवकारी मिछिल सदर देओयानी आदालत ओयाके तारिख १६ माह फिव्रेल इं सन १८३२ साल मोताबक ५ फाल्गुण व ङ्गला शन १२३८ साल रोज वृहस्पतिवार श्रीयुत हेनरि सिकिसपीयर साहेब आदालत मजकुरेर वैठके ॥

भैरवीदासी वनामे नवकृष्णवसु

सायेलार उकिल मुनशी गुलाम आहाम्मद ओ तरपछानिर तरफ हइते सदासुखपण्डित एक केता आकालातनामा दाखिल करिया हाजीर आइल । इत पूर्व्वे गत सनेर १ दिजम्बर तारिखे छाएलार सओयाल दरपेष हइया फयछला अनुमोदनेर जन्य मुलतवि छिल । तदनुजाइ छाएलार दोषरा छओयाल फयछला

सम्वलित अनुमोदने सन हालेर ५ जानेओयारि तारिखे एइ विशयेर जओयाव तलव—ये यद्यपि स्यात् फयछला मजकुरेर लिखित विशयसकल सत्य तवे फयछलार लिखित व्यवस्था अथवा छायेलार उकिलेर दाखिल करा व्यवस्था दोरस्त वटे। एइ आदालतेर पण्डितेर स्थाने (जिज्ञासा) हय। तदनुजाइ पण्डितेर जओयाव दाखिल हओयाते अद्य छायेलार खाष आपीलेर छओयाल तत्समभिव्या[1]-हारि कागजात सम्वलित आमार वैठके रोवकार हइया छायेलार उकिलेर स्थाने जिज्ञाशा करा गेल—ये आसल दस्तावेज नेमपत्र जाहा ओछियत नामा छओयाले लिखियाछ, कोन मोकर्द्दमाय कोन आदालते दाखिल हइयाछिल। जओयाव जेला:—२४ परगणार देओयाणि आदालते मवलग १४८८॥० टाका तालुकातेर हिस्या वावत् ८५६ लम्वरेर मोकर्द्दमाय, जाहाते नवकृष्णवसु मुद्दाइ ओ भैरवीदासी मुद्दालेहेम् छिल, दाखिल छिल इति। यद्यपि स्यात् एइ आदालतेर जओयावे एइ विषय लिखित ये यद्यपि स्यात् फयछलार लिखित छायेलार जओयावेर विषयसकल सत्य-हय, तदनुसारे छाएलार दाखिल करा व्यवस्था शास्त्रानुजाइ दोरस्त वटे। याहाहउक, परे एइ विषय दरियाप्त हयना ये फयछलार लिखित छाएलार जओयावेर लिखित कोन विषय दोरस्त ओ सत्य हओन सववे[2] छाएलार दाखिल करा व्यवस्था दोरस्त। ताहार प्रति दृष्टे हुकुम हइल ये नेमपत्र दस्तावेज मजकुर एइ हुकुमे एइ आदालतेर पण्डित ताहार अनुमोदने उपरेर लिखित विषयेर पष्ट ओ सारओयार एक सप्ताह मध्ये लिखेन, एवं ताहा आशा पर्य्यन्त मोकर्द्दमा मुलतवि थाके इति॥

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरण-लिखितैतदब्दीयफेवरवरीमासीयषोडशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूप-

1. समिव्याहारि—व्यप०। 2. सत्वे—व्यप०।

पत्रमेवं तत्सम पतिनियमपत्रञ्च यत्तदब्दीयमार्चमासीयसप्तमदिनसम्बन्धिबुध-वासरे घटिकाचतुष्टयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशो बोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

जयपत्रलिखिता र्थिन्या उत्तरपत्रलिखितप्रकरणानाम्मध्ये ऽर्थिन्याः पति-र्यदि द्वे पत्न्यौ[1] भैरवीदासीरत्नमणीदास्यावेवं रत्नमणीदासीगर्भजाता-जन्माचिकित्स्यरोगार्त्तमेकं पुत्रं क्षेत्रचन्द्रनामानं संरक्ष्य मृतः स्यात्, क्षेमचन्द्रोपि तादृशरोगग्रस्त एव मृत इत्यस्य आजन्माचिकित्स्यरोगार्त्ते पुत्रे विद्यमाने सत्यर्थिन्या उत्तरपत्रलिखितस्य तत्प्रतिकृतस्योमीयच्छब्द-वाच्यस्य कार्य्यस्य वा एतयोर्द्वयोर्वा सत्यत्वे सत्येनद्धर्म्माधिकरणार्थिनी-नियुक्तोकीलशब्दवाच्यनिविड्व्यवस्था शास्त्रसम्मता भवति, शास्त्रानुसारेणा-जन्माचिकित्स्यरोगार्त्तपुत्रस्य पितृधनाधिकारित्वाभावेन तादृशपुत्रे विद्य-माने सत्यप्यनंशित्वप्रयोजकदोषशून्यपौत्रप्रपौत्राभावे अर्थिनीपतिपत्न्योर-र्थाद्भैरवीदासीरत्नमणीदास्योरेवाधिकारस्तयोर्द्वयोर्म्मध्ये रत्नमणीदास्या मरणे तत्संक्रान्ततदीयपतिधनांशेऽपि भैरवीदास्या अर्थिन्या एवाधिकारः । अर्थिन्यां विद्यमानायामन्येषां नाधिकारः । पुत्रपौत्रप्रपौत्ररहि-तस्य द्विपत्नीकस्य मृतस्य धने तत्पत्न्योः प्रधानाधिकारित्वेन तयोर्म्मध्ये एकस्याः पत्न्या मरणोत्तरं तत्संक्रान्ततत्पतिधनांशे तत्पत्नु(?)र्ये उत्तरा-धिकारिणस्ते एवाधिकारिणो भवन्ति, तत्पत्यु ?)रुत्तराधिकारिणां मध्ये पुत्र-पौत्रप्रपौत्राभावे जीवन्त्यास्तत्पत्न्याः प्रधानाधिकारित्वात्—इति वङ्गदेश-चलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीकादायतत्त्वदायक्रमसंग्रहवि-वादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

पतितस्तत्सुतः क्लीबः पङ्गुरुन्मत्तको जडः ॥
अन्धोऽचिकित्स्यरोगार्त्तो भर्त्तव्यास्ते निरंशकाः ॥ इत्युपरिलिखित-ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ १ ॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।

---

१. पति यदि द्वे पत्न्यौ—व्यप० ।

कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥ इति तत्तद्ग्रन्थ-धृतनारदवचनम् ॥ २ ॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥ ३ ॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः ॥ इति तत्तद्ग्रन्थ-धृतकात्यायनवचनम् ॥ ४ ॥

अतः पत्नी दुहितरश्चैव इत्यादिना ये पूर्व्वपूर्व्वस्याभावे परभूताधिकारिणो निर्द्दिष्टास्ते यथा पत्न्यधिकारप्रागभावे गृह्णीयुस्तथा जाताधिकारायाः पत्न्या अधिकारप्रध्वंसेऽपि भोगावशिष्टं धनं गृह्णीयुः—इति दायभागग्रन्थलिखनञ्चेति ॥ ५ ॥

एतदब्दीयापरैलमासीयाष्टादशदिनसम्बन्धिबुधवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

१३२ सहर ढाकार देओयानि आदालतेर पण्डित श्रीयुत दिगम्बरतर्कवागीशभट्टाचार्य्य स्थाने प्रश्न एइ लं० । ९२—

भोलानाथराय— फैरादी—

मृत रामस्मरण रायेर स्त्री श्रीमतिसावित्रा ओ गोपालकृष्ण ओ मदनमोहनसिंह ओ मृत काशीचन्द्रसिंहेर स्त्री—

आसामीयान् ॥

सावित्रार विक्रि १४॥=) कान्ति हिस्या जमिदारिर कओयाला असिद्ध करिया ताहा दखल पाओयार मकद्दमा—

हिन्दु एक व्यक्ति वैद्य जाति आपन स्त्री आ ततगर्भजात नावालग पुत्र ओ द्वितीय स्त्रीर पुष्यपुत्र राखिया मृत्यु हय, ओ ऐ

स्त्री ओ पुष्यपुत्र दुइ पुत्र छोलानामा अर्थात विरोध भञ्जनीय पत्र द्वाराय ।।=३।१ क्रान्ति हिस्या ऐ अप्राप्तव्यवहार पुत्रेर सत्त ओ ।-६।।= क्रान्ति हिस्या ऐ पुष्यपुत्रेर सत्त हइया ऐ अप्राप्त-व्यवहार पुत्रेर सत्त ताहार मातृ एक्तारे छिलो, ऐ नावालग पुत्रेर मृत्युर पर ऐ अविरा स्त्री सावित्रा अर्थात् नावालगेर माता सेइ-दरवस्त ।।=१३।- दस आना सोया तेरगण्डा एक क्रान्ति हिस्या ऐ पुष्यपुत्रेर अनुमति व्यतित विशेषकरण विना अन्येर निकट विक्रि करिते पारे कि ना। ओ यदि सेइ दरवस्त मिलकियत विक्रि करिये काशीते थाकिये दिनपात करे, 'ओ पुष्यपुत्र'[1] विक्रि असिद्धेर जन्ये ऐ मिलकियत दखल पाओयार प्रार्थनाय आदालते वादि हय—एमत विशयेते विक्रि असिद्धेर हुकुम आदालत हइते हइले पर ऐ पुष्यपुत्र विमातार जिवमाने विरोधि मिलकिअतेर उपर दखल पाइते पारे कि ना।।

द्वितीय—

यदि ऐ हिस्या विक्रिर पर पुष्यपुत्र ऐ विमातार असङ्गत प्रकरण अर्थात छेनाला कर्म्म हाकिमेर निकट प्रकाश करिया वादि हए ओ ताहा सावुद ना हइया डिषमिष हइले सेइ दत्तकपुत्र पितृमातृवस्तु पाइते पारे कि ना, अर्थात् विमातार प्रति एमत अत्युक्ति दत्तक सत्त हक पाओयार निषेध हय कि ना। ए सकल विषयेर उत्तर एतद्देशीय चलित दायभाग प्रभृति शास्त्र सम्मत सप्ताहेर मद्धे लिखेन। इति सन १२३८ साल, तारिख २८ श्रावण मौं॰ शन १८३१—१२ आगस्त।

समागतपारष्यरुवकारिसंवलितप्रश्नपत्रावलोकनात् यादृशबोधोजात-स्तदनुसारेण भाषया[2] सुखबोधार्थमुत्तरं लिख्यते ।।

प्रथम प्रश्नेर उत्तर—

अप्राप्तव्यवहार ईशानचन्द्रेर जननी सावित्रा आपन पति रामशरणरायेर मृत्युर पर पतिर स्थावर वस्तु दत्तकरूप सपत्नीपुत्र

---

१. पुत्र पुत्र—व्यप॰। २. भाषाया—व्यप॰।

ভোলানাথরায়ের সহিত উভয়তো যথাশাস্ত্র লিপি দ্বারা তৃতীয়াংশের একাংশ ।৵৩॥৵ দত্তকপুত্রকে দিয়া আপন অপ্রাপ্তব্যবহার পুত্রের স্বত্বাস্পদ ভূত দুই অংশ ॥৵১৩।৵ নিজাধিকারে অর্থাৎ আপন এক্তারে রাখিয়া ঐ অপ্রাপ্তব্যবহার পুত্রের মরণানন্তর অবীরা সাবিত্রা যথাশাস্ত্র স্বপুত্রধনে অধিকারিণী হইয়া ঐ বিভক্ত সমস্ত স্থাবর বস্তু বিসিষ্ট কারণ বিনা ঐ দত্তকপুত্রের অনুমতি ব্যতিরেক বিক্রয় করিতে পারে না। যদি ঐ তাবত বস্তু বিক্রয় করিয়া সাবিত্রা কাশীতে থাকিয়া কাল যাপন করিতে থাকে, ঐ দত্তকপুত্র ঐ বিরোধি বিক্রীত বস্তু বিক্রয় অসিদ্ধ হইয়া আপন অধিকার অর্থাত দখল পাওয়ার প্রার্থনায় প্রতিবাদি হয়, ও রাজাজ্ঞা দ্বারা অর্থাৎ আদালতের হুকুম মতে বিক্রয় অসিদ্ধ হয়, তবে বিমতা সাবিত্রা বর্ত্তমান পর্য্যন্ত ঐ বিরোধি বিভক্ত বস্তুতে সাবিত্রা বিনা দত্তকপুত্র অধিকারি অর্থাত দখল পাইতে পারে কি না ইতি ॥

অত্র প্রমাণম্—

অপুত্রা শয়নং ভর্ত্তুঃ পালয়ন্তী ব্রতে স্থিতা ।

মৃত্যুসামরণাৎ ক্ষান্তা দায়াদা ঊর্দ্ধমাপ্নুয়ুঃ ॥—ইতি কাত্যায়ন-বচনাৎ ॥

স্ত্রীণাং স্বপতিদায়স্তু উপভোগফলঃ স্মৃতঃ ।

নাপহারং স্ত্রিয়ঃ কুর্য্যুঃ পতিদায়াৎ কথঞ্চন ॥—ইত্যাদি বচনম্ ॥

দ্বিতীয়প্রশ্নস্যোত্তরম্—

ঐ অংশ বিক্রয় করণের পরে দত্তকপুত্র বিমাতার উপপতি ব্যভিচারাদি দোষ রাজধানীতে প্রকাশ করিয়া প্রতিবাদি হয়, তাহার প্রমাণ না হওয়াতে রাজবিচারে ঐ দোষ মিথ্যা হইয়া মকদ্দমা ডিস্মিস হয়। এমত মাতৃদ্বেষ্টা দত্তকপুত্র কোনো মতে বিমাতার ধনে অধিকারী হইতে পারে না। যদ্যপি ঔরস পুত্র দ্বেষ্টা হইয়া মাতার যথার্থ ব্যভিচারাদি দোষ কোনো স্থানে প্রকাশ করে তবে সেই পুত্র মাতৃধনের অধিকারী হয় না। দত্তকাদির পাওনের

विषय कि। केन ना तावत शास्त्रे लिखित आछे–ये पितृ-मातृर यथार्थ दोष पुत्रे सर्व्वतो भावे गोपन करिवेक। इहाते विद्वेष करिया यदि पितृ-मातृर मिथ्या दोष, याहाते अत्यन्त अपमान अव्यवहार्य्यत्वादि दोष हय, इहा राजद्वारे प्रकाश करिले सेइ पुत्र पितृमातृधनेर अधिकारि कोनो मते नहे, विशेषत दायभागेर लिखन धनग्रहण धनस्वामिर ऐहिक पारत्रिक उपकार कर्म्मर वेतन स्वरूप ताहा, ना करिया, तद्विपरीत विद्वेषादि करिले सुतरां अनधिकारी हय-इति दायभागादिशास्त्रसम्मता व्यवस्था॥

अत्र प्रमाणम्—

पितृद्विट् पतितः षण्डो यश्च स्यादौपपातिकः।
औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः॥ इति व्यासवचनम्॥
गोपयेज्जन्म नक्षत्रं धनसारं गृहे मलम्।
प्रभोरप्यवमानञ्च तस्य दुश्चरितञ्च यत्॥
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः।—इत्यादिवचनम्॥

पुन्नाम्नो नरकाद् यस्मात् त्रायते इत्यादि (*वचनेन*) *पुत्रकर्तृकतया महाफलश्रुतेः। तत्कर्म्मवेतनं धनसम्बन्धित्वम्। अतस्तदकुर्व्वतः कुतो वेतनम्*—इति दायभागः।

शन १८३१ साल २५ आगष्ट॥

श्रीईश्वरो जयति
श्रीदिगम्बरशर्म्मणः

१३३—सहर ढाकार देयानि आदालतेर पण्डित श्रीयुत दिगम्बर तर्कवागीश भट्टाचार्य्य स्थाने प्रश्न एइ ये— नं० ४९२

भोलानाथराय फैरादी

शावित्रा ओ गोपालकृष्णसिंह ओ गयरह आसामीयान—

प्रथम प्रश्न—

पूर्व्व प्रश्न व्यवस्थापत्रे एमत बोध हय ना ये मातार व्यभिचा-

रादि दोष प्रकाशे पितृधन पाइते पारे ना। अतएव लिखा जाइतेछे ये मातृ असङ्गत प्रकरण प्रकाशे पितृवस्तु पाओयार निषेध कि ना-एहार व्यवस्था शास्त्रानुसारे परस्यु दिवस मिछिलेर शमय लिखिया पाठाएन ॥

द्वितीय--

पितृमातृदोष प्रकाशे ये पितृमातृधनेर अधिकारि नहे, एमत व्यवस्था लिखिया ताहार निचे व्यासवचन ओ दायभागवचन ये लिखा गीयाछे ताहार अर्थ जथार्थ वाङ्गलाभाषाते लिखिया परस्यु दिवस मिछिलेर समय दाखिल करेण, गौन ना हय। इति शन १२३८ तारिख १२ भाद्र वाङ्गलार आङ्गरेजी शन १८३१-२७ आगस्त।

समागतपारुष्यरूवकारिसंवलितप्रश्नपत्रावलोकनात् यादृशबोधो जातस्तदनुसारेण भाषया सुखबोधार्थमुत्तरं लिख्यते ॥

प्रथम प्रश्नेर उत्तर—

मातृव्यभिचारादि दोष प्रकाश करिले पितृधन पुत्रे पाओनेर बाधा नाइ। पूर्व्व पश्ने लिखित मातृधन पाइते पारे ना-इति।

द्वितीयप्रश्नेर उत्तर—

पितृमातृदोपप्रकाशे पितृमातृधने अधिकारी नहे। ताहार प्रमाण ये व्यासवचन पितृद्विट् इत्यादि। ताहार अर्थ—एइ पितृद्वेष्टा जीवद्दशाते वाक्य द्वारा किम्वा आघात द्वारा अपमान करे एवं मृत्यु हइले श्राद्धादिते वैमुख हय, पतित, अव्यवहार्य्य, ओ षण्ड, नपुंमक, औपपातिकः उपपातकयुक्तः—एरूप औरस पुत्र पितृधने अधिकारी हइते पारे ना, सुतरां क्षेत्रज दत्तकादि अधिकारी नहे ॥ द्वितीय विष्णुधर्म्मोत्तरवचन--गोपयेज्जन्म नक्षत्र-इत्यादिर अर्थ—जन्मनक्षत्र, धनसार श्रेष्ठधन, गृहमल गृहछिद्र, प्रभु-पितृ-मातृर अपमान, आर ताहारदिगेर दुष्कर्म्म गोपन करिवेक। पितृशब्दे ओ प्रभुशब्दे पिता माता दुइ। इहार प्रमाण दायभागादि अनेक शास्त्रे आछे। कोऽर्थः पुत्रेण—इत्यादि वचनेर

অর্থঃ–যে পুত্র ধার্ম্মিক ও বিদ্বান্ না হয়, সে পুত্রে কি প্রয়োজন আছে, অর্থাৎ ধনি ব্যক্তির উত্তরাধিকারী ধনির দ্বেষ্টা হইলে তাহার ধন পাইতে পারে না। ইহার প্রমাণঃ একত্র নির্ণীতঃ শাস্ত্রার্থঃ বাধকং বিনা অন্যত্রাপি কল্প্যতে—ইতি দায়ভাগাদিশাস্ত্রসম্মতা ব্যবস্থা। ইতি সন ১৮৩১ সাল তারিখ ২৯ আগষ্ট ॥

শ্রীঈশ্বরো জয়তি
শ্রীদিগম্বরশর্ম্মণঃ

নং০ ৪৯২—

১৩৪—মৃত রামস্মরণরায়ের পুষ্যপুত্র ভোলানাথরায়-ফৈরাদী ঐ মৃতব্যক্তির স্ত্রী সাবিত্রা ও গোপালকৃষ্ণ সিংহ ওগয়রহ—আসামীয়ান্।

সদর দেওয়ানি আদালতের পণ্ডিতদিগের স্থানে প্রশ্ন এই।

এই আদালতের প্রশ্ন জাহা সহর আদালতের পণ্ডিত শ্রীযুত দিগম্বরতর্কবাগীশভট্টাচার্য্য নিকট পাঠান গিয়াছিল, ও ভট্টাচার্য্য যে উত্তর ও বচনের অর্থ লিখিয়াছেন, তাহা পাঠান জায়ে। যথাশাস্ত্র কি না, এবং বচনের অর্থ যে পণ্ডিত লিখিয়াছেন তাহা যথার্থ কি না, এবং যদি ব্যবস্থা যথার্থ, ও বচনের অর্থ পণ্ডিতের ব্যবস্থার ঐক্য না হয়, তবে ঐ প্রশ্নের যথাশাস্ত্র ব্যবস্থা ও বচনের যথার্থ অর্থ লিখিয়া পাঠাএন।

যদি এক ব্যক্তি বৈদ্যজাতি, আপন বিত্ত রাখিয়া মৃত্যু হয়, ও সেই বিত্ত প্রথম স্ত্রীর পুষ্যপুত্র ও বর্ত্তমানা দ্বিতীয় স্ত্রির গর্ভজাত পুত্র মধ্যে দুই অংশ, এক অংশমতে অংশ জাত হইয়া, ঔরস পুত্রের দুই অংশ তাহার অপ্রাপ্তব্যবহার নিমিত্তক ও পশ্চাৎ তাহার মৃত্যু হওয়াতে আপন মাতৃ এক্তারে ছিলো, এমত বিত্ত শাস্ত্রানুসারে ঐ পুষ্যপুত্রের মাতৃবিত্ত, কি পিতৃবিত্ত হয়, ইহার উত্তর লিখিয়া পাঠাএন ইতি। সন ১৮৩১ তারিখ ২৩ আগস্ত মৌ০ বাং০ শন ১২৩৮ তারিখ ১৪ ভাদ্র ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं व्यवस्थापत्रद्वयञ्च यदङ्गरेजीशब्दप्रतिपाद्यैकत्रिंशदधिकाष्टादशशताब्दीयसितम्बरमासीयोनविंशतिदिनसम्बन्धिसोमवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो-जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रथमप्रश्नस्योत्तरम्—

जाहाङ्गीरनगरसम्बन्धिकोर्टापीलाख्यधर्म्माधिकरणीयप्रश्नयोरुत्तरे सहरजिलाख्याबान्तरधर्म्माधिकरणानयुक्तपण्डितेन दिगम्बरतर्कवागीशभट्टाचार्येण लिखिते यथाशास्त्रे एव। एवं तत्प्रमाणीभूतवचनानामर्था अपि तत्पण्डितलिखिता यथार्था एव। किन्तु अङ्गरेजीशब्दप्रतिपाद्यैकत्रिंशदधिकाष्टादशशताब्दीयागस्तमासीयोनत्रिंशद्दिनलिखितप्रथमप्रश्नोत्तरे व्यभिचारादिदोषप्रकाशकरणे सति पितृस्वत्वास्पदीभूतधनप्राप्तेर्ब्बाधो न भवति पुत्रस्येति यल्लिखितं तत्रायं विशेषो मिथ्याभूतमातृव्यभिचारादि-दोषप्रकाशकर्त्तुः पुत्रस्यातीव निन्दितत्वेन मातुश्च पित्रपेक्षया सहस्रगुणाधिकमान्यत्वेन च पितृदोषप्रकाशं विनैव मातृव्यभिचारादिदोषप्रकाशेनैव-पितृदोषप्रकाशकर्त्तुः पुत्रस्याकृतयथाशास्त्रप्रायश्चित्तस्योत्तराधिकारित्वेन कस्यापि धनग्रहणाधिकारित्वस्य योग्यता न भवतीति ॥

अत्र प्रमाणम्—

उपाध्यायाद्दशाचार्य्य आचार्य्याणां शतं पिता।
सहस्रन्तु पितुर्म्माता गौरवेणातिरिच्यते ॥
गर्भधारणपोषाभ्यां तेन माता गरीयसी।—इत्यादि श्रीकृष्णतर्कालङ्कारकृतदायभागटीकादिग्रन्थलिखितमनुवचनम्[1] ॥१॥

पितृपत्न्यः सर्व्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृस्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयान्यन्यथासङ्करकारिणः स्युरिति प्रयोगतत्त्वादि(उद्वाहतत्त्व पृ० ११८)ग्रन्थधृतसुमन्तु(?)वचनम् ॥२॥

१. मुनि०—व्यप०।

द्वितीयप्रश्नस्योत्तरम्--

यद्येकः कश्चिद् वैद्यजातीयो व्यक्तिविशेषः स्वस्वत्वास्पदीभूतधनं संरक्ष्य मृतः स्यादथ च तदेव धनं तस्य प्रथमपत्नीपोष्यपुत्रवर्त्तमानद्वितीयपत्नीगर्भजपुत्रयोर्मध्ये विभागेन अंशद्वयमौरसपुत्रस्यैकोंऽशः पोष्यपुत्रस्येति । तत्रौरसपुत्रस्यांशद्वयं तस्याप्राप्तव्यवहारत्वेन पश्चात्तन्मरणेन च स्वमातुरायत्तं भवति । एतादृशं धनं यद्यपि पोष्यपुत्रस्य पितृधनमभूत्, किन्तु पश्चाद् भ्रातृस्वत्वास्पदीभूतत्वेन भ्रातृधनं तन्मरणात्तन्मातृसंक्रान्तत्वेन च तन्मातृमरणानन्तरं मातृसंक्रान्तं भ्रातृधनं भविष्यतीति ॥

अङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयफेब्रुवरीमासीयप्रथमदिनसम्बन्धिबुधवासरे मयेदमुत्तरं दत्तमिति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

१३५—यद्यपि पितृव्य ओ भ्रातुष्पुत्र पैतृक साधारण स्थावर एवं अस्थावर वस्तु बण्टकेर विवाद उपस्थित हइया सालिषेर निकट तावत वस्तु उत्तरकाल अंश करिया लओनेर लिखित पठित हइया थाके, किन्तु तदनुसारे कोन वस्तु चिह्नित एवं नाम पृथक, अर्थात् जमिदारि आदिर नाम खारिज, ना हइया सकर भूम्यादीर कर प्रदानेर निमित्त महाल खण्ड विलिमते उभये आसुल तहसील करिया उभये साधारणे राजकर प्रदान करिया थाके, ठाकुरसेवा ओ बागान ओ बाटीदिगर तावत वस्तु साधारणे राखिया ऐ भ्रातुष्पुत्र आपन पितृव्य एवं स्त्री वर्त्तमाने लोकान्तर हइया थाके, तवे मिताक्षराग्रन्थ मते ऐ मृत व्यक्तिर ऐ सकल वस्तुर उत्तराधिकारि ऐ स्त्री किम्वा ऐ पितृव्य हइवेक इति ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नप्रतिरूपपत्रं तत्सम्पर्कीयावशिष्टपत्रचतुष्टयं च यदेतदब्दीयजानवरीमासीयोनविंशतिदिनसम्बन्धिबृहस्पतिवासरे घटिकाद्वयाधिक-

यामद्वयानन्तरं मया प्राप्तं तदलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

यदि कश्चित् स्वपितृव्ये विद्यमाने स्वपत्न्याञ्च विद्यमानायां मृतः स्यात्तदा प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति मिताक्षरादिग्रन्थमते तस्यैव मृतस्य त्यक्तधने तस्य पुत्रपौत्रप्रपौत्राभावे तत्पत्न्येवाधिकारिणी भवति। पत्न्याञ्च विद्यमानायां तत्पितृव्योऽधिकारी भवितुं न शक्नोति। प्रश्नपत्रलिखितेन सराजकरस्थावरादेः करप्रदानार्थं पृथक् पृथक् सराजकरस्थावरखण्डस्य निर्देशेन द्वाभ्यां करग्रहणं कृत्वा ताभ्यां द्वाभ्यां साधारण्येन राजकरो दत्तः स्यादित्यनेन विवादास्पदीभूतधनविभागस्य शास्त्रानुसारेण निष्प्रत्यूहत्वात्। मिताक्षरादिग्रन्थलिखितस्य विभागशब्दार्थस्यैतद् व्यवस्थाया अधोलिखित तृतीयप्रमाणे स्पष्टीकृतत्वाच्चेति मिताक्षरादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतो गोत्रजो बन्धुः—इत्यादिमिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

पत्नी गृह्णीयात्-इत्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्—इति मिताक्षराग्रन्थलिखनम् ॥२॥

विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानान्तदेकदेशेषु व्यवस्थापनम्—इति मिताक्षराग्रन्थलिखनम् ॥३॥

दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः।

विभक्तानां पृथग्ज्ञेयाः पाकधर्म्मागमव्ययाः ॥—इति वीरमित्रोदयादिग्रन्थधृतनारदवचनम् ॥४॥

साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च।

विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः कथञ्चन ॥ इति तत्तद्ग्रन्थधृतनारदवचनम् ॥ ५ ॥

येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वरिक्थतः।

विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् ॥—इति तत्तद्ग्रन्थधृतनारदवचनञ्चेति ॥ ६ ॥

एतदब्दीयापरेलमासीयद्वादशदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१३६. इं सन १८३२ साल तां २५ फेपरेल—

कोटेर पण्डितेर द्वाराय अवगतो हइवेन ये वागचे ब्राह्मण गङ्गाजले सगुण करिते मुक्त हइते पारे किना, आर यदि स्यात् सगुण करे तवे ताहार धर्म्म हाइन हइते पारे किना ॥—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नप्रतिरूपपत्रमवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

वागचीयोपनामकब्राह्मणजातीयो गङ्गाजलेन शपथकरणस्य योग्यो न भवति । यदि च तेन गङ्गाजलेन शपथः क्रियते तदा तस्य धर्म्महानिर्भवत्येवेति शास्त्रानुसारिणी व्यवस्थेति—

अत्र प्रमाणम्—

यथा गङ्गोदकं तोयं गोमयं गां तथा द्विजम् ।

असत्यं वापि सत्यं वा स्पृष्ट्वा दिव्यं करोति यः ॥

त्रिकोटिकुलसंयुक्तो रौरवं नरकं व्रजेत् ।

कर्त्ता कारयिता भद्रे तथैव नरकं व्रजेत् ॥ इति गायत्रीतन्त्रधृत-(पृ० ४४)महादेववचनम् ॥ १ ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१३७ सदर देओयानी आदालतेर पण्डितेर उपर सओयाल—

सओल—

यद्यपि मृत राजा चित्रसेनेर स्त्री राणी इन्द्रकुमारी अवीरा

आपन ओयारिष अर्थात् आपन स्वामीर भ्रातार पौत्र महाराजा तेजचन्द्र वाहादुरेर वर्त्तमाने सुपरेम कोटेर आदालतेर खरचार देना दान अर्थात् दाइक हइया सुपरेम कोटेर देना खरचा आदायकारण आपन दखली चित्रसेनेर त्यज्य कोन वागान विक्रय करिया थाके तवे शास्त्रानुसारे ताहा सिद्ध हय किना। एवं यद्यपि मुद्दइ महाराजा तेजचन्द्र वाहादुरेर महर करा लिपिद्वाराय राजा चित्रसेनेर स्त्री इन्द्रकुमारीर प्रति उपरेर लिखित वागान विक्रयेर ओ हस्तान्तरकरणेर क्षमता वोध हय, सेमते ओ वागान मजकुरान् विक्री सिद्ध हय किना इति ॥—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयमार्च्चमासीयद्वितीयदिनसम्बन्धिशुक्रवासरे घटिकाद्वयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते॥

यद्यपि मृतस्य राज्ञश्चित्रसेनस्यावीरया पत्न्या राज्या इन्द्रकुमार्य्या स्वपतिभ्रातृपौत्रे महाराजतेजश्चन्द्ररायबहादुराख्ये स्वानन्तरोत्तराधिकारिणि विद्यमाने सति सुप्रीमकोर्टाख्यधर्म्माधिकरणव्ययग्रस्तया तया तद्धर्म्माधिकरणव्ययपरिशोधनार्थं राज्ञश्चित्रसेनस्य त्यक्तः स्वायत्तीभूतः कश्चिदारामो विक्रीतः स्यात्तदा शास्त्रानुसारेण तादृशविक्रयः सिद्ध्यति, पुत्र-पौत्रप्रपौत्ररहितस्य मृतस्य धने उत्तराधिकारित्वेनाधिकारिण्याः पत्न्या आपन्निवारणार्थम् आवश्यककार्य्यान्तरार्थं च तत्तत्कार्य्योपयुक्तस्य तद्धनेविक्रयस्य शास्त्रानुसारेणाधिकारित्वात्। एवं यद्यप्यर्थिनो महाराजतेजश्चन्द्रबहादुराख्यस्य मुद्राङ्कितलिपिद्वारेण राज्ञश्चित्रसेनस्य पत्न्या इन्द्रकुमार्य्या उपरिलिखितारामाणां विक्रयप्रकारेण प्रकारान्तरेण वा हस्तान्तरकरणक्षमताया बोधो भवति, तथापि तेषामारामाणां विक्रयः सिद्ध्यति, उत्तराधिकारित्वेन प्राप्तानपत्यपतिधनया पत्न्या कृतस्योत्तराधिकारिसम्मतया प्रश्नपत्रलिखितप्रकारकापन्निवारकावश्यकव्ययपरिशोधनार्थं तदुपयुक्तपतिधनविक्रयस्य सिद्धेर्निष्प्रत्यूहत्वात्—इति वङ्गदेशचलितदायभागश्रीकृष्णतर्काल-

ङ्कारकृतदायभागटीका-दायक्रमसंग्रह—व्यवहारतत्त्व—नारदस्मृति-विवादार्णव-सेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धुः— इत्याद्युपरिलिखितग्रन्थधृतयाज्ञवल्क्य-वचनम् ॥ १ ॥

कुटुम्बार्थमशक्ते तु गृहीतं व्याधितेऽथवा ।

उपप्लवनिमित्तं च विद्यादापत्कृतञ्च तत्—इति व्यवहारतत्त्वादि-ग्रन्थधृतकात्यायनवचनम् ॥ २ ॥

स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदि ।

विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥ इति

एतान्यपि प्रमाणानि *भर्त्ता यद्यनुमन्येत* इति च नारदस्मृत्यादि-ग्रन्थधृतनारदवचनम् ॥ ३ ॥

तथा च *भर्त्ता जीवन् यथा यस्य पोषणादिकं यद्वा कर्म्म करोति मृतभर्त्तृकापि स्वशक्त्यनुसारेण तथैव तस्य पोषणं तच्च कर्म्म कुर्व्वीत ।* इति विवादभङ्गार्णवग्रन्थलिखनञ्चेति ॥ ४ ॥

अङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयमेइमासीयसप्तदशदि-नसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

१३८—अशेष शास्त्राध्यापक श्रील श्रीयुक्त सदर देओयानि आदालतेर पण्डितजन सकल

सओाल—

एक व्यक्ति रामकान्त भट्टाचार्य्य नामे छिल । ऐ रामकान्तेर तिन पुत्र रामजय ओ कालीप्रसाद ओ रामसुन्दरभट्टाचार्य्य हइयाछिल । ताहार मध्ये कालीप्रसाद निःसन्तान, आर रामजय

एक कन्या ओ एक स्त्री ऐ स्त्रीर गर्भे एक पुत्र राखिया आपन पिता ऐ रामकान्तभट्टाचार्य्येर वर्त्तमाने फौत् करे। तदपरे रामजय भट्टाचार्य्येर पुत्र भूमिष्ठ हइले किछु काल गते रामकान्तभट्टाचार्य्य एक पुत्र, अर्थात् ऐ रामसुन्दरभट्टाचार्य ओ एक पौत्र अर्थात् ऐ रामजयेर पुत्रके ओयारिष एवं किछु भूम्यामि राखिया फौत् करे, आर ऐ सकल भूम्यादि रामसुन्दरभट्टाचार्य्य आर ऐ रामजयेर पुत्रेर एजमालि दखले थाके। तस्य परे रामजयेर पुत्र आपन माता ओ भग्नीर सन्मुखेते अष्ट वत्सर वयः क्रमे फौत् करे। उहार फौतेर पर ताहार माता, अर्थात् रामजयेर स्त्री, आपन ऐ एक कन्याके राखिया फौत् करे। ताहार पर रामजयेर कन्यार तिन पुत्र सन्तान हय। ऐ तिन पुत्रेर मध्ये एक पुत्रे प्राप्त हइयाछे, ए क्षयने दुइ पुत्र वर्त्तमान आछे। तदसेत्ताय रामसुन्दरभट्टाचार्य्य आपन-पिता, रामकान्तभट्टाचार्य्य, ओ आपन मातार श्राद्धादि करिया एवं स्थावर वस्तुते दखिलकार थाकिया आपन नावालग दुइ पुत्र आर एक स्त्री अर्थात् ऐ नावालगेरदिगेर माताके राखिया फौत करे। एक्षयने रामसुन्दरभट्टाचार्य्येर ऐ स्त्री ओ नावालग दुइ-पुत्र वर्त्तमान आछे एमते रामजयभट्टाचार्य्येर ऐ कन्यार दावि रामजयेर हिस्यार भूम्यादिर प्रति अर्शं किना। यदि स्यात् अर्शाय, तबे ताहार दावि ऐ रामकान्तभट्टाचार्य्येर भूम्यादि वस्तुर प्रति कि आन्दाज अर्शाइते पारे इति। शन १८३२ साल तारिख १९ जानेआरि मताबक शन १२३८ साल तारिख ७ माघ—॥

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयमार्चमासीयद्वितीयदिनसम्बन्धिशुक्रवासरे[1] घटिकाद्वयाधिकयामद्वयानन्तरं मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रश्नपत्रलिखितप्रकारकवृत्तान्ते सति रामजयभट्टाचार्यस्य दुहितुरयोगो रामजयभट्टाचार्ययोग्यांशभूम्यादिकं प्रति भवत्येव । अतएव रामजय-

१. समवन्धि—व्यप० ।

भट्टाचार्यस्य पितू रामकान्तभट्टाचार्यस्य स्वत्वास्पदीभूतभूम्यादिधनार्द्धांश-परिमितभूम्यादिधनं प्रति तादृशाभियोगोऽयुक्तः, यतो रामकान्तभट्टाचार्यो राममुन्दरभट्टाचार्यनामानमेकं पुत्रमेकञ्च पौत्रमर्थाज्जीवति पितरि मृतस्य रामजयभट्टाचार्यस्य स्वकीयज्येष्ठपुत्रस्य पुत्रञ्च संरक्ष्य मृतः । अतएव रामकान्तभट्टाचार्यस्य मरणानन्तरं तत्त्यक्तधने शास्त्रानुसारेण तदानीं विद्यमानयोः पुत्रपौत्रयोरेव तुल्याधिकारः, रामकान्तभट्टाचार्याख्ये पितरि जीवति सति अनपत्यस्य मृतस्य कालीप्रसादभट्टाचार्यस्य तद्[1]द्वितीयपुत्रस्य पैतृकादिधने स्वत्वानुत्पादात् । एवञ्च सति रामकान्तभट्टाचार्यस्य पौत्रो यदि स्वजननीं स्वभगिनीं चैकां संरक्ष्यानपत्य एव मृतः स्यात्तदा तत्त्यक्तधने अर्थान्मूलपुरुषस्य रामकान्तभट्टाचार्यस्य त्यक्तधनार्द्धांशे तन्मातुरर्थात् रामजयभट्टाचार्यस्य पत्न्या एवाधिकारः तस्याञ्च मृतायां तत्संक्रान्तस्वपुत्रधने तत्पुत्रस्य ये उत्तराधिकारिणस्त एवाधिकारिणो भवन्ति । तत्र रामकान्तभट्टाचार्यपौत्रस्य स्वपुत्रमारभ्य स्वपितुः प्रपौत्रपर्यन्तरहितस्य मृतस्य भगिन्याः कश्चिदेकोऽपि पुत्रस्तन्मातृमरणसमये गर्भे व्यवस्थितो भूमिष्ठो वा यद्यासीत्तदा तस्याधिकारः जाते[2] च तस्याधिकारे पुनरुत्पत्स्यमानानां तद्भ्रात्रन्तराणामर्थाद्रामकान्तभट्टाचार्यपौत्रस्य पितृदौहित्रान्तराणामप्यधिकारः समान एव भविष्यति । सति च रामकान्तभट्टाचार्यपौत्रस्य पितृदौहित्रे तत्पितृव्यपुत्राणामर्थात् राममुन्दरभट्टाचार्यस्य पुत्राणां प्रश्नपत्रलिखितानां नाधिकारः । यदि च रामकान्तभट्टाचार्यपौत्रस्य स्वपुत्रमारभ्य स्वपितुः प्रपौत्रपर्यन्तरहितस्य मृतस्य भगिन्याः कश्चिदेकोऽपि पुत्रस्तन्मातृमरणसमये गर्भे व्यवस्थितो भूमिष्ठो वा नासीत्तदा तत्पितृदौहित्राणां स्वत्वान्यथानुपपत्त्या तद्भगिन्यास्तत्पितृदौहित्रोत्पत्तिमूली[3]भूतायास्तत्सम्बन्धमूलीभूतायाश्च स्वपुत्रोत्पत्तेः प्राक्कालपर्यन्तं यथा पुत्रादिपत्नीपर्यन्तरहितस्य मृतस्य पितुर्द्धने दुहितुरधिकारस्तथा भ्रातृधनेऽप्यधिकारः । सति च रामकान्तभट्टाचार्यपौत्रस्य पितृदौहित्रे स्वतः तत्पितुः पार्व्वणश्राद्धपिण्डदातरि स्वतस्तत्पितुः पार्व्वणश्राद्धपिण्डदानानधिकारिण्यास्तद्भगिन्या नाधिकारः । किन्तु तस्याः पुत्रस्यैव, पुत्रा-

---

१. तत्—व्यप० । २. याते—व्यप० । ३. ० मूलि०—व्यप० ।

णां वोपरिलिखितप्रकारेणाधिकारः —इति वङ्गदेशचलितदायभागश्रीकृष्णतर्कालङ्कारकृतदायभागटीका—दायतत्त्व-दायक्रमसंग्रह-विवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

अविभक्ते मृते पुत्रे[1] तत्सुतमृक्थभागिनम् ।
कुर्व्वीत जीवनं येन लब्धं नैव पितामहात् ॥

लभेतांशं स्वपित्र्यन्तु पितृव्यात्तस्य वा सुतात्—इति दायतत्त्व-विवादभङ्गार्णवादिग्रन्थधृतकात्यायनवचनम् ॥१॥

यथा पैतामहे धने पितुः स्वाम्यं तथैव तस्मिन्मृते तत्पुत्राणामपि, न तत्र सन्निकर्षविप्रकर्षाभ्यां कोऽपि विशेषः । पार्व्वणविधिनापि पिण्डदानेन द्वयोरपि तदुपकारकत्वाविशेषात्—इति दायभागग्रन्थलिखनम् ॥२॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः ॥—इत्यादितत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥३॥

पितुरपि प्रपौत्रपर्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनिदौहित्रस्येव—इति दायभागग्रन्थलिखनम् ॥४॥

दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्—इति तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥५॥

तदभावे पुनः पितृदौहित्रः इति । *तदभावे पितामहस्तदभावे पितामही तदभावे पितुस्सोदरस्तदभावे पितुर्व्वैमात्रेयस्तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रः*—इत्यादि च श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनम् ॥६॥

यद्यपि दुहित्रभावे दौहित्रस्येव भगिन्या एव प्रागधिकारो युक्तस्तथापि तस्याः स्त्रीत्वेन पार्व्वणपिण्डदत्वाभावान्नाधिकारः । दुहितुस्तु दौहित्रात् पूर्व्वमङ्गादङ्गात् सम्भवति इत्यादिविशेषवचनादेवाधिकारः इति भावः इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनञ्चेति ॥७॥

---

१. अविभक्तेऽनुजे प्रेते—कास्मृ० ।

अङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयमैमासीयचतुर्विंशातिदिनसम्बन्धिवृहस्पतिवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१ सदर देओयानि आदालतेर रुवकारि इङ्गरेजी सन १८३२ साल तारिक २३ माह फेवेओयारि मोतावक वाङ्गला १२३८ साल १२ माह फाल्गुन रोज वृहस्पतिवार ए आदालतेर हाकिम विचार्डँ[1] ओयालपोल साहेवेर वैठके—

महाराजा गोविन्दनाथराय— आपीलाण्ट—

गुलालचन्द्र ओरफे नानका वावु प्रभृति— रेष्पाडण्टान—

आपिलेण्टेर उकिल मुनशी हसन आलि ओ रेष्पानडेण्टानेर उकिल मुनशी गोलाम वतुल ओ सदासुख पण्डित हाजिर आइलेन। ए मकर्द्दमा पूर्व्वे कयेक तारिके कथवर्ट थरनेल सिली साहेव हाकिमेर समक्षे रुवकार ओ लालिसेर आरजि इत्यादि प्रावेनसिएल कोटेर कागजात फयसाला पर्य्यन्त ओ ए आदालतेर सओयाल ओ जओवाव पडागिया १८३१ साल १८ माह मे तारिखे कयेक प्रश्नेर प्रत्युत्तर ए आदालतेर पण्डित हइते तलव हइया ओहा दाखिल हओन वादे स्थकित छिल। गतो दिवस आमार वैठके रुवकार ओ नालिषेर आर्रजि इत्यादि कोटेर कागजात फयसाला पर्य्यन्त ओ ए आदालते दाखिल हओ मुजिवात ओ ओहार जवाव पडा गिया दिवावसान प्रयुक्त मुलतवि छिल। अद्य पुनराय ऐ रुवकार हइया ए आदालतेर पण्डितेर व्यवस्था ओ मुशम्मात माया कोङरेर सओयाल ओहार उकिल मुनशी दादार

१. रिचार्ड वालपोल—इति साधीयान् पाठः।

वकेसर साक्षाते दृष्टी हइया वोध हइल ये विवादीय स्थानेर प्रकृत-कर्त्ता माया कोङरेर स्वामीर उत्तमचन्द्रलाहार[1] मुतिचन्द्रके आपन पोष्य एक पुत्र विवेचना करिया देआन, ओ कोटेर व्यापार, ओ जमिदारीर कर्म्म सकल निर्व्वहन, ओ ऐ जमिदारि बहालि, ओ ताहार दान विक्रय हइते स्त्री के विमुख राखन कारण, ओसि नियुक्त करिया, ताहार नामे ओसियतनामा लिखिया दिया मृत्यु हय। कियत् कालानन्तर मुतिचन्द्र ओ पुण्यपुत्र विवेचना विना मरे ओ मायाकोङर उत्तमचन्द्रलाहार स्त्री गोलाल चन्द्र रेष्पाडएटके आपन पोष्यपुत्रताते ग्रहण करे। आपिलाएट ताहार पिता मृत उत्तमचन्द्रेर पिता खडर्गसिंहेर विनामे लाट इयाकुव-पुरदिगर छय लाट खरिद करा उल्लेखे ऐ लाटसकल दखल पाओन दाविते मायाकोङरेर नामे नालिस करिया, डाबरादिगर दुइ लाट मुर्दायालेहार स्थाने लइया, मकद्दमा सोलहनामानुजाय निष्पत्य कराइलेक, ओ फयशला जारिते दुइ लाटेर उपर दखल ओ कावेज हइल। तत्पर गोलालचन्द्र रेष्पानडएट उत्तमचन्द्रेर पोष्य पुत्रता ओ आपनि उत्तमचन्द्रेर पोष्यपुत्र ओ ताहार स्थानापन्न थाकने सोलह ओ विक्रय विषये मायाकोङरेर अक्षमता ऐ जाहाजे इयाकुवपुरदिगर चतुर्दश लाट दखल पाओन दाविते आपिलएट ओ लाट नारायणपुरग्रामेर खरिददार गोपीचरण-वडाल मुद्दइर कवुल दावि ओ उभयेर सोलह सम्वलित दरखास्त गुजराइलेन-ये प्रविनसियान कोटेर हाकिमेर हजुर हइते ताहादिगेर कवुल दावि ओ सोलहनामा, जाहा आपिलाएट ओ मुशम्मात मायाकोङरेर मध्ये हइल, ताहा नामञ्जूर; ओ अन्यथा हइया मुद्दयेर हक्के डिगरि ओ आपिलाएटके ताहार सावेक नालिश जारिकरण कारण अनुमति हइल इति। यथा कागजात् अनुमोदन ओ मकद्दमार समस्त वृत्तान्त दृष्टे रेष्पानडेएटेर पोष्यपुत्रता साक्षीगणेर द्वाराय साव्र्वस्थ, ओ ए आदालतेर पण्डितेर व्यव-

---

१. सालाहार—व्यप०।

स्था हइते ओ अनुभव हइतेछे-ये उत्तमचन्द्रेर स्त्री मायाकोङर स्वामिर अनुमति थाकुक वा ना थाकुक उत्तमचन्द्रेर वंसेर व्यवहार्य्य जयनि शास्त्रानुजाय पोष्यपुत्र राखन ओ तत्परिवर्त्तन चेमता राखे। ए कारण आमार समीपे गोलालचन्द रेष्पानडेण्टेर पोष्यपुत्रता ओ जयनि शास्त्रप्रमाण। ताहार सिद्धताते कोन सन्देह नाइ। किवल एइ सन्देह हइतेछे ये पोष्यपुत्र थाकिते मुसम्मात मायाकोङर स्वामीर त्यक्त धन स्वामीर असियतनामा लिखित नियमेर अन्यथाय जयनि शास्त्रानुसारे हस्तान्तरेर च्मता राखे कि ना; ओ ए आदालतेर पण्डितेर व्यवस्थार लिखित एवारते-ये जयनि शास्त्रानुसारे स्वामीर मृत्युरपर, यदि मृतव्यक्तिर स्त्री पुत्रवति थाके, तथा च ये प्रकार ताहार स्वामीर क्षमता छिल, तदनुरूप स्त्रीर प्रत्येक विषये च्मता याछे-अपष्टता ओ बोधे सिद्ध आइसे ना, ये ताहार अभिप्राय कि कि स्वामी आपन जीवतावस्थाय ये प्रकार स्थावर विषय मोले किम्वा विक्री अथवा दाने हस्तान्तर कारण[1] च्मता राखित सेइमत उहार स्त्री स्वामी मरणान्ते पुत्र सन्तान थाकिते च्मता राखे। अतएव एइ विषय ए आदालतेर पण्डितेर स्थाने जयनि शास्त्रेर प्रकृतानुमति बोधकरण मनासिब बोध हैया हुकुम हइल ये एइ रुवकारिर नकल व्यवस्था महित एइ हुकुमे ये व्यवस्थार लिखित एवारतेर[2] अर्थ ओ तातपर्य्येर विस्तारित, ओ एइ प्रश्नेर प्रत्युत्तर ये मायाकोङर उत्तम चन्द्रेर कायेम मोकाम ओ पोष्यपुत्र गोपालचन्द्र थाकने. ओ उक्त मजमुने उत्तमचन्द्र असियतनामा लिखिया देओने ओ जयनि शास्त्रानुसारे सोलह रुपे दाविर वस्तुर मध्ये घोडा मान्दा ओ डावरा दुइ लाट आवीलाएट सावेक मुद्दइके छाडिया देओन च्मता राखित किना-एक मासेर मध्ये लेखेन—एइ आदालतेर पण्डितेर हाओला करा जाय, ओ ए रुवकारिर द्वितीय नकल व्यवस्थार नकल सहित सहर मुरसिदावादेर जज साहेवेर निकट एक मास

१. करण इति साधीयान् पाठः। २. बारतेर—इति साधीयान् पाठः।

मेयादे प्रसेष्ट सम्वलित एइ हुकुमे पाठान जाय ये ऐ एवारतेर अर्थ ओ ऐ प्रस्तेर[1] प्रत्युत्तर जति अर्थात् जयनि शास्त्रेर पण्डितेर स्थाने, ये उभयेर सहित सम्पर्क ओ प्रयोजन ना राखे, लेखाइया आदालते प्रेरण करेण इति ।—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओयालपोलसाहेवधर्म्माधिकरणलिखितैतदब्दीयफेवरवरीमासीयत्रयोविंशतिदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं तत्समर्पितैतद्धर्माधिकरणीयव्यवस्थापत्रं च यदेतदब्दीयापरेलमासीयतृतीयदिनसम्बन्धिमङ्गलवासरे एवं तत्समर्पितमसीयन्नामाख्यपत्रप्रतिरूपपत्रं यत्तन्मासीयचतुर्द्दशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

प्रभुसमर्पितव्यवस्थालिखितस्य जैनशास्त्रानुसारेण पतिमरणानन्तरं पुत्रवत्या अपि पत्न्याः पतिवत्कार्य्यमात्रकरणे स्वाच्छन्द्येनेति अस्यायमर्थः—पुत्रे विद्यमाने पितुर्यादृशयादृशकार्य्यकरणे, अर्थात् स्थावरस्य दानविक्रयसन्धिप्रभृतिकार्य्यकरणे, जैनशास्त्रानुसारेणाधिकारः तथा पतिमरणानन्तरं स्वेच्छाकृतपोष्यपुत्रे[2] विद्यमाने मातुरपि तादृशतादृशकार्य्यकरणे अधिकारः । एवं च सति मायाकोमराख्या प्रत्यर्थिनो गुलालचन्द्रस्य प्रभुसमर्पितप्रश्नपत्रे उत्तमचन्द्रस्य पोष्यपुत्रत्वेन प्रतिनिधित्वेन च मन्यमानस्य विद्यमानतायामपि उत्तमचन्द्रलिखिते प्रभुसमर्पितविचारपत्रलिखितार्थप्रतिपादके चासीयन्नामाख्ये पत्रे सत्यपि जैनशास्त्रानुसारेण सन्धिरूपेणाभियोगविषयीभूतानां स्थावरद्रव्याणां मध्ये घोडामान्दा डावरेति च भाषायां द्विलाटशब्दप्रतिपाद्यस्थावरस्यैतद्धर्म्माधिकरणस्यावान्तरधर्म्माधिकरणस्य चार्थिने त्यागपूर्वकसमर्पणस्य क्षमतामरक्षदेव । यतः प्रभुसमर्पितासीयन्नामाख्ये पत्रे मतिचन्द्रं प्रत्युत्तमचन्द्रेण लिखितमस्ति–मम नाम रक्षणार्थमेकं बालकं स्वमतसिद्धं पोष्यपुत्रं रक्षित्वा तं शिक्षितं कृत्वा

---

१. प्रश्न इति साधीयान् पाठः । २. स्वेच्छ०—व्यप० ।

ज्ञानापन्नं तं वाणिज्ये सराजकरस्थावरे चाभिषिक्तं त्वं करिष्यसीति। अनेनोत्तमचन्द्रस्य पत्न्या मायाकोमराख्यायाः पोष्यपुत्रग्रहणानुमते स्तत्पत्युरनवगमात् पुनरप्युत्तमचन्द्रेण मतिचन्द्रं प्रति तस्मिन्नेवासीयन्ना-माख्ये पत्रे लिखितमस्ति मम स्त्री यदि वाणिज्ये व्यापारमुत्थापयितुमिच्छति, अथ च सराजकरस्थावरमस्मत्स्वत्वास्पदीभूतं भवदभिप्रायं विना कस्मैचि-द्ददाति विक्रीणीते वा तन्नास्मत्सम्मतम्, त्वं तत्र प्रतिबन्धकतामास्थाय दानं विक्रयं वा मा कारयेति। अनेन मतिचन्द्रस्यासीशब्दप्रतिपाद्यस्य जीवनावस्थायां तदनुमतिमन्तरेणोत्तमचन्द्रस्य पत्न्या मायाकोमराख्या(या) स्तद्धने दानविक्रयादिक्षमता नास्ति। किन्तूत्तमचन्द्रस्याज्ञानुसारेण मतिचन्द्रकृतस्योत्तमचन्द्रस्य पोष्यपुत्रस्य विद्यमानतायामपि असी(यत्)-प्रतिपाद्यस्य मतिचन्द्रस्यानुमतौ सत्यां मायाकोमराख्यायास्तद्धने दानविक्र-यादिक्षमता असीयन्नमाख्यपत्रानुसारेणाप्यस्त्येव। असीशब्दप्रतिपाद्यस्य मतिचन्द्रस्यासीयन्नामाख्यपत्रलिखितनियमसहितस्य मरणानन्तरं तदनुम-तेरसम्भावितत्वेन मायाकोमराख्यायास्तद्धने दानविक्रयादिक्षमतायामपि बाधकाभावः, असीयन्नामाख्ये पत्रे उत्तमचन्द्रस्याज्ञाजातस्यासीशब्दप्रति-पाद्यमतिचन्द्रं प्रत्येव लिखितत्वेनान्यं प्रति अलिखितत्वात्। एवं च सत्ये-तद्विवादे जैनशास्त्रानुसारेण पतिमरणानन्तरं पत्यनुमतिमन्तरेणापि पोष्य-पुत्रग्रहणाधिकारिण्यास्तत्त्यागकरणक्षमतापन्नायाः पतिमरणानन्तरं पति-वत् स्वाच्छन्द्येन कार्य्यमात्राधिकारिण्याः पतिमरणानन्तरं पतिकृतासीय-न्नामाख्यपत्रलिखिताज्ञानुसारेणाकृतपोष्यपुत्रस्य पतिकृतस्यासीशब्दप्रति-पाद्यस्य मरणेन निस्सन्देहेन पतित्यक्तसमुदायधनस्वामिन्याश्चोत्तम-चन्द्रनाहारस्य पत्न्या मायाकोमराख्यायाः अर्थिनोऽभियोगविषयीभूतधन-विषयकाभियोगेनाभियुक्ताया भाषायां षडलाटशब्दप्रतिपाद्यान्तर्गतद्विलाट-शब्दप्रतिपाद्यस्य पतित्यक्तधनानां मध्ये अत्यल्पस्य त्यागपूर्वकसमर्पण-स्यार्थिना सह विवादनिवारणफलकस्यावशिष्टलाटचतुष्टयशब्दप्रतिपाद्य-संरक्षणफलकस्य च क्षमताया निष्प्रत्यूहत्वात्—इति गौतमप्रश्नीयादिजै-नशास्त्रानुसारिणी व्यवस्था। अत्र प्रमाणानि अस्मद्दत्तप्राचीनव्यवस्था-लिखितानि सर्व्वाण्येवेति।

एतदब्दीयजूनमासीयषड्विंशतिदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

२—रोबकारि मिछिल शदर देओयानि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिस पीयेर शाहेबेर बैठके ओयाक्के तारिख १९ माह आपरेल इं शन १८३२ साल मोतावक ८ वैशाख बाङ्गला सन १२३९ साल रोज बृहस्पतिवार ।—

राधाचरणवणिक छाएल

छाएल हाजीर आइल। छाएलेर सओयाल इं सन १८३१ सालेर ५ शेतम्वर तारिखेर लिखित। एलाका जाहागिर नगरेर कोर्ट आपीलेर हाकिम केरिकेरापट् साहेबेर हुकुम। जाहाते छाएलेर दावि डिसमिश हइयाछे। आ ऐ सनेर ७ दिजेम्वर तारिखेर एइ आदालतेर हुकुम जाहा मोफशीशतरत् सदर आपीलेर दरखास्त नामञ्जूर हय, ताहार एवं अन्य अन्य मरातवेर नाराजीते छाएलेर सओयालेर सामील व्यवस्थाजातेर अनुमोदने ओ आविश्वक मते एइ आदालतेर पण्डीतेर व्यवस्था तलवे सावेक नामञ्जूर हओया सओयालेर छानि तजविजेर प्रार्थनाय एलाका जाहागिर नगरेर कोर्ट आपिलेर दस्तखत ओ मोहरे बाङ्गला एवारतेर चारि केता नकल व्यवस्था ओ सन १८३१ साल ५ शेतम्वर तारिकेर लिखित कोर्ट मजकुरेर एक केता फयछला सम्वलित, जाहा एइ मासेर १२ तारिखे दखिल हइयाछिल, अनुमोदने आइल। हुकुम हइल ये सन १८३१ सालेर ५ शेतम्वर तारिखेर लिखित कोर्ट मजकुरेर फयछला माय नकल व्यवस्था, ये कोर्टेर फयछला ताहार बुनि-

यादे हइयाछे, एइ आदालतेर पण्डितेर निकट एइ हुकुमे पाठान जाय-जे पण्डित मौसुक एइ विशयेर जवाव एक सप्ताह मध्ये लिखेन—ये व्यवस्था मजकुर दोरस्त वटे कि ना इति ।—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसूपीयरसाहेवधर्म्माधिकरण-लिखितैतदब्दीयापरेलमासीयोनविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितजाहाङ्गीरनगरसम्बन्धिकोटापीलाख्यधर्माधिकरणीय-जयपत्रं व्यवस्थाप्रतिरूपपत्रसहितञ्च यदेतदब्दीयमैमासीयपञ्चमदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।।

अर्थिनो मातामही यदि स्वसंक्रान्तपतिस्थावरादिधनस्य स्वभरणपोषणार्थं पतिकृतऋणापाकरणार्थं वा पत्युरौर्द्ध्वदैहिकक्रियाद्यावश्यककार्यार्थं वा हस्तान्तरं कृतवती स्यात्तदा प्रभुसमर्पितव्यवस्था शास्त्रसम्मता भवति नोचेदर्थिनोऽप्राप्तव्यवहारतायां हस्तान्तरपत्रे साक्षित्वेन पितृकर्त्तृकतन्नामलिखनेन प्रतिनिधित्वेन पितृकर्त्तृकस्वनामलिखनमात्रेण च शास्त्रसम्मता न भवति, पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य धने पत्न्या उत्तराधिकारित्वेनाधिकारे जाते सति तस्याश्च वर्त्तनाद्यशक्तात्रुपरिलिखितावश्यककार्य्यार्थं तत्तत्कार्योपयुक्तस्य पतिधनस्य हस्तान्तरकरणक्षमतायाः शास्त्रीयत्वात् तद्व्यतिरेकेण हस्तान्तरकरणक्षमताया अशास्त्रीयत्वाच्च—इति वङ्गदेशचलितदायभागदायतत्त्व-दायभागटीका-दायक्रमसंग्रह-विवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

वर्त्तनाशक्तावाधानमप्यनुमतं तत्राप्यशक्तौ विक्रयणमपि—इति दायभागग्रन्थलिखनम् ॥२॥

मर्त्तुकामेन वा भर्त्रा उक्ता देयमृणं त्वया ।

अप्रपन्नापि सा दाप्या धनं यद्याश्रितं स्त्रियाः ॥—इति विवादार्णव-सेतुविवादभङ्गार्णवादिग्रन्थधृतकात्यायनवचनम् ॥३॥

रिक्थग्राही ऋणं दाप्यः—इति तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥४॥

एवञ्च भर्त्तुरौर्ध्वदैहिकक्रियाद्यर्थं दानादिकमप्यनुमतम्—इति दायभाग(पृ० १७३)ग्रन्थालखनम् ॥५॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः ॥—इति दायभाग-दिग्रन्थधृतकात्यायनवचनञ्चेति ॥६॥

एतदब्दीयजूनमासीयाष्टाविंशतितमदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

३—रोवकारि मिछिल सदर देओयानि आदालत मो० कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिस पीयर साहेवेर वैठके ओयाके तारिक ६ माह माइ इं सन १८३२ साल मोतावक २८ वैशाख वाङ्गला सन १२३९ साल रोज वुधवार ॥

आनन्दमोहनघोष — आपीलाण्ट
मोशम्माद हरिप्रिया— रष्पाडण्ट

आपिलाण्टेर उकिल सदासुख पण्डित हाजिर आइल । इं सन १८२९ सालेर ८ शेतम्वर तारिखेर लिखित एलाका मुरसिदावादेर प्राविणसियाल कोर्टेर फयशलार नाराजी ओजुहात सम्वलित आपीलाण्टेर सओयाल सन हालेर १९ आपरेल

तारिखेर एइ आदालतेर हुकुम मतावक जाहा कोर्ट मजकुरेर सारटफिकिट माय आपीलाण्टेर सदर आपिलेर सओयाल अनु-मोदनानुसारे आपीलाण्टेर खोद किम्वा उकिलेर द्वाराय हाजिर आइशन, ओ ओजुहात दाखिलकरण जन्य आपीलाण्टेर नामे एतलानामा जारिर हुकुम छादेर हइयाछिल। उकिल मजकुरेर नामेर एक केता ओकालतनामा ओ एइ आदालतेर तहविलदारेर दस्तखति उकिल मजकुरेर मेहन्यतआनार वावत मवलगे ३२५९ टाकार एक केता रशीद सम्वलित, जाहा ऐ माइ माहार २ तारिखे दाखिल हइयाछिल, सन हालेर १९ आपरेलेर अनु-मोदन हओया माय शारटफिकिट ओ गयरह दरपेश हइल। तत्परे आपीलाण्टेर उकिल एक केता हेवानामा वाङ्ला एवारतेर ॥ दुइ टाका किम्मतेर फिरिस्ती सम्वलित दाखिल करिल। दरियाप्त हइल ये आपीलाण्ट एइ मोकद्दमार जामिनि खरचा कालीकान्तराय जमिनदारेर नामे कोर्टे दाखिल करियाछे। एवं ताहा तथाकार नाजीरेर तहकीकाते मातवर आसियाछे। ए प्रयुक्त प्रकाष ये आपीलाण्ट आपीलेर सामुदाइक सराएत वजाय आनियाछे, एवं एइ मोकद्दमा प्रीविणसीयान कोटेर प्रथम तज-विज हओया सदर आपीलेर जोग्य। एजन्य हुकुम हइल ये एइ मोकर्द्दमार शदर आपील मज्जूर एवं लम्वले दाखिल हय। तत्परे कोटेर फयछला ओ मौजेवात ओ आशल हेवानामा पडा-गेल। हुकुम हइल ये नकल फयछला ओजुहात सम्वलित ओ हे-वानामा एइ आदालतेर पण्डितेर निकट एइ हुकुमे पाठान जाय ये पण्डित मौछफ फयछलार लिखित हेवानामा मजकुरेर विषय सकलेर अनुमोदने एइ विशयेर जओयाव लिखेन जे हेवा-नामा मजकुरेर मोतावक मुद्दइ या रेष्पाडण्ट आपन स्वामीर हिस्यार हकदार हय कि, किम्वा नावालगी हालते उहार स्वामीर मातार साक्षातकार उहार स्वामीर मृतु हओन सरवे आपी-लाण्टेर ओजुहातेर लिखित ओजरातेर अनुमोदने लोप हइयाछे

किना इति । पण्डितेर जओयाव पौछार पर इङ्गरेजी सन १८३१ सालेर ९ आइनेर २ दोशरा दफार मोतावक मोनछेब हुकुम छादेर हइवेक इति ॥—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरण-लिखितैतदब्दीयमेमासीयनवमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितं मुरशीदावादाख्यनगरसम्बन्धिकोटापीलाख्यधर्म्माधिकरणीयज-यपत्रप्रतिरूपपत्रमुजुहातसंज्ञकनिवेदनपत्रसहितं दानपत्रञ्च यत्तन्मासीयैकविंश-तितमदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तद-नुसारेणोत्तरं लिख्यते ॥—

प्रभुसमर्पितदानपत्रानुसारेणार्थिनी अर्थादेतद्धर्म्माधिकरणप्रत्यर्थिनी स्वपतियोग्यांशस्याधिकारिणी भवति । मातरि जीवन्त्यामप्राप्तव्यवहारता-वस्थायां चैतद्धर्म्माधिकरणप्रत्यर्थिनी पतिमरणेनैतद्धर्म्माधिकरणाध्युजुहात-संज्ञकनिवेदनपत्रलिखितवृत्तान्तदृष्ट्या चार्थिन्याः स्वत्वलोपो भवितुं न शक्नोति, यतो दानपत्रे दात्रा स्वपुत्रौ प्रति लिखितमस्ति स्वस्वत्वास्पदीभूत-समुदायधनं पत्रजातसहितं स्वेच्छया स्वाभिप्रायेण प्रसन्नतया स्वाभाविक-बुद्ध्या रोगरहितेन स्वस्वत्वत्यागपूर्व्वकं दानं कृत्वा दानपत्रं लिखित्वा युवाभ्यां मया दत्तम्, युवां सराजकरस्थावरास्थावरात्मकमत्स्वोपार्जित-समुदायधनमायत्तीकृत्य तुल्यांशित्वेन भोगं कुरुताम्, तत्र मया सह ममान्यै-श्चोत्तराधिकारिभिः सह वा किञ्चित् सम्बन्धो नास्तीति । अनेनैव दानस्य सर्व्वतोभावेन शास्त्रानुसारेण निष्पन्नत्वेनैतादृशदानोत्तरक्षणमेव दानग्रही-त्रोरानन्दमोहनघोषश्याममोहनघोषाख्ययोर्दातृपुत्रयोर्दानकृतधने समस्वा-मित्वस्योत्पादेन तयोर्दानग्रहीत्रोर्म्मध्ये श्याममोहनघोषस्य मरणेन तद्योग्यांशे तदुत्तराधिकारिणामेवाधिकारः । तदुत्तराधिकारिणां मध्ये तस्य पुत्रपौत्रप्रपौत्राभावे तत्पत्न्या अर्थादेतद्धर्म्माधिकरणप्रत्यर्थिन्याः प्रधाना-धिकारित्वात् । मृते पितरि जीवन्त्यां च मातर्य्यप्राप्तव्यवहारतावस्थायाञ्च कस्यचिन्मरणेन तदुत्तराधिकारिणा तत्त्यक्तधने स्वत्वलोपो भवति इत्येत-

द्विधायकशास्त्राभावाच्च । यद्यपि दानपत्रे स्वपुत्रौ प्रति लिखितमस्ति दात्रा युवामप्राप्तव्यवहारौ इदानीं सराजकरस्थावरास्थावरधने आयत्तत्वं सम्पाद्य रक्षणावेक्षणकरणस्य योग्यौ न जातौ, अतः कारणान्मम पत्नी युवयोर्माता श्रीमतीसरस्वतीदासी सराजकरस्थावरास्थावरादिधनस्य रक्षणावेक्षणादिकरणपूर्व्वकं युवयोः प्रतिपालनार्थं मोक्त्यारीशब्दप्रतिपाद्यकार्य्ये नियुक्ता मया । युवयोः प्राप्तव्यवहारतापर्य्यन्तं सराजकरस्थावरे मोक्तारीशब्दप्रतिपाद्यत्वेन सा मम पत्नी स्वनाम निवेश्य राजकरं दत्त्वा तदुपस्वत्वे जङ्गमधने च मोक्त्यारीशब्दप्रतिपाद्यं कार्य्यं कृत्वा युवयोः प्रतिपालनं संरक्षणावेक्षणादितरवीयतशब्दप्रतिपाद्यं कार्य्यं करिष्यति । युवां प्राप्तव्यवहारत्वेन निष्पन्नौ सराजकरस्थावरसमुदाये स्वस्वनाम निवेश्यैवं जङ्गमधने चायत्तत्वं संपाद्य पुत्रपौत्रादिक्रमेण परमसुखेन भोगं कुरुताम्, दानविक्रययोः स्वत्वाधिकारो युवयोः । मया सह तत्र कश्चित् सम्बन्धो नास्तीति लिखनेन मोक्त्यारीशब्दप्रतिपाद्यकार्य्यनियुक्तत्वेन ज्ञातायामेतद्धर्म्माधिकरणार्थ्युद्धातसंज्ञकनिवेदनपत्रेण प्रभुसमर्पितजयपत्रलिखितैतद्धर्म्माधिकरणार्थ्युत्तरपत्रेण चारीशब्दप्रतिपाद्यकार्य्यनियुक्तत्वेन च ज्ञातायां मातरि जीवन्त्यां मृतस्याप्राप्तव्यवहारपुत्रस्य तादृशोपरिलिखितप्रकारकदानानुसारेण मृते पितरि जीवतः पुत्रत्वेन चोत्पन्नस्वत्वस्योत्तराधिकारिणां स्वत्वोत्पत्तेरप्रतिबन्धकत्वात्तल्लिखनस्य इति वङ्गदेशचलितमनुदायभागशुद्धितत्त्वदायतत्त्वदायभागटीकाविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतः—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

प्रदानं स्वाम्यकारणम्— इति मनुवचनम् ॥२॥

वस्तुतस्तु प्रदानं स्वाम्यकारणमिति मनूक्तेर्दानमात्रात् सम्प्रदानस्य तद्विषयकज्ञानाभावदशायामपि स्वत्वमुत्पद्यते पितुः स्वत्वोपरमात्तद्धने गर्भस्थस्येव—इति शुद्धितत्त्वग्रन्थलिखनम् ॥३॥

दाने हि चेतनोद्देशविशिष्टात् त्यागादेव दातृव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्—इति दायभागग्रन्थलिखनम् ॥४॥

पूर्वस्वामिस्वत्वनिवृत्तिपरस्वामिस्वत्वोत्पत्तिफलकत्यागत्वेन रूपेण त्यागशक्तस्य दाधातोः—इत्यादि दायभागटीकालिखनम् ॥५॥

प्रथमं पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रः—इति दायभागटीकालिखनञ्चेति ॥६॥

एतदब्दीयजुलाइमासीयपञ्चमदिनसम्बन्धिवृहस्पतिवासरे मयेयं व्यवस्था दत्तेति—

श्रीज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

३११८ नं—

४—रोवकारि मिसिल आदालते देओयानि सदर मोकाम कलिकाता तारिख २१ जुन सन १८३२ साल मोतावके बाङ्गला ६ आषाढ सन १२३६ साल दिवस वृहस्पतिवार श्रीयुत रिचार्ड ओयालपोल साहेबेर बैठके ॥

पञ्चमलालसिंह ओगयरह आपीलाण्टान्
शिवरामसिंह रेस्पाडेण्ट

आपीलाण्टानेर उकिल मुनसि होसन आलि ओ रेस्पाडेण्टर उकिल मुनसि गोलाम वतुल ओ सदासुख पण्डित ओ इन्द्रकुमारिर उकिल मुनशि वु आलि हाजिर हइल। तवतिव मते एइ मकर्दमा गतो माइ मासेर ३१ तारिखे ओ गतो दिवसे आमार बैठके उपस्थित हइया नालिसेर आरजि प्रभृति प्रविन्सीयान कोर्टेर कागच पत्रादि एवं तथाकार फयेसला पर्य्यन्त पडा हइया दिवसावसान प्रयुक्त स्थकित छिल, अद्य पुनराय उपस्थित हइया ए आदालतेर दाखिल हओया अजुहात ओ जओयाव आर इन्द्रकुमारिर दरखास्त प्रभृति कागज पत्र पडागेल। तत्परे रेस्पाडेण्टर उकिलगण सन १८१४ सालेर दिजम्बर मासेर १६ तारिखेर लिखित ए आदालतेर डिगरि

एक केता ओ सन १८१३ सालेर आगष्ट मासेर १४ तारिखेर कालेकट्टरिर परओयानार नकल २ टाका दामेर फिरिस्तिर द्वाराय दाखिल करिलेक, पडागेल। ताहार पर उभयेर उकिलदिगके जिज्ञासा गेल ये सन १२१८ साले जयारामसिंहेर मृत्यु हय, तखन ताहार कि वयेस छिल। रेष्पाडेण्टर उकिलगण जओयाव दिल ये उक्त जयरामेर वयेस २५ वत्सर, आर आपिलाण्टगणेर उकिल आर आपिलाण्ट पञ्चमलालसिंह, (ये) हजुरे हाजिर छिल, जओयाव दिलेक ये ४०।४५ वत्सर वयक्रमे मृत्यु हय। पुनुराय उभयेर उकिलदिगके जिज्ञासा गेल जे एक्षणे रेष्पाडेण्टर वयेस कतो वतसर। रेष्पाडेण्टर उकिलगण जओयाव दिलेक ये रेष्पाडेण्टर वयेस एक्ष्यने आन्दाजि ४२ वत्सर ओ आपीलाण्ट जओयाव दिल ये प्राय ५० वत्सर हइवेक। पुनराय आपिलाण्टके जिज्ञासा गेल ये जयरामसिंह हइते रेष्पाडेण्ट कतो वत्सरेर छोट हइवेक। जओयाव दिल ये ५।६ वत्सरेर इति। कागज पत्रेर द्वाराय बोध हइल ये रेष्पाडेण्ट विरधीय वस्तु दखल पाओनेर दुइ प्रकार दावि राखे :—प्रथम एइये खोसालसिंहेर सूपार्जित विरधीय वस्तु जयरामसिंहेर नामे लेखाजाय। खोसालसिंह ताहार कर्त्ता ओ दखलिकार छिल। खोसालसिंहेर मृत्युर पर जयरामसिंहेर सहदर भाइ शिवरामसिंह रेष्पाडेण्टर दखले आछे, द्वितीय एइये यद्यपि विरधीय वस्तु जयरामसिंहेर त्यक्त हय, तवे जयरामसिंहेर मृत्युर पर आर ताहार वनिता मानकुआरि, ये ताहार एक कन्या, ऐ मानकुआरिर ओ खोसालसिंहेर सद्याते, ओ जयरामसिंहेर द्वितीय कन्या खोसालसिंहेर साद्याते पुत्र सन्तान ना राखिया मृत्यु हय, शिवरामसिंहके अर्शे। एमते ए मकद्दमाय खोसालसिंहेर जयरामसिंह ओ रेष्पाडेण्डके हेवानामा लिखिया देओयार प्रति दृष्टि ना करिया एइ कथा जिज्ञासा करा ए आदालतेर पण्डितेर निकट उचित हइल-ये जयरामसिंहेर त्यक्त

वस्तु मानकुङारिर मृत्युर पर रेष्पाडेण्डर पिता खोमालसिंह ओ रेष्पाडेण्टके अथवा दयामयीर कन्या इन्द्रकुङारिके, ये आपन माता मानकुङारिर साद्याते मृत्यु हय, ताहाके अर्शिवेक। आर यदि स्यात् मसम्मात मानकुङारिर लिखिया देओया हेवानामा आदालतेर प्रासस्तानुसारे ताहा प्रमाण ना हओन प्रयुक्त ग्राह्य हय ना, किन्तु मृत दयामयीर स्वामी आपीलाण्ट पञ्चमलालसिंहेर ओजर मिटाइवार कारण, एमत हेवानामा यथार्थेर विशये शास्त्रेर आज्ञा मते जिज्ञासा करा आविश्वक हइया हुकुम हइल ये एइ रोवकारिर नकल एइ हुकुमे ये निचेर लिखित सओयाजसकलेर जओयाव रोवकारि सोपर्द्द हओनेर तारिख हइते दुइ दिवसेर मध्ये लेखेन-ए आदालतेर पण्डितेर हाओला कराजाय।

प्रथम सओयाल—एइये विवादि ओ जमिदारिर कर्त्ता जयरामसिंह एक वनिता मानकुमारी ओ दुइ कन्या दयामयी ओ पार्व्वती ओ पिता खोसालसिंह ओ एक भाइ रेष्पाडेण्ट शिवरामसिंह (के) राखिया मृत्यु हय। तत्परे दयामयी एक कन्या इन्द्रकुङारि नामे राखिया मृत्यु हय। ओ दयामयीर मृत्युर पर मानकुङारि आर मानकुङारिर मृत्युर पर पार्व्वती निःसन्ताना मृत्यु हय, ओ पार्व्वतीर पर खोसालसिंहेर मृत्यु हय। अतएव उक्त जमिदारि वाङ्गला मुलकेर चलित शास्त्रानुसारे शिवरामसिंहके अथवा दयामयीर कन्या इन्द्रकुमारि, ये मानकुङारिरसाद्याते मरियाछे, ताहार कन्या इन्द्रकुमारिके पोंछे। आर यदि स्यात् मसुम्मात पार्व्वती एक कन्या राखिया मरिया थाके, से कन्यार ओ खोसालसिंहेर मृत्युर पर मृत्यु हय, इहाते विशेषत किछु प्रभेद आछे कि ना।

२—सओयाल—एइये खोसालसिंहेर ओ शिवरामसिंहेर वर्त्तमाने जयरामसिंहेर त्यक्त वस्तुर दान ओ हेवार अधिकार मुसम्मात मानकुङारिके आछे कि ना इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओआलपोलसाहेवधर्म्माधिकरणलिखितैतदब्दीयजूनमासीयैकविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यदेतदब्दीयजुलाइमासीयनवमदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

प्रथमप्रश्नस्योत्तरम्—

विवादास्पदीभूतसराजकरस्थावरस्य स्वामी जयरामसिंहो यदि मानकुमारीनाम्नीं पत्नीमेकां दयामयीपार्व्वतीनाम्न्यौ द्वे कन्ये खोसालसिंहनामानं पितरं भ्रातरं चैकं शिवरामसिंहनामानमेतद्धर्म्माधिकरणप्रत्यर्थिनं संरक्ष्य मृतः स्यात्, तदनन्तरं दयामयीनाम्नी जयरामसिंहस्य कन्यापीन्द्रकुमारीनाम्नीं कन्यामेकां संरक्ष्य मृता स्यात्, एवं दयामयीमरणानन्तरं मानकुमारी मानकुम(ा)रीमरणानन्तरं निःसन्ताना पार्व्वती मृता स्यात्, एवं पार्व्वतीमरणानन्तरं खोसालसिंहोऽपि मृतः स्यात् तदा जयरामसिंहत्यक्तसराजकरस्थावरे तद्भ्रातुः शिवरामसिंहस्याधिकारः, एवं यदि पार्व्वती एकां कन्यां संरक्ष्य मृता स्यात् सापि कन्या खोसालसिंहस्य मरणानन्तरं मृता स्यात्तदात्र शास्त्रानुज्ञायाः कश्चिद् विशेषो नास्ती(ति)।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम्॥

द्वितीयप्रश्नस्योत्तरम्—

खोसालसिंहस्य शिवरामसिंहस्य च विद्यमानतायां जयरामसिंहस्य पत्न्या मानकुमार्य्याः स्वसंक्रान्तपतित्यक्तधनानाम्मध्ये पत्युः स्वर्गार्थं किञ्चिद्धनस्यापन्निवारणार्थं तदुपयुक्तस्य च दानाधिकारितास्ति, तद्व्यतिरेकेण स्वेच्छया स्वाभिप्रायेण च दानाधिकारिता नास्ति-इति वङ्गदेशचलितदायभागदायतत्त्वदायभागटीकादायनिर्णयदायरहस्यनारदस्मृतिव्यवहारतत्त्वव्यवस्थार्णवविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था॥

अत्र प्रमाणम्—

अपुत्रधने पौत्रप्रपौत्राभावे साध्व्याः पत्न्या अधिकारस्तत्रापि भर्त्तृ-स्वर्गमुद्दिश्य दाने यथाकथञ्चिच्छरीररक्षार्थं भक्षणे चाधिकारः। एतदति-रिक्तयथेष्टाचरणे स्थावरविक्रयादौ च नाधिकारः—इति व्यवस्थार्णव-ग्रन्थलिखनम् ॥१॥

स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदि।
विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥—इति दायरहस्यनारदस्मृत्या-दिग्रन्थधृतनारदवचनम् ॥२॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः ॥ इति दायभागादि-ग्रन्थधृतकात्यायनवचनञ्चेति ॥३॥

एतदब्दीयजुलाइमासीयसप्तदशदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

५—रोवकारि मिसिल आदालते देओयानि सदर मोकाम कलिकाता तारिख १९ जुन सन १८३२ साल मोतावके बाङ्ला तारिख ७ आषाढ १२३९ साल दिवस मङ्गलवार श्रीयुत रिचार्ड ओयालपोल साहेबेर बैठके—

मृत दुर्गादासेर स्त्री मसम्मात ब्रह्ममयिदेव्या साएला—

गतो माइ मासेर १७ तारिखेर लिखित सहर कलिकातार हाओयालि जेलार एक केता रिटरनेर सम्वलित तथाकार रोवकारि एक केता ओ असियतनामा पौछिवाय। अद्य साएलेर दरखास्त ओ ईशानचन्द्र ओ गयरहर दरखास्त ओ हरिप्रियार उकिल सदासुखपण्डित ओ राजचन्द्रेर उकिल मुनसि होसन आलिर हाजिरिते पडागेल। तत्परे राजचन्द्रेर उकिल सादा

कागजे वाजे पण्डितेर एक केता व्यवस्था गोजराइल, पडागेल। बोध हइलो ये त्यक्त वस्तुर कर्त्ता गकुलचन्द्रघोसालेर दुइ वनिता छिल। ताहार वड तारिणी, छोट राजेश्वरी। तारिणीर गर्भे दुइ पुत्र, हरिनारायण ओ लक्ष्मीनारायण, ओ एक कन्या आनन्दमयी, आर राजेश्वरीर गर्भे दुइ पुत्र रामनारायण ओ गङ्गानारायण, ओ तीनि कन्या कुङारिदेव्या ओ गङ्गादेव्या ओ दयामयि। मसम्मात तारिणी सन ११८० साले, आर हरिनारायण सन ११९७ साले आपन स्त्री मसम्मात पार्व्वतीके राखिया, ओ लक्ष्मीनारायण सन १२०४ साले आपन स्त्री मसम्मात हेमलताके राखिया, ओ रामनारायण सन १२०१ साले आपन स्त्री मसम्मात हरिप्रियाके राखिया, ओ गङ्गानारायण अप्राप्त वयेसे, ओ अविभाहे, ओ दयामयि निःसन्ताना मृत्यु हइल। हेमलतार दौहित्र नवचन्द्रचाटुर्य्ये लक्ष्मीनारायणेर हिस्यार पर ओ हरिनारायणेर स्त्री पार्व्वतीर मृत्युर पर गोकुलचन्द्रेर दौहित्रगण आनन्दमयीर पुत्र ईशानचन्द्र प्रभृति, ओ गङ्गादेव्यार पुत्र दुर्गादास हरिनारायणेर हिस्यार पर, ओ हरिप्रिया रामनारायणेर हिस्यार पर दखलिकार आछेन। आर गङ्गानारायणेर हिस्या उर्द्ध्वगामि हइया राजेश्वरीर दखले हइल। एक्षने राजेश्वरी ओ कन्या कुङारिदेव्यार साक्ष्याते रामनारायणेर स्त्री हरिप्रियार साक्ष्याते, ओ गङ्गादेव्यार पुत्र मृत दुर्गादासेर स्त्री ब्रह्ममयी, ये सन्तानादी किछु राखे ना, ताहार साक्ष्याते, ओ आनन्दमयीर पुत्रगण ईशानचन्द्रदिगरेर साक्ष्याते मृत्यु हइयाछे। ये हेतु चूडान्त हुकुम हओनेर पूर्व्वे उत्तराधिकारि प्रकारे उक्त व्यक्तिगणेर सत्वे शास्त्रेर आज्ञा ज्ञातो हओन उचित हइल, ए कारण हुकुम हइल ये एइ रोवकारिर नकल एइ हुकुमे ये एइ विषयेर जओयाव, ये उक्त व्यक्तिगणेर मध्ये गङ्गानारायणेर त्यक्त वस्तु, याहा उर्द्ध्वगामि हइया ताहार माता मसम्मात राजेश्व-

रीते अर्शियाछे, उत्तराधिकारि ओ सत्वाधिकारि के वटे, आर गोकुलचन्द्रेर ओ मसम्मात राजेश्वरिर पार्व्वणेर श्राद्ध ओ पिण्डदान करणे काहार क्षमता आछे, सम्राहेर मध्ये लेखेन—ए आदालतेर पण्डितेर हाओला करा जाय—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओआलपोलसाहेवधर्म्माधिकरणलिखितैतदब्दीयजूनमासीयोनविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यदेतदब्दीयजुलाइमासीयनवमदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रभुसमर्पितविचारपत्रलिखितवृत्तान्ते सति मृतस्य[१] गङ्गानारायणत्यक्तधनस्योत्तराधिकारित्वेन तन्मातृराजेश्वरीसंक्रान्तस्याधिकारिणस्तद्विचारपत्रलिखितानां मध्ये ईशानचन्द्रप्रभृतयस्तत्पितृदौहित्रा एव भवन्ति । एवं विवादास्पदीभूतधनाधिकारप्रयोजकगोकुलचन्द्रसम्प्रदानकपार्व्वणश्राद्धपिण्डदानाधिकारितापीशानचन्द्रप्रभृतीनां तद्दौहित्राणामेवास्ति । राजेश्वर्य्याः पृथक्पार्व्वणश्राद्धपिण्डदानाधिकारिता तद्विचारपत्रलिखितानां मध्ये कस्यापि नास्ति, उत्तराधिकारित्वेन प्राप्तधनायाः स्त्रिया मरणानन्तरं तद्धनोत्तराधिकार्य्यधिकारप्रयोजकस्त्रीसम्प्रदानकपृथक्पार्व्वणश्राद्धपिण्डदानस्याभावात्—इति वङ्गदेशचलितमनुदायभागदायभागटीकादायतत्त्वदायक्रमसंग्रहदायनिर्णयदायरहस्यशुद्धितत्त्वश्राद्धतत्त्वव्यवस्थार्णवविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥—

अत्र प्रमाणम्—

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनिदौहित्रस्यैव—इति दायभागग्रन्थलिखनम् ॥ १ ॥

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्त्तते—इति मनुवचनम् ॥ २ ॥

न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते—इति श्राद्धतत्त्वादिग्रन्थधृतमुनिवचनं चेति ॥ ३ ॥

१—मृतस्य—व्यप० ।

एतदब्दीयजुलाईमासीयैकविंशतितमदिनसम्बन्धिशनिवासरे मयेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

प्रश्नपत्र—

६—यद्यपि कोनो व्यक्तिर सन्तान सन्तति ना थाकाय आपन परकालेर निमित्तक अन्तिमकाले दुइ भगिन ओ भागिना थाकिते ओ आपन पैतृक समुदय वस्तु आपन गुरुके वाचनिक दान करे, आर ऐ व्यक्तिर मृत्युर परे ताहार अविरा स्त्री स्वामीर अनुमतिक्रमे ऐ स्वामीर मृत्युर ११ एगार वत्सर गते दानपत्र लिखिया देय—ए प्रकार दान शास्त्र सम्मत सिद्ध वटे कि ना, आर ऐ मृत व्यक्तिर वस्तुते भगिनरा उत्तराधिकारिणी ओ हकदार हइते पारे कि ना, एइ प्रश्नेर प्रत्युत्तर यथाशास्त्र दानपत्र दृष्ट करिया लिखिवेन—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं दानपत्रञ्च यदङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयापरेलमासीयतृतीयदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

यदि केनचिद् व्यक्तिविशेषेण सन्तानाभावेन स्वकीयपरकालार्थं स्वावसानसमये विद्यमानयोर्द्वयोर्भगिन्योर्विद्यमाने च भागिनेये स्वपैतृकसमुदायधनं स्वगुरवे वाचा दत्तं स्यादेवं तस्यैव निःसन्तानव्यक्तिविशेषस्य मरणानन्तरं तस्याविरया पत्न्या स्वपत्यनुमत्यनुसारेण स्वपतिमरणदिवसादारभ्यैकादशसंवत्सरे गते सति दानपत्रं लिखित्वा दत्तं स्यात्तदैतादृशदानं शास्त्रानुसारेण सिद्ध्यति, स्वाम्यनुमत्या अस्वामिकृतस्यापि दानादेः सम्प्रदानादिस्वत्वोत्पत्तिहेतुभूतस्य सिद्धेः शास्त्रीयत्वेन धनस्वामिपत्यनुमत्यानपत्यपतिमरणानन्तरं

प्रधानोत्तराधिकार्य्यवीरापत्नीलिखितदानपत्रप्रमाणस्य पतिकृतधर्मार्थदानस्य सिद्धौ बाधकसामान्याभावात्, धर्मार्थदानं यदि केनचित् स्वस्थेनार्त्तेन वा कृतं श्रावितं वा, अदत्त्वैव मृतश्चेत्तथापि तद्धनं तदुत्तराधिकारिणो राज्ञा दापनीया इति विशेषतो लिखितत्वाच्च। एवं दानसिद्धौ सत्यां तस्यैव मृतव्यक्तिविशेषस्य भगिन्यस्तद्धने उत्तराधिकारिण्यो भवितुं न शक्नुवन्ति, तद्दानोत्तरक्षणमेव धनिनो दातुस्तद्धने स्वत्वविच्छेदेन सम्प्रदानस्य स्वत्वोत्पादेन च धनिन उत्तराधिकारिणां स्वत्वोत्पत्तेरसम्भवात्—इति वङ्गदेशचलितमनुस्मृतियाज्ञवल्क्यस्मृतिदायभागदायभागटीकादायतत्त्वशुद्धितत्त्वदायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा।

कुर्य्युर्य्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै॥—इति दायभागादिग्रन्थधृतनारदवचनम् ॥१॥

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥२॥

स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्मकारणात्।

अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः॥—इति विवादभङ्गार्णवादिग्रन्थधृतकात्यायनवचनम् ॥३॥

तथा च स्वामिनोऽनुमतिसत्त्वे तु अस्वामिकृतविक्रयोपि सिद्ध्यति व्यवहारस्तथा—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥४॥

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्—इति याज्ञवल्क्यस्मृत्यादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥५॥

पत्नी दुहितरश्चैव—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥६॥

वस्तुतस्तु प्रदानं स्वाम्यकारणमितिमनूक्तेर्द्दानमात्रात् सम्प्रदानस्य तद्विषयकज्ञानाभावदशायामपि स्वत्वमुत्पद्यते पितुः स्वत्वोपरमात्तद्धने गर्भस्थस्येव—इति शुद्धितत्त्वग्रन्थलिखनम् ॥७॥

दाने हि चेतनोद्देशविशिष्टात् त्यागादेव दातृव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्—इति दायभागग्रन्थलिखनम् ॥८॥

पूर्वस्वामिस्वत्वनिवृत्तिपरस्वामिस्वत्वोत्पत्तिफलकत्यागत्वेन रूपेण त्यागशक्तस्य दाधातोः—इत्यादि दायभागटीकालिखनञ्चेति ॥८॥

एतदब्दीयजुलाइमासीयत्रिंशत्तमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ॥—

श्रीदुर्गाजयतितराम्
श्रीवैद्यनाथमिश्रेण

७—सदर देओयानी आदालतेर पण्डितेर निकट सओयाल। ३ आगस्त १८३२ साल।

१—यद्यपि स्यात् कोन ब्राह्मण जाति उदासीन अर्थात् वैरागी संसारत्यागी हय, बिग्रहठाकुर स्थापन करिया थाके, ओ आपन उदासीन अर्थात् संसारत्यागी वैरागी शिष्यगण वर्त्तमान थाकिते, ओ आपन समुदय वस्तु रजपुत जाति एक व्यक्ति, ये स्त्री पुत्र राखे, ओ संसारि हय, ओ ऐ उदासीनेर शिष्य हय, ताहाके हेवा अर्थात् दानकरे। एमत दान शास्त्रानुसारे सिद्ध वटे कि ना।—

२—स्थावरास्थावर वस्तुर विषये खयरात् अर्थात् उदासीन व्यक्तिर दान संसारि कोन नीच जातीर हस्ते शास्त्रानुसारे सिद्ध-वेटे कि ना ?—

३—कोन उदासीन वैरागी, अर्थात् संसारत्यागी हइया विग्रह स्थापन करिया आखाडाधारी हइया थाके, ओ उदासीन संसारत्यागी चेला, अर्थात् शिष्यगण थाकनेओ यदि आपन स्थावरास्थावर समस्त विषय रजपूत जाति व्यक्तिके, ये से संसारि ओ स्त्री पुत्र राखे, एवं ऐ उदाशीनेर शिष्य हय, एमते ताहाके हेवा अर्थात् दानकरे, तवे ताहा शास्त्रानुसारे सिद्ध वटे कि ना।—

४—यदि कोन व्यक्ति सक्त पीडित हइया सुन्दर ज्ञान चैतन्य

ना थाके एमत समये आपन सम्यक स्थावरास्थावर वस्तु अन्य-कोन व्यक्तिके हेवा अर्थात् दान करे ताहा शास्त्र सिद्ध वटे कि ना ?-

५—वैरागी उदासीन अर्थात् संसारत्यागी ओ व्रजभूमि निवाशी ओ अवश्य व्राह्मण जाति हइवेक। ओ आखाडाते विग्रह स्थापन थाके कोन रजपूत, जाति ये से स्त्री पुत्र राखे, एवं संसारि हय, से व्यक्ति हइते शास्त्रानुसारे विग्रहठाकुरेर पूजा सेवा हइते पारे कि ना ?—

६—रजपूतजाति विग्रहठाकुर स्पर्श ओ पूजा करिते पारे कि ना ?—

श्रीर्ज्जयतितराम्

प्रभुसमर्पिताङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयागस्ति-मासीयतृतीयदिनलिखितप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयचतुर्थदिन-सम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारे-णोत्तरं लिख्यते ॥

प्रथमप्रश्नस्योत्तरम्—

यदि केनचिद् ब्राह्मणजातीयेनोदासीनेनार्थाद्वैराग्यधर्म्माचरणेन संसारत्यागिना देवप्रतिमां संस्थाप्योदासीनेष्वर्थात् संसारत्यागिषु वैरागिषु स्वकीयशिष्येषु विद्यमानेष्वपि स्वस्वत्वास्पदीभूतसमुदायधनं रजपूतजातीयायै-कस्मै कस्मैचित् स्त्रीपुत्रवते संसारिणे स्वकीयशिष्याय च दत्तं स्यात्तदैतादृश-दानं शास्त्रानुसारेण सिद्ध्यतीति—

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥१॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।

कुर्य्युर्य्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै—इति दायभागादिग्रन्थ-धृतनारदवचनम् ॥२॥

दाने हि चेतनोद्देशविशिष्टात् त्यागादेव दातृव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्—इति दायभागग्रन्थलिखनम् ॥३॥

द्वितीयप्रश्नस्योत्तरम् —

स्थावरास्थावरधनस्वाम्युदासीनव्यक्तिविशेषकर्त्तृकसंसारिनीचजातिसम्प्रदानकदानं शास्त्रानुसारेण सिद्ध्यति शास्त्रे नीचजातिसम्प्रदानकदानस्य निषेधाभावात् —इति तृतीयप्रश्नस्योत्तरमपि प्रथमप्रश्नोत्तरेणैव पर्य्यवसन्नमिति पृथङ् न लिखितमिति—

अत्र प्रमाणानि प्रथमप्रश्नोत्तरप्रमाणानि त्रीण्येवेति—

चतुर्थप्रश्नस्योत्तरम्—

यदि केनचिदतिपीडितेन सम्यग्ज्ञानचैतन्याभावदशायां स्वस्वत्वास्पदीभूतसमस्तस्थावरास्थावरधनमन्यस्मै कस्मैचिद्दत्तं स्यात्तत्र तद्दानं यदि धर्मार्थं कृतं स्यात्तदा सिद्ध्यति, तद्व्यतिरेकेण शास्त्रानुसारेण न सिद्ध्यति ।

अत्र प्रमाणम्—

स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्मकारणात् ॥

अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥—इति विवादभङ्गार्णवादिग्रन्थधृतकात्यायनवचनम् ॥१॥

अदत्तं तु भयक्रोधकामशोकरुगन्वितैः—इत्यादि विवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थधृतनारदवचनम् ॥२॥

अदत्तन्तु भयक्रोधकामशोकरुगन्वितैः इत्यत्र भयाद्याः पञ्च प्रकृतिस्थितिविरोधिनो द्रष्टव्याः—इति विवादभङ्गार्णवादिग्रन्थलिखनम् ॥३॥

पञ्चमप्रश्नस्योत्तरम्—

कश्चिद्व्रजभूमिनिवासी ब्राह्मणजातीयो वैराग्यधर्माचरणेनोदासीनो भवति अर्थात् संसारत्यागी भवति । तस्याखाडासंज्ञकस्थाने देवप्रतिमायाः स्थापनं भवति । केनचित्संसारिणा स्त्रीपुत्रवता रजपूतजातीयेन शास्त्रानुसारेण देवप्रतिमायाः (सेवा पूजा च भवितुं न शक्नोति), ब्राह्मणद्वारा देवप्रतिमायाः पूजा सेवा च भवितुं शक्नोतीति ॥

अत्र प्रमाणम्—

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च पृथिवीपते ।

स्वधर्मतत्परो विष्णुमाराधयति नान्यथा ॥—इति विष्णुपुराणवचनम् ॥१॥

सर्व्ववर्णैस्तु संपूज्याः प्रतिमाः सर्व्वदेवताः—इति वराहपुराण-वचनम् ॥२॥

स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर ।

स्पर्शने नाधिकारोऽस्ति विष्णौर्वा शङ्करस्य च—इति स्कन्दपुराण-वचनम् ॥३॥

षष्ठप्रश्नस्योत्तरम्—

रजपूतजातीयेन देवप्रतिमास्पर्शः कर्त्तुं न शक्यते । देवप्रतिमापूजा तु स्वयं कर्त्तुं न शक्यते । किन्तु ब्राह्मणद्वारा पूजां कारयितुं[1] शक्यते—इति मन्वादिधर्मशास्त्रानुसारिणी व्यवस्था ।

अत्र प्रमाणानि पञ्चमप्रश्नोत्तरप्रमाणानि त्रीण्येवेति ।

एतदब्दीयागस्तिमासीयषोडशदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

३२१८ नं०

८—रोवकारि मिछिल सदर देओयाणि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिस-पीयेर साहेबेर बैठके । ओयाक्के तारिख ३० जुलाइ इङ्गरेजी सन १८३२ साल मोताबक बाङ्गला सन १२३९ साल १६ श्रावण रोज सोमवार ।—

पञ्चमलालसिंह ओ गन्धर्ब्बलाल	आपीलाण्टान
शिवरामसिंह	रेस्पाडण्ट

आपीलाण्टानेर उकिल मुनशी होसेन आलि ओ रेस्पाडण्टेर उकिलान् सदासुख पण्डित ओ मुनशी गोलाम बतुल, इन्दर-

1 पूजां कर्त्तुं न—व्य०.

कोडारिर उकिल मुनशी वु आलि हाजिर आइल। एइ मोकद्दमा एइ मासेर २३।२४ तारिखे आमार वैठके दरपेष, आर तारिख मजकुराणेर रोवकारिर लिखित मत प्रथम आदालतेर कागजात पडा हइया, मुलतवि छिल, अद्य पुनराय रोवकार आपीलेर मौजेवात ओ ताहार जओयाव एवं तत् समिभ्यारि अन्य २ कागजात एइ आदालतेर दाखिल हओया। दुइ मोकद्दमार बावत अर्थात् एइ लम्बर आ ३२२४ लम्बर, जाहाते एइ मोकद्दमा रेष्पाडएट आपीलाएट ओ एइ मोकद्दमार आपीलाएटान् रेष्पा-डएटान् आछे, एइ मासेर १८ तारिखेर रोवकारिर लिखित एइ आदालतेर हाकिम श्रीयुत रिचार्ड आयालपुल साहेवेर राय सम्वलित अनुमोदने आइल। ये हेतुक एइ मोकद्दमार आपी-लाएटानेर ओजरात् निष्पत्येर जन्य आमार निकट एइ आदा-लतेर पण्डितेर पर छओयाल करा उचित हइल, एजन्य हुकुम हइल ये एइ रोवकारिर नकल निचेर तफशीलेर लिखित छओयाल सम्वलित एइ हुकुमे एइ आदालतेर पण्डितेर निकट पाठान जाय ये ए पण्डित ताहार विस्तारित जओयाव लिखेन। यद्यपि स्यात् खोसालखिह परिवर्त्तीय दान, ये मत आपीलाएटान् जाहेर करितेछे, ताहा वाङ्गला सन १२५० साले आपन पुत्रगण जयराम ओ शिवराम दिगेर नामे लिखिया दिया थाके, आर तदनुजाइ जयराम आपन मृत्यु समय वाङ्गला सन १२१८ साल पर्य्यन्त हेवार वस्तुर पर दखिलकार थाके, एवं तस्य स्त्री मानकोडारि ताहार मृत्युर पर ऐ वस्तुते उत्तराधिकारि सुरते दखिलकार हय। एमते मानकोडारिर क्षेमता स्वामीर वस्तु हस्तान्तर करणेर विशये पूर्व्व व्यवस्थाते ये प्रकार लेखा गियाछे ताहार किछु परिवर्त्त ओ सुधरण हइते पारे कि ना इति॥

श्रीश्रीजयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसनीयरसाहेवधर्म्माधिकरण-लिखितैतदब्दीयजुलाइमासीयत्रिंशत्तमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूप-

पत्रं यदेतदब्दीयागस्तिमासीयत्रयोदशदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

यद्यपि खोसालसिंहेन वङ्गालाख्यदशाधिकद्वादशशताब्दे जयराम-शिवरामाख्यस्वपुत्रद्वयसम्प्रदानकमेतद्धर्म्माधिकरणार्थिभिर्न्निर्द्दिष्टं विनिमय-दानं कृतं स्यात्तदनुसारेण जयरामः स्वजीवनपर्य्यन्तमर्थाद्वङ्गालाख्याष्टादशा-धिकद्वादशशताब्दपर्य्यन्तं दानकृतधने आयत्तत्वं सम्पादितवान् स्यादेवं तस्य पत्नी मानकुमारी स्वपतिमरणानन्तरं पतित्यक्तधने उत्तराधिकारित्वेना-यत्तत्वं सम्पादितवती स्यात्तदा मानकुमार्य्याः पतित्यक्तधनस्य हस्तान्तर-करणक्षमताविषये पूर्वव्यवस्थायां यथा लिखितमस्ति, तस्य किञ्चिदपि परावर्त्तनमन्यथा च न भविष्यति, यतो मानकुमार्य्याः पतित्यक्तधनस्य हस्ता-न्तरकरणक्षमताविषये पूर्वव्यवस्थायां यथा लिखितं तत्रैतत्प्रश्नलिखितवृत्ता-न्ते सत्यपि शास्त्रानुसारेण कश्चिद्विशेषो नास्ति-इति वङ्गदेशचलितदाय-भागदायतत्त्वदायभागटीकादायनिर्णयदायरहस्यनारदस्मृतिव्यवहारतत्त्वव्यव-स्थार्णवविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था। अत्र प्र-माणान्येतद्विवादविषयनिविष्टास्मद्दत्तपूर्व्वव्यवस्थालिखितानि सर्वाण्येवेति ॥—

एतदब्दीयागस्तिमासीयसप्तविंशतितमदिनसम्बन्धि सोमवासरे मयेयं व्यवस्था दत्तेति।—

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

९—गोवकारि मिञ्जिन सदर देओयानि आदालत मो० कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिस पीयेर साहेबेर बैठके, ओयाक्कै तारिख २७ माह जून इ० सन १८३२ साल, मोतावक वाङ्गला १५ आषाढ सन १२३९ साल रोज बुधवार ॥—

दुर्ज्जनसिंह ओ अर्ज्जुनसिंह— आपीलाण्टान्
राउत गिरिधरसिंह ओ घनस्यामसिंह—
ओ वन्दरसिंह— रेष्पाडण्टान्

आपीलाण्टानेर उकिलान मुनशी होसन आलि ओ सदासुख पण्डित हाजिर आइल। जेला कानपुरेर मोतालक उभयेर मौरुशी वाइष देहार मध्ये मौजे वाउतपुर ओ गयरह एगारो मौजे हिस्या करिया पाओनेर मोकर्द्दमार वावते अन्य २ विषय सम्वलित ३५० टाका किम्मतेर दुइ वन्ध कागजे आपीलाण्टानेर सदर आपीलेर छओयाल तत् समिभ्यारि कागजात ओ शारटफिकिट सम्वलित अनुमोधन मते इ० सन १८३२ सालेर ५ जानेर तारिखे आपीलाण्टानेर नामे एतला-नामा जारिर हुकुम ये एइ मोकर्द्दमार तजविज एलाहवादेर सदर आदालते, चाहे आर यद्यपि स्यात् आदालत मजकुरे तजविज ना चाहे, तिन मास मध्ये मौजेवात दाखिल करण जन्य वेरेलिर कोर्टेर हाकिमानेर नामे छादेर हय। ताहार जओ-यावे कोर्ट मजकुरेर ऐ सनेर ५ आपरेलेर लिखित रिटरण ओ रोवकारि एतलानामा जारि हओन ओ ताहा आपीलाण्टानेर ज्ञातोर रशीद लिखिया देओन ओ हाजिर हइया नाराजीर मौजेवात दाखिल करणेर ओयादा सम्वलित माह आपरेल मजकुरेर २६ तारिखे अनुमोधन हइया, तारिख मजकुरेर रोव-कारिर लिखित मत अन्य २ विषय सम्वलित शारटफिकिट ओ गयरह सेरेस्थाय राखनेर हुकुम छादेर हइया, तत्परे एइ मोकर्द्दमार तजविज एइ आदालते चाहनेर दुर्ज्जनसिंहेर छओयाल दरपेस मते दुर्ज्जन सिंह मजकुरेर गयेरहाजिरि सरवे उक्त सनेर ३० माइ तारिखे हुकुम हय ये मुलतवि थाके। इ० सन १८३१ सालेर २७ जुनेर लिखित एलाका वेरेलिर प्रीविनसीयान कोर्टेर फयछला आपीलाण्टानेर नाराजिर मौजेवात ओ उकीलान् मजकुरेर नामेर ओकालतनामा ओ

उकीलान् मजकुरानेर मेहन्यत्आनार वावत मवलगे ४०७॥≡) टाकार एइ आदालतेर तहविलदारेर दस्तखति उकिल खरचार रशीद ओ कुडि टाका किम्मतेर फिरिस्ति, फिरिस्तीर लिखित दश केता दस्तावेज सम्वलित याता[1] एइ माह जुनेर २१ तारिखे दाखिल हइयाछिल, अद्य अनुमोधने आइल। तत परे आपीलाण्टानेर उकिलानेर मध्ये सदासुखपण्डित एइ मोकर्द्दमार वावतेर क्रोटेर फयछ्ला दुइ टाका किम्मतेर फिरिस्ति सम्वलित अद्य दाखिल करिलेक। ज्ञातो हइया वोध हइल ये एइ मोकर्द्दमा प्रीविनसीयान् क्रोटेर प्रथम तजविज हओया सदर आपीलेर योग्य, एवं खरचार जामिनदारेर दस्तखतेर एकरार ओ ताहार मातवरिर तहकीकात जेला कानपुरेर जज साहेवेर द्वाराय जेला मजकुरेर नाजीरेर मारफत आमले आसियाछे, एवं उकिलेर मेहन्यतआना एइ आदालतेर तहविले दाखिल हइयाछे। एजन्य प्रकाश ये आपीलाण्टान् सदर आपीलेर शाम्यक् शराएत वजाय आनियाछे। ए प्रयुक्त हुकुम हइल ये आपीलाण्टानेर सदर आपील मञ्जुर एवं लम्वरे दाखिल हय। प्रविनशीयान क्रोटेर फयछ्लाते प्रकाश, ये जेला ओ क्रोटेर पण्डितगण ये उहारदिगेर स्थाने व्यवस्था तलव हइया पितार जीवद्दशाय पितामहेर स्थावर वस्तुर दाविर पुत्रेर क्षेमतार विशय विभिन्नता वाक्यसकल आछे। एजन्य हुकुम हइल ये क्रोटेर फयछला मौजेवात सम्वलित एइ आदालतेर पण्डितेर निकट एइ हुकुमे पाठान जाय ये ऐ पण्डित जेला कानपुरेर प्रचलित शास्त्रेर आज्ञासकलेर अनुमोदने एइ विशयेर जओयाव व्यवस्था ये पितार जीवद्दशाय पितामहेर स्थावर वस्तुर अंश करिया लओनेर हकदार पुत्र हइते पारे कि ना-एक सप्ताह मध्ये दाखिल करेण इति॥

१. याहा—इति साधीयान् पाठः।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिम्पीयरसाहेबधर्माधिकरणलिखितैतदब्दीयजुनमासीयसप्तविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्ट-ओजुह्दतसंज्ञकनिवेदनपत्रं कोटापीलाख्यधर्म्माधिकरणीयजयपत्रञ्च यदेतदब्दीयजुलाइमासीयसप्तदशदिनसम्बन्धिसोमवासरे[1] मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

जीवति पितरि पैतामहस्थावरधनस्यांशं कृत्वा ग्रहणस्याधिकारी पुत्रो भवितुं न शक्नोति, जीवति पितरि पुत्राणां विभागकर्त्तृत्वाभावात्। यदि पिता स्वपैतृकधनस्य विभागं कृत्वा पुत्रेभ्यो ददाति तदा तद्ग्रहणस्याधिकारी पुत्रो भवितुं शक्नोति, जीवति पितरि पितुरेव विभागकर्त्तृत्वात्—इति कानपुरप्रदेशप्रचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभव्यवहारमयूखमिताक्षराटीकादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।

भजेरन् पैतृकमृक्थमनीशास्ते हि जीवतोः॥—इति मनुवचनम् ॥१॥

विभजेरन् सुताः पित्रोरूर्द्ध्वमृक्थमृणं समम्—इति मिताक्षरावीरमित्रोदयादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥२॥

स्वातन्त्र्यार्हे पितरि जीवति तदिच्छै(यै)व विभागमिति तु[2] पातित्यपारिव्रज्यादिभिस्तदनर्हे पुत्रेच्छा(या)पि। तदुपरमे तु स्वेच्छाया निमित्तत्वमर्थसिद्धमिति कालत्रयमेवानेन प्रकारेण—इति वीरमित्रोदयादिग्रन्थलिखनम् ॥३॥

भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते—इति वीरमित्रोदयादिग्रन्थधृतव्यासवचनम् ॥४॥

जीवति पितरि पुत्राणामर्थादानविसर्गाक्षेपेषु न स्वातन्त्र्यम्—इति वीरमित्रोदयादिग्रन्थधृतहारीतवचनम् ॥५॥

---

१. सम्बलि—व्यप०। २. तं—व्यप०।

जीवद्विभागे पितुः स्वातन्त्र्याद् अजीवद्विभागे पुत्राणां स्वातन्त्र्यात्—इति वीरमित्रोदयग्रन्थलिखनञ्चेति ॥६॥

एतदब्दीयागस्तिमासीयोनत्रिंशत्तमदिनसम्बन्धिबुधवासरे मयेयं व्यवस्था दत्तेति ॥—

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

१०—रोवकारि मिछिल मोकाम कलिकातार सदर देओयानि आदालतेर हाकिम श्रीयुत आलकसुन्दरराछसाहेबेर बैठके हओर तारिख सन १८३२ सालेर ३ सेतम्बर मोतावेक सन १२३९ सालेर २० भाद्र सोमवार ।

महाराजा गोविन्दचन्द्रराय	आपीलाण्ट
महाराणी कृष्णमणिदेव्या	रेष्पाडेण्ट

आपीलाण्टेर उकिल सदासुकपण्डित हाजिर आइल । आपीलाण्टेर छओल एक हाजार टाका मूल्ल्येर कागजेर पर सदर आपील मञ्जुरिर प्रार्थनाय डिहिगञ्ज नाटोर ओ गायरह दखल पाइबार मोकद्दमाय मुबलगे आटानब्बै हाजार पाच शत एक टाका आट आना पाँच कडा टाकार तायदादे उकिल मजकुर ओ मुनशी होछेन आलीर नामेर एक केता ओकालतनामा सहित ओ ए आदालतेर तहविलदारेर दस्तखते उकिलेर मेहनतआनार बाबत एक हाजार टाकार रशीद एक केता ओ ए आदालतेर खरचार जेला हाओली सहर कलिकातार मोतालक एदयने काशीपुर निवाशी जगमोहनमल्लिक ओ रामकुमार पालेर नामेर जामिनि एक केता ओ सन हालेर २७ जुलाइ तारिखेर प्रविनशील कोर्ट मुरशीदाबादेर फयसलार नकल

एक केता सन हालेर २९ आगष्ट तारिखे दुइ टाका मूल्ल्येर कागजेर फिरिस्तिर द्वाराय दाखिल हइयाछिल, अद्य दरपेप हइया पाठ करागेल। ताहार पर गोविन्दचन्द्ररायेर उकिल सन १२२० सालेर १६ अग्रहायनेर राणी कृष्णमणि रेस्पाडण्टेर नामेर महाराजा विश्वनाथराय मोतओफ्फार लिखिया देओो अनुमतिपत्रेर नकल एक केता ये ताहार निचे राणि कृष्णमणिर जओाव जोडा देओो आछे लम्वरे दाखिल करिलेक। दृष्टे आइल। यद्यपि आपीलाण्टेर सदर आपीलेर दरखास्ते हुकुम प्रकाश हओनेर पूर्व्वे ए आदालतेर पण्डितेर स्थाने व्यवस्था लओो उचित बोध हइल, ए कारण हुकुम हइल ये एइ मोकर्द्दमा लम्वेर दाखिल हइया एइ रोवकारिर नकल ए आदालतेर फयछला हओो १७४८ लम्वरेर मोकर्द्दमाय दाखिल हओो अनुमतिपत्र सहित ए आदालतेर पण्डितेर हाओोला करा जाय एइ हुकुमे ये एइ रोवकारि पाओार दिवस हइते तिन दिवसेर मध्ये अनुमतिपत्रेर लिखित सरतसकल ओ मजमुन दृष्टे निचेर लिखित छओोलसकलेर जओाव दाखिल करे इति।

प्रथम—एइ ये राणि कृष्णमणि आपन स्वामी महाराजा विश्वनाथराय मोतओफ्फार लिखिया देया अनुमतिपत्रानुसारे गोविन्दचन्द्ररायके आपन पुष्यपुत्रत्ते आनिया गोविन्दचन्द्रराय प्राप्तव्यवहारे पहुछाते ओ ताहार राजि व्यतित आपन जीवद्दशा पर्य्यन्त स्वामीर तेज्य विषयेर पर दखिलकार थाकिते पारे कि ना।

द्वितीय—एइ ये ऐ अनुमतिपत्रानुसारे महाराजा गोविन्द चन्द्ररायके पुष्यपुत्र लओोर पर राणि कृष्णमणिके एद्दयणे एइ विषयेर ये कोन हेतु द्वाराय गोविन्दचन्द्ररायके त्याग करिया दोशरा व्यक्तिके पुष्यपुत्र करणेर चमता आछे किना इति।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतअलकसुन्दरराससाहेबधर्म्माधिकरणलिखितैतदब्दीयतृतीयदिवसीयविचारपत्रान्तार्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्धर्म्माधिकरणनिष्पन्नाष्टचत्वारिंशदधिकसप्तदशशताङ्काङ्कितविवादविषयनिविष्टानुमतिपत्रञ्च यत्तदब्दीयतन्मासीयचतुर्थदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम्—

राज्ञी कृष्णमणी मृतमहाराजविश्वनाथरायाभिधेयस्वपतिलिखितानुमतिपत्रानुसारेण गोविन्दचन्द्ररायाभिधेयं स्वकीयदत्तकपुत्रतामानीय गोविन्दचन्द्ररायस्य प्राप्तव्यवहारतायामपि तदनुमतिमन्तरेण स्वजीवनपर्य्यन्तं स्वपतित्यक्तधने आयत्तत्वं शास्त्रानुसारेण स्वामित्वेन सम्पादयितुं[1] न शक्नोति पतिकृतदत्तकपुत्रग्रहणानुमत्या पतिमरणानन्तरं गृहीतदत्तकपुत्रस्यैव तत्पतित्यक्तसमुदायधने शास्त्रानुसारेण पुत्रत्वेन स्वत्वोत्पादेन राज्याः कृष्णमण्यभिधानायाः पतित्यक्तधने पत्नीत्वेन स्वत्वोत्पत्तेः प्रतिरुद्धत्वात् । यद्यप्यनुमतिपत्रे महाराजविश्वनाथरायेण स्वपत्नीं राज्ञीं कृष्णमणीं प्रति लिखितमस्ति "अस्मन्मरणानन्तरं त्वं दत्तकपुत्रं रक्षित्वा सकलविषयस्य कर्त्री भूत्वास्मत्कृते ईश्वरविग्रहाणां सेवां कृत्वावशिष्टे ये द्वे मम पत्न्यौ[2] तयोर्जीवनावधि ग्रासाच्छादनं त्वया देयमिति" तथाप्यनेन पत्यनुमत्या पतिमरणानन्तरं गृहीतदत्तकपुत्रस्य शास्त्रानुसारेण पितृत्यक्तसमुदायधनस्वामिनः प्राप्तव्यवहारतायामपि तद्विमत्यापि स्वामित्वेन राज्ञी कृष्णमणी स्वजीवनपर्य्यन्तं पतित्यक्तधने भोगवती स्थास्यतीत्यनवगमादिति ।—

अत्र प्रमाणम्—

अनपत्यस्य धनं पत्न्यभिगामि, तदभावे दुहितृगामि—इत्यादि दायभागादिग्रन्थधृतविष्णुवचनम् ॥ १ ॥

तत्र प्रथमं पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रः इति प्रपौत्रपर्यन्ताभावे पत्नीति च तदभावे दुहिता—इति च दायभागटीकादायक्रमसंग्रहादिग्रन्थलिखनम् ॥ २ ॥

---

१. सम्पादितु—व्यप० २. पत्नौ—व्यप० ।

सर्व्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः—इति दायभागादिग्रन्थ-धृतदेवलवचनञ्चेति ॥ ३ ॥

द्वितीयप्रश्नस्योत्तरम्—

प्रभुसमर्पितानुमतिपत्रानुसारेण महाराजगोविन्दचन्द्ररायस्य दत्तक-पुत्रत्वेन ग्रहणानन्तरं राज्ञ्याः कृष्णमण्यभिधानाया इदानीं केनचिद्धेतुना गोविन्दचन्द्ररायस्य त्यागं कृत्वा द्वितीयस्य दत्तकपुत्रत्वेन ग्रहणस्य क्षमता नास्ति, शास्त्रानुसारेण गृहीतैकदत्तकपुत्रस्य पितृत्यक्तसमुदायधने पुत्रत्वेन स्वत्वोत्पादात् । यद्यप्यनुमतिपत्रे महाराजविश्वनाथरायेण स्वपत्नीं राज्ञीं कृष्णमणीं प्रति लिखितमस्ति "अस्मन्मरणानन्तरं त्वमेकस्याधिकस्य वा मत्सन्तानस्य दत्तकपुत्रत्वेन ग्रहणं करिष्यसीति"—अनेन राज्ञ्याः कृष्णमण्य-भिधानायाः दत्तकपुत्रैककरणानन्तरं तस्मिन् विद्यमाने सति तत्त्यागं कृत्वा द्वितीयदत्तकपुत्रग्रहणक्षमताया अनवगमात्—इति वङ्गदेशचलितदाय-भागदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्र-न्थानुसारिणी व्यवस्था ।

अत्र प्रमाणानि—

प्रथमप्रश्नोत्तरलिखितानि त्रीण्येवेति ॥ ३ ॥

एतदब्दीयसितम्बरमासीयदशमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ॥—

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

११—सर्वगुण उपमायोग्य श्रीयुत राजनारायण विद्याभूषण पण्डित आदालते देओानि जेला हुगलि अवगतेषु ॥—

सन १८३२ साल तारिख ७ आपरेल ।—

१३ लम्बरेर कैः कालिदासगङ्गोपाध्याय दीः—

छानि तजविज आः प्रेमचन्द्रचौधारी दीः—

सञ्जोयाल धर्म्मदासचौधुरि ओ गुरुदासचौधुरि-दुइ सहोदर एकान्न वर्त्तिते थाकिया, पैतृक स्थावर वस्तु प्रभृति भोग करिया, ताहार मध्ये ज्येष्ठ, ऐ धर्म्मदास आपनार दुइ पुत्र, वदन चन्द्र ओ प्रेमचन्द्रचौधुरि, आर भ्राता ऐ गुरुदासचौधरि ओ आपन माता सुन्दरिदेव्यार समिद्धे लोकान्त हय। तदन्तरे ऐ गुरुदास मजकुर आपनार ऐ भ्रातष्पुत्रदिगेर सहित ऐ व दस्तुरे एकान्नवर्त्ति थाकिया किछु काल परे आपनार माता आर ऐ दुइ भ्रातष्पुत्र ओ आपन प्रथम संसारेर वनितार गर्भजात वैकुण्ठनाथ नामे एक पुत्र ओ अदत्ता तिन कन्या ओ द्वितीय संसारेर सन्तान सन्तति विहिन वनिता गोविन्दमणिदेवीके राखिया लोकान्त हइले। ऐ गुरुदासेर पुत्र वैकुण्ठनाथ आपनार ज्येष्ठतात-पुत्र ऐ वदनचन्द्र ओ प्रेमचन्द्रचौधरिर सहित एकान्नवर्त्ति एजमाले थाकिया आन्दाज ७ वत्सर वयक्रमे आपनार पितामहि ऐ सुन्दरि देव्या आर अदत्ता तिन भग्नि ओ अवीरा विमातार समिद्धे मृत्यु-हय। परे ऐ वैकुण्ठनाथेर अविरा विमाता ओ तिन अदत्ता भग्नि ओ पितमही सन्दरीदेव्या ओ ज्येष्ठतातेर पुत्र वदनचन्द्र ओ प्रेमचन्द्र सहित एकान्नभुक्त थाकिया वैकुण्ठनाथेर तिन भग्निर विवाह हइया, दुइ भग्निर पुत्र हइले ओ एक भग्नि पुत्रसम्भाविता राखिया, वैकुण्ठनाथेर पितामहीर मृत्यु हय। तदन्तरे किछु काल वादे वैकुण्ठनाथेर विमाता गोविन्दमणीर मृत्यु हय। ऐ वैकुण्ठनाथेर दुइ भग्नि, ओ ताहार पुत्रगण ओ एक भग्नि पुत्र-सम्भाविता ओ वैकुण्ठनाथेर ज्येष्ठतातेर पुत्र वदनचन्द्र ओ प्रेमचन्द्र चौधुरि वर्त्तमान आछे। अतएव वङ्गदेश चलित शास्त्रानुसारे ऐ गुरुदासेर वस्तुर योग्य अंश गुरुदास मृत्यु परे ताहार पुत्र वैकुण्ठनाथके पौंछिया छिल कि ना। यदि पौंछिया थाके तवे वैकुण्ठनाथेर मृत्यु हइले ऐ वस्तु वैकुण्ठनाथेर पितामहीके पौंछिया छिल कि ना। यदि पौंछिया थाके तवे पितामही सुन्दरी देवी मृत्यु हइले उपरेर लिखित व्यक्तिदिगेर मध्ये के पाइते पारे-

इहार व्यवस्था एइ सओयालेर पासे लिखिया ५ रोज मध्ये पाठाइवेन ॥—

एतत्प्रश्नानुसारेण मृतस्य गुरुदासस्य योग्यांशप्राप्तधने वैकुण्ठनाथोऽधिकार्य्यभूत् । पितामहपर्य्यन्तरहिते तस्मिन् मृते पितामही सुन्दरीदेव्यधिकारिण्यभूत् । तस्यां मृतायां वैकुण्ठनाथस्य पितृभ्रातृपुत्रौ वदनचन्द्रप्रेमचन्द्रौ लब्धुं न शक्नुयाताम्, किन्तु वैकुण्ठनाथस्य पितृदौहित्राः प्राप्तुं शक्नुयुरिति विदुषां परामर्शः ॥—

एइ सओयाल अनुसारेते गुरुदास मरिले ताहार योग्यांश वस्तुते वैकुण्ठनाथ अधिकारी हइया छिलो। पितामह पर्य्यन्त रहित सेइ वैकुण्ठनाथ मरिले पितामही सुन्दरीदेवी अधिकारिणी हइयाछिलो। सुन्दरीदेवी मरिले पर वैकुण्ठनाथेर पुत्र वदनचन्द्र ओ प्रेमचन्द्र पाइते पारे ना, किन्तु वैकुण्ठनाथेर पितृदौहित्रेरा पाइते पारे—एइ पण्डितदेर युक्ति ॥—

धर्म्मरत्नदायभागादिषु ग्रन्थेष्वत्र प्रमाणम्

यथा गौतमः—*स्वामी ऋक्थक्रयविक्रयसंविभागपरिग्रहाधिगमेषु*—इत्यादि ॥

यथा मनुः—*ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।*
भजेरन् पैतृकमृक्थमनीशास्ते हि जीवतोः—इत्यादि ॥

यथा मनुः—*अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ।*
मातर्य्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥

यथा याज्ञवल्क्यः—*पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।*
तत्सुता गोत्रजः—इत्यादि ॥

धर्मरत्ने यथा—*दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत्*—इत्यादि ।

सन १८३२ साल ता० २० आपरेल ।

श्रीराजनारायणविद्याभूषणपण्डित ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं व्यवस्थापत्रं विचारपत्रञ्च यदेतदब्दीयश्रितम्बरमासीयत्रयोदशदिनसम्बन्धिबृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेण निवेदनं क्रियते ॥—

प्रभुसमर्पितप्रश्नपत्रलिखितवृत्तान्ते सति तत्प्रश्नोत्तरव्यवस्थायां मृतस्य गुरुदासस्य योग्यांशे तत्पुत्रो वैकुण्ठनाथोऽधिकार्यभूदिति हुगलीजिलाख्यधर्म्माधिकरणनियुक्तविद्यमानपण्डितेन यल्लिखितं तत्सत्यमेव, किन्तु पितामहपर्य्यन्तरहिते तस्मिन् मृते तत्पितामही सुन्दरीदेव्यधिकारिण्यभूदिति यल्लिखितं तद्व्यवस्थायां तन्न सत्यम्, वैकुण्ठनाथस्य भगिनीषु[1] विद्यमानासु तासां पुत्रसम्भावनायां सत्यां वैकुण्ठनाथस्य पितामह्याः सुन्दरीदेव्यास्तत्पितृदौहित्रानन्तरमधिकारिणस्तत्पितामहादप्यनन्तरमधिकारिण्या वास्तवाधिकारस्य[2] अशास्त्रीयत्वात्, एवं वैकुण्ठनाथस्य पितृभ्रातृपुत्रौ बदनचन्द्रप्रेमचन्द्रौ लब्धुं न शक्नुयाताम्, किन्तु वैकुण्ठनाथस्य पितृदौहित्राः प्राप्तुं शक्नुयुरिति यल्लिखितं तद्व्यवस्थायां तत् सत्यमेव। गुरुदासस्य मरणानन्तर तद्योग्यांशे तत्पुत्रस्य वैकुण्ठनाथस्याधिकारे जाते सति तद्धनं वैकुण्ठनाथस्यैव जातम्। अतस्तस्मिन पुत्रपौत्रप्रपौत्रपत्नीदुहितृदौहित्रपितृमातृभ्रातृभ्रातृपुत्रभ्रातृपौत्रपर्य्यन्तरहिते मृते सति तत्त्यक्तधने विद्यमानेषु वैकुण्ठनाथस्य पितृदौहित्रेषु तत्पितृव्यपुत्राणामधिकारस्याशास्त्रीयत्वात्—इति वङ्गदेशचलितदायभागदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारेण निवेदनमिति ॥—

एतदब्दीयनवम्बरमासीयचतुर्द्दशदिनसम्बन्धिबुधवासरे मयेदं निवेदनं कृतमिति ॥

श्रीर्ज्जयतिराम्
श्रीवैद्यनाथमिश्रेण

———

१२—रोवकारि मिशिल सदर देओयानि आदालत मो० कलिकाता ई० सन० १८३२ साल तारिख १३ शेतम्बर मोतावेक

१. भगिनीसु—व्यप० । २. वास्तवमधिकारस्य—व्यप० ।

३० भाद्र सन १२३९ साल रोज वृहस्पतिवार ऐ आदालतेर हाकिम श्रीयुत नाशानाएल जान हालहेड साहेवेर वैठके ॥—

अनङ्गमञ्जरि— आपीलाण्ट

फकिरचन्द्रसरकार— रेष्पाडण्ट

एइ मोकद्दमा वर्त्तमान मासेर १० तारिखे उभयेर उकिलेर मोकाविलाय रोवकार हइया वाजे २ कागजात सुनानि हइया दिवावसान प्रयुक्त स्थकित छिल, अद्य पुनराय आपीलण्टेर उकिल मुनशीदादार वकस ओ रेष्पाडण्टेर उकिल सदासुखपण्डितेर मोकाविलाय दरपेष हइया जिला आदालतेर ओ एइ आदालतेर कागजात मोनाहेजाय आशील। हुकुम हइल-ये एइ आदालतेर पण्डितेर स्थाने एइ विषयेर व्यवस्था तलव करा जाय-ये यदि कोनो व्यक्ति पोष्यपुत्र लय तवे ऐ पोष्यपुत्र राखन विषये शास्त्रानुसारे आपन स्त्रीर स्वीकार आवश्यक वटे कि ना, ओ पोष्यपुत्र लओनेर विषय तिन नियम आचरण आवश्यक। प्रथम—एइ ये सपिण्डक अर्थात् ज्ञातिवर्गके समाचार दिया एकत्र करा आवश्यक॥ द्वितीय-- राजाके ज्ञात करा॥ तृतीय-यज्ञ करा॥ ए मकद्दमार भावे वोध हइल ये पोष्यपुत्र लओन कालिन किवल यज्ञ हइयाछे। प्रथम ओ द्वितीय नियम आमले आइशे नाइ। अतएव एइ विशये एइ मत पोष्यपुत्रता सिद्ध हय कि ना इति॥—

एतद्धर्म्माधिकरणाधिपतिश्रीयुतनासानाएलजानहालहेडसाहेवधर्म्माधिकरणलिखितैतदब्दीयसितम्बरमासीयत्रयोदशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयपञ्चदशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते॥—

यदि कश्चिद् व्यक्तिविशेषः पोष्यपुत्रं गृह्णाति तदा तत्पोष्यपुत्रग्रहणविषये स्वपत्न्याः स्वीकारः शास्त्रानुसारेण वास्तवमावश्यको न भवति, जायापत्योर्म्मध्ये प्रधानीभूतेन पत्या पोष्यपुत्रग्रहणेनैव पतिपरतन्त्राया जायाया अपि तस्मिन् पोष्यपुत्रत्वोत्पत्तेः शास्त्रीयत्वात्, पत्नीस्वीकारं विना पत्युः पोष्यपुत्रग्रहणस्य शास्त्रनिषिद्धत्वाभावाच्च। एवं पोष्यपुत्रग्रहण-

विषये ये त्रयो नियमाः प्रश्नपत्रे आवश्यकत्वेन लिखिताः **अर्थात्** सपिण्डाह्वान-राजनिवेदन-यज्ञास्तेषाम्मध्ये एतद्विवादे यदि पोष्यपुत्र**ग्रहणसमये** केवलं यज्ञभवनमेवावगम्यमानं स्यात्तदा प्रथमद्वितोयनियमयोरर्थात् सपिण्डाह्वान-राजनिवेदनयोरनिष्पन्नत्वेऽप्येतादृशं पोष्यपुत्रत्वं सिद्ध्यति, पोष्यपुत्रग्रहणविषये सपिण्डाह्वान-राजनिवेदनयोः केवलं दृढतरसाक्षित्वेनोपयोगित्वेन प्रभुसमर्पितप्रश्नपत्रलिखितेनैतद्विवादे पोष्यपुत्र**ग्रहणसमये**[1] केवलं यज्ञ एव जात इत्यनेन यज्ञकरणपूर्व्वकपोष्यपुत्रग्रहणस्य निश्चितत्वेन सपिण्डाह्वानराजनिवेदनयोः प्रयोजनस्यार्थसिद्धत्वात्—इति दत्तकमीमांसादत्तकचन्द्रिकादत्तकदीधितिदत्तकनिर्णयदत्तकदर्पणविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—॥

अत्र प्रमाणम्—

अपुत्रेण सुतः कार्य्यो यादृक् तादृक्[2] प्रयत्नतः ।

पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनस्य च ॥—इति दत्तकमीमांसादत्तकचन्द्रिकादिग्रन्थधृतमनुवचनम् ॥१॥

भर्त्तुः प्राधान्यात्तत्परिग्रहेणैव स्त्रिया अपि तस्मिन् पुत्रत्वसिद्धिः भर्तृपरिगृहीतवस्त्वन्तरस्वत्ववत्—इति दत्तकमीमांसाग्रन्थलिखनम् ॥२॥

मधुपर्केण संपूज्य राजानञ्च द्विजान् शुचीन् ।

राजात्र ग्रामस्वामी । बन्धूनाहूय सर्वांस्तु ग्रामस्वामिनमेव चेति वृद्ध[3]-गौतमस्मरणात्—इति दत्तकमीमांसादि (दमी० पृ० ६६) ग्रन्थलिखनम् ॥३॥

बान्धवाद्याह्वानं दृष्टार्थं राजाह्वानवत्—इति दत्तकमीमांसादि (दमी० पृ० ६७) ग्रन्थलिखनम् ॥४॥

पुत्रं प्रतिग्रहीष्यन् इत्यादेः स्वबन्धूनाहूय इत्यर्थः । एतेन स्वबन्धुभिर्ज्ञातः पुत्रो दायं ग्रहीष्यति, श्राद्धादिकञ्च करिष्यति, बान्धवाश्च तं न विचारयिष्यन्तीति सूचनार्थम् । राजनिवेदनं चाप्येतदर्थमेव—इति विवादभङ्गार्णव(२ विवा० १७३ ख)ग्रन्थलिखनञ्चेति ॥५॥

---

१. पौत्र०—व्यप० । २. तादृक—व्यप० ।

३. वृहद्गौतम इति दमी० पुस्तके पाठः ।

एतदब्दीयनवम्बरमासीयसप्तदशदिनसम्बन्धिशनिवासरे मयेयं व्यवस्था दत्तेति ।।—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

१३—रोवकारि मिछिल सदर देओयानी आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिस् पीयेर साहेवेर वैठके ओयाक्कै तारिख ५ सेतम्वर इ० सन १८३२ साल मोतावक वाङ्गला सन १२३९ साल तारिख २२ भाद्र रोज वुधवार ।। —

मोछम्मात वेचुधामन— छापला—

छापलार उकिल मुनशी अलिउल्ला हाजिर आइल । छायेलार छओयाल सन हालेर २१ जुलाइ तारिखेर जेला वेहारेर जज साहेवेर हुकुमेर नाराजीते ये आपन मातार वर्त्तमाने उहार स्वामीर अपुत्रक मृत्यु हओन सरवे मोछम्मात मुद्दा मोतओफीर दौहित्रगण राधा ओ गोवर्द्धनेर मोतओफा मजकुरार सहित ओयारिष सावुद हओया ओ छायेलार ओयारिष साछद ना हओयार विशये छादेर हइयाछे । शास्त्रानुजाइ मोतओफा मजकुरार सहित आपन ओयारिष शाछादर हुकुम छादेर हओनेर प्रार्थनाय उकिल मजकुरेर नामेर ओकालतनामा ओ लाला सुवंशलाल मोक्तारकारेर नामेर मोक्तारनामा ओ तारिख मजकुरेर जेला मजकुरेर आदालतेर रोवकारिर नकल एक केता ओ इ० सन १८०३ साले १९ अक्तुवरेर लिखित एलाका आजिमावादेर आपीलेर रोवकारिर नकल एक केता, ओ इ० सन १८१६ सालेर १५ अक्तुवर तारिखेर जेला मजकुरेर डिगरिर नकल सम्वलित जाहा सन हालेर २७ अगष्ट तारिखे दाखिल हइयाछिल, अद्य

अनुमोधने आइल। हुकुम हइल ये एइ रोवकारिर नकल एवं छओयाल ओ तत्समभिव्यारि कागजात सम्वलित एइ हुकुमे एइ आदालतेर पण्डितेर निकट पाठान जाय ये कागजात अनुमोदन परे एइ विषयेर जओयाव ये जेला वेहारेर जज साहेवेर हुकुम तद्देशीय प्रचलित शास्त्रानुजाइ बटे कि ना लिखेन इति ॥—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरणलिखितैतदब्दीयसितम्बरमासीयपञ्चमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं च यत्तदब्दीयतन्मासीयोनविंशतितमदिनसम्बन्धिबुधवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

वेहारदेशीयजिलाख्यावान्तरधर्म्माधिकरणाधिपतिकृता या तद्देशप्रचलितशास्त्रानुसारिणी न जातास्ति। प्रभुसमर्पितपत्रजातैर्विशेषतो उङ्गरेजीशब्दप्रतिपाद्यषोडशाधिकाष्टादशशताब्दीयाक्तूबरमासीयत्रयोदशदिवसीयवेहारदेशीयजिलाख्यावान्तरधर्म्माधिकरणीयजयपत्रप्रतिरूपपत्रेण तल्लिखितधर्म्माधिकरणनियुक्तपण्डितसम्बन्धिप्रश्नोत्तराभ्यां विवादास्पदीभूतधनमेतद्धर्म्माधिकरणार्थिन्या वेचूधामिन्याः श्वशुरस्य फतेहधामिन आसीत्, तन्मरणानन्तरं तत्पुत्रेण फेकूधामिना अर्थादर्थिन्या वेचूधामिन्याः पत्या पुत्रत्वेन प्राप्तमिति ज्ञातम्। अतस्तद्धनं फतेहधामिनः पुत्रस्य फेकूधामिन एव जातम्। अतस्तन्मरणोत्तरं तदुत्तराधिकारिणामेव तत्राधिकारः। तदुत्तराधिकारिणाम्मध्ये तस्य पुत्रपौत्रप्रपौत्राभावे तत्पत्न्या अर्थिन्या वेचूधामिन्या एव प्रधानाधिकारित्वात्, वेचूधामिन्यामर्थिन्यां विद्यमानायामन्येषान्नाधिकारः, मातरि विद्यमानायामनपत्यस्य कस्यचिन्मरणेन तत्पत्न्याः पुत्रपौत्रप्रपौत्राभावे सति प्रधानाधिकारिण्या अधिकारो न भवतीत्येतद्विधायकशास्त्राभावात्—इति वेहारदेशप्रचलितमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारमाधवव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुता गोत्रजो बन्धुः—इत्यादि मिताक्षरावीरमित्रोदयादिग्रन्थ—धृतयाज्ञवल्क्यवचनम् ॥ १ ॥

पुत्राः पौत्राश्च दायं गृह्णन्ति तदभावे पत्न्यादयः—इति मिताक्षरा-ग्रन्थलिखनञ्चेति ॥ २ ॥

एतदब्दीयनवम्बरमासीयैकविंशतितमदिनसम्बन्धिबुधवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

३३२५ नं—

१४—रोबकारि मिछिल सदर देओयानि आदालत मोकाम कोलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिश-पियेर साहेवेर वैठके ओयार्के तारिख १० शेतम्बर इ० सन १८३२ साल मोतावक २७ भाद्र सन १२३९ साल वाङ्गला रोज सोमवार ॥

गोसाञीचन्द्रकविराज आपीलाण्ट

मोछम्मात जयमनि ओ कृष्णमणि मोतओर्फा—रेष्पाडण्टान

आपीलाण्टेर उकिल मुनसि हयदर आलि ओ रेष्पाडण्टानेर मध्ये जयमनीर उकिल मुनसि गोलाम वतुल हाजिर आइल, एवं इस्तहारनामा जारि हओयाते ओ कृष्णमनीर मोतओर्फार तरफेर कोन ओयारिप ए आदालते हाजिर आइल ना। एइ मोकद्दमा सेरेस्तादारेर कैफियत मते आमार वैठके दरपेष हइया प्रथम आदालत जेला विरभूमेर कागजात ओ द्वितीय आदालत मुर-शिदावादेर कोर्टेर कागजात एवं ए आदालते दाखिल हओया खाष आपीलेर छओयाल जाहा, आपिलाण्ट मौजेवात करार देय,

ও তাহার জওয়াব সেও যায় সাক্ষিদিগের জোবানবন্দি অনু-মোধনে আইল। জয়মনীর উকীল মুনসি গোলাম বতুলের প্রতি ছওয়াল—যে তুমি এই আদালতের দাখিল করা আপন জওয়াবে লিখিয়াছ-যে কৃষ্ণমনী আপন মৃত্তুকালিন মাতবর মনিষ্যদিগের সাক্ষাতে আপন হিস্যার বস্তুতে উহাকে হকদার করিয়াছে, এ প্রযুক্ত জিজ্ঞাসা করা জাইতেছে-যে লিখিত পঠিতের দ্বারায় কি অন্য কোন প্রকারে। আরজ করিলেক-যে আমার মোর্কেলের জওয়াবেতে এ বিষয় পষ্ট প্রকাশ নাই। যে হেতুক এই মোকর্দ্দমার আপীল শাস্ত্রের বিশয়সকল অধিক তহকিকাতের দৃষ্টে মঞ্জুর হইয়াছে তাহার দৃষ্টে হুকুম হইল জে এই মোকর্দ্দমার কাগজসকল এই আদালতের পণ্ডিতের নিকট এই হেতুতে পাঠান জায় যে উভয়ের দাখিল করা কুরশীনামাসকল ও জেলার আদালতের পণ্ডিতের ব্যবস্থা ও এই আদালতের পণ্ডিতগণের খাষ আপীল মঞ্জুর কালিন দাখিলকরা ব্যবস্থা অনুমোধনে নিচের লিখিত ছওয়ালসকলের জওয়াব লিখেন॥

১—প্রথম—এই যে ১৮।৯ মাস বয়ক্রমের সময় মৃত্তুর এক-দিবস পূর্ব্বে ভৈরবের জোবানি কৃত হেবা প্রামাণ্য হয় কি না॥

২—দ্বিতীয়—যদ্যপি স্যাৎ তাহার প্রামাণ না হয়, তবে উভয় বিবাদির মধ্যে কোন ব্যক্তি ভৈরবের উত্তরাধিকারি মতে হক রাখে।

৩—তৃতীয়—যদ্যপি স্যাৎ খাস আপীল মঞ্জুরির সময়ে এই আদালতের দাখিল হওয়া ব্যবস্থার দ্বারায় প্রকাশ যে সাবেক মুদ্দইআনের মধ্যে এক জন কৃষ্ণমনী পুত্রবতী হওনের উদ্দেখের পীতার হিস্যায় হকদার ছিল। এই ক্ষনে প্রকাশ যে কৃষ্ণমনি ও তাহার স্বামি দুয়েরি মৃত্যু হইয়াছে। এ প্রযুক্ত কৃষ্ণমনী মজকুরার ক্ষেমতা ছিল কি না-যে আপন হিস্যা জয়মনীকে যে প্রকার এই আদালতের জওয়াবে লেখে সমর্পন করে, আর তাহার অন্যথায় মোচ্ছম্মাৎ মজকুরার ওয়ারিষ কোন ব্যক্তি হইবেক, এবং সেরেস্তাদার

एइ विशयेर कैफियत ये एइ मोकद्दमा इ० सन १८२२ साले मञ्जुर हय, परे कि जन्य मुद्दत दश वत्सर पर्यन्त मुलतवि थाकिल—दाखिल कारण इति ॥—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुक्तहेनरीसिकिसपीयरसाहेबधर्म्माधिकरणलिखितैतदब्दीयसितम्बरमासीयदशमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातमर्थिनिविष्टानि प्रत्यर्थिनिविष्टानि च वंशावलीपत्राण्येवं जिलाख्यावान्तरधर्म्माधिकरणनियुक्तपण्डितलिखितव्यवस्थापत्रमेतद्धर्म्माधिकरणनियुक्तपण्डिताभ्यां लिखितमेतद्विवादस्यैतद्धर्म्माधिकरणविवेचनायोग्यत्वनिश्चयकालिकमर्थाद्भाषायां खासअपीलमञ्जूरशब्दप्रतिपादककालिकव्यवस्थापत्रं च यदेतदब्दीयाक्तूबरमासीयत्रिंशत्तमदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रथमप्रश्नस्योत्तरम्—

षण्मासाधिकाष्टादशवर्षवयस्केन[1] भैरवेण स्वमृत्योरेकदिवसपूर्व्वं यद्दानं वाचा कृतं तत् सिद्ध्यति प्रभुसमर्पितपत्रजातैर्विशेषतो वीरभूमिप्रदेशीयजिलाख्यावान्तरधर्म्माधिकरणनियुक्तपण्डितसम्बन्धिप्रश्नोत्तराभ्यां प्रामव्यवहारेण प्रकृतिस्थेन च भैरवेण स्वस्वत्वास्पदीभूतधनस्य दानं कृतमित्यवगमेनैतादृशदानसिद्धौ बाधकसामान्याभावादिति ।

द्वितीयप्रश्नोत्तरमप्यर्थादत्रैव पर्यवसन्नमिति पृथङ् न लिखितमिति ।

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥ १ ॥

दाने हि चेतनोद्देशविशिष्टात् त्यागादेव दातृव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्—इति दायभागग्रन्थलिखनम् ॥ २ ॥

अदत्तं तु भयक्रोधकामशोकरुगन्वितैः—इत्यादि विवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थधृतनारदवचनम् ॥ ३ ॥

१. षड्मासाधिकाष्टादशवर्षव्ययस्केण—व्यप० ।

भयादिरुगन्ताः[1] *पञ्च प्रकृतिस्थितिविरोधिनो द्रष्टव्याः*—इति विवादभङ्गार्णवादिग्रन्थलिखनम् ॥ ४ ॥

तृतीयप्रश्नस्योत्तरम्—

यद्यप्यर्थिनीनामर्थादेतद्धर्म्माधिकरणप्रत्यर्थिनीनां मध्ये कृष्णमण्याः पुत्रसम्भावनायां सत्यां पितृत्यक्तधनस्योत्तराधिकारित्वेनाधिकारे जाते सति कृष्णमण्याः स्वसंक्रान्तपितृत्यक्तधनस्य जयमणीमुद्दिश्य यथैतद्धर्माधिकरणोत्तरपत्रे जयमण्या लिखितं तादृशसमर्पणस्य क्षमता पितृकृतर्णापाकरणाद्यावश्यककार्य्यार्थं तत्तत्कार्य्ये प्रयुक्तस्यासीत्, तद्व्यतिरेकेण स्वेच्छया स्वाभिप्रायेण च नासीत्। यदि च कृष्णमण्या तद्धनं दानानुसारेण प्राप्तं यद् वीरभूमिप्रदेशीयजिलाख्यावान्तरधर्म्माधिकरणनियुक्तपण्डितसंबन्धितृतीयप्रश्नोत्तराभ्यां कृष्णमणीजयमण्युभयोपस्थापितयवाब-उल-यवाबसंज्ञकपत्रेण चावगम्यते तदा तद्धनस्य कृष्णमण्याः सौदायिकस्त्रीधनत्वेन तत्रोपरिलिखितपितृकृतर्णापाकरणार्थं तद्विनापि च स्वाच्छन्द्येन समर्पणस्य क्षमता आसीत्। एवञ्च सति कृष्णमण्याः जयमणीमुद्दिश्य तद्धनसमर्पणक्षमताया असत्त्वपक्षे कृष्णमणीमरणानन्तरं तत्संक्रान्ततत्पितृत्यक्तधनस्य यदि कृष्णमणीमरणोत्तरमेतद्धर्म्माधिकरणार्थिनो गोसाइचन्द्रकविराजस्य पिता वैद्यनाथकविराजो विद्यमान आसीत्, तदा तस्य कृष्णमण्याः पितुर्गङ्गानारायणस्य पितामहदौहित्रत्वेनाधिकारे जाते सति तन्मरणोत्तरं तत्पुत्रो गोसाइचन्द्रकविराजोऽधिकारी भवितुमर्हति, यदि च कृष्णमणीमरणात् पूर्वमेव गोसाइचन्द्रकविराजस्य पिता वैद्यनाथकविराजो मृतः स्यात्तदा गोसाइचन्द्रकविराजस्य कृष्णमणीमरणानन्तरं तत्संक्रान्ततत्पितृत्यक्तधने अधिकारो भवितुं न शक्नोति, पितामहदौहित्रपुत्रस्य शास्त्रानुसारेणानधिकारात्, वैद्यनाथकविराजकृष्णमण्योर्मध्ये पूर्व्वं वैद्यनाथकविराजस्य मरणं कृष्णमण्या वा मरणं जातमित्यस्य प्रभुसमर्पितपत्रजातैर्ज्ञातुमशक्यत्वात्। एवं प्रभुसमर्पितार्थिप्रत्यर्थिसमुपस्थापितवंशावलीपत्रलिखितानां[2] मध्ये केवलं जयमण्या एव विद्यमानत्वेन, तस्याश्च कृष्णमणीमरणानन्तरं तत्संक्रान्ततत्पितृत्यक्तधने अधिकारो भवितुं न शक्नोति, भ्रातृदुहितुः

१. क्रोधादीतिपाठः विभ०। २. समुपस्थापित—व्यप०।

पितृव्यधने शास्त्रानुसारेणाधिकारित्वात्। किन्तु कृष्णमणीमरणोत्तरं तत्संक्रान्ततत्पितृव्यत्यक्तधने शास्त्रानुसारेण ये अधिकारिणोऽधिकारिशृङ्खलायां निविष्टाः तेषां मध्ये कश्चिच्चेद्विद्यमानस्तदा स एवाधिकारी भवितुं शक्नोति। परन्तु स च क इति प्रभुसमर्पितपत्रजातैर्ज्ञातुमशक्य एव इति वङ्गदेशचलितमनुदायभागदायभागटीकादायतत्त्वदायक्रमसंग्रहशुद्धितत्त्वदायरहस्यविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥—इति दायभागादिग्रन्थधृतकात्यायनवचनम्॥१॥

यद्वा पत्नीत्युपलक्षणम्, स्त्रीमात्राधिकारे अयमर्थो बोद्धव्यः—इति दायभागग्रन्थलिखनम्॥२॥

स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदि॥
विशेषतो गृहक्षेत्रदानाधमनविक्रयाः॥—इति नारदस्मृत्यादिग्रन्थधृतनारदवचनम्॥३॥

ऋटकूथग्राही ऋणं दाप्यः—इत्यादि विवादभङ्गार्णवादिग्रन्थधृतयाज्ञवल्क्यवचनम्॥४॥

ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा।
भर्त्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥—इति दायभागादिग्रन्थधृतकात्यायनवचनम्॥५॥

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि॥—इति दायभागादिग्रन्थधृतकात्यायनवचनम्॥६॥

एवं पितामहप्रपितामहसन्ततेरपि दौहित्रान्तायाः पिण्डप्रत्यासत्तिक्रमेणाधिकारो बोद्धव्यः—इति दायभागग्रन्थलिखनम्॥७॥

दौहित्रश्च पिण्डदाता न च तत्पुत्रः—इति दायभागग्रन्थलिखनम्॥८॥

न दायं निरिन्द्रिया अदायाश्च स्त्रियो मताः-इति श्रुतेः न दायमर्हति स्त्रीत्यन्वयः, पत्न्यादीनाम् त्वधिकारो विशेषवचनादविरुद्धः--इति दायभागग्रन्थलिखनञ्चेति ॥६॥

एतदब्दीयदिशम्बरमासीयदशमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्

. श्रीवैद्यनाथमिश्रेण

१५—मोकाम कलिकातार सदर देओयानि पण्डित प्रति सओयाल ।

यद्यपि मोछलमान जातीय कोनो वेक्ति हिन्दु जातीय कोनो वेक्तिर स्त्रीके बुझाइया ताहार पतिर असन्मतिते मोछलमान धर्म्म आनिवार मानस करे, अथवा हिन्दुजातीय कोन वेक्तिर स्त्री आपनार जातीय धर्म्मत्याग करिया मोछलमानेर धर्म्म स्वीकार करिते इच्छा करे, तवे पतिर नालिस मते हाकिम वेक्तिके मोछम्र्मात मजकुरा ओ मोछलमान वेक्तिदिगेर प्रार्थना हइते वारण राखा पौंछे कि ना । यद्यपि पौंछे, तवे कि प्रकार, ओ यदि स्यात् ऐ स्त्री मोछलमान हइया थाके, तवे ताहार पतीर जातीर किछुहानि हय कि ना । इति सन १८३२ साल तारिख १० दिसम्बर ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नप्रतिरूपपत्रं यदेतदब्दीयदिशम्बरमासीयत्रयोदशदिनसम्बन्धिवृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

यदि यवनजातीयः कश्चिद्व्यक्तिविशेषो हिन्दूजातीयस्य कस्यचिद् व्यक्तिविशेषस्य स्त्रियं बोधयित्वा तस्याः स्त्रियाः पत्युरननुमत्या च यवनजातीयधर्म्मेष्वानेतुमिच्छति, अथवा हिन्दूजातीयस्य कस्यचिद् व्यक्तिविशेषस्य स्त्री स्वजातीयधर्म्मस्य त्यागं कृत्वा यवनजातीयधर्म्मस्य स्वीकारं कर्त्तुमिच्छति

तदा तस्याः स्त्रियाः पत्युस्तद्विषयकाभियोगे सति राज्ञस्तस्याः स्त्रियाः यवनजातीयस्य तद्व्यक्तिविशेषस्य च तत्तदिच्छाविषयीभूताद्दारणकरणमुचितं भवति। एवं च सति राज्ञस्तयोरुपयुक्तदण्डादिकरणक्षमताप्यस्त्येव। यदि च सा स्त्री यवनजातौ प्रविष्टाऽभूत्तदा तस्याः पतिर्यदि तस्या यवनजातिभवनानन्तरमपि तया सह स्त्रीपुंधर्माचरणादिकार्य्यं कृतवान् स्यात्तदा तत्संसर्गजन्यपातकापनोदकयथाशास्त्रप्रायश्चित्ताचरण विना स्वजातावाचरणीयो व्यवहार्य्यश्च भवितुं शास्त्रानुसारेण न शक्नोतीति, एवं तस्याः स्त्रियाः पत्युः स्वजातेर्हानिर्जाता। यदि च तस्याः स्त्रियाः यवनजातिभवनानन्तरं तत्पतिस्तया सह स्त्रीपुंधर्म्माचरणादिकार्य्यं न कृतवान् स्यात्तदा तत्पत्युस्तत्संसर्गाभावेन संसर्गजन्यप्रत्यवायापनोदकप्रायश्चित्तं विनापि स्वजातेः कापि हानिर्भवितुं न शक्नोतीति मनुमिताक्षराप्रभृतिधर्म्मशास्त्रानुसारिणी व्यवस्था॥—

अत्र प्रमाणम्—

अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम्।

विषयेषु च संजन्त्यः संस्थाप्या ह्यात्मनो वशे॥ इति मनु(९।२) वचनम्॥१॥

दम्पत्योः परस्परधर्म्मव्यतिक्रमे सति अन्यतरज्ञाने दण्डेनापि स्वधर्म्मव्यवस्थापनं राज्ञा कर्तव्यम्—इति मन्वर्थमुक्तावल्यां(पृ० ३४५-३४६) कुल्लूकभट्टव्याख्यानम्॥२॥

यद्यपि स्त्रीपुरुषयोः परस्परमर्थिप्रत्यर्थितया नृपसमक्षं व्यवहारो निषिद्धस्तथापि प्रत्यक्षेण कर्णपरम्परया विदिते तयोः परस्पराभिचारे दण्डादिना दम्पती निजधर्म्ममार्गे राज्ञा स्थापनीयौ—इति मिताक्षरा(पृ० २८८)ग्रन्थलिखनञ्चेति॥३॥

एतदब्दीयदिशम्बरमासीयाष्टादशदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

श्रीदुर्गा

१६—रोवकारी मिछिल सदर देओयानी आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिक्सिपीएर साहेबेर बैठके ओयाक्कं तारिख १९ माह शेतम्बर इ० सन १८३२ साल मोतावक ५ आश्विन वाङ्गला सन १२३९ रोज बुधवार—

दुर्ज्जनसिंह ओ अर्ज्जनसिंह — आपीलाण्टान्
वाउत गिरिधरसिंह ओ गयरह— — रेष्पाडण्टान्

आपीलाण्टानेर उकिलान् मुनशी होशेन आलि ओ सदासुखपण्डित हाजिर आइल। आपीलाण्टानेर छओयाल एइ मासेर ६ तारिखेर अनुमोदन हओया एइ आदालतेर पण्डितेर व्यवस्थार प्रति ओजरात एवं अन्य अन्य विशय सम्वलित सादा कागजेर पर एक केता व्यवस्थार नकल दुइ टाका किम्मतेर एक केता फेरस्त समेत, जाहा एइ मासेर ८ तारिखे दाखिल हइया छिल, अनुमोदने आइल। हुकुम हइल ये आपीलाण्टानेर छओयाल एइ रोवकारिर नकल ओ एइ मासेर ६ तारिखेर रोवकारिर नकल सम्वलित ओ एइ मोकद्दमार मोतालक साम्यक कागजात एइ हुकुमे ये पण्डित सावेक व्यवस्था ओ आपीलाण्टानेर ओजरात ओ एइ मासेर ६ तारिखेर हओया एइ आदालतेर रोवकारिर प्रति अनुमोदन करिया जओयाव लिखेन-ये तत् दृष्टे सावेक व्यवस्थार किछु तवदिल जरुर आछे कि ना, आर यद्यपि स्यात् ताहा थाके, ताहार सरेओयार कैफियत लिखेन-एइ आदालतेर पण्डितेर अग्रे पाठान जाय इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिक्किसपीयरसाहेवधर्म्माधिकरणलिखिततदब्दीयसितम्वरमासीयोनविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्न-

प्रतिरूपपत्रमेतं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातमेतद्धर्म्माधिकरणार्थिनां निवेदनपत्रमेतदब्दीयसितम्बरमासीयपष्ठदिवसीयैतद्धर्म्माधिकरणीयविचारपत्रं च यदेतदब्दीयनवम्बरमासीयपष्ठदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।--

प्रभुसमर्पितोपरिलिखितपत्रजातदृष्ट्या अस्मद्दत्तैतद्विवादविषयनिविष्टपूर्वव्यवस्थायाः किञ्चिदपि परावर्त्तनस्यावश्यकता नास्ति, धर्मशास्त्रे केनापि मुनिना ग्रन्थकारेण वा जीवति धनस्वामिनि पितरि तत्स्वत्वास्पदीभूतं धनं यत् स्वपित्रादिमरणानन्तरं उत्तराधिकारित्वेन पित्रा प्राप्तं तद्धनं तत्पुत्रैर्विभज्य ग्रहीतव्यमित्यस्यालिखितत्वात्, कस्मिंश्चिदपि देशे तादृशव्यवहाराभावाच्च । यच्च एतद्धर्म्माधिकरणार्थिभिः स्वकीयनिवेदनपत्रे अस्मद्दत्तपूर्वव्यवस्थायां पैतामहधनं लिखितं तत्प्रमाणेषु पैतृकं धनं लिखितमिति विरोधो लिखितस्सन् (?) सम्यक्तद्व्यवस्थालिखितानां षण्णां प्रमाणानां मध्ये केवलं प्रथमप्रमाणे मनुवचने एव पैतृकं धनमिति लिखितमस्ति । तत्र पैतृकं धनमित्यस्य पितृस्वत्वास्पदीभूतं धनमित्याशयः । तत्र पितृस्वत्वास्पदीभूतं धनं यद्धनं पित्रा स्वेनैवोपार्जितं तदापि भवति । यद्धनं पित्रा स्वपित्रादिमरणानन्तरं स्वमात्रादिमरणानन्तरं वोत्तराधिकारित्वेन प्राप्तं तदपि भवत्येव, पितृस्वत्वस्य तत्राप्यक्षतत्वात् । यथैतद्धर्म्माधिकरणार्थिभिर्विवादास्पदीभूतं धनं स्वपैतामहमिति लिखितं तत्रापि तद्धनमर्थिनां पितामहस्य स्वोपार्जितं न भवति, किन्त्वर्थिनामेतद्धर्म्माधिकरणीयनिवेदनपत्रेणैव विवादास्पदीभूतं धनं तत्पितामहेनाप्युत्तराधिकारित्वेनैव प्राप्तमित्यस्य स्पष्टीकृतत्वेन, अतएव यद्धनमर्थिनां पितामहेनार्थात् कीर्त्तिसिंहेन मूलभूतधनस्वामिनो विक्रमादित्यरायात् सप्तमपुरुषेणोत्तराधिकारित्वेन प्राप्तं तद्धनं यद्यर्थिनां पैतामहं भवति तदा तद्धनमर्थिनां पित्रा अर्थादगरिधनसिंहेन मूलभूतधनस्वामिनो विक्रमादित्यरायादष्टमपुरुषेणोत्तराधिकारित्वेन प्राप्तं तद्धनमप्यर्थिनां पैतृकमपि भवितुं शक्नोत्येव । इतरेषु तद्व्यवस्थालिखितेषु पञ्चसु प्रमाणेषु सामान्यतो धनमित्यस्य लिखितत्वेन पितुः स्वोपार्जिते क्रमागते च धनशब्दस्याविशेषात्—इति कानपुरप्रदेशचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभव्यवहारमयूखमिताक्षराटीकादिग्रन्थानुसारेणोत्तरमिति ॥

एतदब्दीयदिशम्बरमासीयोनविंशतितमदिनसम्बन्धिबुधवासरे मयेदमुत्त-
रं दत्तमिति ।।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीदुर्गा

१७—रोवकारी मिछिल मोकाम कलिकातार सदर देओयानि आदालतेर हाकिम श्रीयुत आलकसुन्दर रास साहेबेर बैठके हओयार तारिख इङ्गरेजी सन १८४२ सालेर ४ डिजम्बर मोताबेक सन १२४९ बाङ्गलार २० अग्रहायन मङ्गलवार--

आनन्दकिशोर गुप्त बनाम श्रीमती क्षेमङ्करीदासी

छायलेर उकिल मुनशी गोलाम बतुल हाजीर आइल। छायलेर छओयाल ३२ टाका मूल्ल्येर इष्टाम्प कागजेर पर ग्रासाच्छादन प्रभृति विशये मुः ५०० पाच शत कुडी टाकार मोकद्दमार खास आपील मञ्जुरेर प्रार्थनाय उकिल मजकुरेर नामेर एक केता ओकालतनामा ओ इं० सन १८३० सालेर २१ अक्तुबर तारिखेर हओया नदिया जेलार आदालतेर एक केता फयसलार नकल ओ इं० सन १८३२ सालेर १५ फिवरेल ओ सन १८४० सालेर १८ आपरेल तारिखेर हओया कलिकातार कोर्ट आपीलेर दुइ केता फयशलार नकल ओ एक केता वेवस्था सहित, ये सन हालेर ८ शेतम्बर तारिखे दाखिल हइयाछिल, अद्य दृष्टे आइल। येहेतु हुकुम हओनेर पूर्व्व शास्त्रेर विवरण ज्ञात हओया उचित बोध हइल, एजन्य हुकुम हइल ये एइ रोवकारिर नकल एइ हुकुमे ए आदालतेर पण्डितके अर्पन कराजाय ये निचेर लिखित प्रश्नोत्तर ताहार पाइवार दिवसावधि एक सप्ताह मध्ये दाखिल करेण इति।

प्रश्न—खोशालचन्द्रराय तालुकात प्रभृति ओ करुणामयी वनिता ओ करुणामयीर गर्भजात दुहिता श्रीमति चित्रादासीके उत्तराधिकारिगणके राखिया लोकान्तर्गामी हय, तत्परे लिखित श्रीमती करुणामयी स्वामीर तेज्य वस्तुर पर ओ ताहार मृत्युर पर तस्य कन्या श्रीमती चित्रादासी उक्त खोशालचन्द्रेर तेज्य वस्तुर उपर दखिलकार हइलेन। तदपरे उक्त श्रीमती चित्रादासीर दुइ पुत्र अर्थात् भैरवचन्द्रगुप्त ओ आनन्दकिशोरगुप्तेर मध्ये

ज्येष्ठ भैरवचन्द्र गुप्त श्रीमती क्षेमङ्करीदासी वनिता ओ हरसुन्दरी ओ दयामयी प्रभृति चारि कन्याके राखिया आपन माता श्रीमती चित्रादासीर समक्षे लोकान्तर हय, एवं उक्त श्रीमती चित्रादासीर द्वितीय पुत्र आनन्दकिशोर गुप्त उक्त खोशालचन्द्रेर तावत तेज्य वस्तुर उपर दखिलकार हय। अतः पर जिज्ञाशा करा जाइतेछे ये यदि उक्त आनन्दकिशोर आपन ज्येष्ठ भ्राता भैरवचन्द्रेर स्त्री श्रीमती क्षेमङ्करी दासीके, ओ ऐ श्रीमती क्षेमङ्करीदासीर मृत्युर पर ताहार कन्यागण हरसुन्दरी ओ दयामयी प्रभृतिके ताहार दिगेर आबिश्यक अनुसारे ग्रासाच्छादन ना देय, तबे वङ्गदेशीय चलित शास्त्रानुसारे लिखित श्रीमती क्षेमङ्करीदासी ओ तत् परलोकान्तर तस्य कन्यागण श्रीमती हरसुन्दरी ओ दयामयी प्रभृति छाएल आनन्दकीशोर गुप्तेर स्थाने ग्रासाच्छादन पाइबार क्षेमता राखे कि ना—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतअलकसुन्दरराससाहेबधर्म्माधिकरणलिखिताङ्करेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयदिशम्बरमासीयचतुर्थदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयपञ्चदशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते––

प्रभुसमर्पितप्रश्नपत्रलिखितवृत्तान्ते सत्यानन्दकिशोरगुप्तो यद्युत्तराधिकारित्वेन प्राप्तनिजधनायां स्वमातरि जीवन्त्यां मातामहधने अनुत्पन्नस्वत्वस्य मृतस्य भैरवचन्द्रस्य स्वकीयज्येष्ठभ्रातुः पत्न्याः श्रीमत्याः क्षेमङ्करीदास्याः; तन्मरणोत्तरं तत्कन्यानां हरसुन्दरीदयामयीप्रभृतीनामावश्यकग्रासाच्छादनं न ददाति तदा सा एव श्रीमतीक्षेमङ्करीदासी ग्रासाच्छादनोपयुक्तस्वपतित्यक्तधनाभावे स्वजीवनपर्य्यन्तमानन्दकिशोरगुप्तस्य स्वकीयदेवरस्य स्थाने ग्रासाच्छादनग्रहणस्य क्षमतां रक्षत्येव, एवं तन्मरणोत्तरं तत्कन्यकानां यदि विवाहो नाभूत्तदा तासां मध्ये अविवाहितास्सर्वा एव

विवाहपर्य्यन्तं ग्रासाच्छादनोपयुक्तस्वपितृत्यक्तधनाभावे सति विवाहपर्य्यन्तं ग्रासाच्छादनग्रहणस्य क्षमतामानन्दकिशोरगुप्तस्य स्थाने रक्षन्त्येव। यदि च भैरवचन्द्रस्य कन्यानां सर्व्वासामेव विवाहो जातः स्यात् तदा तासां विवाहितानां कन्यकानां मध्ये यासां ग्रासाच्छादनं स्वभर्त्तृकुलात् स्वभर्त्तृकुलसम्बन्धिधनाद् वा स्वपितृत्यक्तधनाद्वा भवितुं न शक्नोति तदा ता अपि यावज्जीवं स्वकुलोचितग्रासाच्छादनग्रहणस्य क्षमतामानन्दकिशोरगुप्तस्य स्वपितृव्यस्य स्थाने रक्षन्त्येव। यासाञ्च विवाहितानां ग्रासाच्छादनं स्वभर्त्तृकुलात् स्वभर्त्तृकुलसम्बन्धिधनाद् वा स्वपितृत्यक्तधनाद् वा भवितुं शक्नोति ताश्च ग्रासाच्छादनग्रहणस्य क्षमतामानन्दकिशोरगुप्तस्य स्थाने न रक्षन्ति, तासामावश्यकग्रासाच्छादनस्य स्वभर्तृकुलादेरुपपत्तेः—इति बङ्गदेशचलितदायभाग-दायतत्त्वदायभागटीका-दायक्रमसंग्रह-विवादार्णवसेतु-विवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

सुताश्चैषाञ्च भर्त्तव्या यावद्वै भर्त्तृसात्कृताः।
अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः॥ इति दायभागादि(दाभा० पृ० १०४)ग्रन्थधृतयाज्ञवल्क्य(पृ० २८७ २।१४१)वचनम्॥१॥

मृते भर्त्तर्य्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः।
विनियोगार्थरक्षासु भरणे च स ईश्वरः॥
परिक्षीणे पतिकुले निर्म्मनुष्ये निराश्रये।
तत् सपिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः॥—इति दायभागादि-(दाभा० पृ० १७३)ग्रन्थधृतनारद(नास्मृ० १३।२८-२९)वचनञ्चेति॥२॥

अङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयाष्टमदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

४७०२ ल० ।

१८ फैरादि—गोलकमणीदासी सा० वेहाला परगणे वलिया आसामी—पीताम्वरहालदार १स्वग्य वेओया १सा० वेहाला परगणे वलिया, निमचाँद राय, १सा० मोदि परगणे मागुरा ।

मालिके जमीन सावेक ँरामचन्द्रहालदारेर ओयारिस श्रीनाथहालदारभट्टाचार्य । इहार हाल खरिदार हरचन्द्र हालदार सा० वेहाला परगणे वालिया १, दोसरा मालिके जमिन महाराजा ँनवकृष्णवाहादुरेर ओयारिस लायेक शिव-कृष्णवाहादुर ओ कालीकृष्णवाहादुर सा० सहर कलिकातार सवावाजार २ ।

दावि मौरसि जमिर लाखेराजी जमीर ओयारिस्मिते दखल कायेम हइवार प्रार्थनाय किम्मत तायदाद १५० टाका । एक वेक्ति गङ्गारामराय जाति छत्रि आपन सजातीते विवाह करे । विवाहिता स्त्रीर पक्षे एक पुत्र मदनराय । ऐ गङ्गारामराय एक-कपालिर कन्याके आसना करे । ताहार उदरे एक कन्या हय । ताहार नाम गोलकमणि । ताहाके छत्रिर संगे विवाह देय । गङ्गारामराय लोकान्त हइवाते ऐ मदनराय आपन पितार स्थावर ओ अस्थावर विषय दखलिकार थाकिया सजातिते विवाह करे, एक कन्या हय । तस्य नाम वरदामणि । ऐ मदन-राय आपन पैतृक जे किछु तावत आपन कन्या वरदामणिके दान करे, सरत् एइ जे पर्यन्त वरदामणिर विमाता जीवितमान थाकिवेक ऐ विषयेर ॥=) आना रकम उपस्वत्व हइते खोरपोष करिवेक, वरदार ।=) आना थाकिवेक, वरदार विमातार लोकान्त हइले सोलो आना उपस्वत्त वरदार थाकिवेक । ऐ वरदार विमाता ऐ प्रकार दखलिकारि थाकिया आपन सपतिनि-पुत्री वरदामनिके सजातीते विवाह दिया फौत करे । वरदामनि आपन विमातार श्राद्ध आदि करिया ऐ दानेर विशयेते दखलिकारि थाकिया किछु काल परे वरदामनि आपन स्वामिके राखिया लोकान्त

हइयाछे। एक्षन ऐ गोलकमनि आपन पितार गङ्गारामरायेर ओयारिस जानाइया नालिस करे। अतएव धर्मशास्त्र अनुसारे ए विषय काहारे घटीवेक इति—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यद्वात्रिंशदधिकाष्टादशशताब्दीयागस्तिमासीयत्रयोविंशतितमदिनसम्बन्धिवृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

अत्र यद्यपि प्रश्नपत्रे लिखितमस्ति मदनरायस्य कन्या वरदामणी स्वविमातुः श्राद्धादिकं कृत्वा तद्दानकृतधने आयत्तत्वं सम्पाद्य किञ्चित्-कालानन्तरं स्वपतिं रक्षित्वा मृतेति, परन्तु वरदामण्या विमाता प्रश्नपत्रलिखितानां स्त्रीणां मध्ये का भवतीति प्रश्नपत्रेण ज्ञातुं न शक्यते; तथापि प्रश्नपत्रलिखितवृत्तान्तस्य सत्यत्वञ्चेत् तदा वरदामण्याः यदि कन्यापुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्रभ्रातृमातृपितृपर्य्यन्तानां मध्ये कश्चिन्नास्ति चेत्तदा तत्पत्युरेवाधिकारः। प्रश्नपत्रलिखितवृत्तान्ते सति विवादास्पदीभूतधनस्य वरदामण्याः कन्यावस्थायां पितृदत्तत्वेन सौदायिकस्त्रीधनत्वात् कन्यावस्थायां पितृदत्तसौदायिकस्त्रीधने च कन्यामारभ्य पितृपर्य्यन्तानामुपरिलिखितानामभावे पत्युरधिकारस्यार्थसिद्धत्वात्—इति वङ्गदेशचलितदायभागदायतत्त्व-दायभागटीका-दायक्रमसंग्रह-विवादार्णवसेतु-विवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा।
भर्त्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥—इति दायभागादि(दाभा० पृ० ७६)ग्रन्थधृतकात्यायन(कास्मृ० ९०१। पृ० १०६) वचनम्॥१॥

विवाहकाले तत्पूर्वापरकाले वा स्त्रियै यद्धनं पित्रा दत्तं तत्र तु धने प्रथमं कुमार्य्यास्तदनन्तरमूढायाः पुत्रवतीसम्भावितपुत्रयोस्तदनन्तरं च वन्ध्याविधवयोश्चाधिकारः। सर्व्वदुहित्रभावे पुत्रादेर्यौतुकधनवत् क्रमेणा-

धिकारः—इति दायक्रमसंग्रह(पृ० २३)विवादार्णवसेत्वादि(पृ० ५७) ग्रन्थलिखनम् ॥२॥

तत्र यौतुकधने इति प्रस्तुत्य सर्व्वदुहित्रभावे पुत्रस्याधिकार इति। पुत्राभावे दौहित्रोऽधिकारीति। दौहित्राभावे पौत्रस्तदभावे प्रपौत्र इति। तदभावे सपत्नीपुत्र इति। तदभावे सपत्नीपौत्रस्तदभावे सपत्नीप्रपौत्र इति। एतत्पर्य्यन्ताभावे ब्राह्मदैवार्षगान्धर्वप्राजापत्याख्यविवाहपञ्चकलब्धयौतुकधने भर्त्तुरधिकारः—इति दायक्रमसंग्रह(पृ० १९।२०)ग्रन्थलिखनम् ॥३॥

बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च।

अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः॥—इति दायभाग(पृ० ९२)दायक्रमसंग्रह(पृ० २०)विवादार्णवसेतु(पृ० ६०)विवादभङ्गार्णवादि(२ विवा० ४८५ क)ग्रन्थधृतयाज्ञवल्क्य(२।१४५)वचनम् ॥४॥

बन्धुदत्तमिति माता पितृभ्यां यद्दत्तम्, अतएव तत्पुत्राश्च भ्रातर[1] एव बान्धवाः तदाह वृद्धकात्यायनः—

पितृभ्याञ्चैव यद्दत्तं दुहितुः स्थावरं धनम्।

अप्रजायामतीतायां भ्रातृगामि तु सर्वदा॥ इति

सर्व्वदापदेन ब्राह्मादिपैशाचान्तविवाहिताया अप्रजाया[2] धनं भ्रातृगाम्येव भवतीति। स्थावरपदाद् दण्डापूपन्यायादेवापरस्य धनस्य सिद्धिः। बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते—इति दायभाग(पृ० ९२)ग्रन्थलिखनम् ॥५॥

प्रथमं सोदराणां तदभावे मातुः मातुरभावे पितुः एषां पुनरभावे तद्धनं भर्त्तुः—इति दायभाग(पृ० ९५)ग्रन्थलिखनञ्चेति ॥६॥

अङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजानवरीयमासीयचतुर्दशदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति—

श्रीदुर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

1. भ्रातरो बान्धवाः—दाभा०।

2. अप्रजसो धनं—दाभा०।

३:४१ नं

१६—रोवकारी मिछिल शदर देओयानि आदालत मा० कलिकाता आदालत मजकुरेर हाकिम श्रीयुत रिचार्ड ओयालपोल साहेवेर वैठके। तारिक ८ माह जानेर ई सन १८३२ साल मोताबके वाङ्गला २७ माह पौष १२३९ साल दिवस वुधवार—

मोछम्मात लक्ष्मीप्रिया आपीलाण्ट

भैरवचन्द्रचौधुरि ओ जयचन्द्रचौधुरि, रेष्पाडेण्टान

आपिलण्टेर उकिल मनसि होसन आलि ओ हाजिर रेष्पाडेण्टर उकिल सदाशुकपण्डित हाजिर आइल, आर द्वितीय रेष्पाडेण्ट जयचन्द्रराय इयानामनामा ओ इस्ताहारनामा जारिते ओ खोद् किम्वा उकिलेर द्वाराय हाजिर नाइ। एइ मकद्दमा गत नवम्बर मासेर २६ तारिखे आमार वैठके रोवकार हइया नालिसि आरजि प्रभृति कागजात् नां प्रिविन्सियाल कोर्टेर फयछला पर्य्यन्त ओ ए आदालतेर कागज-पत्र पडा हइया आपीलण्टेर उकिलेर उक्त उदाहरण सेरेस्ता हइते वाहिर करनेर हुकुम छादेर हइया मुलतवि छिल, अद्य करुणामयी ओ गएरह आपीलण्टान ओ जयचन्द्रघोष ओ गएरह रेष्पाडेण्टान ३०२६ लम्बरेर मोकद्दमार कागजपत्र आर कमलाकान्त राय ओ गएरह वनाम गङ्गाचरणसेन खास आपीलेर दरखास्त ओ ताहार सम्वन्धीय कागजपत्रेर सहित आमार वैठके दरपेष हइया एइ दुइ मकद्दमार कोन-कोन कागज विशेषत एइ आदालतेर पण्डितेर व्यवस्था सकल प्रगाड दृष्टे दृष्टी करा ओ पडा गेल। एवं एइ आदालतेर सन १८२७ सालेर २० ओ २८ नवम्वर तारिखेर लिखित दुइ केता रोवकारि ओ व्यवस्था एइ आदालतेर पण्डितेर कालीप्रसादराय छाएलेर मोकद्दमार ओ जे रेष्पाडेण्टर उकिल दुइ २ टाका किम्मतेर फेरस्त तिन केतार द्वाराय दाखिल करिलेक, ताहा पडा-गेल। तत्परे आपिलण्टेर उकिलके जिज्ञाशा गेल ये पूर्णिमार पुत्र व्रजनाथ कोन वतसरे, कि जयदुर्गार वर्तमाने, कि ताहार

मृत्युर पर जन्म हय । जओयाव दिलेक ये सन १२२९ साले जयदुर्गार मृत्यु हय। ताहार मृत्युर पर सन १२३० साले पूर्णिमार पुत्र व्रजनाथेर जन्म हय। बोध हइल ये आपीलाण्ट जेला रङ्गपुर ओ दिनाजपुरर संक्रान्तेर परगणे ववनपुर ओ गएरहर ग्रामसकल दाविर वस्तुर हिस्या चारि आना पाच गण्डार दखल पाओनेर दाविते एइ एजेहारे नालिस करे ये मुद्दाइयार स्वामि कृष्णचन्द्र-चौधुरिर पितामह सदाशिवचौधुरिर दुइ पुत्र; प्रथम मुद्दाइयार स्वामिर पिता रामचन्द्र, द्वितीय रामानन्द, सदाशिवेर मृत्युर पर ताहार जमिदारि ओ गएरह ताहार दुइ पुत्र उभये विभाग पाइया रामचन्द्र ज्येष्ठप्रयुक्त रकम नय आना, आर रकम सात आना रामानन्देर हिस्या निर्द्धारित हय। रामचन्द्र तिन पुत्र कृष्णचन्द्र ओ हरिश्चन्द्र ओ कृष्णानन्दके ओयारिस आर ए नय आनार कम त्यक्त वस्तु राखिया मृत्यु हय। आर उभयेर विभागानुसारे मुद्दाइयार स्वामी कृष्णचन्द्रके रकम चारि आना पाच गण्डा आर कृष्णानन्द ओ हरिश्चन्द्रके रकम चारि आना पनरो गण्डा पौंछिल। एवं प्रत्येक आपन २ हिस्यार पर दखिलकार हइल। मुद्दाइयार स्वामि कृष्णचन्द्र दुइ स्त्रि, मुद्दाइया ओ जयदुर्गा एवं मुद्दाइयार गर्भजात कन्या पूर्णिमा आर जयदुर्गार गर्भजात नावालक पुत्र कीर्त्तिचन्द्रके राखिया सन १२१२ साले मृत्यु हइले कीर्त्तिचन्द्रेर नाम जारि हइले सन १२२० साले कीर्त्तिचन्द्रेर मृत्यु हय। ताहार पर जयदुर्गार नाम जमिदारिर ताहुते लेखा जाय। किन्तु मुद्दाइया ओ जयदुर्गा दुइ जनेइ एक अर्क्के जमिदारिर पर दखिलकार एवं उसुल तहसिलेर कर्म्मकर्ता छिल। परे सन १२२९ सालेर पौष माहाते जयदुर्गारो मृत्यु हय। आर शास्त्रानुसारे विरधीय जमिदारी मुद्दइयार एवं ताहार दौहित्रेर सत्त्व आछे। भैरवचन्द्र मुद्दाआलेहे जओयाव देय ये शास्त्रानुसारे जयदुर्गार ओ किर्त्तिचन्द्रेर पिण्डाधिकारि एवं वलवत्त्व ओयारिस आमि इति।

यदी स्यात् एइ आदालतेर पण्डितेर व्यवस्थानुसारे, जाहा एइ आदालतेर इनफसालि ३०२६ लम्बरेर मकद्दमार ओ कमलाकान्तराय ओ(ग)एरह खास आपीलेर मकद्दमाते दाखिल, एवं ताहा दृष्टे ए दुइ मकद्दमा इनफशान हय। प्रकाश आछे ये यदि पुत्र पितार त्याज्य वस्तु ओयारिस सरवे पाइया इं पुत्रनां पौत्र ना राखिया मृत्यु हइया थाके एवं ताहार भग्निर पुत्रेर जन्म हइया किम्वा ताहार गर्भे थाके, तवे ताहार पितार दौहित्र उक्त त्याज्य वस्तुर ओयारिस ये पार्व्वणेर श्राद्ध ओ गएरह से करिते पारे हइवेक। आर यदि स्यात् दौहित्र ना जन्मिया थाके किम्वा ताहार मातार गर्भे ना थाके, ए प्रकारे उक्त मृत व्यक्तिर भग्नि, ये दौहित्र जन्मिवार आकर, ऐ ये पर्य्यन्त पुत्र ना हइवेक से पर्य्यन्त हकदार हइवेक। किन्तु मकद्दमार हालत दृष्टे एवं उभयेर ओजर निष्पत्त्य कारण विशेषत ए मकद्दमाते व्यवस्था लओन उचित हइया हुकुम हइले ये एइ रोवकारिर नकल एइ हुकुमे ये छओयाल—एइ ये रामचन्द्रचौधुरि मृत्त हय, तिन पुत्र ओयारिस राखे, ज्येष्ठा स्त्रिर गर्भजात कृष्णचन्द्र आर द्वितीया स्त्रीर गर्भजात हरिश्चन्द्र ओ कृष्णानन्द, आर तिन भाइ, पितार त्याज्य वस्तु एइ रकमे, ये चारि आना पाच गण्डा कृष्णचन्द्र, आर चारि आना पोनरो गण्डा हरिश्चन्द्र, ओ कृष्णानन्द आपन २ विभाग करिआ लय। ततपरे कृष्णचन्द्रेर मृत्यु हय। ओयारिस राखिल दुइ स्त्रि लक्ष्मीप्रिया ओ जयदुर्गा, ओलक्ष्मीप्रीयार गर्भजात पूर्णिमा नामे एक कन्या, आर जयदुर्गार गर्भजात कीर्त्तिचन्द्र नामे एक पुत्र, आर कृष्णचन्द्रेर त्याज्य वस्तु कीर्त्तिचन्द्रे। एवं कीर्त्तिचन्द्र नावालग ओ अविवाहिता मृत्युर पर ताहार माता जयदुर्गाते पौछिल। जयदुर्गारो मृत्यु हइल आर ताहार मृत्युर पर पूर्णमार गर्भजात एक पुत्र व्रजनाथ नामे जन्म हय। इहातेइ वाङ्गला देशेर प्रचलित शास्त्रानुसारे मृत कृष्णचन्द्रेर क्रिया ओ कर्म्म पार्व्वणेर श्राद्ध प्रभृति करिवार क्षमता पूर्णिमार पुत्र

व्रजनाथ राखे, कि क्रिष्णचन्द्रेर वैमात्रेय भ्राता हरिश्चन्द्रेर पुत्र भैरवचन्द्र राखे। आर कृष्णचन्द्रेर त्याज्य वस्तु इहारदिगेर मद्धे कोन व्यक्तिके पौंछे—जओयाव दुइ मप्ताह मद्धे लेखेन—एइ आदालतेर पण्डितके हाओला करा जाय—इति।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओआलपोलसाहेबधर्म्माधिकरणलिखितैतदब्दीयजानवरीमासीयनवमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयत्रिंशत्तमदिनसम्बन्धिबुधवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रश्नपत्रलिखितवृत्तान्ते सति मृतस्य कृष्णचन्द्रस्य पार्व्वणश्राद्धपिण्डदानादिक्रियाकरणक्षमतां कृतस्य कृष्णचन्द्रस्य दौहित्रोऽर्थात् पूर्णिमापुत्रो व्रजनाथ एव रक्षति, न तु कृष्णचन्द्रस्य वैमात्रेयभ्रातुर्हरिश्चन्द्रस्य पुत्रो भैरवचन्द्रः, एवं कृष्णचन्द्रस्य त्यक्तधनम्, यत्तन्मरणानन्तरं तत्पुत्रेण कीर्त्तिचन्द्रेण कीर्त्तिचन्द्रस्य मरणानन्तरं तन्मात्रा जयदुर्गया च प्राप्तम्, तद्धने यदि कीर्त्तिचन्द्रस्य मातुर्जयदुर्गाया मरणसमये कीर्तिचन्द्रस्य भगिन्याः पूर्णिमायाः कश्चिदेकोऽपि पुत्रोऽर्थाद् व्रजनाथोऽन्यः कश्चिद् वा गर्भे व्यवस्थितो भूमिष्ठो वा आसीत् तदा तस्याधिकारः। जाते च तस्याधिकारे पुनरुत्पत्स्यमानानां तद्भ्रात्रन्तराणामर्थात् कीर्त्तिचन्द्रस्य पितृदौहित्रान्तराणामप्यधिकारः समान एव भविष्यति। कृष्णचन्द्रस्य मरणानन्तरं तत्त्यक्तधनमुत्तराधिकारित्वेन तत्पुत्रेण कीर्त्तिचन्द्रेण प्राप्तम्, अतस्तद्धनं कीर्तिचन्द्रस्यैव जातम्। अतस्तस्मिन्नप्राप्तव्यवहारे अकृतविवाहे च मृते सति तस्य पुत्रमारभ्य पितृपर्य्यन्ताभावेन तत्त्यक्तधनं तन्मात्रा जयदुर्गया उत्तराधिकारित्वेन प्राप्तमपि जयदुर्गामरणोत्तरं कीर्तिचन्द्रत्यक्तधनं कीर्तिचन्द्रस्य मरणानन्तरं[1] ये कीर्तिंचन्द्रस्योत्तराधिकारिणस्तेषामेव भवति, यथा पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य धने पत्न्या उत्तराधिकारित्वेनाधिकारे जाते सत्यपि पत्न्या मरणोत्तरं पत्न्यनन्तरं पत्युर्ये उत्तराधिकारिणस्तेषामेव तद्धनं भवति, तथा पुत्रमारभ्य

१. मात्रनन्तर—व्यप.।

पितृपर्य्यन्तरहितस्य मृतस्य धने मातुरुत्तराधिकारित्वेनाधिकारे जाते सत्यपि मातुर्म्मरणोत्तरं मातुरनन्तरं पुत्रस्य ये उत्तराधिकारिणस्तेषामेव तद्धनं भवति ।

प्रकृते तु कीर्त्तिचन्द्रस्योत्तराधिकारिणां मध्ये कीर्त्तिचन्द्रस्य पुत्रमारभ्य तत्पितुः कृष्णचन्द्रस्य प्रपौत्रपर्य्यन्तानां कीर्त्तिचन्द्रस्य पितृदौहित्रादर्थाद् व्रजनाथात् पूर्व्वं कीर्त्तिचन्द्रस्य त्यक्तधनाधिकारिणां मध्ये इदानीं कश्चिन्नास्तीति प्रभुसमर्पितप्रश्नपत्रेण स्पष्टतरतयाऽवगमेन कीर्त्तिचन्द्रपितृदौहित्राधिकारस्य निष्प्रत्यूहत्वात्, सति च कीर्त्तिचन्द्रपितृदौहित्रे कीर्त्तिचन्द्रपितृव्य-पुत्रस्य भैरवचन्द्रस्य नाधिकारः । यदि च कीर्त्तिचन्द्रस्य मातुर्जयदुर्गाया मरणसमये कीर्त्तिचन्द्रस्यैकोऽपि पितृदौहित्रो गर्भे व्यवस्थितो भूमिष्ठो वा नासीत्तदा कीर्त्तिचन्द्रस्य पितृदौहित्राणां स्वत्वान्यथानुपपत्त्या कीर्त्तिचन्द्रस्य भगिन्याः पूर्णिमायास्तत्पितृदौहित्रोत्पत्तिमूलीभूतायास्तत्सम्बन्धमूर्च्छनासमूलभूतायाश्च स्वपुत्रोत्पत्तेः प्राक्कालपर्य्यन्तं यथा पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य पितृधने दुहितुरधिकारस्तथा भ्रातृधनेऽप्यधिकारः । सति च कीर्त्तिचन्द्रस्य पितृदौहित्रे स्वतः कीर्त्तिचन्द्रस्य पितुः पार्व्वणश्राद्धपिण्डदातरि स्वतः कीर्त्तिचन्द्रस्य पितुः पार्व्वणश्राद्धपिण्डदानानधिकारिण्याः कीर्त्तिचन्द्रस्य भगिन्याः पूर्णिमाया नाधिकारः, किन्तु तस्याः पुत्रस्यैव, पुत्राणां वोपरिलिखितप्रकारेणाधिकारः— इति वङ्गदेशाचलितमनु-दायभाग-दायतत्त्व-दायभागटीका-दायक्रमसंग्रह-श्राद्धतत्त्व-शुद्धितत्त्वविवादार्णवसेतु-विवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

त्रयाणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते—इति मनुवचनम् ॥१॥

पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यः वृद्धप्रमातामहेभ्यः स्वधोच्यताम्—इति श्राद्धतत्त्वादिग्रन्थ(श्रा.त० पृ० २४३)धृतगोभिलवचनम् ॥२॥

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनिदौहित्रस्येव—इति दायभागग्रन्थलिखनम् ।३॥

इश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्--इति दायभागादि-ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥४॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धु:—इत्यादिदायभागादिग्रन्थधृतयाज्ञवल्क्य-वचनम् ॥५॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥--इति दायभागादि-ग्रन्थधृतकात्यायनवचनम् ॥६॥

यद्वा पत्नीत्युपलक्षणम्, स्त्रीमात्राधिकारे अयमर्थो बोद्धव्यः—इति दायभागग्रन्थलिखनम् ॥७॥

तदभावे पुनः पितृदौहित्र इति । तदभावे पितामहस्तदभावे पितामही तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयस्तदभावे पितृसोदरपुत्र (स्तदभावे) पितृवैमात्रेयपुत्रः—इत्यादि श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनम् । ८॥

यद्यपि दुहित्रभावे दौहित्रस्यैव भगिन्या एव प्रागधिकारो युक्तस्त-थापि तस्याः स्नातेन पार्व्वणपिण्डदातृत्वाभावान्नाधिकारः, दुहितुस्तु दौहित्रात् पूर्व्वमङ्गादङ्गात् सम्भवतीत्यादिविशेषवचनादेवाधिकार इति-भावः--इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनञ्चेति ॥९ ।

एतदब्दीयफाल्गुनीमासीयषोडशदिनसम्बन्धिशनिवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

२०—रोवकारि मिछील शदर देओयानी आदालत मो० कलि-काता आदालत मजकुरेर हाकीम श्रीयुत हेनरी सिकिसपीयेर साहेवेर वैठके । तारिख ३० जानेर इं सन १८३३ साल मोतावेक वाङ्गला सन १२३९साल १९ माघ दिवस बुधवार—

शामरामदासवनाम वेहालचन्द्र मोतओफाार ब्रि, राधा-चरण नाबालगेर माता सुन्दरीदासी—

मोफलेप—

छाएल हाजीर आइल। छाएलेर छओयाल इं० सन १८३१ सालेर २० दिजम्बरेर लिखित, जेला छिलहट्टेर एकटी जज-साहेबेर फयछलार नाराजीर मोजेबातेर न्याय एइ मासेर १७ तारिखेर एइ आदालतेर हुकुम मोताबक जेला मजकुरेर तारिख मजकुरेर फयछला आर सादा कागजेर उपर एक केता व्यवस्था सम्वलित, जाहा एइ मासेर २३ तारिखे दाखिल हइया छिल, अनु-मोधने आइल। यद्यपि स्यात् तारिख मजकुरेर जजसाहेव मोछा-फर फयछलार लेखा आछे जे काजीयार वस्तु दोकान मजकुर मुर्द्दाआलेहेर स्वामीर स्वकृत थाकाते मुद्दाइ अर्थात् छाएल ताहार हकदार शास्त्रागुजाइ हइते पारे ना। ए प्रयुक्त मोफनेशी आपील मञ्जुरि अथवा नामञ्जुरिर विषये चुडान्त हुकुम छादेर हओनेर पूर्व्वे हुकुम हईल जे छाएलेर छओयाल एइ मोकद्दमार फयछला सम्वलित एइ आदालतेर पण्डितेर निकट पाठान जाय एइ हुकुमे जे जदि स्यात् दुइ भ्राता, एक जन प्राप्तव्यवहार, द्वितीय, अप्राप्तव्यवहार, एकत्र थाके, आर भ्राता प्राप्तव्यवहार आपन सोपार्ज्जित हइते दोकान कारवार जारि करे। ए प्रकारे छोट भ्राता एमत दोकानेर किछु हिस्यार हकदार, एवं कि आन्दाज हइते पारे कि ना—ताहार व्यवस्था एक सप्ताह मध्ये दाखिल करेण—इति व्यवस्था दाखिल हओनेर परे कागजेर सामिल दरपेप हय—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरण-लिखितैतदब्दीयजानवरीमासीयत्रिंशत्तमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रति-रूपपत्रमेवं तत्समर्पितैतद्धर्म्माधिकरणार्थिनिवेदनपत्रमेतद्विवादविषय-

निविष्टजयपत्रञ्च यत्तदब्दीयफेब्रुवरीमासीयचतुर्द्दशदिनसम्बन्धिबृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि द्वयोर्भ्रात्रोरेकत्रवासिनोर्म्मध्ये एकः प्राप्तव्यवहारो द्वितीयश्चाप्राप्तव्यवहारो भवति, एवञ्च प्राप्तव्यवहारो भ्राता स्वोपार्जितधनात् हट्टे वाणिज्यव्यापारं करोति, तत्र यदि प्राप्तव्यवहारेण भ्रात्रा तद्वाणिज्यव्यापारमूलीभूतस्वोपार्जितधनं पैतृकादिसाधारणधनाद्युपघातेनोपार्जितं स्यात्, तद्धनेन कृतो यो वाणिज्यव्यापारस्तत्र व्यापारे कनिष्ठभ्रातुरपि शरीरायासश्चेद्यदेतत्तद्धर्म्माधिकरणार्थिनिवेदनपत्रेणैवं प्रभुसमर्पितजयपत्रलिखितेन यद्यप्यर्थी कदाचिद् विवादास्पदीभूतवाणिज्यविषये कर्म्म कृतवान् इत्यर्थिप्रत्यर्थिनोर्द्वयोरेव साक्ष्युपस्थापितवृत्तान्तेन ज्ञातमित्यनेन चावगम्यते तदा तद्वाणिज्यव्यापारोत्पन्नद्रव्यं पञ्चधा विभज्य तत्र भागद्वयं कनिष्ठभ्रातुर्भवितुमर्हति, साधारणपैतृकादिधनाद्युपघातेन स्वशरीरायासेन च प्राप्तव्यवहारस्य ज्येष्ठभ्रातुस्तद्वाणिज्यव्यापारमूलीभूतस्वोपार्जितधने अंशद्वयाधिकारित्वेन कनिष्ठभ्रातुरेकांशाधिकारित्वात्। अतएवैतादृशसाधारणधनेन कृतो यो वाणिज्यव्यापारस्तद्व्यापारे द्वयोर्भ्रात्रोः शरीरायाससत्त्वेन पञ्चधाविभक्ततद्व्यापारोत्पन्नधने कनिष्ठभ्रातुरंशद्वयाधिकारित्वस्य शास्त्रीयत्वात्। यदि च प्राप्तव्यवहारेण भ्रात्रा तद्वाणिज्यव्यापारमूलीभूतस्वोपार्जितधनं साधारणपैतृकादिधनाद्युपघातेन नार्ज्जितं स्यात् तदा साधारणपैतृकादिधनाद्यनुपघातार्ज्जितं धनं ज्येष्ठभ्रातुरसाधारणं जातम्। अतस्तद्धनेन कृतो यो वाणिज्यव्यापारस्तत्र व्यापारे यदि भ्रातृत्वेनांशित्वेनार्थात् साधारण्यप्रतियोगित्वेन कनिष्ठभ्रातुः शरीरायासस्तदा तद्वाणिज्यव्यापारोत्पन्नद्रव्ये कनिष्ठभ्रातुस्तृतीयांशाधिकारः, ज्येष्ठभ्रातुरसाधारणधनशरीरायासाभ्यां तद्धनोपार्जकत्वेनांशद्वयाधिकारित्वेन शरीरायासमात्रकर्त्तुः कनिष्ठभ्रातुस्तृतीयांशाधिकारित्वस्य शास्त्रीयत्वात्। यदि च प्राप्तव्यवहारेण भ्रात्रा तद्वाणिज्यव्यापारमूलीभूतस्वोपार्जितधनं साधारणपैतृकादिधनाद्युपघातेन नार्जितं स्यादेवं तद्धनेन कृतो यो वाणिज्यव्यापारस्तत्र व्यापारेऽपि भ्रातृत्वेनांशित्वेनार्थात् साधारण्यप्रतियोगित्वेन कनिष्ठभ्रातुः शरीरायासोऽपि नासीत्, यदि चेत् शरीरायासस्तदा

सोऽपि भृत्यत्वेनार्थाद् वेतनग्राहित्वेन, वस्त्रसुगन्धिततज्जयपत्रलिखित-सिद्धीदासीप्रत्यर्थिनीनिर्दिष्टोत्तरपत्रलिखिततात्पर्यार्थेनार्थाद् अर्थी तद्वाणिज्यव्यापारे भृत्यत्वेनार्थाद्वेतनं गृहीत्वा गुमास्ताशब्दप्रतिपाद्यत्वेन स्थित इत्यनेनावगम्यते तदा तद्वाणिज्यव्यापारोत्पन्नद्रव्ये कनिष्ठभ्रातुरंशित्वेन किञ्चिदपि ग्रहणाधिकारिता नास्ति, साधारणधेनुकादिधनाद्यनुपघातेन स्वोपार्जितधनस्य ज्येष्ठभ्रातुरसाधारणधनत्वेनासाधारणस्वत्वास्पदीभूतेन तेन धनेन कनिष्ठभ्रातुर्भ्रातृत्वेनांशित्वेनार्थात् साधारणधनप्रतियोगित्वेन शरीरायासमन्तरेण ज्येष्ठभ्रातृकृततद्वाणिज्यव्यापारोत्पन्नद्रव्ये ज्येष्ठभ्रातुरेवासाधारणस्वत्वेन, तत्र कनिष्ठभ्रातुरसाधारणस्वप्रतियोगिनः किञ्चिदपि स्वत्वाभावात् —इति वङ्गदेशान्तर्गतश्रीहट्टप्रदेशप्रचलितदायभागदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥

तस्य भागद्वयं देयं शेषास्तु समभागिनः—इति दायभागादिग्रन्थधृत(दाभा० पृ० १०७)व्यासवचनम् ॥ १ ॥

यत्र पुनः साधारणधनमात्रेणैकस्य व्यापारोऽपरस्य धनशरीरायासाभ्यां तत्रैकस्यैको भागोऽपरस्य भागद्वयं न्यायावगतमेव निबद्धम् । एतेन चैतदपि सिद्ध्यति यत् साधारणधनोपघाते सति यस्य यावतोंऽशस्य स्वल्पस्य महतो वोपघातस्तस्य तदनुसारेण भागकल्पना कार्या—इति दायभाग(पृ० १०९।११०)ग्रन्थलिखनम् ॥ २ ॥

तस्मात्साधारणधनोपघातार्जितं धनं विभजेदिति विधेः—इति दायभाग(पृ० ११५)ग्रन्थलिखनम् ॥ ३ ॥

तस्मादनुपघातार्जितमर्जकस्यैव, नेतरेषामिति सिद्धम्—इति दायभागग्रन्थलिखनम् (पृ० ११२) ॥ ४ ॥

एवं यत्रैकेन शरीरव्यापारमात्रेणापरेण च स्वधनशरीरायासाभ्याम-

र्ज्जितं तत्र शरीरायासमात्रेणार्ज्जकस्यैकांशित्वं धनशरीरायासाभ्यामर्ज्ज- कस्य द्व्यंशित्वं न्यायसाम्यात्--इति दायक्रमसंग्रह(पृ० २८)ग्रन्थ- लिखनम् ॥५॥

विभक्तेनाविभक्तेन वा साधारणधनानुपघातेनापरव्यापारनैरपेक्ष्येण च यदर्ज्जितं तदर्ज्जकस्यैव तदविभाज्यमितरैः--इति दायक्रमसंग्रहग्रन्थ- (पृ० २२)लिखनम् ॥ ६ ॥

एतदब्दीयमार्चमासीयचतुर्दशदिनसम्बन्धिवृहस्पतिवासरे मयेयं व्य- वस्था दत्तेति—

श्रीज्जयगोपालस्य—

श्रीवैद्यनाथमिश्रस्य

३३२५ नं—

२१—रोवकारी मिछिल सदर देओयानि आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिसपीएर साहेबेर बैठके, तारिख ५ फिब्ररेल ई सन १८३३ साल मोताबेक बाङ्गला सन १२३९ साल तारिख २५ माघ दिवस मङ्गलवार—

गोशाञीचन्द्रकविराज	आपीलाण्ट
मोछम्मात जयमनी जीवतमान	
ओ कृष्णमणि मोतओफात	रेस्पाण्डण्टान

आपीलाण्टेर उकिल मुनशी हयदर आलि ओ रेस्पाण्डण्टानेर मध्ये जीवतमान एक जन मोछम्मात जयमणिर उकिल मुनशी गोलाम रसुल हाजिर आइल। एवं इस्तहारनामा जारि हओयाते ओ कृष्णमणी मोतओफात रेस्पाण्डण्टेर कोनो ओयारिश ए आदालते हाजीर आइल ना। एइ मोकद्दमा इत पूर्व्वे ई० सन १८३२ सालेर शेतम्बर माहार ० तारिखे आमार बैठके रोव- कार एवं साम्यक[1] कागजात पडा हइया तारिख मजकुरेर रोवकारिर लिखित मते एइ आदालतेर पण्डितेर स्थाने व्यवस्था

---

१ सम्बलित-इति साधीयान् पाठः।

तलव हइया आर व्यवस्था पौछिले पर गतो कल्य दरपेष हइया ताहार अनुमोधनान्ते दिवावसान प्रयुक्त मुलतवि छिल, अद्य पुनराय दरपेष हइल। एइ आदालतेर पण्डितेर व्यवस्थार लिखित यश्रोयावेर द्वाराय एइ मोकद्दमार आशल मुद्दाइयान मोछम्मात कृष्णमणी ओ जयमनीके भैरवकविराजेर तरफेर जोवानि हेवार सत्वतार विषये जेलार आदालतेर व्यवस्था वहाल हइते छे। किन्तु जेलार फयछलार द्वाराते, याहा प्रविनशीयान कोटेर तजविज कालिन वहाल हइयाछे, प्रकाश हय ना ये कृष्णमणीर हक भैरवेर हेवार वुनियादे किम्बा आपन पिता गङ्गानारायणेर उत्राधिकारिर हकेर वुनियादे डिगरि हइयाछे। ये कारण फयछला मजकुरेते उहार हक दुइ प्रकारेइ जप्त[1] (?) हइयाछे, आर एइ क्षणे एइ विशय मोकद्दमार तजविजे मातवर हइयाछे ये हेतुक मोछम्मात कृष्णमणीर प्रविनशीयान कोटेर फयछलार पर मृत्यु हइयाछे, परे एइ विशयेर तलास आर तजविज उचित ये कृष्णमनीर हिस्यार पर उभय विवादिर मध्ये कोन व्यक्ति हकदार हइते पारे। आर पण्डितेर व्यवस्थार द्वाराते प्रकाश ये यद्यपि स्यात् मोछम्मात कृष्णमणी विवादीय वस्तु हेवार द्वाराय पाइया थाके, वस्तु मजकुरा ताहार स्त्रीधन हइवेक, आर उहाके क्षमता आछे ये आपन इतसा मते हस्तान्तर करिते पारे, ये प्रकार जयमनी रेष्पाडण्ट एइ आदालतेर आपीलेर मौजेवातेर जश्रोयावे ताहा उहाके हेवाकरण प्रकाश करियाछे। आर यदि स्यात् विवादीय वस्तु मोछम्मात मजकुराके पितृ उत्राधिकारिर सुरते पौछियाछे, आर आपीलाण्टेर पिता वैद्यनाथेर परे, ये प्रकार मोकद्दमार कागजातेते प्रकाश, मोछम्मात मजकुरार मृत्यु हइयाछे, तवे ए प्रकारे पण्डितेर व्यवस्था मते मोछम्मात कृष्णमणीर हकीयतेर हकदार ना आपीलाण्ट ना रेष्पाडण्ट हइते पारे। यदि गङ्गानारायणेर ओयारिष, ये केहो थाके, उहार हक राखिवेक। एइ सकल विशयेर प्रति

१. जद—व्यप०।

दृष्टि हुकुम हइल, ये जयमणीर प्रकाश करा मोकद्दमांत कृष्णमणीर हेवार विषये ये प्रकार एइ आदालतेर आपीलेर मौजेवातेर यश्रोयावे लिखियाछे, रेष्पाडण्टेर स्थाने सावुद तजवेर पूर्व्वे एइ आदालतेर पण्डितेर स्थाने जिज्ञाशा कराजाय ये यदि स्यात् कोन व्यक्ति मिलकियतेर दावि उत्तराधिकारिर एवं दानेर दुइ बुनियादे दरपेष करे, आर दुइ मतेइ डिगरि हासिल करे, आर ततरे आपन हकीयत दोशराके हेवा करिया मृत्यु करे—ए प्रकारे एमत हेवा सिद्ध हइते पारे कि ना इति—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीमिकिसगीयरसाहेवधर्म्माधिकरणलिखितैतदब्दीयफेवरवरीमासीयसप्तमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयषड्विंशतितमदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि काचित् स्त्री धनस्य प्राप्तीच्छापूर्व्वकाभियोगमुत्तराधिकारित्वदानाभ्यां करोति, एवमुत्तराधिकारित्वदानाभ्यां द्वाभ्यामेव हेतुभ्यां धर्म्माधिकरणतो जयपत्रं प्राप्नोति, तदनन्तरं धर्म्माधिकरणीयजयपत्रानुसारेण स्वस्वत्वास्पदीभूतधनमन्यस्मै दत्त्वा मृता स्यात्तदैतादृशदानं सिद्ध्यत्येव, उत्तराधिकारित्वदानाभ्यां द्वाभ्यामेव तस्याः स्वत्वस्य तद्धने निश्चितत्वेन द्वयोर्म्मध्ये दानस्यापि तत्स्वत्वोत्पादकस्य सत्त्वात् । एतद्विवादविषयनिविष्टास्मद्दत्तप्राचीनव्यवस्थालिखितप्रकारकतद्दानानुसारेण तस्यास्तस्मिन् सौदायिकस्त्रीधने स्वेच्छया दानाधिकारस्य निष्प्रत्यूहत्वात्—इति वङ्गदेशचलितोपरिलिखितव्यवस्थालिखितग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

तद्व्यवस्थालिखितपञ्चमप्रमाणं षष्ठप्रमाणञ्चेति । एतदब्दीयमार्च्चमासीयाष्टादशदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

२२—रोवकारि मिसिल सदर देओयानी आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत रिचार्ड ओयालपोल साहेवेर वैठके। तारिख २० फिवरेल इं सन १८३३ साल मों वाङ्गला सन १२३९ साल तारिख १० फाल्गुन दिवस वुधवार—

मोछम्मात लक्ष्मीप्रिया आपीलाण्ट

भैरवचन्द्रचौधुरि ओ गयरह् रेष्पाडेण्टान्

आपीलण्टेर उकिल मुनसि होसन आलि ओ हाजिर रेष्पाडेण्टर उकिल सदासुखपण्डित हाजिर आइल। आर द्वितीय रेष्पाडेण्ट जयचन्द्रचौधुरि इयानामा ओ इस्ताहारनामा जारि हओयातेओ सयं किम्वा उकिलेर द्वाराय हाजिर नाइ। एइ मकर्द्दमा गतो जानेर माहार ९ तारिखे आमार वैठके रोवकार एवं एइ मकर्द्दमार साम्यक कागजात आर ३०२६ लम्वरेर मकर्द्दमार कागजात आर कमलाकान्तराय ओ गयरह् वनाम गङ्गाचरणसेनेर खास आपिलेर छओयाल ओ तत्सम्भिव्यारि कागजात पडा हइया तारिख मजकुरेर रोवकारिर लिखित छओयालेर जओयाव एइ पण्डितेर स्थाने तलव हइया मुलतवि छिल, अद्य एइ आदालतेर पण्डितेर जओयाव दाखिल हओने पुनुराय रोवकार आर गतो जानेन माहार २९ तारिखे अनुमोधन हओया भैरवचन्द्र रेष्पाडेण्टर छओयाल अनुमोधने आइल। तत्परे हाजिर रेष्पाडेण्टर उकिल सदासुखपण्डित कोट आपीलेर दाखिल करा रेष्पाडेण्टर छओयालेर नकल एक केता दुइ टाकार किम्मतेर एक केता फिरिस्तिर द्वाराय दाखिल करे, पडागेल। यदि स्यात् एइ आदालतेर पण्डितेर जओयाव हइते प्रकाश आछे ये कृष्णचन्द्रेर पुत्र किर्त्तिचन्द्रेर त्याज्य वस्तु, ये ताहार माता जयदुर्गाते आसिया, जयदुर्गार मृत्युते किर्त्तिचन्द्रेर भग्नी पूर्णिमार पुत्र व्रजनाथके अर्शे। किन्तु रेष्पाडेण्टर उकिल जाहेर करे जे छिवादीय जायेगा जयदुर्गार मृत्यु हओने भैरवचन्द्रेर दखले आइसे। एवं एखन

পর্য্যন্ত তাহার দখলে আছে, আর পূর্ণিমার পুত্র ব্রজনাথের মৃত্যু হইয়াছে। আর মোকদ্দমাত পূর্ণিমার সেত্রী রোগি আছে, শাস্ত্রানুসারে বৈমাত্রেয় ভ্রাতার কিম্বা তাহার পুত্রের ত্যাজ্য বস্তুর অধিকারিত্ব রাখে না। এতদ্‌ভিন্ন মোকদ্দমাত পূর্ণিমার বিবাহ, জাহার সহিত নিঃধার্য্য হইয়াছিল পরে তাহার সহিত না হইয়া অন্য ব্যক্তির সহিত বিবাহ হইয়া পুত্র উৎপত্তি হয়, আর এ প্রকার স্ত্রী এবং পুত্র পার্ব্বণের শ্রাদ্ধের ও পূর্ব্বপুরুষের ত্যাজ্য বস্তুর অধিকারি হয় না, আর জখন মুদাইআনের দাবি কোর্টের পণ্ডিতের ব্যবস্থার লিখিত, যে লক্ষ্মীপ্রিয়ার বিবাদীয় জায়গার অধিকারিত্ব নাই, দৃষ্টে ডিসমিস হয় তখন রেস্পাডেণ্টর ওজরের তত্ত্ব ও তদান্ত করণের আবিশ্বক থাকিল না। জে প্রকার প্রিবিনসিয়ান কোর্টের ফয়ছলা তাহার দৃষ্টান্ত আছে। আর আপীলাণ্টের উকিল জিজ্ঞাসা মতে জাহের করে যে পূর্ণিমার পুত্র ব্রজনাথের এই দমণে মৃত্যু হইয়াছে, আর এখন পর্য্যন্ত তাহার পুত্র হওনের সম্ভাবনা আছে, আর মোকদ্দমাত মজকুরার বিবাহ দুই বার হয় নাই, এবং তাহার সেত্রি রোগ নাই ইতি। যদ্যপি স্যাৎ মোকদ্দমা নিষ্পত্ত্য হওনের পূর্ব্বে বিচার অনুসারে উভয় বিবাদীর ওজর নিষ্পত্ত্য করা উচিত। এ কারণ হুকুম হইল যে এই রোবকারির নকল এই হুকুমে জে নিচের লিখিত ছওয়ালের জওয়াব আগতো মিছিলে লেখেন এই আদালতের পণ্ডিতকে সমার্পন করা জায়।

১ প্রথম—এই যে যদি স্যাৎ পূর্ণিমার পুত্র ব্রজনাথের জন্ম হইয়া মৃত্যু হইয়া থাকে, তবে কিত্তিচন্দ্রের ত্যাজ্য বস্তু, যাহা ব্রজনাথকে আসিয়াছিল, তাহা তাহার মাতাকে অর্শে কি না।

২ দ্বিতীয়—এই যে পূর্ব্বপুরুষের বস্তুতে উত্তরাধিকারি ব্যক্তি সেত্রি রোগ জন্য তাহার অধিকারিত্বতে প্রতিবন্ধক হয় কি না। যদ্যপি স্যাৎ উক্ত সেত্রিরোগ অধিকারিত্বর প্রতিবন্ধক হয়, তবে

व्रजनाथेन[1] त्याज्य्य वस्तु ताहार मातामहि मोछम्मात लक्ष्मीप्रियाके अर्शिवेक कि ना।

३ तृतीय––एइ ये मोछम्मात पूर्णिमार विवाह कोन व्यक्तिर सहित निःधार्य्य हइया पूर्व्व कथवकथनेर वहिर्भूत हइया अन्यकोन व्यक्तिर सहित विवाह हय आर ताहा हैते ताहार पुत्र सन्तान जन्मिया थाके। ए मते मोछम्मात पूर्णिमा किम्वा ताहार पुत्र कीर्त्तिचन्द्रेर त्याज्य वस्तुर अधिकारि हइवेक कि, पूर्णिमार माता लक्ष्मीप्रिया इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओआलपोलसाहेवधर्म्माधिकरणलिखितैतदब्दीयफेवरवरीमासीयविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयमार्च्चमासीयषोडशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

यदि पूर्णिमापुत्रो व्रजनाथ उत्पन्नो भूत्वा मृतः स्यात् तदा कीर्त्तिचन्द्रस्य त्यक्तधनं यदुत्तराधिकारित्वेन व्रजनाथेन प्राप्तम्, तद्धने यदि व्रजनाथस्य पुत्रमारभ्य पितृपर्य्यन्तानां मध्ये कश्चिन्नास्ति तदा तन्मातुरेवाधिकारइति।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतः—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

द्वितीयप्रश्नस्योत्तरम्—

यद्युत्तराधि(कारि)व्यक्तेः श्वेतरोगस्तदा यथाशास्त्रप्रायश्चित्ताचरणं विना पूर्व्वाधिकारित्यक्तधने अधिकारस्य प्रतिरोधो भवत्येव, यथाशास्त्रप्रायश्चित्ताचरणे सत्यधिकारस्य प्रतिरोधो न भवतीति।

---

१. व्रजनाथेर—इति साधीयान् पाठः।

अत्र प्रमाणम्—

मृते पितरि न क्लीबः कुष्ठ्युन्मत्तजडान्धकाः ।

पतितः पतितापत्यं लिङ्गी दायांशभागिनः ॥—इति दायभागादि-ग्रन्थधृतदेवलवचनम् ॥१॥

कुष्ठी अकृतप्रायश्चित्तः । कृतप्रायश्चित्तस्य पापाभावादंशित्वम्, पापस्यैवानंशितामूलत्वादिति साम्प्रतम्—इति विवादभङ्गार्णवग्रन्थ-(पृ० २१२ क)लिखनम् ॥२॥

तृतीयप्रश्नस्योत्तरम्—

यदि पूर्णिमाया विवाहः केनचिद् व्यक्तिविशेषेण सह निर्द्धारितोऽपि पूर्व्वकथाबहिर्भाविवान्येन केनचित् सह विवाहो जातः स्यादेवं तेन पुरुषेण पूर्णिमायाः पुत्रो जनितश्चेत्तदा तस्याः पूर्णिमायाः किंवा[1] तत्पुत्रस्य कीर्त्ति-चन्द्रत्यक्तधने एतद्विवादविषयनिविष्टास्मद्दत्तपूर्व्वव्यवस्थालिखितप्रकारेणा-धिकारो भवत्येव—इति वङ्गदेशचलितोपरिलिखितव्यवस्थालिखितग्रन्था-नुसारिणी व्यवस्था—

एतदब्दीयमार्च्चमासीयषड्विंशतितमदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति—

श्रीज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

———

२३—रोवकारि मिछिल सदर देओयानि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत रिचार्ड ओयालपूल साहेवेर वैठके, तारिक २० फिव्ररेल इं सन १८३३ साल मोतावेक वाङ्गला सन १२३९ साल तारिख १० फाल्गुन दिवस वुधवार—

दुलारसिंह ओ गयरह — आपीलाण्टान्

राणी पद्मावती ओ गयरह — रेष्पाडण्टान्

---

१. किम्वा—व्यप० ।

आपीलाण्टानेर उकिलान् मुनशी होशन आलि ओ मुनशी आज्वोक्ष आलि आर राणी पद्मावती रेप्पाण्डण्टेर उकिलान् सदासुखपण्डित लाला बस्तिलाल हाजिर आइल ओ आपीलाण्टानेर उकिल मुनशी दादार बक्स ओ रेप्पाण्डण्टेर उकिल मुनसी गोलाम वतुल वेयारामी ओजरे हाजिर नाइ। एइ मोकद्दमा एइ मासेर १४ तारिखे आमार वैठके रोवकार हइया प्रीविनशीयान कोर्टेर नालिसि आरजि ओ गयरह कागजात लम्बर पर्य्यन्त पडा हइया मुलतवि छिल, अद्य पुनराय रोवकार हइया प्रीविनशीयान कोर्टेर बाकि कागजात फयछला पर्य्यन्त एवं एइ आदालतेर कागजात अनुमोधने आइल। बोध हइल ये आपीलाण्टान सावेक मुद्दाइयान परगणे पौयाखालि ओ गयरह महालते खेराजी ओ नाखेराजी दखल पाओनेर दाविते एइ एजहारे नालिस करे ये परगणे पौयाखालि ओ गयरह मुद्दाइआनेर पितामह गरिवदासेर हासिल करा, उक्त गरिवदास ताहाते जिवद्दशा पर्य्यन्त दखलिकार थाकिया पाच पुत्र हरिसिंह ओ जयसिंह ओ रनसिंह ओ भानुसिंह ओ अचलसिंह मुद्दाइआनेर पिताके राखिया मृत्यु हय। हरिसिंह ओ ताहार मृत्युर पर शुभकरणसिंह तस्य पुत्र आर शुभकरणसिंहेर मृत्यु, ये सन १२१६ सालेर फाल्गुन माहाते हइयाछे, ताहार पर पहुपतसिंह आर पहुपतसिंहेर मृत्युर पर रङ्गलालसिंह भ्रातृगण ओ पितृव्यदिगेर अनुमति ओ एतर्फाके पितृ-पितामह त्याज्य वस्तुर पर एवं चकदेनाओरि ओ गयरहर उपर, याहा ताहार मुनाफा हइते खरिद हय, कावेज ओ दखलिकार एवं उसुल तहशीलेर कर्म्मकर्त्ता थाकिया, भ्रातृगण ओ पितृव्यदिगेर एवं मुद्दाइआनेर प्रतिपालन करितेछिल। रङ्गलालसिंहेरओ सन १२३२ साले निःसन्तान ओ अविवाहित विणा ओछी मोकरार मृत्यु हइल, आर मुद्दाइआन व्यतिरेक उहारदिगेर उत्तराधिकारि ओ पिण्डाधिकारि द्वितीय केह नाइ, एवं शास्त्रानुसारे मृत रङ्गलालसिंहेर श्राद्ध ओ क्रिया-

কর্ম্মে তুলারসিংহ মুদ্দাইর হস্তেতে হইয়াছে, ইতি। রাণী পদ্মাবতী মুদ্দাআলেহে জওয়াব দেয় যে পরগণে পৌয়াখালি হরিসিংহের হাসীল করা, আর চকদেনাওরি ও গয়রহ মুদ্দাআলেহের স্বামী পহুপতসিংহের পিতা শুভকরণসিংহের খরিদা। মুদ্দাআলেহের স্বামী পুত্যপুত্র রাখনের বিষয়ে উহাকে অনুমতি দেয় আর রঙ্গলালসিংহ কর্ত্তাপুত্র রাখনের ভার উহার প্রতি অর্পন করিয়া এক কেতা ওচ্ছীয়তনামা এ বিষয়ের লিখিয়া মৃত্যু হয়। আর পূর্ব্ব পুরুষের শ্রাদ্ধ ও ক্রিয়াকর্ম্মতে আপনি অশক্ত থাকন প্রযুক্ত ত্যাজ্য বস্তুর কর্ত্তার উত্তরাধিকারি তাহার ত্যাজ্য বস্তু হইতে নৈরাস হইতে পারে না। আর অমৃতলাল ও চরঞ্জীলাল ও কালীপ্রসাদ ও বিশনলাল মুদ্দাআলেহের জওয়াবের মজমুন কবুল করিয়া জওয়াব গুজরায়। আর প্রীবিনসিয়ান কোর্টের তজবিজ কালিন মুদ্দাইআনের দাবি ডিসমিস হয়। যদি স্যাৎ কাগজাত হইতে প্রকাশ যে মুদ্দাইআনের আশল দাবি রঙ্গলালের ত্যাজ্য বস্তুর বাবত, আর গরিবদাস ও গয়রহের ত্যাজ্য বস্তুর উল্লিক করার কারণ কিরল (?) পূর্ব্ব পুরুষের পরস্পর মৃত্যুর বিবরণ প্রকাশ জন্য লেখা গিয়া ছে। আর আপীলাণ্টানের এজহার এই যে উহারদিগের বংশে মৈথিলি শাস্ত্র চলন আছে—উচিত বোধ হয়। এবং রেষ্পাডণ্টও তাহাতে অস্বীকার নহে। এ প্রযুক্ত এই মোকদ্দমার এই তজবিজ ও রোধকরণ যে রঙ্গলালসিংহ, যে অবিবাহিত ও নিঃসন্তান মৃত্যু হইয়াছে, তাহার ত্যাজ্য বস্তুর উত্তরাধিকারিত্ব উভয় বিবাদি ও তৃতীয় ব্যক্তির মধ্যে কোন ব্যক্তি মৈথিলি দেশের প্রচলিত শাস্ত্রানুজাইক রাখে। পরে হুকুম হইল যে এই রোবকারির নকল এই হুকুমে যে ছওয়ালের যওয়াব যে বিবাদীয় জমীদারী হরিসিংহ হইতে হরিসিংহের পুত্র শুভকরণসিংহে আর শুভকরণসিংহের মৃত্যুর পর শুভকরণসিংহের জ্যেষ্ঠ পুত্র পহুপতসিংহে, আর পহুপতসিংহে মৃত্যুর পর শুভকরণসিংহের কনিষ্ঠ পুত্র রঙ্গলালসিংহে বিনা বিভাগে অর্শিল। তৎপরে

रङ्गलाल निःसन्तान ओ अविवाहित मृत्यु ह्य, राखिल मुद्दाइयान अचलसिंहेर पुत्रगण आर अर्ज्जनसिंह रणसिंहेर पुत्र आर तुलसीसिंह भातुसिंहेर पुत्र गरिवदासेर पुत्रगण हरिसिंहेर भ्रातृवर्ग आर मोछम्मात पद्मावती मुद्दाआलेहे पहुपतसिंहेर स्त्री आर शुभकरणसिंहेर दौहित्र उपेन्द्रलाल ओ दयालाल ओ गिरिधारिलाल ओ प्रेमलाल ओ जनकलालके परे। मैथिलि देशेर प्रचलितशास्त्र अनुजाइक रङ्गलाल मजकुरेर त्याज्य वस्तु इहारदिगेर कोन व्यक्तिके अंशिवेक—एक सप्ताह मध्ये वचन दृष्टान्त सम्बलित लिखेन एइ आदालतेर पण्डितके समर्पन कराजाय—इति।—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डश्रोआलपोलसाहेबधर्म्माधिकरणलिखिततदब्दीयफेबरवरीमासीयविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयमार्च्चमासीयषोडशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि विवादास्पदीभूतसराजकरस्थावरं (धनं) हरिसिंहस्य मरणानन्तरं तत्पुत्रेण शुभकरणसिंहेन प्राप्तम्, शुभकरणसिंहस्य मरणानन्तरं तज्ज्येष्ठपुत्रेण[1] पुहपतिसिंहेन प्राप्तम्, तन्मरणानन्तरं तद्भ्राता रङ्गलालसिंहेनार्थात् शुभकरणसिंहस्य कनिष्ठपुत्रेणाविभक्तत्वेन प्राप्तम्, तदनन्तरं रङ्गलालसिंहोऽविवाहितो निस्सन्तान एवाचलसिंहस्य पुत्रानर्थिनः एवं रणसिंहस्य पुत्रमर्ज्जनसिंहं भातुसिंहस्य पुत्रं तुलसीसिंहं चैवं पुहपतिसिंहस्य पत्नीं पद्मावतीनाम्नीं प्रत्यर्थिनीं चैवं शुभकरणसिंहस्य दौहित्रानुपेन्द्रलालदयालालगिरिधारीलालप्रेमलालजनकलालान्[2] संरक्ष्य मृतः स्यात्तदा रङ्गलालत्यक्तधने रङ्गलालस्य पुत्रमारभ्य तत्प्रपितामहपुत्रपर्य्यन्तानामर्थाद् गरीवदासस्य पुत्रपर्य्यन्तानाम्मध्ये यदि कश्चिन्नास्ति तदा रङ्गलालप्रपितामहगरीवदासपौत्राणामर्थादर्थिप्रभृतीनां प्रभुकृतप्रश्नलिखितानामधिकारो रङ्गलालभ्रातृपत्नो पद्मावती यावज्जीवं स्वभर्त्तृकुलोपयुक्तग्रासाच्छादनस्यावश्यक-

---

१. तत्कज्येष्ठ०—व्यप०। २. ०जनकलालान—व्यप०।

विधवाधर्म्माद्याचरणोपयुक्तस्य चाधिकारिणी भवति—इति मिथिलादेशचलितमनुविवादचिन्तामणिविवादरत्नाकरविवादचन्द्रकल्पतरुप्रभृतिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धुः—इत्यादिविवादचिन्तामण्यादिग्रन्थधृतयाज्ञवल्क्य वचनम् ॥१॥

बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।

यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत् ॥—इति विवादचन्द्रविवादरत्नाकरादि (वि० पृ० ५९६) ग्रन्थधृतबृहस्पति(पृ० २१६)वचनम् ॥२॥

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत् ।—इति मनुवचनम् ॥३॥

अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे मातृगामि तदभावे पितृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि तदभावे बन्धुगामि तदभावे सकुल्यगामि—इत्यादि विवादचिन्तामण्यादिग्रन्थधृतविष्णुवचनम् ॥४॥

बन्धुरत्र सपिण्डः सकुल्यः सगोत्रः—इति विवादचिन्तामणि(पृ० २३६)ग्रन्थलिखनम् ॥५॥

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते—इत्यादि विवादचिन्तामण्यादिग्रन्थधृतबृहस्पतिवचनम्[1] ॥६॥

भरणं चास्य कुर्व्वीरन् स्त्रीणामाजीवनक्षयात्—इति विवादचिन्तामण्यादि(पृ० २५०)ग्रन्थधृतशङ्खवचनञ्चेति ॥७॥

एतदब्दीयापरेलमासीयतृतीयदिनसम्बन्धिबुधवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१. बृहन्मनु–इति, धर्मो० ।

२४—रोवकारि मिसिल सदर देओयानि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत रिचार्ड ओयाल-पोल साहेबेर बैठके। तारिख २५ आपरेल इं सन १८३३ साल मोतावके वाङ्गला सन १२४० साल तारिख १४ वैशाख दिवस वृहस्पतिवार—

मसम्मात लक्ष्मीप्रिया	आपीलाण्ट
भैरवचन्द्रचौधुरि ओ गयरह	रेप्पाडेण्डान

आपीलाण्टेर उकिल मुनसि होसन आलि ओ हाजिर रेप्पा-डेण्ड भैरवचन्द्रचौधुरिर उकिल सदासुखपण्डित हाजिर आइ-लेन, आर द्वितीय रेप्पाडेण्ड जयचन्द्रचौधुरि इयानामनामा ओ इस्ताहारनामा जारि हेतु आपनि किम्वा उकिलेर द्वाराय ए आदालते हाजिर नाइ। एइ मोकद्दमा भिन्न २ दिवसे आमार बैठके रोवकार हइया एइ आदालतेर पण्डितेर व्यवस्था ओ कागजात आर उभयेर दाखिल करा दरखास्तादी पडा हइया व्रजनाथेर पिताके दरखास्त दाखिल करण हुकुम हइया मुलतवि छिल, अद्य पुनुराय रोवकार आर व्रजनाथेर पिता गौरमोहनचट्टोपाध्यार दरखास्त ओ व्रजनाथेर माता मोसम्मात पूर्णिमार दरखास्त पडा गेल। यदि स्यात् एइ आदालतेर पण्डितेर पूर्व्वेर ओ एइ क्षनेर व्यवस्थासकलेर द्वाराय प्रकाश आछे ये कीर्त्तिचन्द्रेर त्याय्य वस्तु व्रजनाथके, आर यदि स्यात् पूर्णिमार पुत्र व्रजनाथेर जन्म हइया मृत्यु हइयाथाके, तवे कीर्त्तिचन्द्रेर त्याय्य वस्तु, याहा उत्तराधि-कारि हेतुते व्रजनाथके अर्शियाछिल, यदि व्रजनाथेर इस्तक पुत्र नां(?)पिता केह ना थाके, तवे ताहार माताके अर्श, आर शेत्रि-रोगेर प्रायश्चित्त करणेते सेत्री रोगी व्यक्ति उत्तराधिकारिर वाधि-त्य(?)पूर्व्वपुरुसेर विशयेते हय ना। किन्तु व्रजनाथेर पिता गौर-मोहनचट्टोपाध्याय वर्त्तमान आछे। आर मोछम्मात पूर्णिमा जाहेर करे ये विवादीय वस्तु आमार पितार त्याय्य वस्तु, ओ ताहार विज पुरुसेर, एवं उक्त मोसम्मात सन्तान हओनेर आ-

स्वास राखे। आर एइ आदालतेर पण्डितेर पूर्व्वेर व्यवस्थाते विस्तारित करिया लेखा गियाछे ये यदि मोसम्मात जयदुर्गार मृत्युर समये कीर्त्तिचन्द्रेर पितार कोनो दौहित्र मातार गर्भे ना थाके, किम्वा जन्म ना हइया थाके, ए प्रकारे कीर्त्तिचन्द्रेर भग्नि अर्थात् मोसम्मात पूर्णिमा, ये कीर्त्तिचन्द्रेर पितार दौहित्रगणेर जन्माइवार आकरआछे, पुत्र जन्मान पर्य्यन्त कीर्त्तिचन्द्रेर विषयेते दखलिकार थाकिवेक। एमते कीर्त्तिचन्द्रेर त्याज्य वस्तुर उत्तराधिकारित्य. याहा व्रजनाथके अर्शियाछिल, ताहा उक्त मोसम्मातके अर्शे, ओ ताहार स्वामिके अर्शे ना। यद्यपि चूडान्त हुकुम हओनेर पूर्व्वे शास्त्रेर आज्ञा आपीलाण्ट मोसम्मात पूर्णिमार एजहार यथार्थेर निमित्त वोध करण उचित हइल, ए कारण हुकुम हइल ये एइ रोवकारिर नकल पूर्व्वेर व्यवस्थार सम्वलित एइ हुकुमे ये छओयालेर जओयाव ये कीर्त्तिचन्द्रेर त्याज्य वस्तु, याहा व्रजनाथके अर्शियाछिल, ताहा ताहार माता मोसम्मात पूर्णिमा, ये ताहार स्वामि वर्त्तमान एवं आर पुत्र हओनेर आस्वास राखे अर्शिवेक, कि व्रजनाथेर पिता गौरमोहनचट्टोपाध्यायके, दुइ दिवसेर मध्ये लेखेन, एइ आदालतेर पण्डितके समापन करा जाय। आर व्यवस्था दाखिल हओनेर पर व्रजनाथेर पिता ओ माता गौरमोहनचट्टोपाध्याय ओ पूर्णिमार दरखास्तसकलेर लिखित विषयेते एवं रेष्पाडेण्ट भैरवचन्द्रचौधुरिर ओ ताहार दाखिल करा व्यवस्थार पर विवेचना करा जाइवेक इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओयालपोलसाहेवधर्म्माधिक-रणलिखितैतदब्दीयापरेलमासीयपञ्चविंशतिदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितप्राचीनव्यवस्थाद्वयञ्च यदेतदब्दीयमैमासीयैकादशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

कीर्तिचन्द्रत्यक्तधनं यदुत्तराधिकारित्वेन व्रजनाथेन प्राप्तं तत्र तन्मातुः पूर्णिमायाः सधवायाः पुत्रान्तरसम्भावनायामर्थान्मूलभूतधनस्वामिनः कीर्तिचन्द्रस्य पितुः कृष्णचन्द्रस्य दौहित्रान्तरसम्भावनायां सत्यां तेषां स्वत्वरक्षणान्यथानुपपत्त्या स्वपुत्रस्य व्रजनाथस्योत्पत्तेः प्रागिव तन्मरणानन्तरं स्वपुत्रान्तरोत्पत्तेः प्राक्कालपर्य्यन्तमधिकारः। कीर्तिचन्द्रपितृदौहित्रान्तरसम्भावनायां सत्यां व्रजनाथस्य पितुर्गौरमोहनचट्टोपाध्यायस्य नाधिकारः।

मूलभूतधनस्वामिनः कीर्तिचन्द्रस्य त्यक्तधने उत्तराधिकारित्वेन तत्पितृदौहित्रस्य व्रजनाथस्यैकस्याधिकारे जाते सत्येतद्विवादविषयनिविष्टप्रथमव्यवस्थानुसारेण पुनरुत्पत्स्यमानानां तद्भ्रात्रन्तराणामर्थात् कीर्तिचन्द्रपितृदौहित्रान्तराणामप्यधिकारस्समान एव भविष्यति। अत एव यावत्कालपर्य्यन्तं कीर्तिचन्द्रस्योत्तराधिकारिणां तत्पितृदौहित्राणामुत्पत्तिसम्भावनाराहित्यं न भवति तावत्कालपर्य्यन्तं कीर्तिचन्द्रत्यक्तधने तत्पितृदौहित्रस्य व्रजनाथस्यैकस्य कियत्परिमितोऽंशो भवतीति निश्चयस्य भवितुमशक्यत्वेनेदानीं व्रजनाथस्य पितुर्गौरमोहनचट्टोपाध्यायस्य व्रजनाथत्यक्तकियत्परिमितांशे अधिकारो भवतीति निश्चयस्य भवितुमशक्यत्वात्—इति वङ्गदेशचलितप्रथमव्यवस्थालिखितग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणानि—

प्रथमव्यवस्थालिखितानि सर्व्वाण्येवेति—

एतदब्दीयमैमासीयषोडशदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति—

श्रीज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

२५—रोवकारी मिछिल सदर देओयानि आदालत[1] मजकुरेर हाकिम श्रीयुत रिचार्ड ओआलपुल साहेबेर बैठके। तारिख

१. आदालत आदालत—व्यप.।

२५ आपरेल ईं सन १८३३ साल मोताबक वाङ्गला सन १२४० साल तारिख १४ वैशाख दिवस वृहस्पतिवार—

गोपालस्यहायेर अलि नओयावराय आपीलाण्ट

मोछम्मात भगवती कोङर ओ गयरह रेप्पाडण्टान्

आपिलाण्टेर उकिल सदासुखपण्डित ओ निलवेञ्जमेन एडमेनष्टोन वेलि साहेव, मोछम्मात भगवतीकोङर रेप्पाडण्टेर तरफ हइते आपन नामेर एक केता ओकालतनामा ओ मेहनतआनार वावत एक केता रसिद २५० टाकार एइ आदालतेर तहसिलदारेर दस्तखति सम्वलित दाखिल करिया, ओ जितुलाल रेप्पाडण्टेर उकिल मुनशी फकिर महम्मद हाजिर आइलेन। एइ मासेर १० तारिखे एइ मोकद्दमा आमार वैठके रोवकार हइया नालिसि आरजि ओ गयरह प्रविनशीयान कोटेर कागजात १७४ लम्वर पर्य्यन्त पडा हइया दिवावसान प्रयुक्त मुलतवि छिल। अद्य पुनुराय रोवकार एवं प्रविनशीयान कोटेर वाकी कागजात फयछला पर्य्यन्त ओ एइ आदालतेर कागजात दृष्टे आइल वोध हइल ये आपीलाण्ट सावेक मुद्दाइ विवादीय ग्रामसकलेर दखल पाओनेर दाविते एइ एजहारे नालिश करे ये वायश्रायान छलतुण्डसिंह, ये सन्तानादि राखिनो ना, आपन सहोदर भ्राता वाय छलतुण्डसिंहेर कन्या मोछम्मात राधामोहनकोङरके छलतुण्डसिंहेर अनुमतिमते आपन सन्ताने आनिया प्रतिपालन करिया, छलतुण्डसिंह मजकुरके कहिलेक ये आमि राधामोहनकोङरेर विवाह ओ कन्यादान करिवा, कन्या मजकुरेर गर्भे प्रथम ये पुत्र सन्तान हइवेक आमार विषयेर मालिक ओ पिण्डाधिकारि हइवेक। ताहार जओयावे छलतुण्डसिंह एकरार करिल आर उहाके अनुमति दिल ये कन्या मजकुरेर विवाह ओ कन्यादान करे; कन्या मजकुरेर प्रथम सन्तान आमार ओ तोमार विषयेर ओ मालामालेर मालिक ओ पिण्डाधिकारि हइवेक। तदनुसारे

कन्यादान करिल। नओयावरायेर पिता पेयारिलालेर अनुमति ओ अभिप्राय मते उपरेर लिखित विषये कन्यार विवाह नओयाव-रायेर सहित देओ याइया पुरोहित ओ गयरहर सन्मुखे कुशो आर गङ्गाजलेर सहित कन्यादान एवं पुत्रिकापुत्रेर वचने संकल्प करिल। ये प्रकार राधामोहनकोङरेर पुत्र गोपालस्यहा-येर जन्म हओनेर पर चूडाकरण ओ कर्णभेद ओ गयरह दाँडा-सकल आमले आनिया मृत्यु हइल। मोक्कर्मात भगवतीकोङर आसामी फैरादिर दावि ओ एजहार अस्वीकार एवं कलतुण्ड-सिंहेर रायब्रजराजसिंहके पुष्यपुत्र ओ कर्त्तापुत्र करण एवं ताहार दस्तावेज उहाके लिखिया देओन आर ब्रजराजसिंह मजकुरेर शास्त्रानुसारे कलतुण्ड सिंह मोनओफार क्रिया ओ कर्म करण सम्बलित जओयाव देय। विचारकालिन मुद्दाइर दावि डिशमिप हय इति॥ यदि स्यात् चूडान्त हुकुम हओनेर पूर्व्व शास्त्रेर आज्ञा कलतुण्डसिंहेर गोपालस्यहार पुत्रिकापुत्र आ ब्रजराजसिंह पुष्यपुत्र ओ कर्त्तापुत्र हओनेर विषये बोध करण उचित हइल। एजन्य हुकुम हइल ये एइ रोवकारिर नकल ओ आपीलाण्टेर साक्षीगणेर एजहार ओ ब्रजराजसिंहेर कर्त्तापुत्रेर ओ सन्तानेर दस्तावेज सम्बलित एइ हुकुमे एइ आदालतेर पण्डितके समापन करा जाय ये निचेर लिखित छओयाल सकलेर जओयाव पश्चिम देश प्रचलित शास्त्रानुसारे एक सप्ताह मध्ये, यतो शीघ्र हइते पारे, लिखेन।

१—प्रथम—एइ ये एइ क्षणकार समय अर्थात् कलियुगे निःसन्तान व्यक्तिर आपन सहोदर भ्रातार कन्याके सन्तानत्वेते लओन यथार्थ हय कि ना।

२—द्वितीय—एइ ये यदि स्यात् आपीलाण्ट ओ उहार साक्षीगणेर एजहार छलतुण्डसिंहेर कन्या राधामोहनकोङरके कलतुण्डसिंह आपन सन्तानत्वेते लओनेर विषये ओ कन्यादान ओ पुत्रिकापुत्रेर कथा, उभयत कलतुण्डसिंह ओ छलतुण्डसिंह

ओ नओयावरायेर पिता पेयारिलालेर सहित स्थिर हओने ताहार दाँडासकल आमले आना, याहा मुद्दाआलेहेर अन्य २ साक्षीगण हइते ओ मुद्दाइर साक्षीगणेर एजहारे ऐ विषये सत्वंता करे, कलतुण्डसिंहेर पुत्रिकापुत्र गोपालस्यहाय हइल कि ना।

३—तृतीय—एइ ये यदि स्यात् गोपालस्यहाय पुत्रिकापुत्र हओने उक्त व्यक्ति कलतुण्डसिंहेर त्याज्य वस्तुर मालिक ओ पिण्डाधिकारि हइवेक कि उहार स्त्री भगवतीकोञर।

४—चतुर्थ—एइ ये व्रजराजसिंहके कर्त्ता पुत्र करण ओ सन्तानेते लओन, ये से आपन पितार ज्येष्ठ पुत्र ओ ताहार वयक्रम ३० वत्सरेर अधिक एवं कयेक सन्तान आछे, उचित। किम्वा ताहार सत्वताते उक्त व्यक्तिर पिता मातार अनुमति ओ वयक्रमेर निर्द्धार्य्य एवं आत्मवर्गेर ओ हाकिमेर गोचरेर नियम आछे।

५—पञ्चम—एइ ये यद्यपि व्रजराजसिंह कर्त्तापुत्रेर पर आपन आसल पिता ओ मातार श्राद्ध ओ क्रियाकर्म्म करिया ताहारदिगेर त्याज्य वस्तुर दखलिकार हइया थाके, तवे ताहार कर्त्तापुत्रता यथार्थ ओ वहाल थाकिवेक कि ना।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरिचार्डओआलपोलसाहेवधर्म्माधिकरणलिखितैतदब्दीयापरैलमासीयपञ्चविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितार्थिसद्दियुपस्थापितवृत्तान्तपत्राणि व्रजराजसिंहस्य कृत्रिमपुत्रविषयकपत्रञ्च यदेतदब्दीयमैमासीयैकादशदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

कलियुगे निस्सन्तानेन व्यक्तिविशेषेण स्वकीयसहोदरभ्रातृकन्यायाः सन्तानत्वेनार्थात् कन्यात्वेन ग्रहणं धर्म्मशास्त्रानुसारेण न सिद्ध्यति, धर्म्मः

शास्त्रे तादृशविध्यभावात्, *अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः*—इति विधेरेव धर्म्मशास्त्रीयत्वादिति--

तत्र प्रमाणम् ।

अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः ।

पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च ॥ इति दत्तकमीमांसादत्तकचन्द्रिकादिग्रन्थधृतमनुवचनम्[1] ॥१॥

द्वितीयप्रश्नस्योत्तरम्--

यद्यप्यर्थिनस्तन्निर्द्दिष्टसाद्युपस्थापितवृत्तान्तेन च सिलमन्तसिंहस्य कन्याया राधामोहनकोमराख्यायाः कुलमन्तसिंहेन स्वसन्तानत्वानयनविषये कन्यादानपुत्रिकापुत्रविषये चोभयोः कुलमन्तसिंहसिलमन्तसिंहयोः नवावरायपित्रा प्यारीलालेन सह स्थिरीकरणं तस्य रीतिसमुदायस्य भवनं यत्प्रत्यर्थिनोऽन्यसाक्षिगणैरर्थिसाक्षिसाद्वयेन च सत्यत्वमाप्नोति तथापि गोपालसहायः कुलमन्तसिंहस्य पुत्रिकापुत्रो न जातः एतादृशपुत्रिकापुत्रस्य शास्त्रालिखितत्वात्, औरसदत्तकृत्रिमपुत्रातिरिक्तपुत्राणां कलियुगे विशेषतः शास्त्रनिषिद्धत्वाच्च । एवञ्च सति कुलमन्तसिंहस्य पत्नी भगवती कोमराख्या एव तत्त्यक्तधने अधिकारिणी भवतीति तृतीयप्रश्नस्योत्तरमप्यर्थादत्रैव पर्य्यवसन्नमिति पृथङ् न लिखितमिति ।—

अत्र प्रमाणम्—

अनेकधाकृताः पुत्रा ऋषिभिर्य्यैः पुरातनैः ।

न शक्यास्तेऽधुना कर्त्तुं शक्तिहीनतया नरैः ॥[2] इति दत्तकमीमांसादत्तकचन्द्रिकादिग्रन्थधृतबृहस्पति(पृ० २०७)वचनम् ॥१॥

दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः ।

इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ॥ इति दत्तकमीमांसा दत्तकचन्द्रिकाव्यवहारमयूखमिताक्षराटीकादिग्रन्थधृतशौनकवचनम् ॥२॥

दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रह इति च शौनकेन पुत्रान्तरनिषे-

१. वचनमिदं मनुस्मृतौ नोपलभ्यते । २ शक्तिहीनैर्धिरन्तनैरिति बृस्मृ० पाठः ।

धाद् दत्तौरसावेवाभ्यनुज्ञायेते । दत्तपदं कृत्रिमस्याप्युपलक्षणम्-इति दत्तकमीमांसा(पृ० ३०)ग्रन्थलिखनम् ॥३॥

पत्नी दुहितरश्चैव-इत्यादि मिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥४॥

चतुर्थप्रश्नस्योत्तरम्—

यदि व्रजराजसिंहस्य कृत्रिमपुत्रीकरणमेवं सन्तानत्वे आनयनं यो व्रजराजसिंहः स्वपितुर्ज्येष्ठपुत्र एवं त्रिंशद्वर्षाधिकवयस्कः, कतिपयसन्ताना अपि तस्य सन्ति, तदा मिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारकौस्तुभाद्यनेकग्रन्थमते तस्य कृत्रिमपुत्रत्वं न सिद्ध्यति । दत्तकपुत्रग्रहणविषये ये ये नियमाः मिताक्षरादिग्रन्थेषु लिखितास्ते सर्वे नियमाः कृत्रिमपुत्रविषयेऽपि मिताक्षरादिग्रन्थेषु लिखिताश्च । एवमात्मीयवर्गस्य राज्ञश्च विज्ञापनमन्तरा प्रकारान्तरेण तस्य कृत्रिमपुत्रतायाः सत्यत्वनिश्चये सति मनुमते तस्य कृत्रिमपुत्रत्वं सिद्ध्यति । मनुवचने केवलं सजातीयत्वकृत्रिमपुत्रीकरणयोर्द्वयोरेव कृत्रिमपुत्रकरणे प्रयोजकत्वमिति—

अत्र प्रमाणम्—

एवं क्रीतस्वयंदत्तकृत्रिमेष्वपि योज्यं समानन्यायत्वात्--इति मिताक्षरा(पृ० २२४)ग्रन्थलिखनम् ॥१॥

क्रीतस्वयंदत्तकृत्रिमेष्वपि समानन्यायत्वादेकपुत्रज्येष्ठपुत्रयोर्निषेधः-इति वीरमित्रोदय(पृ० ६१०)ग्रन्थलिखनम् ॥२॥

सदृशं यं प्रकुर्वीत गुणदोषविचक्षणम् ।

पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥ इति मनु(९।१६९) वचनम् ॥३॥

पञ्चमप्रश्नस्योत्तरम्—

यद्यपि व्रजराजसिंहः कृत्रिमपुत्रभवनानन्तरं स्वकीयजनकपितुः स्वजनन्या मातुश्च श्राद्धादिक्रियाः कृत्वा तयोस्त्यक्तधने आयत्तत्वं संपादितवान् स्यात्तदा तस्य कृत्रिमपुत्रत्वं मिताक्षराद्युपरिलिखितग्रन्थानुसारेण न सिद्ध्यति, मनुशुद्धिविवेकग्रन्थानुसारेण सिद्धमपरावर्त्यं च भवितुं शक्नोति-इति पश्चिमदेशचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारमा-

धवव्यवहारकौस्तुभदत्तकमीमांसादत्तकचन्द्रिकाशुद्धिविवेकादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

गोत्ररिक्थे जनयितुर्न्न भजेद्दत्रिमः सुतः ।

गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ इत्यत्र दत्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वात्— इति मिताक्षरा(पृ० २२५)ग्रन्थलिखनम् ॥१॥

स च पुत्रत्वकरस्य पिण्डप्रदः । निजपित्रादीनां पिण्डप्रदत्वं तस्य तिष्ठत्येव— इति शुद्धिविवेकग्रन्थ (पृ० ३१ ख पं० ६)लिखनञ्चेति ॥२॥

एतदब्दीयजुनमासीयत्रयोदशदिनसम्बन्धिवृहस्पतिवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

सओाल—

२६— एक स्त्रीलोक पतिर मरणान्तर आपन पिता मातार स्थावर अस्थावर किञ्चित् विषय पाइया पित्रालय वास करिया भोगवाना थाकिया लोकान्तर हइले ए स्त्रीलोकेर पतिर सहोदर भ्रातार पौत्र ओ भर्त्तार भग्नीर पुत्र वर्त्तमान थाकाते ए अविरा स्त्रीलोकेर मातृ पितृ संक्रान्त प्राप्त स्थावर अस्थावर विषय ए दुइ जनार मध्ये काहाके अर्शिते पारे, यथाशास्त्र सओालेर पाशे शास्त्रेर निदर्शने उत्तर लिखिया पाठाइबा इति—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयजुनमासीयषष्ठदिनसम्बन्धिवृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते— यदि काचित् स्त्री पतिमरणानन्तरं स्वपैतृकं मातृकञ्च स्थावरास्थावरकिञ्चिद्धनं

प्राप्य स्वपित्रालये वासं कृत्वा तद्धने भोगवती भूत्वा मृता स्यादत्र विवादास्पदीभूतं धनं तया उत्तराधिकारित्वेन प्राप्तमिति प्रश्नपत्रेण स्पष्टतरतया अवगमात्तन्मरणोत्तरं तस्याः स्त्रियाः पत्युः सहोदरभ्रातुः पौत्रस्य वङ्गदेशीयाक्षरलिखितप्रश्नलिखितस्य तस्याः पत्युः सहोदरभ्रातुर्दौहित्रस्य वा पारसीकलिपिलिखितप्रश्नलिखितस्य तस्याः पत्युर्भागिनेयस्य च तत्संक्रान्ततत्पितृत्यक्तधने तत्संक्रान्ततन्मातृत्यक्तधने च नाधिकारः। यथा पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य धने पत्न्या उत्तराधिकारित्वेनाधिकारे जाते सत्यपि पत्न्या मरणोत्तरं तद्धनं तत्पत्युत्तराधिकारिणामेव भवति तथा पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य धने दुहितुरुत्तराधिकारित्वेनाधिकारे जाते सत्यपि दुहितुर्म्मरणोत्तरं तत्पितुर्ये उत्तराधिकारिणस्तेषामेव तद्धनं भवति, प्रकृते तु तस्याः स्त्रियाः पत्युः सहोदरभ्रातुः पौत्रस्य तस्याः पत्युः सहोदरभ्रातुर्दौहित्रस्य वा तस्याः पत्युर्भागिनेयस्य वा तस्याः पितुर्म्मातुश्चोत्तराधिकारित्वाभावात्–इति वङ्गदेशचलित-दायभागदायतत्त्व-दायभागटीका-दायक्रमसंग्रह-विवादार्णवसेतु-विवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव–इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम्॥१॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥–इति दायभागादिग्रन्थधृतकात्यायनवचनम्॥२॥

यद्वा पत्नीत्युपलक्षणं स्त्रीमात्राधिकारे अयमर्थो बोद्धव्यः—इति दायभागग्रन्थलिखनञ्चेति। ३॥

इङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयप्रथमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

छओाल—

२७—रामचन्द्रसरकार नामे एक व्यक्ति आपन एक जोत-जमा ओ वैद्यनाथ नामक एक पुत्र राखिया लोकान्तर हय। परे वैद्यनाथ ऐ जमाय दखिलकार थाके। वैद्यनाथ मजकुरेर दुइ स्त्री, तारामणि ओ राधामणि। तारामणि मजकुरार गर्भजात दुइ पुत्र गङ्गाधर ओ राजकुमार। राधामणि मजकुरार गर्भजात एक पुत्र, आनन्दकुमार[1] एवं एक कन्या आदरमणि। ताहार मध्ये आनन्दकुमारेर मृत्यु आपन पिता वैद्यनाथेर समक्षे हय। परे दुइ पुत्र, अर्थात् गङ्गाधर ओ राजकुमार ओ अदत्ता कन्या अर्थात् आदरमणी ओ आपन दुइ स्त्रीके वर्त्तमान राखिया वैद्यनाथ मजकुर परलोक प्राप्त हय। कियत्कालान्तर गङ्गाधर ओ राजकुमार आपन वैमात्रीय अदत्ता भग्नी आदर-मणी ओ माता ओ विमाताके वर्त्तमान राखिया लोकान्तर हय। परे तारामणी मजकुरार मृत्यु हइले राधामणी मजकुरा ताहार श्राद्ध आदि करिया आपन गर्भजात ऐ अदत्ता कन्या आदरमणीर विवाह दिया लोकान्तर हय। एइ क्षण ऐ वैद्यनाथ सरकारेर पुत्रसम्भाविता कन्या आदरमणी ओ वैद्यनाथ मजकुरेर पितृदौहित्र, अर्थात् रामचन्द्रसरकारेर कन्यार पुत्र, श्री ईश्वरचन्द्रवसु वर्त्तमान। अतएव शास्त्र सम्मत वैद्यनाथ मजकुरेर पैतृक स्थावरादि धनेर, अर्थात् जोतजमा मजकुरार, सत्ताधिकारिणी वैद्यनाथेर पुत्रसम्भाविता कन्या श्रीमती आदरमणी किम्वा ताहार पितृदौहित्र ईश्वरचन्द्रवसु अधिकारि हइवेक-इहार यथाशास्त्र ये व्यवस्था हय लिखिवेन इति—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदेतदब्दीयजुनमासीयषष्ठदिनसम्बन्धिबृहस्पति-वासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

---

१. आदन्द—व्यप०।

प्रश्नपत्रलिखितवृत्तान्ते सति मूलभूतधनस्वामिनो रामचन्द्रसरकारस्य मरणानन्तरं तत्त्यक्तधने तत्पुत्रस्य वैद्यनाथस्याधिकारे जाते सति तद्धनं वैद्यनाथस्यैव जातम् । अनन्तरमस्मिन् मृते तत्त्यक्तधने तन्मरणोत्तरं विद्यमानयोर्गङ्गाधरराजकुमारयोर्वैद्यनाथपुत्रयोरधिकारे जाते सति तद्धनं तयोरेव जातम् । अनन्तरं तयोर्म्मरणोत्तरं तयोः पुत्रमारभ्य पितृपर्य्यन्तरहितयोस्त्यक्तधने तयोर्म्मातुस्तारामण्या अधिकारे जाते सति तारामण्या मरणोत्तरं तत्संक्रान्तस्वपुत्रधनं तत्पुत्रयोर्ये उत्तराधिकारिणस्तेषामेव भवति । तत्र च तत्पुत्रयोरुत्तराधिकारिणां मध्ये तयोः पुत्रमारभ्य पितृप्रपौत्रपर्य्यन्तानाम्मध्ये कश्चिन्नास्तीति प्रश्नपत्रेण स्पष्टतरतयावगमेनेदानीं गङ्गाधरराजकुमारयोः पितृदौहित्राधिकारस्य शास्त्रीयत्वेन गङ्गाधरराजकुमारयोः पितृदौहित्रोत्पत्तिसम्भावनायां सत्यां तत्स्वत्वान्यथानुपपत्त्या तयोर्भगिन्या आदरमण्यास्तयोः पितृदौहित्रोत्पत्तिमूलीभूतयोस्तयोस्सम्बन्धमूलीभूतायाश्च स्वपुत्रोत्पत्तेः प्राक्कालपर्य्यन्तम् (अधिकारः) । यथा पुत्रादिपत्नीपर्य्यन्तरहितस्य मृतस्य पितुर्द्धने दुहितुरधिकारस्तथा भ्रातृधनेऽपि (भगिन्या) अधिकारः । गङ्गाधरराजकुमारयोः पितृदौहित्रोत्पत्तिसम्भावनायां सत्यां तयोः पितामहदौहित्रस्येश्वरचन्द्रस्य नाधिकारः । सति च गङ्गाधरराजकुमारयोः पितृदौहित्रे स्वतस्तयोः पितुः पार्व्वणश्राद्धपिण्डदातरि स्वतस्तयोः पितुः पार्व्वणश्राद्धपिण्डदानानधिकारिण्यास्तयोर्भगिन्या आदरमण्या नाधिकारः, किन्तु तस्याः पुत्रस्यैव पुत्राणां वा अधिकारः—इति वङ्गदेशचलितदायभाग-दायतत्त्व-दायभागटीका-दायक्रमसंग्रह-विवादार्णवसेतु-विवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो, धनिदौहित्रस्येव—इति दायभागग्रन्थलिखनम् ॥२॥

यद्यपि दुहित्रभावे दौहित्रस्येव भगिन्या एव प्रागधिकारो युक्तस्तथापि तस्याः स्त्रीत्वेन पार्व्वणपिण्डदत्वाभावान्नाधिकारः, दुहितुस्तु दौहित्रात्

पूर्व्वमन्नादङ्गात् सम्भवतीत्यादिविशेषवचनादेवाधिकार इति भावः—इति-श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनम् ॥३॥

तदभावे पुनः पितृदौहित्र इति । तदभावे पितामहस्तदभावे पितामही तदभावे पितुः सोदरस्तदभावे पितुर्वैमात्रेयः तदभावे पितृसोदरपुत्रपितृ-वैमात्रेयपुत्रपितृसोदरपौत्राणां पितृवैमात्रेयपौत्राणां क्रमेणाधिकारः तदभावे पितामहदौहित्र०--इत्यादि श्रीकृष्णतर्कालङ्कारकृतदायभाग-टीकालिखनञ्चेति ॥४॥

इङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयप्रथमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

श्रीर्ज्जयतितराम्

२८ প্রথম প্রশ্ন :—

যদ্যপি কোন ব্যক্তিরা দুই সহোদর, অর্থাৎ মধ্যম ও কনিষ্ঠ ভ্রাতা, আপনাদের জ্যেষ্ঠ ও তৃতীয় ভ্রাতার সহিত পার্থক্য হইয়া, আপনারা দুই সহোদরে একান্নবর্ত্তিতে স্থাবর অস্থাবর বস্তু উপার্জ্জন করিয়া, মধ্যম ভ্রাতা এক পুত্র রাখিয়া লোকান্ত হয়। তাহার পর ক্রমে একান্নবর্ত্তিতে থাকিয়া ঐ মধ্যমের পুত্র এক স্ত্রী, ও কনিষ্ঠ ভ্রাতা এক পুত্র ও এক কন্যা রাখিয়া মৃত্যু হয়। এমত স্থলে ঐ কনিষ্ঠের পুত্র পীড়িত জীবনাসংশয় হইয়া ঐ সমুদয় সাধারণের স্থাবর অস্থাবর বস্তু আপন সম্ভাবিতা পুত্রিনী ভগ্নীকে দান করিতে পারে কি না—যথাশাস্ত্র এই প্রশ্নের প্রত্যুত্তর লিখিবেন ইতি—

द्वितीय प्रश्न—

यद्यपि कोन व्यक्ति जीवनासंशय हइया साधारणेर कोन स्थावर अस्थावर वस्तु आपन भग्निके दान करिया ऐ दानपत्रे एमन नियम राखे ये यदि स्यान आमि ए यात्रा रक्षा पाइ, एइ दानपत्र अकर्म्मण्य हइवेक; अतएव शास्त्रानुसारे एमत नियमित दान सिद्ध वटे कि ना—

प्रभुसमर्पितप्रश्नपत्रं दानपत्रञ्च यदेतदब्दीयमैमासीयषोडशदिनसम्बन्धिवृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

यद्यपि चतुर्णां सोदरभ्रातॄणां मध्ये द्वौ भ्रातरावर्थान्मध्यमकनिष्ठौ स्वकीयज्येष्ठतृतीयभ्रातृभ्यां सह पृथगन्नौ[1], तावेव द्वावेकान्नौ स्थावरास्थावरधनमुपार्ज्जयतः तयोर्म्मध्ये मध्यमो भ्राता एकं पुत्रं संरक्ष्य मृतः स्यात्, तदनन्तरं कमेर्णैकान्ने स्थितया तस्यैव मध्यमस्य पुत्र एकां पत्नीं संरक्ष्य मृतः, एवं कनिष्ठो भ्राता एकं पुत्रं कन्याञ्चैकां रक्षित्वा मृतः स्यात् एवञ्च सति तस्यैव कनिष्ठस्य पुत्रः पीडितो जीवनसंशयमापन्नः सन् तदेव साधारणस्थावरास्थावरसमुदायधनं सम्भावितपुत्रार्थै स्वभगिन्यै दत्तवान् स्यात्तदा तद्दानं दातुः स्वांशयोग्ये सिद्धं भवितुं शक्नोति, तद्व्यतिरिक्ते सिद्धं भवितुं न शक्नोतीति—

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥१॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा।

कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै॥ इति दायभागादिग्रन्थधृतनारदवचनम् ॥२॥

विभक्तस्येवाविभक्तस्थावरस्यापि स्वामिकृतदानादि सिद्ध्यत्येव अक्षपातादिना पश्चादंशपरिचयसम्भवादिति भावः—इति श्रीकृष्णतर्कालङ्कारदायभागटीकालिखनम् ॥३॥

---

१. पृथक अन्नौ—व्यप० ।

अत्र साधारणद्रव्यस्य समुदायस्यैकेन विक्रये परांशयोग्येऽसिद्धिः स्वांशयोग्ये तु सिद्धिः-इत्यादि विवादभङ्गार्णवग्रन्थ(१. विवा० ३०५ क) लिखनम् ॥४॥

द्वितीयप्रश्नस्योत्तरम्—

यद्यपि कश्चिद्व्यक्तिविशेषो जीवनसंशयमापन्नस्सन्नसाधारणस्थावरास्थावरवस्तु स्वभागिन्यै दत्त्वा तद्दानपत्रे एवं (तेन नियमो लिखितः यद्यहमेतद्रोगान्मुक्तो भूत्वा जीवामि तदैतद्दानपत्रमकर्म्मण्यं भविष्यति। अत एवैतादृशं सोपाधिदानं तद्दानकर्त्तृयोग्यांशेऽपि तद्दानकर्त्तुस्तद्रोगविमुक्तत्वेन वर्त्तमानतायां सिद्धं भवितुं न शक्नोति, यतस्तद्दानपत्रे दात्रा लिखितमस्ति यद्यहमेतद्रोगान्मुक्तो भूत्वा जीवामि तदा अस्तद्वर्त्तमानतायामेतद्दानपत्रमकर्म्मण्यं भविष्यति, न तु वा सर्व्वं तथैव जातमिति। एवञ्च सति दातुस्तद्रोगान्मरणे सति तद्दानं दातुः स्वांशयोग्ये सिद्धं भवितुमर्हति। सोपाधिदानमुपाधिसिद्धौ सिद्धं भवति उपाध्यसिद्धावसिद्धं भवति-इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायक्रमसंग्रहविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरप्रमाणानि चत्वारि ॥४॥

सोपाधिदानमुपाध्यसिद्धावसिद्धम्—इति विवादभङ्गार्णवग्रन्थलिखनञ्चेति ॥५॥

इङ्गरेजीशब्दप्रतिमाय्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयपञ्चमदिनसम्बन्धिशुक्रवासरे मयेयं व्यवस्था दत्तेति।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

२६—नं० ३१ खास आपील—

इं १८२४ साल—

सदर देओयानि आदालतेर पण्डितेर प्रति प्रश्न—

यद्यपि स्यात् कोन व्यक्तिर दुइ पुत्रेर मध्ये ज्येष्ठ पुत्र एक

कन्या राखिया पिता वर्त्तमाने मरे, आर कनिष्ठ पुत्र पितार मरणोत्तर एक पुत्र राखिया लोकान्तर करे—एमत स्थले ए कन्या ओ पुत्रेर मध्ये के धनाधिकारी हवेक—यथाशास्त्र प्रश्नेर उत्तर लिखिवा इति —

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रमेतद्विवादविषयनिविष्टपत्रजातञ्च यदङ्गरेजीशब्द-प्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयप्रथमदिनसम्बन्धिसो-मवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि कस्यचिद्‌द्वयोः पुत्रयोर्म्मध्ये ज्येष्ठपुत्रः कन्यामेकां रक्षित्वा जीवति स्वपितरि मृतः स्यादेवं कनिष्ठपुत्रः स्वपितुर्म्मरणोत्तरमेकं पुत्रं रक्षित्वा मृतः स्यात्तत्र यदि पित्रा स्वस्वत्वास्पदीभूतं धनं विभज्य स्वपुत्राभ्यां दत्तं स्याद् यत् प्रभुसमर्पितपत्रान्तर्गतद्वादशाङ्काङ्कितवङ्गालाख्याष्टादशाधि-कद्वादशशताब्दीयफाल्गुनमासीयपञ्चदशदिनलिखितएकरारनामासंज्ञकपत्रे-णावगम्यते तदा तद्दानानुसारेण तद्धने द्वयोः पुत्रयोः स्वत्वे जाते सति द्वयोः पुत्रयोर्म्मरणानन्तरं तयोर्ये उत्तराधिकारिणस्तेषामेव तद्धनं भवति। तत्र द्वयोर्म्मध्ये ज्येष्ठपुत्रः पत्नीमेकां कन्यां चैकामेकं पुत्रं च विश्वनाथ-नामानं संत्यज्य जीवति पितरि मृत इति प्रभुसमर्पितपत्रजातैर्ज्ञातम्। एवं च सति तद्दानानुसारेण ज्येष्ठपुत्रयोग्यांशे तत्पुत्रस्य विश्वनाथस्याधिकारे जाते सति तद्धनं विश्वनाथस्यैव जातमतस्तन्मरणानन्तरं तत्त्यक्तधने तदुत्तराधिकारिणामेवाधिकारस्तदुत्तराधिकारिणाम्मध्ये तस्य पुत्रमारभ्य पितृपर्य्यन्ताभावेन तन्मातुः करुणाया अधिकारे जाते सति करुणामरणो-त्तरं विश्वनाथस्य पितुः रामलोचननस्करस्य प्रपौत्रपर्य्यन्ताभावेन तत्पितु-र्दौहित्रस्य भागवतमण्डलस्याधिकारः। पितरि मृते पुत्रं रक्षित्वा मृतस्य कनिष्ठपुत्रस्यांशे तत्पुत्रस्याधिकारः। यदि च पित्रा स्वस्वत्वास्पदीभूतधनं विभज्य स्वपुत्राभ्यां न दत्तं स्यात्तदा तद्धने पितुरेव स्वत्वमस्ति। अत एव जीवति पितरि मृतस्य ज्येष्ठपुत्रस्य पैतृकधने स्वत्वानुत्पादाद् जीवति पिता-

महे मृतस्य पौत्रस्य च विश्वनाथस्यानपत्यस्य पैतामहधने स्वत्वानुत्पादात् तन्नदुत्तराधिकारिणां तद्धने नाधिकारः। किन्तु पितृमरणोत्तरं मृतस्य कनिष्ठपुत्रस्य पैतृकसमुदायधने स्वत्वोत्पादेन पैतृकसमुदायधनं तस्यैव जातम्। अतस्तन्मरणोत्तरं तदुत्तराधिकारिणामेव तत्राधिकारः। तदुत्तराधिकारिणाम्मध्ये तत्पुत्रस्यैव प्राधान्येनाधिकारः—इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

अदानं स्वाम्यकारणम्—इति मनुवचनम् ॥१॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥२॥

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनिदौहित्रस्यैव—इति दायभागग्रन्थलिखनम् ॥३॥

पितर्य्युपरते पुत्रा विभजेयुर्द्धनं पितुः।

अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते ॥—इति दायभागादिग्रन्थधृतदेवलवचनम् ॥४॥

तत्र प्रथमं पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रः—इति श्रीकृष्णतर्कालङ्कारकृतदायभागटीकालिखनञ्चेति ॥५॥

अङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयागस्तिमासीयपञ्चमदिनसम्बन्धिभाममयासरे मयेयं व्यवस्था दत्तेति—

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

३०—मोकाम कलिकात्तार सदर देओयानी आदालतेर पण्डित हइते सदर बडेर प्रश्न :—

यदि स्यात् जेला सारङ्गबाशी क्षेत्रीय जाती राजा हरकुमारदत्त मौरुशी जमिदारिर पर दखिल काबिज थाकिया दुइ बिवाहिता स्त्रीर गर्भजातक दुइ पुत्रके उत्तराधिकारि राखिया लोकान्तर हइल।

परे ताहार ज्येष्ठ पुत्र राजा तेजप्रताव नामिक कुलाचार मते समुदय अवण्टक जमिदारिर पर सम्भोगी थाकिया आपन मृत्युर पूर्व्वे वैमात्रेय भ्राता थाकितेओ अवण्टक जमिदारि मजकुर हइते २१ मौजा तिन स्त्रीर मध्ये एक स्त्री महाराणी तिलत्तमादेव्यार नामे दान करिया दानपत्रेर निचे एइ विवरण लेखे ये आमार परे महाराणी मौछुफ समुदय देहात जमिदारि मजकुर दान करा ग्रामसकल सम्वलित आपण एकत्तारे राखिया आपन कवज तछरूपे आर्णाबेक, आर समयेर हाकिमेर सरकारे मालगुजारि आदाय करिते थाकिवेन इति। ताहार दुइ वत्सर परे उक्त राजा निःसन्तान ऐ वैमात्रेय भ्राता राजा अमरप्रतावसेन ओ तिन स्त्रीके उत्तराधिकारि राखिया मरिल। ऐ तिन स्त्रीर मध्ये दानग्रहिता महाराणी उत्तराधिकारित्व एवं दानपत्र मजकुरेर द्वाराय समुदय जमिदारिर पर दावि करितेछे। ओ मृत राजार वैमात्रेय भ्राता राजा अमरप्रतापसेन ताहार आपनार एकान्नवर्त्ती एवं अंशी थाकार दाविते एइ विवरणे ये पैतृक जमीदारी हओन कारण एवं अवण्टक ओ मृत राजार कुष्ठव्यामहकालिन दानपत्र लेखा हओने दान असिद्ध, ओ महाराणीर खोरपोष भिन्न अन्य कोन स्वत्व ना थाकीवाते उत्तराधिकारिर दावि करिया आपनाके समुदय जमिदारीर सत्वाधिकारि ओ कर्त्ता करार दितेछे। अतएव शास्त्रानुसारे ऐ दुइ दाविदार मजकुरानेर मध्ये कोन व्यक्ति सकल जमीदारी मजकुरेर पर दखल पाइवार स्वत्व राखे ताहार व्यवस्था चलित शास्त्रसम्वलित रितमते लेखेन इति—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयसितम्बरमासीयाष्टाविंशतितमदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यद्यपि सारनदेशीयः क्षत्रियजातीयः कश्चिद्राजा हरकुमारदत्तनामा व्यक्तिविशेषः क्रमागतसराजकरस्थावरादिधने आयत्तत्वं संपाद्य द्वयोः पत्न्योर्गर्भजातौ द्वौ पुत्रावुत्तराधिकारिणौ संरक्ष्य मृतः स्यात्, तदनन्तरं तस्य ज्येष्ठपुत्रो राजा तेजःप्रतापसेनः स्वकुलोचिताचारानुसारेण समुदायसाधारणसराजकरस्थावरादिधने आयत्तत्वं संपादितवान् स्यात्तदा तन्मरणानन्तरं तस्य पुत्रपौत्रप्रपौत्राभावेन तत्यक्ताविभक्तसाधारणसराजकरस्थावरादिसमुदायधने तद्वैमात्रेयभ्रातृ राज्ञोऽमरप्रतापस्यैवाधिकारः, साधारणसराजकरस्थावरादिधने अंशयन्तरानुमतिमन्तरेणैकस्य स्वांशयोग्येऽपि दानाद्यनधिकारित्वेन साधारणसराजकरस्थावरादिसमुदायधने दानाद्यनधिकारित्वस्यार्थसिद्धत्वात् पश्चिमदेशचलितशास्त्रानुसारेण साधारण्यप्रतियोगिनि वैमात्रेयभ्रातरि विद्यमाने सत्यप्यविभक्तधने पत्न्या अनधिकाराच्च। एवं राज्ञस्तेजःप्रतापसेनस्य पत्नीनां यावज्जीवं स्वभर्तृकुलोचितग्रासाच्छादनोपयुक्तधने आवश्यकविधवाधर्माद्याचरणोपयुक्तधने चाधिकारः-इति सारनदेशचलितमनुमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था--

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतो गोत्रजो बन्धुः—इत्यादि मिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्-इति मिताक्षराग्रन्थलिखनम् ॥२॥

सोदराणामभावे भिन्नोदरा धनभाजः-इति मिताक्षराग्रन्थलिखनम् ॥३॥

तस्मादपुत्रस्य स्वर्य्यातस्य विभक्तस्यासंसृष्टिनो धनं परिणीता स्त्री संयता सकलमेव गृह्णातीति स्थितम्—इति मिताक्षराग्रन्थ(पृ० २२१) लिखनम् ॥४॥

अविभक्तेषु द्रव्यस्य मध्यगत्वादेकस्यानीश्वरत्वात् सर्व्वाभ्यनुज्ञाऽवश्यं कार्य्या। विभक्तेषु तु विभक्तानुमतिमन्तरेणापि व्यवहारः सिद्ध्यस्येव— इति मिताक्षराग्रन्थलिखनम ॥५॥

स्थावरस्य समस्तस्य गोत्रसाधारणस्य च ।

नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना ॥—इति वीरमित्रोदयग्रन्थ-धृतव्यासवचनम् ॥६॥

स्वर्य्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी ।

अविभक्ते धनांशे तु प्राप्नोत्यामरणान्तिकम् ॥—इति वीरमित्रोदय-ग्रन्थधृतकात्यायनवचनम् ॥७॥

अङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयाक्तूबरमासीय-नवमदिनसम्बन्धिबुधवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीबच्चनाथमिश्रेण

३१—रोवकारि मिछिल सदर देओयानि आदालत मो० कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरी सिकिस-पीयेर साहेवेर वैठके । तारिख २४ जुलाइ ई सन १८३३ मोतावके बाङ्गला १० श्रावण सन १२४० साल दिवस बुधवार—

कृष्णकान्त पोद्दार—छापल

सन हालेर १७ जुन तारिखेर हओया एइ आदालतेर हाकिम रिचार्ड ओयालपुल साहेवेर हुकुम मोतावक जेला जङ्गल महालेर जज साहेवेर रिटरण[१] सम्वलित ओ ऐ सनेर २१ मार्चेर लिखित तथाकार रोवकारिर सहित एवं छापलेर छओयालेर नकल, जाहा जज साहेवेर मौछाफर रिटरणेर सामील एइ आदालते पौछियाछिल, हाकिम रोवकारि ओ राजचन्द्रराय छायेलेर मोकद्दमार कागजात सम्वलित अद्य आमार वैठके दरपेष हइल, अनुमोदने आइल । हुकुम हइल ये साबेक व्यवस्था ओ सन हालेर २१ मार्च तारिखेर हओया जेला जङ्गल महालेर जज साहेवेर हालेर रोवकारि एइ आदालते पण्डितेर निकट

---

१ रिटरण—व्यप० ।

एइ हुकुमे पाठान जाय ये पण्डित मजकुर ऐ सकल अनुमोदन
परे एइ विषयेर व्यवस्था ये उपरेर लिखित जेलार जजसाहेबेर
रोबकारिर लिखित सुरत देवसेवार खरच ओ सेवाइतेर
ओयाजिबि खरच मिनाह बादे बाकी उपसत्व डिक्रिर
टाका आदायेर जन्य जाहा सेबाइतेर नामे हइयाछे खरच
हइते पारे कि ना—एक सप्ताह मध्ये दाखिल करेण इति ॥

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिक्रिम्पायसाहेबधर्म्माधिकरण-
लिखिताङ्करेजीशब्दप्रतिवाच्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीय-
चतुर्विंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नत्रयलिखितपत्रमेवं तत्समर्पितपूर्व्व-
व्यवस्थापत्रमेतदब्दीयमार्च्चमासीयैकविंशतितमदिवसीयजङ्गलमहालजिला-
ख्यावान्तरधर्म्माधिकरणाधिपतिकृतविचारपत्रञ्च यदेतदब्दीयागस्तिमासीय-
द्वादशदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोकनेन यादृशबोधो जातस्त-
दनुसारेणोत्तरं लिख्यते—

जङ्गलमहालजिलाख्यावान्तरधर्म्माधिकरणाधिपतिकृतविचारपत्रलिखि-
तवृत्तान्ते सत्यपि देवसेवार्थं व्ययातिरिक्तस्य सेवाइतशब्दवाच्यस्यावश्यकव्य-
यातिरिक्तस्य देवत्रभूम्युपस्वत्वस्य व्ययो जयपत्रलिखितराजतमुद्रापरिशोधना-
र्थम् यज्जयपत्रं सेवाइतशब्दवाच्यस्य नाम्ना जातम्, भवितुं न शक्नोति,
देवत्रभूमौ तदुपसत्त्वे च देवमात्रस्वत्वेन तदितरस्वत्वाभावात् । यश्च देवत्र-
भूम्युपस्वत्वादावश्यकदेवसेवार्थं किञ्चिद्व्ययोज्यावशिष्टस्य स्वभक्षणाद्यर्थं
व्यवहारो देवनिवेदनं विनापि पापिष्ठानाम् स च शास्त्रनिषिद्धत्वेन शास्त्रा-
नुसारेण यथार्थो भवितुं न शक्नोति, शास्त्रनिषिद्धव्यवहारस्य शास्त्रानुसारे-
णाप्रामाणिकत्वात्, विशेषतश्चलितशास्त्रानुज्ञायामसत्यामेव लोकव्यवहा-
रस्य शास्त्रे प्रमाणत्वेनोपन्यासाच्च, देवत्रविषये विशेषतश्चलितशास्त्रानुज्ञायाः
प्राचीनव्यवस्थाया एतद्व्यवस्थायाश्च प्रथमप्रमाणे मनुवचनेन एव स्पष्टी-
कृतत्वाच्च—इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायभागटीकादाय-
क्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्--

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥ इति मनुवचनम् ॥१॥

प्रतिमादिदेवतार्थमुत्सृष्टं धनं देवस्वम्—इति मन्वर्थमुक्तावल्यां कुल्लूकभट्टव्याख्यानम् ॥२॥

तस्माच्छास्त्रानुसारेण राजा कार्य्याणि साधयेत् ।
वाक्याभावे तु सर्वेषां देशदृष्टमतं नयेत्—इति संवर्त्तवचनञ्चेति ॥३॥०॥

इङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयनवम्बरमासीयषड्विंशतितमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति--

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

३२—रोवकारि मिछिल सदर देओयानि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुत हेनरि सिकिसपीएर साहेवेर वैठके। तारिख २ अक्तुवर इं सन १८३३साल मातावेक वाङ्गला १७आश्विन सन १२४०साल दिवस वुधवार—

कालीकिशोररायचौधुरि छाएल

छाएलेर उकिलान मुनशी हुसुन आलि ओ मुनशी घु आलि आर सदासुखपण्डित द्वितीय पक्ष रामवकसेर पक्ष हइते आपन नामेर एक केता ओकालतनामा भैरवचन्द्रचक्रवर्त्तिर नामेर एक केता मोक्तारनामा सम्वलित दाखिल करिया हाजिर आइले। छाएलेर छओयाल कोर्ट मुरशीदावादेर[1] हाकिम चारर्ल्स उलिएम इष्टीएर साहेव ओ कोर्ट जाँहगीरनगरेर हाकिम केरिकेरापट साहेवेर सन हालेर ९६ जुन ओ २२ मार्च्च तारिखेर लिखित हुकुमेर नाराजिते जाहा देनदार जगदीश्वरीर हिस्यार निलामेर विशये

१. मुरशीदावादेर०—व्यप० ।

छादेर हय। छाएलेर माता मोछम्मात मजकुरार जीवद्दशा पर्य्यन्त दखलि कावेजी जमिदारि निलाम नाहओयार प्रार्थनाय छाएलेर उकिलानेर नामेर ओकालतनामा ओ रामजयसाण्ड्यालेर नामेर मोक्तारनामा ओ क्रोट मुरशीदावाद ओ क्रोट जाहागेरनगरेर सन हालेर २६ जुन ओ २२ मार्च्च ओ इङ्गराजी सन १८३१ सालेर १९ मार्च्च तारिखेर लिखित तिन केता रोवकारी ओ इं सन १८२९ सालेर ९ एपरेलेर लिखित जेला मयमनसिंहेर देओयानि आदालतेर फयछलार नकल तिन केता ओ वाङ्गला ए वारतेर च्छोलेनामार नकल एक केता आर जेलार गुजाराण जगदीश्वरीर दरखास्तेर नकल एक केता ओ इं सन १८३२ सालेर २५ एपरेल ओ इं सन १८२६ सालेर ५ जुलाइ ओ २६ एपरेलेर लिखित एइ आदालतेर नकल तिन केता ओ इं सन १८२९ सालेर ३ दिजेम्वरेर लिखित जेला मजकुरेर देओयानि आदालतेर एक केता रोवकारिर नकल सम्वलित, जाहा अन्य मुनशी होशन आलि उकिल आर द्वितीय पक्ष रामवकसेर पक्षेर एक केता छओयाल, जाहा सदासुखपण्डित दाखिल करिलेक, तिन केता सेओयाय तिन केता नकल फयछला पडागेल। यदि स्यात् मजुद कागजातेर द्वाराय प्रकाश हइतेछे—ये छाएल ओ मोछम्मात नारायणीदेव्या ओ जगदीश्वरीदेव्यार हकुक छोलेनामार द्वाराय रफा हइयाछे, आर ऐ छोलेनामा जेलार आदालते मञ्जुर ओ मातवर हइयाछे आर ताहार द्वाराय प्रकाश ये मोछम्मात जगदीश्वरीर मृत्युर पर ताहार हिस्या छाएलके आर्शीवेक। ए प्रकारे मोछम्मात मजकुरार देना आदायेर जन्ये ताहार हिस्या विक्रएर उपयुक्त हइते पारे कि ना—आमार निकट ए विषय शास्त्रेर एलाका राखे। ए जन्ये चूडान्त हुकुम छादेर हओयार पूर्व्व हुकुम हइल ये छाएलेर छओयाल एवं उहार दाखिल करा कागजात ओ द्वितीय पक्षेर छओयाल सम्वलित एइ आदालतेर पण्डितेर अग्रे पाठान जाय—ये पण्डित मजकुर

छोलेनामार लिखित सरतसकलेर अनुबोधने उपरेर लिखित छओयालेर जओयाब एक सप्ताह मध्ये दाखिल करेण इति—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिक्सिपीयरसाहेवधर्म्माधिकरण-लिखिताङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयाक्तूबरमासीय-द्वितीयदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवाद-विषयनिविष्टपत्रजातञ्च यदेतदब्दीयदिशम्बरमासीयद्वितीयदिनसम्बन्धिसोम-वासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि मूलधनिनो रामकिशोररायाभिधेयस्यैतद्धर्म्माधिकरणार्थिनः पितु-स्त्यक्तधने सन्धिपत्रानुसारेणैतद्धर्म्माधिकरणार्थिनो नारायणीदेव्याश्च जग-दीश्वरीदेव्याश्च स्वत्वं निश्चितं स्याद्, एवं तदेव सन्धिपत्रं जिलाख्यावान्तर-धर्म्माधिकरणे सत्यं जातं स्याद्, एवं तेनैव सन्धिपत्रेण जगदीश्वरीदेवी-मरणोत्तरं तदायत्तीभूतांऽश एतद्धर्म्माधिकरणार्थिनो भविष्यतीत्यवगम्यमानं स्यात्, तदा जगदीश्वरीदेवीदेयऋणपरिशोधनार्थं तज्जीवनपर्य्यन्तमुपस्वत्व-भोगार्थं तत्पुनःस्वत्वास्पदीभूततदायत्तीभूतांऽशो[1] विक्रययोग्यो भवितुं न शक्नोति सन्धिपत्रतात्पर्य्यार्थधर्म्मशास्त्राभ्यां तथैव पर्य्यवसानात्—इति बङ्ग-देशचलितदायभागदायतत्त्वदायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादि-ग्रन्थानुसारिणी व्यवस्था—

सर्व्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः—इति दायभागादि-ग्रन्थधृतदेवलवचनम् ॥ १ ॥

न स्त्री पतिपुत्रकृतं न स्त्रीकृतं पतिपुत्रौ—इति विवादार्णवसेतु(पृ० २६) विवादभङ्गार्णवादिग्रन्थ(१ विवा० २०८ ख)धृतविष्णुवचनञ्चेति ॥२॥०॥०॥०॥

---

१. तदापत्ती०—व्यप० ।

इङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयदिशम्बरमासीयो-नविंशतितमदिनसम्बन्धिवृहस्पतिवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रस्य

———

३३—रोवकारि मिछिले सदर देओयानि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम श्रीयुतहेन्‌रीसिकिसपीयेर साहेबेर बैठके। ८ तारिख अक्तुवर इं० १८३३ साल मोतावेक वाङ्गला २३ आश्विन सन १२४० साल दिवस मङ्गलवार—

मोछम्मात भवानीदेव्या— छापला—

छाएनार उकिल मुनशी माहाम्मद हानीफ ओ सदासुक-पण्डित ओ द्वितीय पक्षेर उकिल मौलुवि कम्म होशेन हाजीर आइल। गतो कल्य छाएलेर छओयाल दरपेष हइया गौरेर प्रति मुलतवि छिल, अद्य पुनराय रोवकार हइल। यदि स्यात् एइ मोकद्दमार हुकुम छादेर हओनेर पूर्व्व एइ विषयेर तहकिक आविश्यक ये मोछम्मात ब्रह्ममयी ताहार स्वामी गोपीनाथ वन्द्योपाध्याय ओछीनामा मोतावक आपनी ओछी सरवराहकार मकरर करणेर क्षेमता राखे कि ना। ए जन्य हुकुम हइल ये एइ मोकद्दमार कागजात एइ विशयेर जओयाव तलवेर जन्ये एइ आदालतेर पण्डितेर अग्रे पाठान जाय इति—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरण-लिखिताङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयाक्तूवरमासीयाष्टमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषय-निविष्टपत्रजातञ्च यदेतदब्दीयदिशम्बरमासीयद्वितीयदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

ब्रह्ममयी स्वपतिगोपीनाथवन्द्योपाध्यायकृतासीयन्नामाख्यपत्रानुसारेण स्वयं धनरक्षकस्यार्थादसीशब्दप्रतिपाद्यस्य सरवराहकारशब्दवाच्यस्य च नियोगकरणक्षमतां रक्षत्येव, मृते पितरि जीवत्यां च मातर्य्यप्राप्तव्यवहाराणां पुत्राणां धनरक्षणोपायकरणे मात्रपेक्षया अन्येषां सुहृत्तरत्वाभावात्—इति वङ्गदेशचलितदायभागदायतत्त्वव्यवहारतत्त्वविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् ।

न्यसेयुर्बन्धुमित्रेषु–इत्याद्युपरिलिखितग्रन्थ(दात० पृ० १८) (दाभा० पृ० ६२)धृतकात्यायन(कास्मृ० ८४५, पृ० १०२)वचनम् ॥१॥

रक्षेयं बालधनमाव्यवहारप्राप्तेः—इत्युपरिलिखितग्रन्थ(दाभा० पृ० ६३)धृतमुनिवचनम् ॥२॥

तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।

अभावे बीजिनो माता तदभावे च पूर्व्वजः ॥—इति व्यवहारतत्त्वादि(व्यत० पृ० ६४।६५)ग्रन्थधृतनारद(नास्मृ० पृ० ५८)वचनञ्चेति ॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयषोडशदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

३४—रोवकारि मिछिल सदर देओानि आदालत मोकाम कलिकाता आदालत मजकुरेर हाकिम हेनरि सिक्सिपीयेर साहेवेर वैठके। इं १८३३ साल ओाके तारिख २१ नवम्वर मोतावक वाङ्गला १२४० साल ७ अग्रहायन रोज वृहस्पतिवार

लोकनाथदत्त—

ओ जगन्नाथदत्त— वनाम कुविर भाण्डारि

साएलानेर उकिल मुनशी हयदर आली हाजिर आइल। सन हालेर ३० जुलाएर हओा जेला मेमनसिंहेर जज साहेवेर फयशला, जाहा सन १८३२ सालेर २७ आगष्ट तारिखे सदर आमिन आलार फयशलार तरदिदे सादेर हय, ताहार असम्मतिर सायलानेर सओाल एक टाका मूल्ल्येर कागजे उपरेर तारिखेर लिखित[1] जेला मजकुरेर जज साहेवेर ओ सदर आमिन आलार दुइ केता फयसला ओ उकिल मजकुरेर नामेर ओकालतनामा सम्वलित, जाहा सन हालेर ९ आक्तोवर तारिखे दाखिल हइयाछिल, पडागेल। साएलानेर सओालेर खास आपिल ग्राह्य अथवा अग्राह्य विशय हुकुम छादेर हओार पूर्व्वे हुकुम हइल ये सओयाल ओ गयरह कागजात एइ आदालतेर पण्डितेर निकट पाठाइया हुकुमे देओा जाय—ये कागजात दृष्टे ए विशयेर व्यवस्था यद्यपि ये रूप सदर आमिन आलार फयशलाय मुद्दइ साएलानेर तरफ हइते प्रमाण हेतु लेखा आछे गुजरिया थाके, दासत्त साव्यस्थ निमिर्थे एमत प्रमाण हेतु जथार्थ गणा जाइवेक कि ना इति।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसपीयरसाहेवधर्म्माधिकरणलिखिताङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयनवम्वरमासीयैकविंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातञ्च यत्तदब्दीयदिशम्वरमासीयैकविंशतितमदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

सदर-आमीन–आलासंज्ञकस्य जयपत्रे अर्थिनां पक्षतो यथा हेतुर्दासत्वस्थिरीकरणार्थं लिखितः स च दासत्वस्थिरीकरणार्थं याथातथ्येन प्रमाणं

१ कागजेर उपर…तारिखेर लिखित…इति साधीयान् पाठः।

भवत्येव, तज्जयपत्रैरेतेषां दासादीनां शास्त्रोक्तपञ्चदशदासान्तर्गतदाया-द्युपागतत्वेनावगमात्—इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायक्रम-संग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः—इत्यादि दायक्रमसंग्रह-विवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थधृतनारदवचनम् ॥१॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयजानवरीमासी-यषोडशदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

तरजमा

प्रथम छओाल

३५—यदि स्यात् हिन्दुवर्गेर मध्ये कोनो ब्राह्मण व्यक्ति आपन निकातन हइते निर्गत हइया अनुद्दिष्ट हय ओ ताहार निदर्शन ना पाओा जाय, तबे ताहार मृत्युर अवधारित कोन पर्य्यन्त गणना हइवेक, एवं ताहार मृत्युर अवधारित गणनार समय कि प्रकार व्यवहार तस्य मृते उचित हइवेक, एवं ताहार निज विशय कोन अवधि मृत व्यक्तिर धन बला जाइवेक, आर ए विशये कत दिवस नियम अवधारित आछे-ताहार व्यवस्था एतद्देशीय चलित शास्त्रानुजाइ श्लोक एवं ताहार तरजमार सहित वाङ्गला भाशाय ।

द्वितीय छओाल

यदि स्यात् हिन्दु वर्णेर मध्ये कोनो ब्राह्मण व्यक्ति आपन निकातन हइते निर्गत हइया अनुद्दीस हय ओ ताहार निदर्शन ना पाओा जाय, एवं ताहार निज विशय अन्य कोन व्यक्ति अतिक्रम आक्रम करिया ग्रहण करे, तबे १२ वत्सर मध्ये

केह उत्राधिकारित्वभावे ऐ व्यक्तिर निज विशये दाविदार हइते पारे कि ना—ताहार व्यवस्था एतद्देशीय चलित शास्त्रानुसारे श्लोक एवं ताहार तरजमार सहित वाङ्गला भाशाय इति।

तृतीय छओाल

उपरेर लिखितव्य विशये ऐ अनुद्देशी व्यक्तिर स्त्री वर्त्तमान थाकिते ताहार अन्य कोन सरिक व्यक्ति ऐ अनुद्देश व्यक्तिर स्त्रीके अविरा स्त्रीलोक एवं एक-अन्न-भुक्त ओ गृहवाशी ओ निज प्रतिपाल्य कहिया उत्राधिकारित्त भावे ताहार विशयेर पर दाविदार हइते पारे कि ना—ताहार व्यवस्था श्लोक वचन द्वाराय तरजमा सम्वलित वाङ्गला भाशाय—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयनवम्बरमासीयोनत्रिंशत्तमदिनसम्बन्धिशुक्रवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि हिन्दुजातीयानाम्मध्ये कश्चिद् ब्राह्मणः स्वकीयनिकेतनान्निर्गत्यानुद्दिष्टः स्यात्, तस्यैव निर्गतस्य वार्ता न प्राप्यते चेत् तदा तस्य मरणावधारणं प्रस्थानदिनमारभ्य द्वादशसंवत्सरानन्तरं भविष्यति, एवं तस्य मृत्योरवधारणसमये चायं व्यवहारः कर्त्तुमुचितो भविष्यति—शास्त्रानुसारेणाधिकारिणा पर्णनरं दग्ध्वा त्र्यहाशौचं विधाय आद्यश्राद्धादिकं कर्त्तव्यम्। एवं तत्स्वत्वास्पदीभूतधनं तन्मरणावधारणानन्तरक्षणमारभ्यैव तत्स्वत्वं धनमिदमिति व्यवहर्त्तव्यमिति। एवमेतद्विषये गमनदिनमारभ्य दशवर्षसमाप्तिसमय एवावधारित इति।

अत्र प्रमाणम्—

गतस्य न भवेद्वार्त्ता यावद् द्वादशवार्षिकी।

प्रेतावधारणं तस्य कर्त्तव्यं सुतबान्धवैः॥—इति शुद्धितत्त्वादि-(शुत० पृ० २५६)ग्रन्थधृतनारदवचनम्॥१॥

एवं *पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्*—इति तत्तद्ग्रन्थधृतादिपुराण-(शुत० पृ० ३१०)वचनञ्चेति॥२॥

द्वितीयप्रश्नस्योत्तरम्—

यदि कश्चिद्ब्राह्मणजातीयो व्यक्तिविशेषः स्वनिकेतनान्निर्गत्यानुद्दिष्टः स्यात्तस्य वार्ता न प्राप्यते चेत्, एवं तत्स्वत्वास्पदीभूतधने उदासीनैर्बलाद् गृह्यमाणे[1] सति शास्त्रानुसारेणोत्तराधिकारिणः पत्न्यादयः सुहृत्तमत्वेन प्रोषितधनरक्षाकरणाय[2] एवं तत्र विषये तन्मरणावधारणानन्तरं स्वत्वमूलको(ऽधिकारोऽ)व्याहतो न भविष्यति[3] इति स्वाधिकाराय च द्वादशवर्षमध्येऽपि तत्राधिकर्तुमभियोक्तुमर्हन्तीति ।

अत्र प्रमाणम्—

अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् ।

न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च ॥—इति दायभागादिग्रन्थधृतकात्यायनवचनम् ॥१॥

पत्नी दुहितरश्चैव—इत्यादि तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनञ्चेति ॥२॥

तृतीयप्रश्नस्योत्तरम्—

प्रपौत्रपर्यन्तरहितस्यानुद्दिष्टस्य पत्न्यां वर्तमानायामंशयन्तरेण केनचित् कथञ्चिदप्यनुद्दिष्टधनेऽधिकर्तुं न शक्यते—इति च वङ्गदेशचलितदायभागादिग्रन्थसम्मता व्यवस्थेति ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनञ्चेति ॥१॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयजानवरीमासीयसप्तविंशतितमदिनसम्बन्धीयसोमवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

१. गृह्यमाने—व्यप० । २. प्रोषितधनरक्षाकारा०—व्यप० ।

३. स्वत्वमूलक व्याहत भविष्यति—व्यप० ।

प्रथम लेखार भाषा—

हुजुरेर सुपुर्द करा सओयाल, जाहा इंरेजी सन १८३३ साले २९ नवम्बर मासे शुक्रवारे आमि पाइयाछिलाम, ताहार दृष्टे येमत वोध हइल तदनुसारे उत्तर लिखितेछि ।

प्रथम प्रश्नोत्तरेर भाषा—

यदि हिन्दु जातिर मध्ये कोनो ब्राह्मण वाटी हइते प्रस्थान करिया अनुद्देश हइया थाकेन, ताहार कोनो समाचार ना पाओया जाय, त तवे ताहार मरण निश्चय १२ वत्सरेर पर हइवेक, आर ताहार मरण निश्चय हइले एइ प्रकार व्यवहार उचित हइवेक ये शास्त्रानुसारे ये अधिकारी हइवेक से पर्णनर अर्थात पत्रेर निर्म्मित नराकार दाह करिया ३ दिवस अशौच ग्रहण करिया आद्य श्राद्ध प्रभृति कर्म्म करिवेक, आर ऐ अनुद्देश व्यक्तिर धन ताहार मरण निश्चय यखन हइवेक, ताहार पर क्षण अवधि ऐ धनके मृत व्यक्तिर त्यक्त धन वलिया व्यवहार हइवेक, आर ए विषये गमन दिन अवधि १२ वत्सर पर्य्यन्त नियम आछे ।

इहार प्रथम प्रमाण—

शुद्धितत्वप्रभृति ग्रन्थ धृतनारदमुनिवचनेर भाषा—

वाटी हइते प्रस्थान करिले ऐ व्यक्तिर १२ वतसर पर्यन्त यदि कोन समाचार ना पाओया जाय तवे ताहार पुत्र ओ ज्ञातिरा मरण निश्चय वोध करिवेक इति—

ओ द्वितीय प्रमाण-

शुद्धितत्वादि ग्रन्थ धृतआदिपुराणवचनेर भाषा—

ऐ प्रकार पर्णनर अर्थात् पत्रेर निर्म्मित नराकार दाह करिया त्रिरात्र अशौच व्यवहार करिवेक इति—

द्वितीय प्रश्नोत्तरेर भाषा—

यदि कोन ब्राह्मण व्यक्ति आपन वाटी हइते गमन करिया अनुद्देश हइया थाकेन, ताहार कोन समाचार ना पाओया जाय,

আর তাহার ধন অন্য কোন ব্যক্তি আক্রমন করিয়া গ্রহণ করে, তবে শাস্ত্রানুসারে তাহার ওয়ারিশ, যে পত্নী প্রভৃতি তাহারা ঐ প্রবাসি ব্যক্তির অতি অন্তরঙ্গ—এ প্রযুক্ত ঐ প্রবাসি ব্যক্তির ধনরক্ষার এক্তিয়ার করণ জন্য আর ঐ বিষয়ে প্রবাসি ব্যক্তির মরণ নিশ্চয় হইলে, ঐ পত্নী প্রভৃতির ভাবি হকীয়তের কো.. লোকসান না হইবার কারন ১২ বৎসরের মধ্যে ঐ পত্নী প্রভৃতি ওয়ারিশ লোক ঐ বস্তু তে আপন অধিকার করিবার নিমিত্ত দাবী করিতে পারে ইতি—

ইহার প্রথম প্রমাণ—

দায়ভাগাদি গ্রন্থ ধৃত কাত্যায়নমুনি বচনের ভাষা—

নাবালগের ধন অযথার্থ ব্যয় না করিয়া নাবালগের অন্তরঙ্গ লোকের স্থানে গচ্ছিত রাখিবেক, আর প্রবাসি ব্যক্তির ধনও ঐ প্রকারে রক্ষা করিবেক-ইতি ॥

দ্বিতীয় প্রমাণ—

দায়ভাগাদি গ্রন্থ ধৃত যাজ্ঞবল্ক্যমুনি বচনের ভাষা—

পুত্র ও পৌত্র ও প্রপৌত্র না থাকিলে মৃত ব্যক্তির ধন প্রথমে পত্নী পায়, পরে দুহিতা পায়, তৎপরে দৌহিত্র পায় ইত্যাদি।

তৃতীয় প্রশ্নোত্তরের ভাষা—

অনুদ্দেশ ব্যক্তির পুত্র পৌত্র প্রপৌত্র না থাকিলে পত্নী থাকিতে অন্য শরীক কোন ক্রমে অনুদ্দেশ ব্যক্তির ধনে অধিকার করিতে পারে না। এই সকল ব্যবস্থা বাঙ্গলার চলিত দায়ভাগাদি-গ্রন্থানুসারিণী।

ইহার প্রমাণ—

দায়ভাগাদি গ্রন্থ ধৃত যাজ্ঞবল্ক্যমুনি বচনের ভাষা—

পুত্র ও পৌত্র ও প্রপৌত্র না থাকিলে মৃত ব্যক্তির ধন প্রথমে পত্নী পায়, পরে দুহিতা পায়, তৎপরে দৌহিত্র পায়, তৎপরে পিতা, তৎপরে মাতা, তৎপরে ভ্রাতা পায়—ইত্যাদি ॥

अङ्गरेजी सन् १८३४ साल तारिख सातइसा माह् जानवरी रोज सोमवार एइ व्यवस्था आमी दाखिल करिलाम इति ।

३६—रामदास शर्मा मुफलेह्   मुदाइ
राधाचरण शर्म्मा ओ गयरह्   मुदाआलेहे
सओआलेर फर्द शदर देओआनी आदालतेर पण्डितेर निकट—
सओआलेर तपसिल—

प्रथम सओआल—

यदि नान्दिमुखेर श्राद्ध स्वामी ओ स्वीर पक्षे हइले ना हइया थाके तवे एइ प्रकार विवाह् सत्य हइते पारे कि ना—इति ।

द्वितीय सओआल—

भ्राता ना थाकाते ओ ज्ञाति सपिण्ड थाकिते यदि नान्दिमुख ना हइयाथाके तवे विवाह् सत्य हइते पारे कि ना—इति ।

तृतीय सओआल—

एइ सरते—ये एक व्यक्ति, आत्रिजाति ब्राह्मण, आपन कन्यार विवाह् कोन व्यक्तिर सहित स्थिर करिया, वाक्दान करिया ताहार मृत्यु हय । परे ऐ कन्यार विवाह अन्य व्यक्तिर सहित हइते पारे कि ना । आर यदि एक व्यक्ति, ये ताहार सहित विवाहेर कथोपकथन छिलो ना, विवाह् करे—ताहा सत्य हइते पारे कि ना—इति ।

चतुर्थ सओआल—

ऐ कन्यार विवाहेर समय ऐ कन्यार सपिण्डन ज्ञाति थाकिते सम्प्रदानेर क्रिया पुरोहित करिते पारे कि ना—यदि करिया थाके प्रामाण्य हइते पारे कि ना इति ।

सप्तम[१] सओआल—

यदि एक व्यक्ति एक जन स्त्रीलोकके, ये ऐ स्त्रीलोक ताहार खुडार भग्नीर कन्या हय, एवं ऐ दुइ जने ज्ञातत्त खुडततो भ्राता

---

[१] पञ्चम—इति साधीयान् पाठः ।

৩।৮ পুরুস তফাত হইয়া থাকে, বিবাহের কথা কহে, এবং কন্যার মাতার সপিণ্ড করণের দিবস বিবাহ হইয়া থাকে, তবে এ প্রকার বিবাহ সত্য বটে কি না ইতি।

पष्ठ सओोल—

यदि एक व्यक्ति एक स्त्री जयकाली नामक ओ एक पुत्र, द्वितीय स्त्रीर गर्भजात राखिया फौत करे; परे ऐ पुत्र आपन पितार त्येज्य वस्तुर पर दखिलकार हइया एक अविवाहिता कन्या राखिया फौत करे, परे ऐ कन्या आपन पितार तेज्य वस्तुर पर दखिलकार हय; परे एक व्यक्ति कहे—ये आमी सन १२२७ साले ऐ कन्याके विवाह करिया छि, ओ द्वितीय व्यक्ति कहे—जे आमी ऐ कन्याके सन १२२९ साले ओहार पितार वाकदानानुसारे विवाह करियाछि, एवं आमार एक पुत्र ऐ कन्यार गर्भे जन्मियाछिल, ताहाते ए कन्यार मृत्यु हय, एवं ताहार श्राद्धेर दिवस ऐ पुत्र आपन पिता अर्थात् ऐ द्वितीय व्यक्तीर समीच्चे मृत्यु हय, ए विषये यदि मोतओफफात मजकुरार विवाह करा सत्य हय तवे जयकाली मजकुरा उत्राधिकारिणी हय, कि ना। यदि विवाह सत्य ना हय। तवे कि आन्दाज उहाके अर्श इति।

सप्तम सओोल—

यदि एकजन स्त्री आपन स्वामी ओ नावालग पुत्र राखिया मृत्यु हय, ओ मोतओफफा मजकुरेर पितामहेर एक स्त्री मर्तमान थाके, परे ऐ नावालग पुत्रेर आपन पिता मोछम्मात मजकुरार स्वामीर समीच्चे मृत्यु हय, तवे एइ दुइ जना, अर्थात मेतओफफात मजकुरार स्वामी ओ पितामहेर थाकेन, इहार कोन व्यक्ति ओयारिश हइवेक इति।

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशश-

ताब्दीयजुलाइमासीयपञ्चदशदिनसम्बन्धिसोमवासरे मया प्राप्तं तदवलोक्य याद्दशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ।

प्रथमप्रश्नस्योत्तरम्—

वरस्य कन्यायाश्च पक्षतो विवाहकर्माङ्गीभूतनान्दीमुखश्राद्धं यदि न जातं स्यात्तथापि विवाहः सिद्धो भवितुं शक्नोति, अङ्गभूतकर्मणोऽकरणेऽपि प्रधानसिद्धेः शास्त्रीयत्वादिति ।

अत्र प्रमाणम्—

प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः ।

तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया ॥—इति तिथितत्त्वादि-(तित० पृ० ११)ग्रन्थधृतछन्दोगपरिशिष्टवचनम् ।

द्वितीयप्रश्नस्योत्तरम्—

यदि भ्रातृसत्त्वे सपिण्डसत्त्वेऽपि नान्दीमुखश्राद्धं न जातं स्यात् तथापि विवाहः सिद्धो भवितुं शक्नोतीति ।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरप्रमाणमेवेति ।

तृतीयप्रश्नस्योत्तरम्—

यदि कश्चित् श्रोत्रियब्राह्मणजातीयो व्यक्तिविशेषः स्वकीयकन्याविवाह-कथोपकथनं केनचित्सह स्थिरीकृत्य वाग्दानं कृत्वा मृतः स्यात्, पश्चात्तस्याः कन्याया विवाहोऽन्येन केनचित्सह कलौ भावितुं न शक्नोति, एवं येन सह विवाहकथोपकथनं न स्थितं स यस्मै वाग्दत्ता कन्या तस्मिन् विद्यमाने सति यदि विवाहं करोति तदा स विवाहः शास्त्रानुसारेण कलौ न सिद्ध्यतीति ।

अत्र प्रमाणम्—

दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च—इति कलिवर्ज्यप्रकरणे उद्वाहतत्त्वादि(पृ० ११२)ग्रन्थधृतमुनिवचनम् ॥

चतुर्थप्रश्नस्योत्तरम्—

यदि तस्याः कन्याया विवाहसमये तस्याः सपिण्डसत्त्वे सम्प्रदान-क्रियाकरणे कन्यादानाधिकारिणोऽनुमतिस्तदा पुरोहितेनापि सम्प्रदानक्रिया

कर्तुं शक्यते, नान्यथा। यदि च पुरोहितेन कन्यासम्प्रदानं कृतं स्यात्तत्र कन्यादानाधिकारिणोऽनुमतिश्चेत्तदा प्रमाणं भवति नोचेन्न भवतीति!

अत्र प्रमाणम्—

पिता पितामहो भ्राता सकुल्यो जननी तथा।

कन्याप्रदः पूर्वनाशे प्रकृतिस्थ परः परः॥—इत्युद्वाहतत्त्व(पृ० १२६) धृतमुनिवचनम्॥१॥

स्वामिनोऽनुमतिसत्त्वे तु अस्वामिकृतविक्रयोऽपि सिद्ध्यति, व्यवहारोऽपि तथा—इति विवादभङ्गार्णवादि(ग्रन्थ(१ विवा ३०३)लिखनम्।

पञ्चमप्रश्नस्योत्तरम्—

यदि सप्तमपुरुषबहिर्भूतपितृव्यसम्बन्धसपिण्डभगिनीकन्यया सह विवाहकथोपकथनं कृतम्, एवं कन्यामातृसपिण्डीकरणदिने विवाहो जातः स्यात्तदा तादृशविवाहः सिद्ध्यति। तत्र तस्याः कन्यायाः मातुः पतिपुत्रविहीनायाः सपिण्डीकरणं वस्तुतः शास्त्रतो यद्यपि नायाति, तथापि प्रश्नपत्रे लिखितमस्तीति कृत्वा मयोत्तरं लिखितमिति।

अत्र प्रमाणम्—

मातृतः पञ्चमीं त्यक्त्वा पितृतः सप्तमीं त्यजेत्—इत्युद्वाहतत्त्वादि(पृ० १०६)धृतमुनिवचनम्॥१॥

पतिपुत्रविहीनायाः स्त्रिया नास्ति सपिण्डनम्—इति तत्तद्ग्रन्थधृतमुनिवचनम्॥२॥

षष्ठप्रश्नस्योत्तरम्—

यद्येकः कश्चिद् व्यक्तिविशेषो जयकालीनाम्नीपत्नीमेकां पत्यन्तरगर्भजातमेकं पुत्रञ्च सत्त्वय मृतः स्यात्तदनन्तरं स एव पुत्रः स्वपितृव्य (?) त्यक्तधने आयत्तत्वं सम्पाद्याविवाहितां कन्यामेकां विहाय मृतः स्यात्तदनन्तरं सा कन्यापि स्वपितृत्यक्तधने आयत्तत्वं सम्पादितवती स्यात्, तदनन्तरं कश्चिद् वदति "बङ्गालाख्यसप्तविंशत्यधिकद्वादशशताब्दे मयेयं विवाहिता" इति, द्वितीयः कश्चिद् वदति बङ्गालाख्योनत्रिंशदधिकद्वादशशताब्दे तत्कन्यापितृकृतवाग्दानानुसारेण मयेयं विवाहितेति, एवं तस्याः गर्भे मया एकः

पुत्रः जनित इति च, ततः सा मृता, एवं तस्याः श्राद्धदिने सोपि पुत्रः स्वपितुः समक्षं मृतः स्यादेवंविधविषये मृतायास्तस्याः विवाहस्य सत्यतायामसत्यतायां वोभयथैव जयकाली उत्तराधिकारिणी भवितुं न शक्नोति, सपत्नी पुत्रदौहित्रत्यक्तधने मातामहविमातुः, सपत्नीपुत्रत्यक्तधने विमातुश्चेदानीं वङ्गदेशचलितशास्त्रानुसारेणाधिकाराभावात् । किन्तु मूलभूतधनस्वामिपत्नीत्वेन यावज्जीवं स्वभर्तृकुलोचितग्रासाच्छादनस्यावश्यकविधवाधर्माद्याचरणोपयुक्तधनस्य चाधिकारिणी भवतीति ।

अत्र प्रमाणम्—

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ।

ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ॥—इति मनु(६।२०२)-वचनम् ॥१॥

सप्तमप्रश्नस्योत्तरम्—

यद्येका काचित् स्त्री स्वपतिमप्राप्तव्यवहारं पुत्रञ्च संरक्ष्य मृता स्यादेवं तस्याः स्त्रियाः पितामहस्त्वेका पत्नी च वर्तमाना स्यात्, पश्चात्सोपि अप्राप्तव्यवहारः पुत्रः स्वपितुः समक्षं मृतः स्यात्, तदा पतिपितामहपत्न्योर्वर्तमानयोर्मध्ये पतिरेवाधिकारी भवति । तस्याः स्त्रिया[1] मरणानन्तरं विवादास्पदीभूतनद्धनेऽप्राप्तव्यवहारपुत्रस्वत्वस्योत्तराधिकारित्वेन जातत्वेन तद्धनं तस्यैवाप्राप्तव्यवहारस्य जातम् । अतस्तन्मरणोत्तरं तस्यैवा(प्राप्तव्यवहारस्य ये उत्तराधिकारिणस्तेषामेव भवति, तस्याप्राप्तव्यवहारस्योत्तराधिकारिणां मध्ये तत्पुत्रमारभ्य दौहित्रपर्य्यन्ताभावेन तत्पितुरेवाधिकारस्य शास्त्रसिद्धत्वात् । जयकाल्याश्च धनिनोऽप्राप्तव्यवहारस्य मातामहविमातुः सपत्नीपुत्रदौहित्रस्य तस्यैवाप्राप्तव्यवहारस्य त्यक्तधनेऽधिकाराभावात्—इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायभागटीका-उद्वाहतत्त्वादिग्रन्थानुसारिणी व्यवस्था ।

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा—इत्यादि तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

---

१. स्त्रीया म०—व्यप० ।

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयफेवरवरीमासीयदशमदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतिराम्
श्रीवैद्यनाथमिश्रेण

३७—रुवकारि मेछेल सदर देओानी आदालते मोकाम कलिकाता आदालते मजकुरेर हाकिम हेनरि सिकिसपीयेर छाहेवेर वैठके । सन १८३३ इं २८ माहे नवम्वर मोतावेक सन १२४० वाङ्गला १४ माहे अग्रहायन दिवस वृहस्पतिवार—

रतनचन्द्र ओ किरतचन्द्र छाएलान्

छायेलानेर उकिल लालावस्तिलाल हाजिर आसिलेक। छाएलानेर छओाल सन हालेर २४ जुलाइर हओा कोट आजिमावादेर हाकिम जेमछ हारिङ्गटीन छाहेवेर हुकुमेर नाराजिते जाहा तामछ कटवरट छाहेवेर अभिप्रायेर ऐक्यताय कोन व्यक्तिर अंशेर विना नामकरणे जायदाद निलामेर वावत छादर हय। हुकुम मजकुरेर तरदिद ओ॰ छाएलानेर दाखिल करा आमानत टाका। फेरत हओनेर प्रार्थनाय सन १८२९ इं॰ ११ शेतम्वरेर लिखित हुकुम गोपालचन्द्र ओ प्यारिलालेर एक किता छओाल आर २६ जुलाइर मस्तवार लिखित कोट मजकुरेर हाकिमेर रुवकारिर नकल एक किता सम्वलित, जाहा एइ मासेर १५ तारिखे दाखिल हइया छिल, पडागेल। प्रकाश हइतेछे ये आदालतेर कायदा ओ जावेता ओ प्रकार नहे ये एजमालिर डिगरिर हालते रशदि अंश सुरतेर कएक व्यक्ति मुद्दाआलेहेमेर पर डिगरि जारी आमले आइशे। अतएव ए विषय उपरेर लिखित प्रेवनशीयान कोटेर हुकुम जावेता ओ दस्तुरेर अन्यथा नहिवेक। किन्तु जखन एजमालि डिगरि जारि जन्ये हुकुम हइल, उचित

छिल जे डिगरिर टाका जे अन्दाज अंश किरतनचन्द्र अथवा गोपालचन्द्र, अथवा किरतचन्द्र हइते दाखिल हइया थाके ताहा फेरत दिया अंशेर विना निर्द्दिष्टे ते सुमुदय पैतृक विषयेर निलामेर हुकुम छादर करेण। किन्तु चुडन्त हुकुमे छादरेर पूर्व्वे हुकुम हइल जे एइ विशयेर व्यवस्था एइ आदालतेर पण्डित हइते तलव हय ये पैतृक कर्ज्जेर बावत डिगरिर जारि हालते यद्यपि सन्तानेरा पितार लोकान्तरे पैतृक त्यज्य वस्तुर पर अंश स्तरते दखिलकार हइया थाकेन तवे डिगरिर टाका सन्तानदिगेर अंश हइते लओया जाइवेक, कि अंशेर विना निर्णय पितार त्यज्य वस्तु हइते उसुल हइवेक। आर छेरेस्तादार, यदि स्यात्, एइ मकर्द्दमार प्रमान एइ आदालतेर सेरेस्ताय थाके गुजरायेन। इति

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिकिसबीयरसाहेवधर्म्माधिकरणलिखिताङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयनवम्वरमासीयाष्टाविंशतितमदिवसीयविचारपत्रान्तर्गतप्रतिरूपपत्रं यत्तदब्दीयदिशम्वरमासीयाष्टाविंशतितमदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

यदि पैतृकर्णपरिशोधनार्थं धर्म्माधिकरणतो जयपत्रे प्रकाशिते सति पुत्राः स्वपितुर्मरणोत्तरं तत्त्यक्तधने अंशित्वेन आयत्तत्वं सम्पादितवन्तः स्युस्तदा जयपत्रविषयीभूतपैतृकमृणं पुत्राः स्वस्वांशानुसारेण स्वस्वांशत एव दद्युः, यतः पित्रुपरमानन्तरं तत्त्यक्तधने पुत्राणां यथा अधिकारस्तथैव पैतृकर्णपरिशोधनेप्यधिकारः। अतएव पितृमरणोत्तरमंशानुसारेण गृहीतपैतृकधनानां पुत्राणामंशानुसारेणैव पैतृकर्णपरिशोधनाधिकारस्य शास्त्रानुसारेण न्याय्यत्वात्—इति पाटलिपुत्रप्रभृतिदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारमाधवव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

रिक्थग्राह[1] ऋणं दाप्यः-इति उपरिलिखितग्रन्थधृतयाज्ञवल्क्य-वचनम् ॥१॥

पितर्य्युपरते पुत्रा ऋणं दद्युर्यथांशतः ।

विभक्ता अविभक्ता वा यो वा तामुद्वहेद्धुरम् ॥—इत्युपरिलिखित-ग्रन्थधृतनारदवचनम् ॥२।

विभजेरन्सुताः पित्रोरूर्द्ध्वं रिक्थमृणं समम्-इति तत्तद्ग्रन्थधृतयाज्ञवल्क्यवचनमिति ॥३॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयफिवरवरीमासीयाष्टाविंशतितमदिनसम्बन्धिशुक्रवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

न० ३४५५

३८—रूवकारि मिछिल आदालते सदर देओानि मोकाम कलिकाता आदालत मजकुरार हाकिम हेनरि सिक्सिपीयर छाहेवेर वैठके। सन १८३१ ई हओा तारिख २६ नवम्बर मोतावेक सन १२४० वाङ्गला १२ अग्रहायन दिवस मङ्गलवार—

राजा पटनीमन ओ राय वनशीधन आपिलाण्टान्।
राय मनोहरलाल स्वयं ओ अलि स्वरूप
जानिवे आनन्दिलाल ओ हरजयलाल ओ
मुकुन्दलाल ओ हरवनशीलाल नावालगान् रेछपाडण्टान।

आपिलाण्टानेर उकिलान मुनशी होछन आलि ओ मुनशी दादार वखश ओ रेछपाडण्टानेर उकिलान् मुनशी अलिउल्ला ओ मुनशी गोलाम आहमद हाजिर आसिलेक ओ रेछपाडण्टानेर तृतीय उकिल सदासुखपण्डित पिडित त्रिधाय हाजिर

---

१. ऋक्थग्राह—व्यप० ।

नाइ। एइ मकद्दमा गत कल्य आमार बैठके उपस्थित आर गत कल्येर रूवकारिर लिखित उजुहाते अनेक कागजात पडा हइया दिवा अवसान जन्ये मलतवि रहिल। अद्य पुनराय उपस्थित। ओ उभय विवादिर विवाद वावत एइ आदालतेर मतफरकार रूवकारिसकल ओ एइ आदालत ओ कोटेर मिछिलेर गाँथा उभयेर दस्तावेज पडा गेल। यद्यपि चुडन्त हुकुम हओयार पूर्व्वे कयेक विषयेर जिज्ञाशा एइ आदालतेर पण्डित हइते आवश्यक बोध हइल, अतएव हुकुम हइल ये ऐ रूवकारिर नकल सम्वलित एइ आदालतेर ओ कोर्टेर सकल कागजात एक सप्ताह मियादे ऐ पण्डितेर निकट पाठान जाय ये वारानशेर पाठशालार व्यवस्था ओ सुप्रीम कोर्ट ओ अन्य अन्य पण्डितेर दस्तखति व्यवस्था दृष्टान्तरे एइ विशयेर जओाव लेखेन। जे ओजएम वेवाडिन छाहेव हाकिमेर हुजुरेर वावत ऐ पण्डितेर जोवानि जओाव-सकलेर सुधरान अथवा वदलानु हेतु, जहार जेकेर ऐ हाकिमेर रूवकारिते लिखित आछे, किछु आवश्यक हय कि ना। आर यद्यपि ऐ पण्डितेर पूर्व्वेर राय वर्त्तमान थाके, तवे लेखेन ये उपरेर व्यवस्थाहाय मजकुरेर लिखित वचनसकल कोन विचारे अशुद्ध गणा जाइतेछे, आर आपन व्यवस्थार वुनयाद आ कोन वचनसकलेर पर मवतनी आछे, सरेओार लेखेन। ओ यद्यपि आपिलाण्टानेर उकिल रेछपाडण्टानेर दाखिल करा व्यवस्था वावते मकद्दमा नेहालसिंह आपिलाण्ट ओ चेत्तू रेछपाडण्टेर पक्षे विशेषत एइ विशयेर पर ओजरदार आछे ये ऐ मकद्दमार उभय विवादीय ब्राह्मण जाति छिलेन, आर ऐ मकद्दमार उभय आगरओाला वैश्य जाति हयेन। अतएव उचित ये ऐ पण्डित ताहार पर दृष्ट करिया ऐ विशयेर जओाव, जे आगरओाला जातिर मर्य्यादा निमित्त व्यवस्था मजकुरेर किछु तफात आविश्यक आइसे, कि ना लेखेन। आर कोर्टेर मिछिलेर ६४ लम्वरेर दाखिल करा एइ आदालतेर सावेक पण्डित-

नकलेर व्यवस्था, जाहा मतफरकार मुकद्दमार विचारे एइ आदालते लओा गीयाछे, ऐ पण्डित ताहार पर ओ गौर ओ ताम्बुल करिया जओाव लेखेन—ये तदनुसारे ओ तदान्तर ये सकल तहकीकात आमले आशीयाछे, तद्दृष्ट व्यवहार किछु तवदिल हेतु आवश्यक हइवेक, कि ना। ओ यदि स्यान् आवश्यक हय ताहार जेकेर लेखेन इति ॥

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतहेनरीसिक्किमरीयरसाहेबधर्म्माधिकरणलिखिताङ्गरेजीशब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयनवम्बरमासीयषड्विंशतितमदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पिततद्विवादविषयनिविष्टपत्रजातञ्च यत्तदब्दीयदिशम्बरमासीयाष्टाविंशतितमदिनसम्बन्धिशनिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते।

वाराणस्यधिकरणकपाठशालास्थपण्डितलिखितव्यवस्थापत्रस्य सुप्रीमकोर्टाख्यधर्म्माधिकरणनियुक्तपण्डिततदितरपण्डितसम्मतव्यवस्थापत्रस्य चावलोकनेन श्रीयुक्तोलियमवेराडीनसाहेबाभिधानेतद्धर्म्माधिकरणाधिपतिकृतास्मत्संबन्धिप्रश्नस्यास्मद्दत्तवाचनिकोत्तरस्य परावर्त्तनस्य शुद्धकरणस्य चावश्यकता काचिदपि नास्ति। तथाहि श्रीयुक्तोलियमवेराडीनसाहेबाभिधानैस्तद्धर्म्माधिकरणाधिपतिकृतास्मत्संबन्धिप्रश्नश्चायमेव। यद्यपि हिन्दूजातीयः कश्चित् पत्नीमेकां पञ्च दौहित्रान्, येषां दौहित्राणां माता विद्यमाने स्वपितरि मृता स्यात्, द्वौ भ्रातुष्पुत्रौ च संत्यज्य मृतः स्यात्, एवं क्रमागतधनं भ्रात्रोर्द्वयोर्म्मध्ये विभक्तं स्यात्तदा तस्य मृतस्य त्यक्तांशः कस्य भवतीत्येकः। तदुत्तरं मया दत्तं 'तत्पत्नी प्राप्नुयात्।' पुनः प्रश्नान्तरम्—तत्पत्नीमरणोत्तरं कस्य भवतीति। तदुत्तरं मया दत्तम्—'दुहिता यदि नास्ति तदा दौहित्राः प्राप्नुयुः' इति। अत एवैतयोर्द्वयोः प्रश्नयोर्म्मध्ये प्रथमप्रश्नस्य यदुत्तरं मया दत्तं तदेवोत्तरं तत्प्रश्नविषये वाराणस्यधिकरणकपाठशालास्थपण्डितैः सुप्रीमकोर्टाख्यधर्म्माधिकरणनियुक्तपण्डितैरन्यैरपि पण्डितैर्लि-

खितम् । तत्र कश्चिद्विशेषो नास्ति, तद्व्यवस्थाद्वयोर्म्मध्ये विभक्तकृत्स्न पतिधने[1] तु पूर्व्वं पत्न्या एवाधिकारः, इत्यस्य लिखितत्वात् ।

द्वितीयः प्रश्नो यस्तदधिपतिना मां प्रति कृतस्स च प्रश्नो वाराणस्य-धिकरणकपाठशालास्थपण्डितान् प्रति सुप्रीमकोर्टाख्यधर्म्माधिकरणनि-युक्तपण्डितान् प्रति तदितरपण्डितान प्रति वा तत्प्रश्नकर्त्तृभिर्यद्यपि न कृतस्तथापि तैः पण्डितैरेकानुपूर्व्वीकसंस्कृतव्यवस्थाद्वयोरधोभागे कात्यायन-मुनिवचनं वीरमित्रोदयग्रन्थलिखिततद्वचनव्याख्यानञ्च प्रमाणं लिखित्वा यल्लिखितं यत्तत्पारसीकतत्प्रतिरूपेणैक्यं नालम्बते । तस्यायं पर्य्यवसितार्थः । यद्विभक्तं पतिधनं पतिमरणोत्तरं पुत्रपौत्रप्रपौत्राभावे सत्युत्तराधिका-रित्वेन पत्न्या प्राप्तं स्यात्, पत्नीमरणोत्तरं तद्धनं पतिभ्रातृपुत्रदौहित्रयोः समवाये पतिभ्रातृपुत्रा एव प्राप्नुयुर्न्न दौहित्रा इति । तत्र वीरमित्रोदय-ग्रन्थलिखितस्य कात्यायनवचनस्य तद्वचनव्याख्यानस्य चायमेवाभिप्रायः । यदि विभक्तं पतिधनं पुत्रपौत्रप्रपौत्राभावे सत्युत्तराधिकारित्वेन पत्न्या प्राप्तं स्यात्तदा पत्नीमरणोत्तरं तत्संक्रान्तपतिधनं पत्युर्य्ये उत्तराधिकारिणस्त एव गृह्णीयुः, न तु पत्न्युत्तराधिकारिण इति । तत्र च पत्युत्तराधिकारिणां मध्ये "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुतः"—इत्यादि याज्ञवल्क्यादि-वचनोक्तसत्युत्तराधिकारिणां दुहित्रादीनामेवाधिकारः । तत्रापि प्रथमं दुहि-तुस्तदभावे दौहित्राणां तदभावे मातुस्तदभावे पितुस्तदभावे भ्रातॄणां तदभावे भ्रातृपुत्राणां तदभावे गोत्रजादीनां पाठक्रमेणाधिकारः । तत्र च पत्नी-मरणोत्तरं विद्यमानायां दुहितरि विद्यमानेषु दौहित्रेषु विद्यमानायां मातरि विद्यमाने च पितरि विद्यमानेषु च भ्रातृषु पतिभ्रातृपुत्रात् पूर्व्वं पत्युत्तरा-धिकारिषु एतान् विहाय पतिभ्रातृपुत्राणामधिकारो भवति – एतद्विधायकः पश्चिमदेशचलितधर्म्मशास्त्रान्तर्गतस्य कस्यापि ग्रन्थस्याभिप्रायो नास्ति । अतएव तत्तद्व्यवस्थालिखितपण्डितानां मतं पश्चिमदेशचलितशास्त्रबहिर्भू-तमेव, तत्तत्पण्डितैः स्वस्वव्यवस्थालिखितवचनानां वीरमित्रोदयादिग्रन्थानां चाशयानबुध्द्वैव लिखितत्वात् । अतएव वीरमित्रोदयादिग्रन्थलिखित-

१. कृत्स्न—व्यप० ।

कात्यायनवचनं तद्व्याख्यानञ्च यत्तत्तत्खण्डतलिखितव्यवस्थामूलभूतप्रमाणमस्ति तदेतद्व्यवस्थाया अधोभागे प्रमाणत्वेन, एवं सर्व्वत्रैव वीरमित्रोदयादिग्रन्थे यत्पतिधनं पुत्रपौत्रप्रपौत्राभावे सत्युक्ताधिकारित्वेन पत्न्या प्राप्तं तद्धने पत्नीमरणोत्तरं प्रथमं दुहितुस्तदभावे दौहित्राणामधिकारस्य बहुशो लिखितत्वात्, तद्विषयकवीरमित्रोदयादिग्रन्थलिखितप्रमाणान्यप्येतद्व्यवस्थाया अधोभागे प्रमाणत्वेन मया लिखितानि सन्ति। तैरेवैतत्सर्व्वं स्पष्टमिति।

एवञ्च सति अस्मद्दत्तश्रीयुक्तालियमवेराडीन साहेव मिथानैतद्धर्म्माधिकरणाधिपतिसमीपे वाचानकोत्तरस्य प्रमाणान्यप्येतद्व्यवस्थाया अधोभागे लिखितानि सन्त्येवेति। एवं थानसिंहनाम्नोऽर्थिनः जिनुनाम्न्याः प्रत्यर्थिन्या विवादसम्बन्धिन्या व्यवस्थाया अगरवालाख्यवैश्यजातीयस्य मर्य्यादार्थमेतद्विषये कस्यचिद्विशेषस्यावश्यकता नास्ति। याज्ञवल्कीयापुत्रधनाधिकारप्रकरणीयवचने सर्व्ववर्णेष्वयं विधिः' इति। अस्य विशेषतो लिखितत्वात्। एवं कोटपालाख्यधर्म्माधिकरणनिविष्टपत्रजातान्तर्गतचतुःपञ्चयङ्काङ्कितव्यवस्था चैतद्धर्म्माधिकरणे विवादास्पदीभूतधनजाते आयत्तत्वसम्पादकाज्ञाभवनकाले गृहीता, तदनुसारेण तदनन्तरं यच्चदनुसन्धानं धर्म्माधिकरणतो जातं तद्दृष्ट्यापि श्रीयुक्तालियमवेराडीनसाहेवाभिधानैस्तद्धर्म्माधिकरणाधिपतिकृतास्मत्सम्बन्धिप्रश्नस्यास्मद्दत्तवाचानिकोत्तरव्यवस्थायाः काचिदपि परावर्त्तनस्यावश्यकता नास्ति, तद्व्यवस्थायामपि पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य विभक्तधने प्रथमं पत्न्यास्तदभावे दुहितुस्तदभावे दौहित्राणामधिकारस्य स्पष्टीकृतत्वात्-इति पश्चिमदेशान्तर्गतागराप्रदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमाधवव्यवहारमयूखव्यवहारकौस्तुभादिग्रन्थानुसारिणी व्यवस्था--

तत्र प्रमाणम्—

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥—इति वीरमित्रोदयादिग्रन्थधृतकात्यायनवचनम्॥१॥

अयञ्च वचनार्थः—दायादा इत्यत्र कस्येत्यपेक्षायां शयनान्वितभर्तु-रित्येवोपस्थितत्वादनुषज्यते—इति वीरमित्रोदयग्रन्थलिखनम् ॥२॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥

एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः ।

स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः ॥—इति मिताक्षरावीर-मित्रोदयव्यवहारमाधवव्यवहारमयूखव्यवहारकौमुदभादिग्रन्थधृतयाज्ञवल्क्य-वचनम् ॥३॥

पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्—इति मिता-क्षराग्रन्थलिखनम् ॥४॥

तस्माद्विभक्ता संसृष्टयन्यपुत्र स्वर्याते पत्नी धनं प्रथमं गृह्णात्ययमर्थः सिद्धो भवति—इति मिताक्षराग्रन्थलिखनम् ॥५॥

तस्मादपुत्रस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनो धनं परिणीता स्त्री संयता सकलमेव गृह्णातीति स्थितं, तदभावे दुहितरः—इति मिताक्षरा-ग्रन्थलिखनम् ॥६॥

दुहित्रभावे दौहित्रो धनभाक्—इति मिताक्षरावीरमित्रोदयादि-ग्रन्थलिखनम् ॥७॥

पत्न्यभावे दुहितरोऽपुत्रविभक्तासंसृष्टधनभाजः—इति वीरमित्रोदय-ग्रन्थलिखनम् ॥८॥

यथा पितृधने स्वाम्यं तस्याः सत्स्वपि बन्धुषु ।

तथैव तत्सुतोऽपीष्टे मातृमातामहे धने ॥—इति वीरमित्रोदयग्रन्थधृत-बृहस्पतिवचनञ्चेति ॥९॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयफिवरवरीमासी-याष्टाविंशतितमदिनसम्बन्धिशुक्रवासरे मयेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

१३४ लम्बर आपील—

इ० १८३१ साल

३६—सदर देओयानि आदालतेर पण्डितेर प्रति प्रश्नः—
यद्यपि स्यात् एक व्यक्ति अपुत्रक एक विधवा कन्या आर ऐ कन्यार एक पुत्र एवं एक कन्या ऐ व्यक्तिर वर्त्तमाने मरे। ताहार एक पुत्र आर सहोदर भ्रातार एक पुत्र राखिया लोकान्तर करे। आर ऐ व्यक्तिर मरणान्ते ऐ वर्त्तमाना कन्यार पुत्रेर मृत्यु हय—एमत स्थले ऐ व्यक्तिर स्थावरादिधने काहार अधिकार हय। आर पूर्व्वोक्त कन्या ओ दौहित्रगण वर्त्तमान थाकिते ऐ व्यक्ति उदरामय ओ ज्वररोगावस्थाय आपन स्थावरादि धन सहोदर भ्रातार पुत्रके दान करिया ऐ दानपत्रे दौहित्रगणेर मोशाहेरा निर्णय करिया ऐ दानेर वस्तुर उपस्वत्व हइते दिवार विषये दानगृहीता व्यक्तिर प्रति अनुमति लिखिया देय, तवे एमत दान शास्त्रानुसारे सिद्ध वटे, कि ना—इहार यथाशास्त्र प्रत्युत्तर लिखिवा—इति।

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रमेतद्विवादविषयनिविष्टपत्रजातञ्च यदङ्गरेजीयाब्दप्रतिपाद्यत्रयस्त्रिंशदधिकाष्टादशशताब्दीयनवम्बरमासीयोनत्रिंशत्तमदिनसम्बन्धिशुक्रवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि पुत्रपौत्रप्रपौत्ररहितः कश्चिद्व्यक्तिविशेष एकां विधवां दुहितरं तत्पुत्रञ्चैकं स्वजीवनावस्थायां मृताया एकस्या दुहितुरेकं पुत्रं सहोदरभ्रातृपुत्रञ्चैकं संरक्ष्य मृतः स्यात् तन्मरणानन्तरञ्च विद्यमानायास्तत्कन्यायाः पुत्रस्य मरणं जातं चेदपि धनिनो मृतस्य त्यक्तधने तन्मरणाकालीनविद्यमानपुत्रयोः सम्प्रति च वर्त्तमानाया दुहितुरेवाधिकारः। यतः पुत्रपौत्रप्रपौत्ररहितस्य मृतस्य त्यक्तधने प्रथमं पत्न्यास्तदभावे दुहितुरधिकारः, दुहितृष्वपि प्रथमं कुमार्य्यास्तदभावे चोढायाः पुत्रवत्याः सम्भावित-

पुत्रायाश्चाधिकारः अत एव पितृमरणोत्तरं या कन्या पुत्रवती स्थिता तस्या अधिकारस्य धनिनो मृतस्य पुत्रमारभ्य कुमारीपर्य्यन्तरहितस्य त्यक्तधने निष्प्रत्यूहतया जातत्वेन जाताधिकारायां तस्यां विद्यमानायां तत्पुत्रस्य मरणेऽपि धनिनो मृतस्य त्यक्तधने तस्य अधिकारो नैव विनश्यति। अतस्तस्यां विद्यमानायां तत्संक्रान्तपितृधने तत्पितृदौहित्रस्यार्थात्तद्भगिनी-पुत्रस्य विद्यमानस्य तत्पितृभ्रातृपुत्रस्य च नाधिकारः। एवं पूर्व्वोक्तकन्या-दौहित्राणां विद्यमानतायामुदरामयज्वररोगावस्थायां स्वस्वत्वास्पदीभूतस्थाव-रादिधनस्य भ्रातृपुत्रसम्प्रदानकं यद्दानं तेन कृतं तद्दानपत्रे दानविषयीभूत-स्थावरादिधनोपस्वत्वात् स्वदौहित्राणां ग्रासाच्छादनदानार्थमनुमतिर्दानप्रदा-तारं स्वभ्रातृपुत्रं प्रति लिखिता स्यात्तदान(?)मेतद्विवादविषयानिविष्टप्रभुसमर्पित-पत्रजाततात्पर्य्यार्थविवेचनया धर्म्मशास्त्रानुसारेण न सिद्ध्यति। कथञ्चिद्दानं जातं चेदपि दातृत्वेन मन्यमानस्य रोगार्त्ततावस्थायामेतद्दानस्य जातत्वेनै-तादृशदानसिद्धेः शास्त्रीयत्वाभावात्—इति वङ्गदेशचलितमनुदायभागदाय-तत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसा-रिणी व्यवस्था—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतो गोत्रजो बन्धुः—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्य-वचनम्॥

अपुत्रस्य मृतस्य कुमारी रिक्थं[1] *गृह्णीयात्तदभावे चोढा*—इति दायभागादिग्रन्थधृतपराशरवचनम्॥

पुत्रवती सम्भावितपुत्रा चाधिकारिणी—इति दायभागग्रन्थ-लिखनम्॥ ३॥

कुमार्य्यभावे चोढाया पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्योऽधिका-रस्तयोरेकतराभावे एकतराधिकारः—इति दायक्रमसंग्रहग्रन्थलिखनम्॥ ४॥

---

१. ऋक्थं—व्यप०।

अदत्तन्तु भयक्रोधकामशोकरुगन्वितैः— इत्यादि विवादार्णवसेतु विवादभङ्गार्णवादिग्रन्थधृतनारदवचनम् ॥ ५ ॥

तत्र भयादिरुगन्वितान्ताः[१] *पञ्चप्रकृतिस्थितिविरोधिनो द्रष्टव्याः*— इति विवादार्णवसेतु (पृ० १५३) विवादभङ्गार्णवग्रन्थ १ विवा०४८६ख) लिखनञ्चेति ॥ ६ ॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशततमीयमेमासीयनवम-दिनसम्बन्धिशुक्रवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

४० रोवकारि मिछिल आदालते देओयानि सदर मोकाम कलिकात्ता इङ्गरेजी सन १८३४साल तारिख ६ माह माइ मोताबक वाङ्गला सन १२४१साल तारिख २५ माह वैशाख रोज मङ्गलवार आदालत मजकुरेर हाकिम श्रीयुत रावट हालडन राटरि साहेबेर वैठके—

रामगोपालदेओ वनाम गकुलचन्द्रतहविलदार
ओ कृष्णगोविन्दतन्तर
ओ जुगलकिशोरतन्तर
ओ हरेकृष्णतन्तर
ओ राजकिशोरतन्तर

छाएल हाजीर हइल। छाएलेर सओाल एक टाका मुल्येर इष्टाम्प कागजेर पर दासत्वेर मकद्दमाय दासत्व ओ कार्य्येर खेसारत वावत मवलगे १५ टाकार परिमाणे खास आपिल ग्राह्य हओनेर प्रार्थनाय एक केता जेला मयमनसिंहेर काजी

---

१. क्रोधादिरुगन्विताः इति विवादार्णवसेतुपाठः।

सदर आमिनेर फयसलार नकल इं सन १८२८ सालेर ३०माह दिजम्बरेर लिखित ओ एक केता जेला मजकुरेर जजसाहेबेर फयसलार नकल इं सन १८३३ सालेर १७ दिजम्बरेर लिखित सम्वलित, जाहा सन हालेर १३माह मार्च्च तारिखे दाखिल हइयाछिल, अद्य उपस्थित ओ दृष्ट हइल। जे हेतुक ए मकद्दमार उभये हिन्दुजाति हयेन, अतएव ए मकद्दमार फयसलासकलेर यथार्थ ओ अयथार्थेर प्रति व्यवस्था लओन उचित बोध हइया हुकुम हइल जे समुदय कागजाते ए आदालतेर पण्डितके समर्पण करा जाय। उचित ये पण्डित कागजात अनुमोदन ओ दृष्ट पूर्व्वक ए विशयेर व्यवस्था ये ए मकद्दमार फयसला-सकल वाङ्गला देश चलित शास्त्रमते यथार्थ वटे, कि ना—लिखिया मदरसेर वन्देर पूर्व्वे दाखिल करेण इति—

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरावटहालडनराटरीसाहेवधर्म्माधिकरणलिखितैतदब्दीयमेइमासीयपञ्चदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं च यदेतदब्दीयमेइमासीयसप्तमदिनसम्बन्धिबुधवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

एतद्विवादविषयनिविष्टमयमनसिंहजिलाख्यावान्तरधर्म्माधिकरणनियुक्तसदरआमीनपदाभिषिक्तकाजीशब्दप्रतिपाद्यकृताङ्करेजीशब्दप्रतिपाद्याष्टाविंशत्यधिकाष्टादशशताब्दीयदिशम्बरमासीयत्रिंशत्तमदिवसीयजयपत्रं वङ्गदेशचलितशास्त्रानुसारेण यथार्थमेव भवति—इति वङ्गदेशचलितदायभागादिग्रन्थानुसारिणी व्यवस्था—

अत्र प्रमाणम्—

यत्रापि चैकं दासीगवादिकं वहुसाधारणं तत्रापि तत्तत्कालविशेषे वहनदोहनफलेन स्वत्वं व्यज्यते। तदाह वृहस्पतिः—

"एकां श्रीं कारयेत् कर्म्म यथांशेन गृहे गृहे" इति युक्त्या विभजनीयम्, तदन्यथानर्थकं भवेत्—इति च दायभाग(पृ० ६)ग्रन्थ-लिखनम् ॥१॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयमेइमासीयसप्तविंशतितमदिनसम्बन्धिमङ्गलवासरे मयेयं व्यवस्था दत्तेति—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

(४८)—मोकाम कलिकातार सदर देओआनि आदालतेर इंरेजि सन १८३४ सालेर १८ जानेर मोतावक वाङ्गला सन १२४० सालेर ६ माघ शनिवार तारिखेर श्रीयुत ओलीयम ब्राडिन साहेव ऐ आदालतेर हाकिमेर वैठकेर रोवकारि—

७५ नं:—

सन १८३२ साल

राधानाथचौधुरि आपीलाण्ट

श्रीमति कृष्णरमनिदास्या, कृष्णनाथ मोतओफार कन्या ओ परानचन्द्रनेउगी ओ राधाचन्द्रनेउगी नावालगदिगेर माता—

रेष्पाडण्ट

आपीलाण्टेर उकिल सदासुखपण्डित हाजिर आइल। एइ मोकद्दमा कल्य ओ अद्य आमार वैठके रोवकार हइया जेलार तावत कागज ओ क्रोट आपिलेर कागजसकल ओ ए आदालतेर कागजसकल पाठ करा गेल। चुडन्त हुकुम प्रकाश हओनेर पूर्व्वे निचेर लिखित प्रश्नसकलेर प्रत्युत्तर ए आदालतेर पण्डितेर स्थाने लओा उचित वोध हइया हुकुम हइल जे एइ रोवकारिर नकल मोकद्दमार कागज समेत ए आदालतेर पण्डितके एइ हुकुमे समर्पन करा जाय ये निचेर लिखित प्रश्नसकलेर प्रत्युत्तर एइ हुकुम प्राप्तेर दिवसावधि तिन सप्ताह मध्ये दाखिल करेन।

प्रथम प्रश्न—कोन व्यक्ति हिन्दुर एक पुत्र तिन कन्या ओ एक सहोदर भ्राता ओ पैतृक वस्तु राखिया मृत्यु हय। ताहार पर ए मृत व्यक्तिर पुत्र अविवाहित समय उहार तिन सहोदरा भगनी, ताहार मध्ये एक जनार दुइ पुत्र, ओ स्वामि आछे, आर दुइ जना पुत्रसन्तान राखे ना, वर्त्तमान थाकितेओ पैतृक विषय आपन पितृसहोदरके हेवा करे। तवे ए प्रकार पैतृक विषयेर हेवादातार पितार दौहित्रगण थाकितेओ वाङ्गलादेशीय चलितशास्त्रानुसारे सिद्ध ओ यथार्थ वटे कि ना इति—

द्वितीय प्रश्न—यद्यपि स्यात् वाङ्गलादेशीय चलितशास्त्रानुसारे एइ हेवानामा सिद्ध बोध हय, तवे साक्षीदिगेर जवानवन्दि प्रभृति मोकद्दमार कागजसकलेर द्वाराय कोन एक द्वितीय हेतु ए हेवानामा अयथार्थेर विषये पाओ। जाय—ताहा विस्तारित लेखेन इति—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतओलियमवेराडिनसाहेवधर्म्माधिकरणलिखितैतदब्दीयजानवरीमासीयाष्टादशदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं च यदेतदब्दीयजानवरीमासीयद्वाविंशतितमदिनसम्बन्धिबुधवासरे मया प्राप्तं तदवलोक्य यादृशाबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

यदि हिन्दुजातीयः कश्चिद्व्यक्तिविशेषः पुत्रमेकं कन्यात्रयं सहोदरभ्रातरं चैकं पैतृकं धनं च संरक्ष्य मृतः स्यात्तदनन्तरं तस्य पुत्रोऽप्यविवाहित एव पुत्रद्वयवत्या एकस्याः सधवाया भगिन्या अपरयोः पुत्ररहितयोर्द्वयोर्भगिन्योश्च विद्यमानतायामपि स्वपैतृकधनस्य दानं स्वपितृव्यमुद्दिश्य कृतवान् स्यात्तदोपरिलिखितानां भगिन्यादीनां मध्ये ये केचित्तद्धनमात्रोपजीविनस्तेषां यावज्जीवं स्वपितृकुलोचितग्रासाच्छादनोपयुक्तादावश्यकधर्म्माद्याचरणोपयुक्ताच्च धनाद्यदवशिष्टं धनं तद्विषये तद्दानं सिद्धं भवतीति—

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम्--इति मनुवचनम् ॥१॥

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते—इति विवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थधृतबृहस्पतिवचनम् ॥२॥

स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।

कुर्य्युर्य्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै ॥--इति दायभागादिग्रन्थधृतनारदवचनञ्चेति—

द्वितीयप्रश्नस्योत्तरम्—

(ए)तद्विवादविषयनिविष्टपत्रजातैरेतद्दानस्यायथार्थताबोधकः कश्चिद्धेतुरद्यापि न प्राप्तः। यद्यप्यर्थिप्रत्यर्थिनोः प्रश्नोत्तराभ्यां दानसमये दातू राजयक्ष्मरोगग्रस्तताऽवगम्यते, परन्तु तत्तत्पत्रजातैर्दातृपितृपरमसमये दातुस्तद्रोगग्रस्ततताया अनवगमेन दातुः स्वपितृपरमानन्तरं तत्त्यक्तधने स्वत्वोत्पत्तेर्निश्चिततत्वेन केश्चित् तत्पत्रजातैर्दानसमयात् पूर्वं प्रायश्चित्तकरणस्याप्यवगमेन तद्दानसमयात्पूर्वं कृतप्रायश्चित्तस्य स्वपितृपरमसमये अजाततद्रोगस्य पितृत्यक्तधने जातस्वत्वस्य तद्रोगग्रस्ततायास्तत्कृतदानस्याशास्त्रीयत्वसम्पादकत्वाभावात्—इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणत्रयम् ॥३॥

पतितानामपि स्वधनसाध्यप्रायश्चित्तश्रुतेः पातित्येन स्वत्वनाशः प्रायश्चित्तवैमुख्ये बोध्यः—इति दायतत्त्व(पृ० १६२)दायभागटीका(पृ० १६)विवादभङ्गार्णवादि(२ विवा १४ ख १५ क)ग्रन्थलिखनञ्चेति ॥४॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयजूनमानीयद्वादशदिनसम्बन्धिबृहस्पतिवासरे मयेयं व्यवस्था दत्तेति ।

श्रीजयतितराम्

श्रीवैद्यनाथमिश्रेण

———

(४२)—नं० ६४ सदर आपील —

रोवकारि सदर देओानि आदालत मोकाम एलाहाबाद ए आदालतेर हाकिम श्रीयुत आलकसुन्दर जान कालओन साहेबेर बैठके। ओाकका तारिख ३० देछम्बर सन १८३३ ई मोतावेक ४ पौष सन १२४१ फछलि वोज[1] सोमवार—

लछमीकान्तकालिया आपीलाण्ट

रघुनाथरायेर मृत्यु ओ रानाराओ[2] ओ लछमीराओ[3] निमाराओर ओारिश आपन तरफ हइते एवं रघुनाथराओ मजकुरेर ओारिसिर दाविदार— रेष्पाडण्टान

गोविन्दलओाजापुरि रघुनाथराओ मतोफार लिखित ओछियतनामा सुरते अछियतेर दाविदार—

छाएल—

आपिलाण्टेर उकिलगण छयद फजल होसेन ओ मौलवि गोलाम जिनानि ओ पण्डित ब्रजलाल ओ मौलवि नेयामत आली ओ लाला पहलओानसिंह ओकिलान, गोविन्दलओाजारपुरि दाविदार ओछियत रघुनाथराओ मतोफार एक रेष्पाडण्टेर तरफ हइते छानि ओकालतनामा दाखिल करिया ओ रानाराओ ओ लदमीराओ रेष्पाडण्टानेर एवं रघुनाथराओ मजकुरेर वाछतेर दाविदारेर उकिलान् लाला रामचन्द्र ओ छइएलाएत आली हाजिर आइल। ई सन १८३३ सालेर २४ आपरेल ओ १५ मेइ ओ ६ जुन ओ २८ दिशम्वरेर लिखित ए आदालतेर रोवकरि सकल ओ सहर वानारसेर पाठसालार पण्डितानेर व्यवस्था, जे वारानसेर प्रविनशीयान कोटेर छओयालेर जओावे कोट मजकुराते गुजरियाछिल, ओ तथाकार व्यवस्था आपिलाण्टेर तरफ हइते ए आदालते दाखिल हइयाछे, ओ ए आदालतेर पण्डितेर व्यवस्था जे सन हालेर १५ मेइ तारिखेर लिखित रोवकारिर

---

१. रोज—इति साधीयान् पाठः। २. रानाराओ—व्यप०।

३ लछमीवाओ—व्यप०।

जओवे गुजरियाछिल, पडा गेल। मोकद्दमार रोयदादे एइ प्रकार वोध हए जे माधवजी ब्राह्मणजाति पितार तेज्य वस्तुर अर्द्धेक हिस्या तकसिम करिया लइवार दाविते मवलगे ५० लक्ष टाकार तायदादे रानाराओ ओ लक्ष्मीराओ ओारिसान निमाराओ ओ खोद रघुनाथ ओ लक्ष्मीकान्तकालियार नामे वानारसेर प्रविनशीयान कोर्टे नालिस करिलेक, ओ मोकद्दमा दरपेस थाकन कालिन दस्तावेज तमलिकनामा कि हेवानामा आपन हक मुख्य हिस्या मुद्दाआलेहेमेर मध्ये एक व्यक्ति लक्ष्मीकान्तकालियार नामे लिखिया काएम मोकाम ओ ओारिस आपना करिया लिखिया देय, ओ मोकद्दमा निष्पत्य ना हओाते माधोजि मजकुर फौत हइलेओ आपीलाण्ट ओहार जायगाते काएम मोकाम मुद्दइ हइया मोकद्दमा समाप्ते पौछाइल। वानारसेर प्रविनशीयान कोर्टेर हाकीमान पाटसालार पण्डितदिगेर व्यवस्थार दृष्टे एइ खोलासाते, जे मौरूशी विओजाहा कखन तकसीम ना हइयाछे, ओ एक एक व्यक्तिर हिस्या नियुक्त ना हइयाछे, यद्यपि उत्तराधिकारिदिगेर मध्ये कोन व्यक्ति अन्य आपन अंशीर परामर्श व्यतिरेके एमत अंशीय धन दान करे, एमत दान शास्त्रेर विधान ओ मिताक्षरा इत्यादिर प्रमानानुसारे ग्राह्य नय, ओ वेवाक वस्तु अस्थावर ओ सरिकी धन आपन अंशीय व्यक्तिर परामर्श व्यतिरेक हेवा ओ विक्रय ना करे, सन १८२२ सालेर १६ जुलाइ तारिखे एइ प्रकार फयसुल करिलेन ये समुदाय मौरुशी धन हइते कि रामाजिकालियार ओ कि देओाजि पिता किम्वा माछजि खुडार मक्रुत हय, तिन भ्राता अर्थात् निमाराओ ओ रघुनाथराओ ओ लक्ष्मीकान्तकालिया, ये स्थाने जाहार निकट थाके, तिन भ्रातार सोमान अंश जाना जाय। आपीलाण्ट ऐ फयसलार पर धैर्य्य ना हइया सदर आपील करिलेक। ओ ए आदालते आपीलाण्ट पाटसालार पण्डितदिगेर लिखित व्यवस्था, जे दरपेष करिल, ताहार तृतीय दफाते जे मोकद्दमा रोयदाद सहित एक

प्रकार अक्यता राखे। एइ जे शास्त्रानुमारे जे हेतुते हिस्यादार आपन हिस्या ना पाय। यद्यपि हिस्यादार से हेतु हइते सुध्य थाके, ओ द्वितीय अंशीयरा ताहार अंश जबरदस्ती मते ना देय। हाकिम विचार कालिन ताहार हिस्या देओान, ओ यदि ऐ व्यक्ति आपन हिस्या अन्य काहार नामे लिखिया दिया मृत्यु हइया थाके, हाकिम सेस विरोध निवारण कारण दस्तावेज मत आमले आनेन, ओ आपन हिस्या ऐ व्यक्ति जाहाके दियाछे, ताहाके देन। कारण एइ—यद्यपि केह कोन दस्तावेज लिखे आर दस्तावेज मत आमले ना आनिया थाके, किम्वा अन्य केह दस्तावेजेर मजमुने विरोधीय हय, हाकिम ओहार दास्तावेज मत आमले आनान, ओ विरोधीय व्यक्ति हइते जरिमाना लएन। यदि स्यात् स्वयं हाकिम ओहार दस्तावेज मत अवलम्वन ना करेण, तवे हाकिम आपन खाजना हइते दस्तावेजेर लिखित मत आमले आनेन। ओ ए आदालते जे एइ आदालतेर पण्डितेर व्यवस्था ए आदालतेर छओालेर जओावे दाखिल हइल ताहार खोलासा। एइ जे ए प्रकार अवण्टक विशयेर तमलिक ओ हेवा ए मलुकेर दस्तुर मत मिताक्षरा ओ गयरह पुस्तक अनुसारे सिद्ध हइते पारे ना। ए प्रयुक्त जे पाटसालार पण्डितदिगेर दुइ व्यवस्था ओ ए आदालतेर पण्डितेर व्यवस्था अनक्य हओाने सर्व्वं प्रकारे प्रत्यय हय ना। ए विशयेर सन्देह दुर करणार्थे कलिकातार सदर देओानि आदालतेर पण्डितेर निकट हइते ज्ञात हओा आविश्यक आछे जे एइ मोकद्दमार आसल दाविदार माधोजी, जेसकल तदन्तिर हिस्या तकसिमेर कारण ओ हक ओसुलेर कारण, जाहा चाइ ताहा आमले आनियाछे, अर्थात् आपन वर्त्तमाने ए नालिस आदालते उत्थापन करियाछिल, ए कारण ए मोकद्दमा उत्थापन हओानेते माधोजि आसल दाविदार तरफ हइते जे आपन हिस्या पाओानेर कारण ओ ताहार हिष्यार, जाहा हस्तान्तर हइया थाके, ताहा यथार्थ आछे-कि ना। ए कारण हुकुम हइल जे मोक-

द्दमा मलतवि रहे, आर आसल तिन किता व्यवस्था आर तमलिकनामार नकल राखिया आसल तमलिकनामा एइ रुवकारिर नकलेर सम्वलित एइ आदालतेर रेजेष्टर साहेवेर इंराजि चिठी द्वाराय कलिकातार सदर देओानि आदालतेर रेजेष्टर साहेवेर नामे सेखानकार पण्डितेर निकट व्यवस्था लओनेर कारण उक्त आदालते पाठानो जाय। एइ प्रार्थना जे रेजेष्टर साहेव से आदालतेर हाकिमदिगेर ज्ञातसारे तिन केता व्यवस्था आर तमलिकनामा आर एइ रुवकार सेखानकार पण्डितके समर्पन करिया वानारस देसेर प्रचलित पुस्तकसकल अनुसारे इहार जवाव सप्ताहेर मध्ये उक्त पण्डितेर निकट हइते लइया, आर एइ मकद्दमार तत तुल्य दृष्टान्त वानारस देशेर इहार पूर्व्वे यदि कोन मकद्दमा सेखाने निष्पत्य हइयाथाके, तवे ऐ मकद्दमार फयसलार नकल ए आदालते पाठान आर उपरेर लिखित विषयेर तत्त-तदन्त हओनेर परे ओछितेर विषये किम्वा रघुनाथराओ मोतौफा रेष्पाण्टेर फेराङ्गतेर विषये उचित हुकुम प्रकाश हइवेक इति—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितविचारपत्रं तमलिकनामाख्यं पत्रं व्यवस्थापत्रत्रयं च यदङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिशदधिकाष्टादशशताब्दीयजानवरीमासीयचतुर्विंशतितमदिनसम्बन्धिशुक्रवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

मूलभूतैतद्विवादाभियोक्ता माधवजीनामकः कश्चित्पुरुषविशेषो यत्रदनुसन्धानं स्वकीयभागस्य विभज्य ग्रहणार्थं स्वकीयासाधारणस्वत्वसम्पादनार्थमुचितं भवति तथा कृतवानर्थात् स्वस्य वर्त्तमानतायां धर्म्माधिकरणे अयमभियोगस्तेनैवोत्थापितः स्यात्, अतएवैतद्विवादस्योत्थापने सति अकृतैतद्विवादनिर्णयस्यार्थाद्धर्म्माधिकरणतोऽदृष्टैतद्विवादपरिच्छेदस्य मूलभूतैतद्विवादाभियोक्तुर्माधवजीनाम्नः सकाशात् स्वकीयांशस्य धर्म्माधिकरणतो विभक्तस्य प्रापणार्थं तदीयांशो यो हस्तान्तरं गतः स्यात्तद्धस्तान्तरकरणं

यदि माधवजीनाम्नः पत्नी विद्यमाना स्यात्, तदा तस्याः स्वपतिकुलोचित-ग्रासाच्छादनोपयुक्तादावश्यकविधवाधर्म्माद्याचरणोपयुक्ताच्च धनाद्यदवशिष्ट-मेवं माधवजीनाम्नः कन्यकाश्चेत् कुमार्यस्तासां विवाहपर्यन्तं स्वपितृकुलो-चितग्रासाच्छादनोपयुक्तात्तासां च विवाहोपयुक्ताच्च धनाद्यदवशिष्टमेवमन्ये ये केचित्तद्धनमात्रोपजीविनस्तेषां यावज्जीवं माधवजीनाम्नो जीवनावस्थास-दृशग्रासाच्छादनोपयुक्तादावश्यकधर्म्माद्याचरणोपयुक्ताच्च धनाद्यदवशिष्टं धनं तद्विषये एतद्विवादतात्पर्यार्थतमलिकनामाख्यपत्रतात्पर्यार्थविवेचनया फलतो मिताक्षरादिग्रन्थानुसारेण यथार्थमेव भवति, यतस्तमलिकनामाख्ये पत्रे माधवजीनाम्ना लिखितमस्ति स्वेच्छया बलात्कारं विना लक्ष्मीकान्तं स्वकीयप्रतिनिधिं कृत्वा स्वपितुस्त्यक्तस्य स्थावरास्थावरादिस्वकीयार्द्धांशस्य स्वोपार्जितस्य चैवं यत्र मदीयं स्वत्वमस्ति तस्य सर्व्वस्य लक्ष्मीकान्तः स्वामी कृतः। यत्र च शास्त्रानुसारेण धर्माधिकरणविचारेण च मदीयं स्वत्वमस्ति, भवितुं च शक्नोति, तस्य सर्व्वस्यैव स्वामी लक्ष्मीकान्त एवास्ति, एवं सर्व्वप्रकारेण स्वामी अधिकारी च कृतः। अथ च यत्र कश्चि-द्विरोधः कर्त्तव्यो यत्र वा आयत्तत्वं सम्पाद्यं तत्सर्व्वं लक्ष्मीकान्त एव करिष्यति। अत्र विषये लक्ष्मीकान्तस्येतरयोर्द्वयोर्भ्रात्रोरन्यस्य कस्यचिद्वा अभियोगो मदीयांशोपरि नास्ति। यदि कश्चिदभियोगं करिष्यति तदा सोऽ-भियोगोऽग्राह्य एव भविष्यति। तत्रायमेव हेतुः स्वकीयांशस्य स्वामिना मया लक्ष्मीकान्तं स्वकीयप्रतिनिधिमुत्तराधिकारिणं च कृत्वा तस्मै स्वांशो दत्तः। स च स्वामीकृतः" इति लिखनेन यद्यपि विवादास्पदीभूतधनस्याविभक्तताद-शायां दानमवगम्यते। एवं पश्चिमदेशचलितमिताक्षरादिग्रन्थे अविभक्त-धनस्य दानमंशयन्तरानुमतिमन्तरेण सिद्धं भवितुं नार्हतीति लिखितमस्ति, परन्तु याथातथ्येनैतद्दानस्य धर्म्माधिकरणतो माधवजीनाम्नोऽशो विभक्तो भूत्वा यदि लक्ष्मीकान्तस्य तत्कृत्रिमपुत्रस्यैव विभज्य तदीयांशग्रहणे निसृष्टार्थस्यार्थाद्धर्माधिकरणतो माधवजीनाम्नोऽशं विभज्य ग्रहणे असी-शब्दप्रतिपाद्यत्वेन नियुक्तस्य दानानुसारेणायत्तो भविष्यति, तदैव पर्य्य-वसानं भविष्यति। एवं च सति विभागानन्तरमेव दाननिष्पत्तिः पर्य्यव-स्यति। तत्र च अंशयन्तरानुमतिर्नापेक्ष्यते, विभक्तधनदानस्यैव पर्य्यवसि-

तत्वात् विभक्तधनदानसिद्धेर्मिताक्षरादिग्रन्थानुसारेण निष्प्रत्यूहत्वाच्च । एवं स्वस्वत्वनिवृत्तिः परस्वत्वापादनं[1] च दानं च परो यदि स्वीकरोति तदा सम्पद्यते, नान्यथा इत्यादि मिताक्षराग्रन्थे(पृ० १४१)वीरमित्रोदय-ग्रन्थे च भोगप्रकरणे स्पष्टतरतया लिखितमस्ति। तत्र दानस्योभयदलयोः स्वस्वत्वनिवृत्तिरूपप्रथमदलस्यैतावता दातृव्यापारेण निष्पन्नत्वेऽपि संप्रदान-स्वत्वोत्पत्तिरूपस्य द्वितीयदलस्य धर्म्माधिकरणतो विभक्ते दातुरंशे संप्रदान-भूतव्यक्तिविशेषस्यायत्तत्वं विना अनिष्पाद्यत्वेन धर्म्माधिकरणतो विभक्ते स्वांशे संप्रदानायत्तीभवनात्मकस्य संप्रदानस्वत्वोत्पत्तिरूपद्वितीयदलहेतुभूतस्य बहुकालसाध्यस्य राजाधीनतया दुष्करत्वेन मन्यमानस्य च कस्यचिद् व्यक्तिविशेषस्यासीशब्दप्रतिपाद्यत्वेन नियोगकरणं विना अनिष्पाद्यत्वेन मन्यमानस्य च दात्रा स्वकर्त्तव्यस्य स्वदत्तस्वांशे संप्रदानायत्तीभवनरूपस्य संप्रदानस्वत्वोत्पत्तिहेतुभूतस्य सम्पादनार्थं सम्प्रदानभूतव्यक्तिविशेषस्यासी-शब्दप्रतिपाद्यत्वेन नियोगकरणस्यापि शास्त्रीयत्वात्, यतोऽविभक्तेऽपि स्वांशे असीशब्दप्रतिपाद्यस्य नियोगकरणे शास्त्रविरोधो नास्ति । अथ च वीर-मित्रोदयग्रन्थे यदि केनचित् स्वस्वत्वास्पदीभूतधनस्य दानं कृत्वा सम्प्रदान-स्यायत्तत्वमसंपाद्यैव मृतः स्यात्तथापि राज्ञा प्रतिग्रहीतुरायत्तत्वं दानसम्पादकं सम्पाद्यमित्यस्यापि विशेषतो लिखितत्वाच्च। एवं लक्ष्मीकान्तस्य कृत्रिम-पुत्रत्वपक्षे दानादिकं विनापि विवादास्पदीभूतधने तस्य स्वामित्वमव्याहतमेव पुत्रत्वात्— इति वाराणसीप्रभृतिदेशचलितमनुमिताक्षरावीरमित्रोदयव्यव-हारमाधवव्यवहारमयूखव्यवहारकौस्तुभव्यवहारचिन्तामणिविवादचिन्ताम-णिविवादरत्नाकरविवादचन्द्रकल्पतरुपारिजातादिग्रन्थानुसारिणी व्यवस्थेति—

अत्र प्रमाणम्—

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते— इति वीरमित्रोदयादिग्रन्थधृत-बृहस्पतिवचनम् ॥१॥

कन्याभ्यश्च पितृद्रव्याद्देयं वैवाहिकं वसु— इति तत्तद्ग्रन्थधृतदेवल-वचनम् ॥२॥

---

१. परस्वत्वापादानं च परस्वत्वापादानं च—व्य०प० ।

अविभक्तेषु द्रव्यस्य मध्यगत्वादेकस्यानीश्वरत्वात् सर्वाभ्यनुज्ञा अवश्यं कार्या। विभक्तेषु तु विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्ध्यत्येव—इति मिताक्षराग्रन्थलिखनम् ॥३॥

आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात्—इति मिताक्षरादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥४॥

स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः। स भोगादभ्यधिको बलीयान्, स्वत्वबोधने भोगस्यागमसापेक्षत्वात्—इति मिताक्षरा(पृ० १३६)ग्रन्थलिखनम् ॥५॥

आगमेऽपि बलं नैव भुक्तिः स्तोकापि[1] यत्र नो—इति मिताक्षरादिग्रन्थधृतयाज्ञवल्क्य(२।२७)वचनम् ॥६॥

यस्मिन्नागमे स्वल्पापि भुक्तिर्भोगो[2] नास्ति तस्मिन्नागमे बलं सम्पूर्णता नास्ति। अयमभिसन्धिः। स्वत्वनिवृत्तिः परस्वत्वापादनं च दानम्। परस्वत्वापादनं च परो यदि स्वीकरोति तदा सम्पद्यते नान्यथा। स्वीकारस्त्रिविधः। मानसो वाचिकः कायिकश्चेति। तत्र मानसो ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमित्याद्यभिव्याहारोल्लेखी सविकल्पकः प्रत्ययः। कायिकः पुनरुपादानाभिमर्शनादिरूपोऽनेकविधः। तत्र च नियमः स्मर्यते। दद्यात् कृष्णाजिनं पुच्छे गां पुच्छे करिणं करे। केशरेषु तथैवाश्वं दासीं शिरसि दापयेत् इति। तत्र हिरण्यवस्त्रादावुदकदानानन्तरमेवोपादानादिसम्भवात् त्रिविधोऽपि व्यापारः[4] सम्पद्यते। क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासम्भवात् स्वल्पेनाप्युपभोगेन भवितव्यम्, अन्यथा दानक्रयादेः सम्पूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दुर्बलो भवति। तत्सहितादागमात्—इति मिताक्षरा(पृ० १४१)ग्रन्थलिखनम् ॥७॥

याज्ञवल्क्यादिभिः सर्व्वप्रकारकानुपभोगे पूर्णस्वत्वोत्पादकता दानाद्यागमस्य नास्तीत्युक्तम्। 'आगमेऽपि बलं नैव भुक्तिः स्तोकाऽपि

१. स्तोकोपि यत्र नो—व्यप०। २. भुक्तिर्नो नास्ति—व्यप०।

३. ०पादानं—व्यप०। ४. स्वीकारः—इति मिताक्षरायाम्।

यत्र नो। बलम्पूर्णता। नारदः। 'विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु। विशेषतः स्थावराणां यन्न भुक्तं न तत्स्थिरम्'॥ दानविक्रयादेरुपभोगनिरपेक्षस्यैव स्वत्वोत्पादकत्वात्। किमिति। भोगलवोऽप्यवश्य तत्रापेक्ष्यत इत्याशङ्कायामुपपत्तिरुक्ता विज्ञानेश्वराचार्यैः। दानादेः परस्वत्वापादनत्वात्[1] परकर्तृकस्वीकारापेक्षाऽवश्यं भावनीया[2]। स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकः। ममेदमित्यध्यवसायो मानसः। ममेदमित्याद्यभिलापो वाचिकः। उपादानाभिमर्शनादिरूपेणानेकप्रकारकः[3] कायिकः। तत्र मानसं विना स्वत्वासम्भवात्स तावदावश्यक एव[4]। दानविशेषपुरस्कारेण शब्दप्रयोगविशेषनियमादर्शनादिचेष्टाविशेषनियमाच्च वाचिककायिकावप्यावश्यकावित्यवसीयते। तत्र हिरण्यवस्त्रादौ दातृकर्तृकजलत्यागादनन्तरमेव प्रतिग्रहीतुरुपादानादिसम्भवात् त्रिविधोऽपि व्यापारः सम्पद्यते। क्षेत्रादौ तु फलोपभोगं विना कायिकस्वीकारासम्भवादल्पेनाप्युपभोगेनावश्यं भवितव्यमन्यथा दानक्रयादेः सम्पूर्णता न भवत्युत्तरकालिकव्यापाराभावात्। तेन तत्सहितादागमान्तराद्विकल आगमो दुर्ब्बलो भवति। एतच्च द्वयोरागमयोः पूर्व्वापरभावानवगमे। तदवगमे तु स्वल्पभोगविकलोऽपि प्राक्तन एवागमो बलवान्, पूर्व्वेण दानादिना स्वत्वापगमे दानाद्यनन्तरासम्भवात्। न चैवं तस्य क्षेत्रादेर्मध्यगतत्वापत्तिः। पूर्व्वस्वाम्यापगमादुत्तरस्वाम्यानुत्पत्तेश्चेति[5] वाच्यम्, प्रतिश्रुतन्यायेनावेक्षणीयस्वत्वस्यसत्त्वात् पूर्वस्वाम्यसत्त्वेऽपि राज्ञैव प्रतिग्रहीत्रादेः कायिकस्वीकारस्यानिःप्रतिपक्षस्य सम्पादनीयत्वात्—इति वीरमित्रोदय(पृ० २०७।२०८)ग्रन्थलिखनम् ॥८॥

याज्ञवल्क्यः। 'आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो'। आगमे विद्यमानेऽपि भोगविरहात् तावत्कालं स्वत्वार्थवृत्तिर्योग्य भवतीत्यर्थः - इति व्यवहारचिन्तामणिग्रन्थलिखनम् ॥६॥

---

1. °पादान०—व्यप० ।
2. भावनीयः—व्यप० ।
3. उपादानादिभिमर्शन०—व्यप० ।
4. स त्वावश्यक एव०—विमि० ।
5. पूर्वस्याम्यागमाद्०—वीमि० ।

याज्ञवल्क्यः । 'आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो' । आगमे विद्यमानेऽपि भुक्तिविरहात् तावत्कालं स्वत्वं न सिद्ध्यतीत्यर्थः । अत्र यत्रान्यमुद्दिश्य केनचित् किञ्चिद्दत्तं तत्रोद्देश्यस्य स्वीकारव्यञ्जकयोगाभावात् स्वत्वं न निश्चीयत इति न्याय एव मूलम्—इति च व्यवहारचिन्तामणिग्रन्थलिखनम् ॥१०॥

अतस्तत्र जलप्रक्षेपरूपः पात्रोद्देश्यक उत्सर्ग एव ददाति नाविवक्षितः । दानत्वनिष्पत्तिस्तु तस्य सम्प्रदानकर्तृकस्वीकारे सत्येवेति परमार्थः-इति वीरमित्रोदय(पृ० २४३)ग्रन्थलिखनम् ॥११॥

न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेत् । तस्माद्राजाचार्यावनिन्द्यौ—इति मिताक्षरा(पृ० १३०।१३१)ग्रन्थधृतगौतमवचनम् ॥१२॥

यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम् ।
नयेत्तथानुमानेन धर्म्मस्य नृपतिः पदम् ॥ इति मनु(६।४४) वचनम् ॥१३॥

यः स्वामिना नियुक्तस्तु दानायव्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु सः स्मृतः ॥
प्रमाणं तत्कृतं सर्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ॥ इति वीरमित्रोदय–व्यवहारचिन्तामणिविवादचन्द्र(पृ० १५०)विवादरत्नाकरकल्पतरुप्रभृति-ग्रन्थधृतबृहस्पति(बृस्मृ० ६।२६।पृ० ६८)वचनम् ।१४॥

निसृष्टार्थस्तु यो यस्मिंस्तस्मिन्नर्थे प्रभुस्तु सः ।
तद्भर्त्ता तत्कृतं कार्य्यं नान्यथा कर्त्तुमर्हति ॥ इति वीरमित्रोदय-व्यवहारचिन्तामणिकल्पतरुप्रभृतिग्रन्थधृतकात्यायन(कास्मृ० ४७०।पृ० ५६) वचनम् ॥१५॥

पितृधनहारित्वं तु पूर्व्वस्य पूर्वस्याभावे सर्वेषामविशिष्टम् ।
न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः । इत्यौरसव्यतिरिक्तानां[1]

१. त्यस्यौतरव्यक्तिरिक्तानां—व्यप० ।

पुत्रप्रतिनिधीनां सर्वेषां रिक्थहारित्वाप्रतिपादनपरत्वात्–औरसस्य तु, एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः–इत्यनेनैव रिक्थभाक्त्वस्योक्तत्वात्—इति मिताक्षरा (पृ० २१५) दिग्दर्शनमिति ॥१६॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयद्वादशदिनसम्बन्धिशनिवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

(४३)—रोवकारि मिछिल आदालत देओयानि सदर मोकाम कलिकाता तारिख ३ माह जुन सन १८३४ इङ्गरेजी मतावक २२ माह ज्यैष्ठ सन १२४१ बाङ्गला रोज मङ्गलवार आदालत मजकुरार हाकिम श्रीयुत रावरट हालडन राटरि साहेबेर वैठके—

रामगोपालदेओ वनाम गोकुलचन्द्र तहविलदार ओ गैरह। छाएल हाजिर हइल। गत मासेर ६ तारिखेर हुकुम मते ए आदालतेर पण्डित ये व्यवस्था दाखिल करिलेन ताहा तारिख मजकुरेर दृष्टी हओ छाएलेर खास आपीलेर सओयाल एवं तत्सम्पर्कीय अन्य कागजातेर सहित पडागिया बोध हइल ये पण्डितेर लिखित व्यवस्था तारीख मजकुरेर रोवकारिर लिखत सओयाल मतावक नहे। कारण एइ ये सओलेर मर्म्म एइ—मद्दइयान अर्थात् तरफछानी ये गोपालभाण्डारि ओ गयरह उहारदिगेर पूर्व्वपुरुषेर दास-दासी छिल, आद्य पर्य्यन्त हइते सेवा ओ कार्य्ये नियुक्त ओ प्रवृत्त छिल। ए क्षणे उहारा सेवा ओ कार्य्य हइते गरहाजीर हइयाछे—नालिस करे। सदर आमीन ओ जज साहेब आपनारदिगेर फयसलार विस्तारित विवरणसकलेर

द्वाराय छाएल ओ गयरहेर पूर्व्व पुरुस मसम्मा हाडो फारिक्-छानिर खरिदा गोलाम, साव्यस्थानुसारे उहारदिगेर दावि, एइ हुकुमे ये छाएल ओ गयरह दास्यत्वेर सेवा ओ कार्य्य करे डिगरि करिलेन। ये हेतुक प्रकाश्य बोध हइतेछे ये किवल हाडो मजकुर दासत्वताय खरिद हइयाछिल ना, ताहार पुत्र-पौत्रादी इहाते छाएल ओ गयरहेर दासत्व सिद्ध हओन विषये ये ऐ फयसलासकल हइयाछे, एमत फयसलासकल शास्त्र-सम्मत यथार्थ वटे कि ना। अतएव हुकुम हइल ये पुनराय कागज-सकल पण्डितेर हाओाला करा जाय। उचित ये पण्डित उपरेर लिखित विवरणे ज्ञात हओनान्तर ताहार जओाव दुइ रोजेर मध्ये दाखिल करेण इति ॥०॥

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतरावर्टहालडनराटरीसाहेवधर्म्माधिकरणलिखितैतदब्दीयजुनमासीयतृतीयदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रमेवं तत्समर्पितैतद्विवादविषयनिविष्टपत्रजातं च यदेतदब्दीयजुनमासीयद्वादशदिनसम्बन्धिबृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

एतत्प्रश्नपत्रलिखितवृत्तान्ते सति हाडोनाम्नः क्रयपत्रे केवलहाडोसंज्ञको दासत्वेन क्रीतो न तु तस्य पुत्रपौत्रादिरिति नियमो यदि लिखितः स्यात्तदा दासत्वेन हाडोमात्रस्य क्रयेण तत्पुत्रपौत्रादीनां शास्त्रोक्तपञ्चदशदासानन्तर्गतत्वनाशास्त्रीयबलात्कारकृतदासभावान्तर्गतत्वेन च तेषां दास्यविषये जातं यज्जयपत्रजातं तच्छास्त्रसिद्धं न भविष्यति, अशास्त्रीयबलात्कारकृतदासमोचनस्य शास्त्रानुसारेण कर्त्तुमुचितत्वात्। यदि च तस्मिन् क्रयपत्रे केवलहाडोसंज्ञको दासत्वेन क्रीतो न तु तस्य पुत्रपौत्रादिरिति नियमो न लिखितः स्यात्तदा दासत्वेन हाडोसंज्ञकस्य क्रयेण तत्पुत्रपौत्रादीनामपि शास्त्रोक्तपञ्चदशदासान्तर्गतत्वेन तेषां दास्यविषये जातं यज्जयपत्रजातं तच्छास्त्रसम्मतं भविष्यत्येव, क्रीतद्रव्यमात्रोत्पन्नद्रव्यजातमात्र एव क्रयकर्त्तुः स्वत्वस्य शास्त्र-

व्यवहारोभयसिद्धत्वात्-इति वङ्गदेशचलितमनुदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।

अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥

मोक्षितो महतश्चर्णाद् युद्धे प्राप्तः पणे जितः ।

तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥

भक्तदासश्च विज्ञेयस्तथैव वडवाभृतः ।

विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥—इति दायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थधृतनारदवचनम् ॥१॥

चौरापहृतविक्रीता ये च दासीकृता बलात् ।

राज्ञा मोचयितव्यास्ते दासत्वं तेषु नेष्यते ॥-इति विवादार्णवसेतु(पृ० १६३)विवादभङ्गार्णवादिग्रन्थधृतनारद(नासं० पृ०६८)वचनञ्चेति ॥२॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयजुलाइमासीयपञ्चविंशतितमदिनसम्बन्धिशुक्रवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

(४४)—रोवकारि मिछिल आदालत देओानि सदर मोकाम कलिकाता अदालत मजकुरार काएम मोकाम हाकिम श्रीयुत तामस किमल रावटसन साहेबेर बैठके। ओाके तारिख ४ माह जुन सन १८३४ साल इं मातवेक २२ ज्यैष्ठ सन १२४१ वाङ्गला दिवस बुधवार—

मुछम्मात विश्वेश्वरिदेव्या मफलछा ओापिलाएट

ताराचान्दचट्टोपाध्याय ओ गयरह रेष्पाडएटान

आपीलाएटेर उकिल मुनसी हयदर आली ओ रेष्पाडएटानेर मध्ये ताराचान्दचट्टोपाध्याय हाजिर आइल। ए मोकद्दमा

सिरस्तादारेर कैफियत सम्बलित गत मेइ मासेर ३० तारिखे आमार वैठके रोवकार हइया आपीलाण्टेर उकिलेर स्थाने आपीलेर सओालेर नकल तलव हइया स्थकित छिल, अद्य आपीलेर सओालेर नकल दाखिल कराते पुनराय रोवकार हइल, ओ फयसला ओ आपीलेर छओाल ओ ए आदालतेर पण्डितेर व्यवस्था ओ सदर आपीलेर मन्जुरिर सरव सम्बलित रोवकारि दृष्टे आइल। जे हेतुक चुडन्त हुकुम सादर हओार पूर्व्वे आदालतेर पण्डितेर निकट व्यवस्था तलव करा मोकद्दमार विस्तारित[1] सहित उचित वोध हइल, अतएव हुकुम हइल ये एइ रोवकारिर नकल एइ हुकुमे जे निचेर लिखित समुदाय छओालेर जओाव वाञ्छल। मुलुकेर चलित शास्त्रानुसारे ओहार वचन प्रमाण सहित आगत वुधवार दिवसे दाखिल करेण—ए आदालतेर पण्डितेर हाओाला कराजाय।

प्रथम सओाल —

सरूपचन्द्र वित्तत्वेगागी वेक्ति एक पुत्र दिपचन्द्र ओ पद्ममणी ओ दुर्गामणी दुइ कन्या राखिया मृत्यु हय। ओहार समुदाय तेय्ये वस्तु ओहार पुत्र दिपचन्द्रके पौछिल। ओ दिपचन्द्र आपन जीवद्दशा पर्य्यन्त अन्येर अंश वेतेरेक दखिलकार थाकिया सन १२०४ साले तस्य स्त्री वेदवति ओ तस्य कन्या दासमनीके राखिया मृत्यु हय। वेदवति ताहार तेय्ये विषये दखिलकार हइया मुछम्मात दासमनिर विवाह देय, जे दासमनीर पुत्र सर्व्वचन्द्र जन्मे। १२०९ साले दासमनी आपन मातामही वेदवति ओ सर्व्वचन्द्र पुत्र, आ सन १२२४ साले सर्व्वचन्द्र आपन मातामही वेदवति ओ आपन स्त्री विश्वेश्वरिर सनमुखे मृत्यु हय। तत्परे सन १२२८ साले मुछम्मात वेदवति मृत्यु हय। अतएव दिपचन्द्रेर तेय्ये वस्तु दिपचन्द्रेर दौहित्र

१ विस्तावित—व्यप०।

सर्वचन्द्रेर स्त्रीके असिवेक, कि दीपचन्द्रेर भग्निर सन्तान-दिगेके इति—

द्वितीय सओाल—

यद्यपि दासमनि दिपचन्द्रेर वर्त्तमाने किम्वा ताहार मृत्युर पर दिपचन्द्रेर स्त्री वेदवति वर्त्तमाने जमिदारिर मजकुरार उपर दखल पाइया थाके, ऐ प्रयुक्त ओ दखल ना पाओा प्रयुक्त ये प्रकार प्रथम सओाल लेखा गेल ओहार तेर्व्ये वस्तुते दिपचन्द्रेर दौहित्रेर स्त्री विश्वेश्वरि सत्वाधिकारि हओने ओ ना हओने किम्वा दिपचन्द्रेर भग्निर सन्तानेरा सत्वाधिकारि हओने ओ ना हओने शास्त्र अनुसारे व्यत्तिक्रम आछे कि ना इति ॥—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिस्थानाभिषिक्तश्रीयुततामसकिमिलरावटसन्‌साहेवधर्म्माधिकरणलिखितैतदब्दीयजुनमासीयचतुर्थदिवसीयविचारपत्रान्तर्गतप्रश्नपत्रप्रतिरूपपत्रं यदेतदब्दीयजुनमासीयद्वादशदिनसम्बन्धिबृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

प्रथमप्रश्नस्योत्तरम्—

प्रथमप्रश्नलिखितवृत्तान्ते सति दीपचन्द्रत्यक्तधने यदि तस्य पुत्रमारभ्य तत्पितुः स्वरूपचन्द्रस्य प्रपौत्रपर्य्यन्तानां मध्ये कश्चिन्नास्ति तदा दीपचन्द्रस्य पितुः स्वरूपचन्द्रस्य दौहित्राणामर्थात् दीपचन्द्रभगिनीपुत्राणामेवाधिकार इति ॥—

अत्र प्रमाणम्—

पितुरपि प्रपौत्रपर्य्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यो धनिदौहित्रस्यैव—इति दायभागग्रन्थलिखनम् ॥१॥०॥०॥०॥

द्वितीयप्रश्नस्योत्तरम्—

यदि दासमनी दीपचन्द्रे स्वपितरि विद्यमाने मृते वा दीपचन्द्रपत्न्यां वेदवत्यां विद्यमानायां धराजकरस्थावरात्मकतद्धने आयत्तत्वं सम्पादितवती

स्यात्तत्र तस्या आयत्तत्वं यदि तत्पितृकृतदानानुसारेणाभूत्तदा तद्धनस्य दासमन्याः पितृदत्तसौदायिकस्त्रीधनत्वेन दासमन्याः मरणोत्तरं तत्त्यक्तपितृदत्तसौदायिकस्त्रीधने तद्दुहित्रभावे तत्पुत्रस्य सर्व्वचन्द्रस्य अधिकारे जाते सति तन्मरणोत्तरं तत्त्यक्तधने सर्वचन्द्रस्य पुत्रपौत्रप्रपौत्ररहितस्य पत्न्या विश्वेश्वरीदेव्या एवाधिकारः। सर्व्वचन्द्रपत्न्यां विश्वेश्वरीदेव्यां विद्यमानायां सर्वचन्द्रप्रमातामहस्वरूपचन्द्रदौहित्राणां नाधिकारः। एवञ्च सति विश्वेश्वरीदेव्या दीपचन्द्रदौहित्रपत्न्यास्तद्धनाधिकारित्वे दीपचन्द्रभागिनीपुत्राणां चानधिकारित्वे दीपचन्द्रत्यक्तधने अयमेव व्यतिक्रमो जातः। दीपचन्द्रस्य धनं तत्कृतस्वकुल्योद्देश्यकदानानुसारेण तत्कन्यास्वत्वास्पदञ्चेत्तन्मरणोत्तरं तस्यास्त्यक्त धनमिति। तत्र च धने तत्पुत्रस्य सर्व्वचन्द्रस्याधिकारित्वेन तन्मरणोन्तरं तदेव धनं सर्व्वचन्द्रत्यक्तमिति च। यदि च सराजकरस्थावरात्मकतद्धने दासमन्या आयत्तत्वमुपरिलिखिततत्पितृकृतदानानुसारेण नाभूदथवा प्रथमप्रश्नलिखितरीत्या आयत्तत्वमेव नाभूत्तदा प्रथमप्रश्नोत्तरलिखितप्रकारेण दीपचन्द्रभागिनीपुत्राणामधिकारित्वे दीपचन्द्रदौहित्रपत्न्या विश्वेश्वरीदेव्या अनधिकारित्वे च दीपचन्द्रत्यक्तधने कश्चिद् व्यतिक्रमो नास्ति—इति वङ्गदेशचलितमनुदायभागदायतत्त्वव्यवहारतत्त्वव्यवहारमातृकादायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥—

अत्र प्रमाणम् —

प्रदानं स्वाम्यकारणम्—इति मनुवचनम् ॥१॥

ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा ।
भर्त्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥—इति दायभागादिग्रन्थधृतकात्यायनवचनम् ॥२॥

विवाहकाले तत्पूर्व्वापरकाले वा स्त्रियै यद्धनं पित्रा दत्तं तत्र तु धने प्रथमं कुमार्य्यास्तदनन्तरमूढायाः पुत्रवतीसम्भावितपुत्रयोस्तदनन्तरं वन्ध्याविधवयोश्चाधिकारः। सर्व्वदुहित्रभावे पुत्रादेर्यौतुकधनवत् क्रमेणाधिकारः—इति दायक्रमग्रन्थलिखनम् ॥३॥

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा--इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥४॥

प्रथमप्रश्नोत्तरलिखितप्रमाणञ्चेति ॥५॥०॥०॥०॥

अङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयअगस्त्यमासीयैकादशदिनसम्बन्धिसोमवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

(४५)—इं सन १८३४ सालेर ७ एपरेल दिवस स(ो)मवार एइ आदालत अर्थात जेला तिरहतेर देओानि आदालतेर रोवकारि द्वाराय मोकाम कलिकातार सदर देओानि आदालते पण्डितेर पर सओाल—

हनुमानदत्तराय ओ भोलादत्तराय ओ गणेशदत्तराय

मुद्दइयान

मृत चण्डीदत्तेर वनीता मुछम्मात छोलछनचौधुरायन

ओ परमेश्वरिदत्त मुदाहालेहम

मोकद्दमा कालेक्टरि सेरेस्ताय नाम लिखा ओ जेला तिर्होतेर आदालतेर मोतालके देहा निजामत हादि परगनार मौजे वछुलपुर ओ गयरहुत दखल पाओार प्राथनाय मवलगे ८७३५ तृगुन मालगुजारि देहा निजामतेर तायदादे ॥

प्रथम प्रश्न :—

चौधुरि देवदत्तराय जाति ब्राह्मण। एहार चारि पुत्र। प्रथम विरसिंहराय, ताहार पुत्र चण्डीदत्तराय नामे छिल। ताहार वनिता मछुम्मात छोलछन, ओ विरसिंहेर कन्या मुछम्मात चान्द्रावति चण्डीदत्तेर सहोदरा भग्नि छिल, ओ चन्द्रावति मजकुरार पुत्र

परमेश्वरिदत्त आछे, ओ देवदत्त मजकुरेर द्वितीय पुत्र सिवसिंह, तस्य पुत्र आनकट्टीराय तस्य पुत्र सदाशिवराय तस्य पुत्र कृष्णदत्तराय मुद्दइ वर्त्तमान, ओ देवदत्तराय मजकुरेर तृतीय पुत्र हरदिसिंहराय, तस्य दुइ पुत्र भैरवदत्त ओ हनुमानदत्तराय मुद्दइ वर्त्तमान आछे; ओ भैरवदत्तेर एक पुत्र सम्भुदत्तराय, तस्य पुत्र भोलानाथराय मुद्दइ वर्त्तमान आछे; ओ देवदत्त मजकुरेर चतुर्थ पुत्र जयकृष्णराय निसन्तान मृत्यु हय। अतएव जिज्ञाशा कराजाय ये चण्डीदत्त मजकुर ब्राह्मन जाति आपन भग्निर सन्तान परमेश्वरिदत्तके कर्त्तापुत्र करियाछे, शास्त्रानुसारे सिद्ध वटे कि ना ॥

द्वितीय प्रश्न :—

यद्यपि कर्त्तापुत्र असिद्ध हय, तवे हेवानामार लिखित धन आ परमेश्वरिदत्तेर नामे एकरारनामा शास्त्र मत सिद्ध हइवेक कि, ना, ओ एइ सओोलेर सम्र्लात हेवानामा ओ एकरारनामा ओ कुरशीनामा दृष्टि करिया मैथिलि शास्त्रानुसारे प्रति उत्तर लिखेन इति ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं तत्संवलितं दानपत्रं संवित्पत्रं वंशावलीपत्रं च यदङ्करे मीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयापरेलमासीयद्वात्रिंशत्तमदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

प्रथमप्रश्नस्योत्तरम्—

प्रथमप्रश्नलिखितवृत्तान्ते सति अर्थात् पितामहगोत्रादौ नियमाने सति पुत्रपौत्रप्रपौत्ररहितब्राह्मणजातीयचण्डीदत्तमैथिलेन सोदरभगिनीपुत्रः परमेश्वरीदत्तः कृत्रिमपुत्रः कृतश्चेत् स कृत्रिमपुत्रो मिथिलादेशीयशास्त्रानुसारेण सिद्ध्यति । यद्यपि दत्तकमीमांसाग्रन्थे ब्राह्मणानां भागिनेयस्य पुत्रता-

निषेधकं वचनं लिखितमस्ति, परन्तु तद्वचनं वास्तवं दत्तकपुत्रविषयकमेव, न तु कृत्रिमपुत्रविषयम्, अथ च सर्व्वस्मृतिप्रधानमनुस्मृतौ कृत्रिमपुत्रताविषये मनुवचनोक्तसजातीयत्वादेरेवाप्रयोजकतां दृष्ट्वा सर्व्वैरेव प्राचीनार्व्वाचीनैर्मैथिलनिबन्धकारैः स्वस्वग्रन्थेषु स्वसजातीयः कश्चित् कृत्रिमपुत्रः कर्त्तव्य इत्येव लिखितः, भागिनेयः कृत्रिमपुत्रो न कर्त्तव्य इति निषेधकः केनापि न लिखितः, वरं मैथिलैर्महामहोपाध्यायधर्म्मशास्त्रव्यवस्थापककेशवमिश्रैर्यत्र *पितैव भ्रात्रादिर्व्वा कृत्रिमपुत्रः कृतस्तत्रापि पितृत्वेनैव निर्देशो न पुत्रत्वेन भ्रातृत्वेन*—इति द्वैतपरिशिष्टग्रन्थे लिखितमस्ति। एवञ्च सति पित्रपेक्षया भ्रात्रपेक्षया च भागिनेयस्य दत्तकमीमांसाग्रन्थलिखितपुत्रतानिषेधप्रयोजकविरुद्धसम्बन्धस्याधिक्यं नास्ति। एवं दत्तकपुत्रस्य स्वजनकपित्रादीनां पिण्डदातृत्वं निषिद्धमिति सर्वेषां निबन्धकाराणां सम्मतम्। मैथिलग्रन्थकाराणां मते *कृत्रिमपुत्रस्य स्वजनकपित्रादीनां पिण्डदातृत्वमप्यस्त्येव*—इति शुद्धिविवेके रुद्रधरोपाध्यायैर्मैथिलैर्लिखितमस्ति। अतो मैथिलग्रन्थकाराणां मते दत्तकपुत्रकृत्रिमपुत्रयोर्विषयमात्र एव महान् भेदोऽस्ति। अतएव मिथिलादेशे सजातीयः कश्चित्[1] कृत्रिमपुत्रः क्रियते, तत्रापि पितामहपौत्राद्यपेक्षया स्नेहातिशयात् पुत्रगुणाधिक्यदर्शनाच्च प्रायशो मैथिलैः प्राज्ञैर्ब्राह्मणैर्विशेषतो भागिनेयः कृत्रिमपुत्रः क्रियते इति सर्व्वदैव तद्देशव्यवहारः। एवञ्च सति मनुस्मृतिसम्मतताया मिथिलादेशीयग्रन्थानुसारेण तद्देशव्यवहृतताया ब्राह्मणानां भागिनेयस्य कृत्रिमपुत्रताया मैथिलनिबन्धकारप्रणीतदत्तकमीमांसाग्रन्थलिखितवचनबाध्यता[2] नास्ति, यतस्तद्देशाचारजात्याचारकुलाचारादिसिद्धस्य कस्यचिदपि कर्म्मणो बाधस्तदन्यदेशीयग्रन्थानुसारेण तदितरजातिप्रचलितग्रन्थानुसारेण तदन्यकुलप्रचलितग्रन्थानुसारेण वा भवितुं न शक्नोति, देशाचारजात्याचारकुलाचारादीनां मन्वादिधर्म्मशास्त्रे प्रबलप्रमाणत्वेनोपन्यासात्। यत्र विषयविशेषे स्वदेशीयपरदेशीयग्रन्थयोर्विरोधस्तत्र विषये स्वदेशीयग्रन्थस्यैव प्राबल्येण प्रचारस्य भवितुं युक्तत्वाच्चेति ॥—

---

१. कश्चित—व्यप०। २. निबन्धकाराप्र०—व्यप०।

अत्र प्रमाणम्—

सदृशं यं प्रकुर्व्वीत गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥ इति मनुवचनम् ॥१॥

अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः ।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनस्य च ॥ इति कल्पतरुविवादरत्नाकरप्रभृतिग्रन्थधृतवृहस्पतिवचनम् ॥२॥

सद्भिराचरितं यत् स्याद्धार्म्मिकैश्च द्विजातिभिः ।
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ॥ इति मनु(८।४६)-वचनम् ॥३॥

जातिजानपदान्[1] *धर्म्मान् श्रेणीधर्म्मांश्च धर्म्मवित् ।*
समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपालयेत् ॥—इति मनुवचनम् ॥४॥

देशजातिकुलानाञ्च ये धर्म्माः प्राक् प्रवर्त्तिताः ।
तथैव ते पालनीयाः प्रजाः प्रक्षुभ्यतेऽन्यथा ॥—इति बृहस्पतिवचनम् ॥५॥

यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः ।
तथैव परिपाल्योऽसौ यदा वशमुपागतः ॥—इति याज्ञवल्क्यवचनम् ॥६॥

मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते ।
वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम् ॥—इति बृहस्पति-(पृ० २३३)वचनम् ॥७॥

यत्र पितैव भ्रात्रादिर्वा कृत्रिमपुत्रः कृतस्तत्रापि पितृत्वेनैव निर्द्देशो न तु पुत्रत्वेन भ्रातृत्वेन । इति द्वैतपरिशिष्टग्रन्थलिखनम् ॥८॥

स च पुत्रत्वकरणस्य पिण्डप्रदः निजपित्रादीनां पिण्डप्रदत्वं तस्य तिष्ठत्येव - इति शुद्धिविवेकग्रन्थलिखनम् ॥९॥

---

१. जातिजानपदान्—व्यप० ।

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।

युक्तिहीनविचारेण धर्म्महानिः प्रजायते ॥—इति विवादचिन्तामण्यादिग्रन्थधृतबृहस्पतिवचनम् ॥१०॥

स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ।—इति याज्ञवल्क्यवचनम् ॥११॥

द्वितीयप्रश्नस्योत्तरम्—

प्रथमप्रश्नोत्तरलिखितरीत्या मिथिलादेशीयशास्त्रानुसारेण कृत्रिमपुत्रतायाः सिद्धौ सत्यां द्वितीयप्रश्नलिखितरीत्या कृत्रिमपुत्रतायामसिद्धत्वेनावगम्यमानायामप्युभयथैव परमेश्वरीदत्तोद्देश्यकदानपत्रं संवित्पत्रं च चण्डीदत्तस्य गृहावशिष्टे तत्पत्न्याश्च यावज्जीवं स्वपतिकुलोचितग्रासाच्छादनोपयुक्तादावश्यकविधवाधर्म्माद्याचरणोपयुक्ताच्च धनादवशिष्टे चण्डीदत्तनाम्नः कन्यकाश्चेत् कुमार्य्यस्तासां विवाहोपयुक्तात्तासां च स्वपितृकुलोचितग्रासाच्छादनोपयुक्ताच्च धनादवशिष्टे अन्येषां तद्धनमात्रोपजीविनामपि यावज्जीवं चण्डीदत्तनाम्नो जीवनावस्थासदृशग्रासाच्छादनोपयुक्तादावश्यकधर्म्माद्याचरणोपयुक्ताच्च धनादवशिष्टे च संवित्पत्रलिखितत्रिमुखाख्यघट्टसम्बन्धिशिवालयबन्धयोर्दृढीकरणपरिष्कारोपयुक्ताच्च धनादवशिष्टे महिंसिनग्रामान्तर्गततडागोत्सर्गोपयुक्ताच्च धनादवशिष्टे च धने सिद्ध्यति । दानपत्रसंवित्पत्राभ्यां विवादास्पदीभूतधने चण्डीदत्तनाम्नः पुत्रपौत्रप्रपौत्ररहितस्य केनचित् सह साधारण्यस्यानवगमेन तयोः पत्रयोर्विवेचनया शास्त्रानुसारेण देयद्रव्यस्य तस्मै कृत्रिमपुत्राय स्वशिष्यत्वेन भागिनेयत्वेन च प्रीतिपूर्व्वकदानस्यावगमेन नैतादृशदानसिद्धौ बाधकसामान्याभावात्—इति मिथिलादेशचलितमनुस्मृतियाज्ञवल्क्यस्मृतिबृहस्पतिस्मृतिविवादचिन्तामणिविवादरत्नाकरविवादचन्द्रकल्पतरुपारिजातद्वैतनिर्णयद्वैतपरिशिष्टशुद्धिविवेकशुद्धिचिन्तामणिस्मृतिसारप्रभृतिग्रन्थानुसारिणी व्यवस्था ॥

अत्र प्रमाणम्—

प्रदानं स्वाम्यकारणम् —इति मनुवचनम् ॥१॥

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते—इति विवादचिन्तामण्यादिग्रन्थधृतबृहस्पतिवचनम् ॥२॥

सर्व्वस्वं गृहवर्ज्जन्तु कुटुम्बभरणाधिकम् ।

यद्द्रव्यं तत् स्वकं देयमदेयं स्यादतोऽन्यथा — इति तत्तद्ग्रन्थधृतकात्यायन(६४० । पृ० ७६)वचनम् ॥३॥

भृतिस्तुष्टया पण्यमूल्यं स्त्रीशुल्कमुपकारिणे ।

श्रद्धानुग्रहसंप्रीत्या दत्तमष्टविधं स्मृतम् ॥—इति तत्तद्ग्रन्थधृतबृहस्पति(पृ० १३८)वचनम् ॥४॥

कन्याभ्यश्च पितृद्रव्याद्देयं वैवाहिकं वसु । इति तत्तद्ग्रन्थधृतदेवलवचनम् ॥५॥

अनूढानान्तु कन्यानां वित्तानुरूपेण संस्कारं कुर्य्युः—इति तत्तद्ग्रन्थ(विचि० पृ० २१०)धृतविष्णुवचनञ्चेति ॥६॥

इशवीशब्दप्रतिपाद्यनिगमगुणगजेन्दुमिताब्दीयसितम्बरमासीयप्रथमदिनसम्बन्धिचन्द्रवासरे मया विचारपत्रप्रश्नपत्रदानपत्रसंवित्पत्रवंशावलीपत्रैः सहितेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

प्रश्न :—

(४६)—यद्यपि कोन व्यक्तिर दुइ सन्तान थाके, आर ज्येष्ठ सन्तान आपन पिता वर्त्तमाने ऐ पिता ओ भ्रातार एकान्नवर्तिते-कोन स्थावर वस्तु आपन परिश्रम ओ क्षमतार द्वाराय उपार्ज्जन करे, आर पितार जीवद्दशा पर्य्यन्त ऐ वस्तुर उपस्वत्त्व साधारणेर खरचे आसियाथाके, एमत स्थले पितार लोकन्तपरे ऐ वस्तु उभये दुइ भ्राताय अंश हइते पारे कि सोपार्जित सरवे ऐ ज्येष्ठ भ्राता समुदय ऐ वस्तु पाइवेक, आर यद्यपि कनिष्ठ भ्राता ऐ वस्तुर अंशेर हकदार हय, तवे कि आन्दाज पाइवेक—एइ प्रश्नेर प्रत्युत्तर यथाशास्त्रे लिखिवेन इति ॥

श्रीज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदीशवीशब्दप्रतिपाद्यनिगमगुणगजेन्दुमिताब्दीय-जानवरीमासीयसप्तमदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥

कस्यचिद् व्यक्तिविशेषस्य द्वयोः पुत्रयोर्म्मध्ये ज्येष्ठपुत्रेण जीवति पितरि तेन सह भ्रात्रा च सहाविभक्ततादशायामेव किञ्चित् स्थावरं धनं स्वशक्त्या स्वायासेन चोपार्जितं स्यात्, अथ च पितुर्जीवनदशापर्य्यन्तं तदुपस्वत्वं साधारण्येन व्ययितं स्यात्तत्र साधारणद्रव्योपघातेन तद्धनमर्जितं चेत्तदा पितुर्न्निधनानन्तरं तद्द्रव्यं त्रिधा विभज्य भागद्वयमुपार्ज्जकस्य ज्येष्ठस्यैको भागः कनिष्ठस्य, ज्येष्ठस्य तद्धनं विद्याधनं चेत्, अथ च कनिष्ठोऽपि तत्समविद्यस्तदधिकविद्यो वा भवेत्, तदापि ज्येष्ठोपार्जितविद्याधने तादृशस्य कनिष्ठस्यापरिलिखितप्रकारेण तृतीयांशाधिकारः; यदि च तद्धनं साधारण-द्रव्यानुपघातेन ज्येष्ठेन अर्जितमभूत्तदा तत्र धने स्वोपार्जितत्वमात्रेणो-पार्ज्जकस्य ज्येष्ठमात्रस्यैवाधिकारो न त्वेकान्नवर्त्तितया कनिष्ठभ्रातुः स्वामित्वे-नाधिकारः। किन्तु भ्रातृस्नेहेन पौरुषबुद्ध्या वा यदि ज्येष्ठो भ्राता कनिष्ठ-भ्रात्रे किञ्चिद्ददाति तदा तदनुसारेणोपार्ज्जकज्येष्ठदत्तपरिमितधनं कनिष्ठस्या-धिकारः—इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायभागटीकादायक्रम-संग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी व्यवस्था ॥

इशवीशब्दप्रतिपाद्यनिगमगुणगजेन्दुमिताब्दीयसितम्बरमासीयगजेन्दु-मितदिनसम्बन्धिगुरुवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

(४७)--प्रश्न :—

शूद्रादिर दत्तकपुत्रग्रहणकालीन तन्निमित्त शास्त्रसम्मत कि कि कर्म्म कर्त्तव्य उचित; आर यदि स्यात् ग्रहणकालीन ताहार

कर्त्तव्य कर्म्म सकल हइयाथाके, एवं तस्य पर दत्तक पुत्र ग्रहीतार मृत्यु हइले कोनो ज्ञाति द्वारा ऐ दत्तक पुत्रेर चूडाकरण इत्यादि हइले ऐ दत्तक पुत्र सिद्ध हइया ऐ ग्रहीतार स्वत्वे स्वत्वाधिकारि हइते पारे कि ना इति ॥

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं यदङ्गरेजीशब्दप्रतिपाद्यचतुस्त्रिंशदधिकाष्टादशशताब्दीयापरेलमासीयपञ्चदशदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

शूद्रादीनां दत्तकपुत्रग्रहणसमये एतानि कर्म्माणि शास्त्रतः कर्त्तुमुचितानि भवन्ति। प्रथमतः पुत्रदानं तत्पितृकर्तृकम्, तत्पित्रनुज्ञया तन्मातृकर्तृकं वा, तदनन्तरं व्याहृतिहोमादिकं विधाय ग्रहणं ग्रहीतृकर्तृकम्, तदनुज्ञया तत्पत्नीकर्तृकं वेति। यद्यपि दत्तकपुत्रग्रहणसमये पुत्रग्रहणाङ्गभूतानि सर्व्वाण्येव कर्म्माणि जातानि स्युः, तस्मात् परं दत्तकपुत्रग्रहीतुर्म्मरणं जातं चेद्, अपि केनचित् तज्ज्ञातिना तस्यैव दत्तकपुत्रस्य चूडाकरणादिसंस्कारा ग्रहीतृगोत्रेणार्थात्ग्रहीतृपुरुषस्य नामगोत्रे समुच्चार्य्य जाताश्चेत्, तदा स एव दत्तकः पुत्रो ग्रहीतुः पुत्रो भूत्वा ग्रहीतृत्यक्तधने स्वत्वाधिकारी भवत्येव-इति वङ्गदेशचलितमनुदायभागदायतत्त्वदायभागटीकादायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवदत्तकमीमांसादत्तकचन्द्रिकादत्तकदीधितिदत्तकनिर्णयादिग्रन्थानुसारिणी व्यवस्थेति ॥—

अत्र प्रमाणम्—

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः इति मनुवचनम् ॥१॥

नत्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुः। पुत्रं *प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा, अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयाद्*—इति दत्तकमीमांसादि-(पृ० १०१।१०२)ग्रन्थधृतवशिष्ठवचनानि ॥२॥

राजात्र ग्रामस्वामी । बन्धूनाहूय सर्व्वां स्तु ग्रामस्वामिनमेवेति वृद्ध-गौतमस्मरणात् —इति दत्तकमीमांसा(पृ० ६६)ग्रन्थलिखनम् ॥३॥

बन्धूनात्मपितृमातृबन्धून् ज्ञातीन् सपिण्डान् । बान्धवाद्याह्वानं दृष्टार्थं राजाह्वानवत्—इति दत्तकमीमांसा(पृ० ६७)ग्रन्थलिखनम् ॥४॥

चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।

दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥ —इति दत्तकमीमांसादि-(पृ० ७४)ग्रन्थधृतकालिकापुराणवचनम् ॥५॥

दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः ।

आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ॥ —इति दत्तकग्रन्थधृत-(पृ० ७४)कालिकापुराणवचनम् ॥६॥

तस्मादेषां पञ्चानां पुत्राणां शौनकवशिष्ठान्यतमविधिपरिग्रहेणैव पुत्रत्वं नान्यथा—इति दत्तकमीमांसा(पृ० १०६) ग्रन्थलिखनम् ॥७॥

तस्माद्दत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमिति सिद्धम् । दानग्रहणहोमाद्यन्यतमाभावे पुत्रत्वाभाव एव—इति दत्तकमीमांसा(पृ० १११ ग्रन्थलिखनम् ॥ ८ ॥

सर्व्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः—इति दायभागादिग्रन्थ धृतदेवलवचनञ्चेति ॥ ६ ॥

इशवीशब्दप्रतिपाद्यनिगमगुणगजेन्दुमिताब्दीयसितभगमासीयगजेन्दु-मितदिनसम्बन्धिगुरुवासरे मयेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

व्यवस्थार तरजमा वाङ्गला भाषाय--

हजुरेर समर्पित करा सवाल, जाहा अङ्गरेजी सन १८३४ साले अपरैल मासेर १५ तारिखे दिवस मङ्गलवारे आमि पाइयाछिलाम, ताहार दृष्टे ये मत वोध हइल तदनुसारे उत्तर लिखितेछि—

प्रश्नोत्तरेर भाषा—

शूद्रादिर दत्तक पुत्र ग्रहणकालीन शास्त्रानुसारे एइ सकल कर्म्म कर्त्तव्य उचित। प्रथमतः जनक पिता किम्वा तदनुमतिक्रमे जननी माता पुत्र दान करिवेक। ताहार पर ग्रहीता व्यक्ति किम्वा तदनुमतिक्रमे ताहार पत्नी व्याहृति होम प्रभृति शास्त्रानुसारे करिया पुत्र ग्रहण करिवेक। आर यद्यपि दत्तक पुत्र ग्रहणकालीन पुत्र-ग्रहणेर अङ्ग ये सकल कर्म्म ताहा हइया थाके, ताहार पर दत्तक पुत्र ग्रहीता व्यक्तिर मृत्यु हयोयाते ताहार कोन ज्ञातिर द्वाराय ऐ दत्तक पुत्रेर चूडाकरण प्रभृति संस्कार ग्रहीता पितार नाम गोत्र उल्लेख करिया हइयाथाके, तवे ऐ दत्तक पुत्र सिद्ध हइया ग्रहीतार त्यक्त धने स्वत्वाधिकारी हइवेक। एइ व्यवस्था वङ्गदेश चलित मनु ओ दायभाग ओ दायतत्व ओ दायभागटीका ओ दायक्रमसंग्रह ओ विवादार्णवसेतु ओ विवादभङ्गार्णव ओ दत्तक-मीमांसा ओ दत्तकचन्द्रिका ओ दत्तकदीधिति ओ दत्तकनिर्णय ओ गयरह ग्रन्थ सम्मत वटे इति।

प्रथम प्रमाण मनुवचन। ताहार भाषा—माता किम्वा पिता किम्वा उभये ग्रहीता व्यक्तिर पुत्र ना थाका प्रयुक्त प्रीति पूर्व्वक आपन पुत्रके सजातीय ग्रहीता व्यक्तिके दान करे, ऐ पुत्र ग्रहीता व्यक्तिर दत्तक पुत्र जाना जाइवेक। इति ॥ १ ॥

द्वितीय प्रमाण वशिष्ठ मुनिर वचन सकल, दत्तकमीमांसा प्रभृति ग्रन्थेर लिखित। ताहार भाषा—ये व्यक्तिर केवल एक पुत्र थाकिवेक से व्यक्ति ऐ पुत्रके काहाकेओ दिवेक ना। एवं ग्रहीता व्यक्ति ओ ग्रहण करिवेक ना। कारण एइ ये ऐ पुत्र ऐ जनकेर पूर्व पुरुषेर सन्तानेर निमित्त थाकिवेक। एवं स्त्रीलोक पतिर अनुमति व्यतिरेक पुत्र दिवेक ना, ओ लइवेक ना। एवं पुत्रग्रहण ये करिवेक से वन्धुलोकेर आह्वान एवं राजार निकट निवेदन ओ व्याहृति होम प्रभृति करिया वन्धुलोकेर साक्षात् ग्रहण करिवेक इति ॥ २ ॥

तृतीय प्रमाण—दत्तकमीमांसा ग्रन्थ लिखित । ताहार भाषा—द्वितीय प्रमाण वशिष्ठ मुनिर वचन। ताहाते लेखा आछे ये राजार निकट निवेदन करिया पुत्र ग्रहण करिवेक। ए स्थले राजा शब्दे ग्रामस्वामी, अर्थात् जमिदार, जाना जाइवेक। कारण एइ ये वृद्ध गौतम मुनि कहियाछेन ये वन्धुसकलेर एवं ग्रामस्वामी अर्थात् जमिदारेर आह्वान करिवेक। अर्थात् उहारदिगके ज्ञातो कराइवेक इति ॥ ३ ॥

चतुर्थ प्रमाण दत्तकमीमांसा ग्रन्थलिखित। ताहार भाषा—वन्धुलोक ओ ज्ञातिलोकेर आह्वान यत्नपूर्वक करिवेक। ए स्थले वन्धु शब्दे आत्मवन्धु ओ पितृवन्धु ओ मातृवन्धु ओ ज्ञातिशब्दे सपिण्ड जाना जाइवेक; ओ वन्धु ओ सपिण्डेर आह्वानेर प्रयोजन एइ ये इहारदिगेर ज्ञानसारे ये दत्तक पुत्र ग्रहण करिवेक से दत्तक पुत्र लोकेते प्रकाश हइवेक। येमन राज निवेदनेर प्रयोजन अर्थात् इहारदिगेर ज्ञातसारे ग्रहीत दत्तक पुत्रके केह मिथ्या करिते पारिवेक ना ॥ ४ ॥

पञ्चम प्रमाण—दत्तकमीमांसा प्रभृति ग्रन्थ धृत कालिकापुराणवचन। ताहार भाषा—वालकेर चूडाकरण प्रभृति संस्कार यदि ग्रहीतार नाम गोत्र उल्लेख करिया हइया थाके तवे दत्तक प्रभृति पुत्रेरा ग्रहीतार पुत्र हयेन। न तु वा दास वला जाइवेक इति ॥ ५ ॥

षष्ट प्रमाण—ऐ सकल ग्रन्थ धृत कालिकापुराणवचन। ताहार भाषा—दत्तक प्रभृति पुत्र यदि ग्रहीतार नाम गोत्र उल्लेख करिया संस्कृत हइया थाकेन तवे ऐ पुत्रेरा अन्येर औरस जात हइलेओ ग्रहीता व्यक्तिर पुत्रता सम्यक् प्रकारे प्राप्त हयेन इति ॥ ६ ॥

सप्तम प्रमाण—दत्तकमीमांसा ग्रन्थ लिखित। ताहार भाषा—दत्तक प्रभृति पाच प्रकार पुत्रेर प्रति शौनकमुनिर कथित किम्वा

वशिष्ठमुनिर कथित ये प्रकार पुत्र ग्रहणेर विधान आछे ताहार मध्ये कोनो एक प्रकार विधान करिले ग्रहीतार पुत्रता सिद्ध हय। न तु वा हय ना इति ॥ ७ ॥

अष्टम प्रमाण—दत्तकमीमांसा ग्रन्थ लिखित। ताहार भाषा—ये हेतुक दत्तक प्रभृति पुत्रेर संस्कार करातेइ पुत्रता हय—एइ कथा स्थिर। अतएव दान किम्वा ग्रहण किम्वा व्याहृति होम प्रभृति, ये विधान नियमित आछे, ताहार मध्ये यदि कोनो एक कर्म्म ना हय तवे उहार पुत्रता सिद्ध हय ना इति ॥ ८ ॥

नवम प्रमाण—दायभाग प्रभृति ग्रन्थ धृत देवलमुनिवचन। ताहार भाषा—ये व्यक्तिर औरस पुत्र ना थाके, ताहार दत्तक प्रभृति पुत्रेरा धनाधिकारि हयेन इति ॥ ९ ॥

अङ्गरेजी सन १८३४ साले। सेतम्वरमासेर १८ तारिके दिवस वृहस्पतिवारे एइ व्यवस्था दाखिल करा गेल ॥—

———

(४८)—नं० ६ आपिल सन १८३४ साल—

रुवकारि आदालते देओानि मों० ताजपुर परगने खोरद नागपुरेर एजेण्ट गवरनर[1] जानेरेल शाहेव वाहादुरेर मोहकमा कापतान तामश डिनगेप एजेण्ट साहेवेर बैठके सन १८३४ शालेर २९ मार्च्च मोताबक सन १२४० साल १७ चैत्र मओोफके सन १२४१ सालेर ५ चैत्र दिवस शनिवार—

चेतरामतेओारि— आपिलाण्ट

सावेक मुदइ—

आशानाथतेओारि— रेष्पाडण्ट

सावेक मुद्दाआलेहे

मोकद्दमा मौजे खटका ओ मौजे देशउत परगने खोफरा माद्यने परगने खोरदनागपुरेर मोछम्मात सुमित्रातेओारिनेर

१. गववनरजानेरेन—व्य-० ।

अर्द्धेक हिस्याय दखल पाइवार वावद एशिष्टण्ट कमिशनर साहेवेर फयशलार नाराजी ॥—

इहार पूर्व्वे शन हालेर २८ फिवरेल ओ एइ मासेर १४ ओ २१ ओ २५ तारिखे एइ मोकद्दमा हजुरे रुवकार हइया मुलतवि छिल। अद्य एइ मोकद्दमा पुनराय उभयेर मोकाविलाय रुवकार हइल। गोविन्दनारायणतेओारि उभये सरिकानेर १ जना हजुरे हाजीर हइल। मिछिलेर समुदय कागजात ओ उभयेर कुरशिनामा मोलाहेजा हइया एइ वोध हय जे वासुदेवतेओारि उभयेर मुरस छिलेन। ताहार दुइ पुत्र। ज्येष्ठ जगतमन तेओारि, कनिष्ठ कृष्णमन तेओारि। वासुदेवतेओारिर सन्तान हइते आपिलाण्ट चेतरामतेओारि अष्टम पुरुप ओ रेष्पाडण्ट आशानाथतेओारि ओ गोविन्दनारायणतेओारि सप्ट पुरुष छिल, आर कृष्णमनतेओारि सन्तान हइते गोदलरामतेओारि पञ्चम पुरुस[1] थाकिआ, एक कन्या ओ सुमित्रातेओारिनि आपन स्त्रीके राखिया अपुत्रक मृत्यु हय। ओ ताहार कन्या सुमित्रा वर्त्तमाने आपन एक पुत्र सन्तान राखिया मृत्यु हय। ओ ताहार कन्यार सन्तान आपन वनिताके राखिया मृत्यु हय। आर जगतमनतेओारि ओ कृष्णमनतेओारि उभये पितार स्थावर अस्थावर सकल विसय अर्द्धार्द्ध अंश करिया लइया दखिलकार थाकिया मृत्यु हइले। ताहारदिगेर उत्तराधिकारिरा पैतृक त्यक्त धने आपन२ हिश्या मतो दखिलकार थाकिया, इहार मध्ये आपिलाण्ट चेतराम तेओारि रेष्पाडण्ट आशानाथतेओारि ओ गयरह गोदलरामतेओारि मजकुरेर वनिता सुमित्राके ताहार स्वामिर ओ स्वामिर भ्रातार हिश्यार विपय मौजे खटगा ओ मौजे देसउतेर अर्द्धेक हइते वेदखल करिले। मोछम्मात मजकुरार नालिस मते सन १८१८ सालेर ६ जुन तारिखे जेला रामगडा हइते मौजे खटगा ओ मौजे देशउत ग्रामेर चारि आना रकम अर्थात अर्द्धेक २ मोछम्मात

१. पुरुष—व्यप०।

सुमित्रार स्वामिर, अर्द्धेक, ओ स्वामिर भ्रातार अर्द्धेक विषये दखल पाइया दखिलकार छिल। परे सुमित्रा मजकुरा आपन दखलि ऐ दुइ मौजार समुदय हिस्या मोवलगे ७५१ टाका पने रेष्पाडण्ट आशानाथतेओारिर निकट विक्रय करिया कोवाला ओ पनेर टाकार रशीद सन १८२१ सालेर २३ आपरेल मोतावक फशलि सन १२२८ सालेर ९ वैशाख तारिखे लिखिया दिया सन १८२१ सालेर २८ आपरेल तारिखे आपन स्वेच्छापूर्व्वक मों शहरघाटीर काजिर मोहर ओ सन १८३१ सालेर ३० आपरेल तारिखे रेजष्टरि कराइया देय। तद्वधि आशानाथ-तेओारि विक्रीत विषयेर पर दखलिकार आछे। सुमित्रातेओारिनि फसलि सन १२४० सालेर भाद्र माहाते फौत करे। ताहाते चेतरामतेओारि सुमित्रार स्वामिर सगोत्र प्रयुक्त ओ अपुत्रक फौत करणे आपनाके ताहार हिस्यार हिस्यादार करार दिया एइ नालिष करिवार खोरद नागपुरेर परगना हरेर एशिष्टण्ट कमिसनर साहेवेर सुमित्रार दखलि विषय आशा-नाथतेओारिर निकट विक्रय एव ताहाते ताहार दखिलकार थाकार शाछदेते सन १८३३ सालेर २८ मे तारिखे मोकद्दमा डिपमिष करियाछेन। आपिलाण्ट ऐ फयसलाय नाराज हइया सन १८३३ सालेर ११ सेतम्वर तारिखे परगना हावेर खोरद नागपुर ओ गयरहेर कमिसनरि मोहकमाय आपिलेर दरखास्त करे। परे कमिसनरि वरखास्त हइया आमार मोता-लुक हओार उभयेर मोकद्दमा एइ आदालते मोन्तजम हय इति। रेष्पाडण्ट आशानाथतेओारि जाहेर करे ये सुमित्रार स्वामिर हिस्या छिल ओ से विना आखेज ओ आपत्य आपन स्वामिर विशयेर पर दखिलकार थाकिया आपन सेच्छा पूर्वक मौजे खटगा ओ मौजे देशओात ग्रामेर अर्द्धेक मोवलगे ७५१ टाका पने आमार निकट विक्रय करिया, कोवालाय काजिर मोहर ओ रेजष्ट साहेवेर रेजष्टरि कराइया लिखियादेय। तद्वधि आमि

रेष्पाडण्ट आमार दखले आछे। आर सुमित्रा आपन दखलि जमिर मध्ये एक नहरि जमि खारिटाम्भ आ पावि दुइ गाछ, काठाल १ ओ कदम्ब १ कयाल धरके दान करे। आपिलाण्ट ताहाते मोजाहेम हय ना इति। यदि स्यात् रेष्पाडण्ट आशानाथतेओरि जाहेर करितेछे जे सुमित्रातेओरिनेर विक्रयानुसारे विक्रित विशयेर पर दखिलकार आछे। आपिलाण्ट चेतरामेर सहित ताहार एलाका नाइ, ओ ताहार खरिद साब्यस्त करिया कोवाला ओ पनेर टाकार रशीद पेष करे। किन्तु प्रकाश हइते छे जे सुमित्रा वेओा ओ अविरा थाकिया स्वामिर पैतृक विषय आशानाथ तेओारिर निकटे विक्रय करे। मिताक्षरा ओ दायभागेर तरजमार केताव मोलाहेजाय प्रकाश हइतेछे जे वेओा ओ अविरा स्त्रिके स्वामिर पैतृक विषय दान विक्रयेर क्षमता कदापि नाइ। ए कारण हिन्दुदिगेर शास्त्रानुसारे ओ देशाचार मते सुमित्रा वेओा अविरा रेष्पाडण्ट आशानाथ तेओारिर निकटे स्वामिर पैतृक विषय विक्रय करा ओ आशानाथ मजकुरेर ताहा खरिद करा ओ कोवाला माफिक एसिष्टण्ट कमिसनर साहेवेर हुकुमानुसारे ताहाते दखिलकार थाका सम्य(क) प्रकारे अयोग्य ओ आदालतेर ग्राह्येर योग्य नहे। एवं शास्त्र द्वारा ओ देशाचार मते वोध हय ये मृत गोदलरामेर त्यज्य वस्तुर पर ताहार सगोत्र दखल पाइवार सत्व राखे किन्तु तरजमाय वहि दृष्टे अवगति हय जे पितार सप्तम पुरुष पर्य्यन्त सपिण्ड ओ हिस्याय हकदार। आर उभयेर कुरछिनामा हइते प्रकाश आछे जे वासुदेवतेओारि उभयेर मुवा। ताहार दुइ सन्तान। ज्येष्ठ जगतमनतेयारि उभयेर घरना ओ कनिष्ठ कृष्णमनतेओारि। सुमित्रातेओारिनेर स्वामि गोदलरामतेओारिर घरना छिल। दुइ भ्रातार आपन पितार विषय अर्द्धेक अर्द्धेक रकम अंश करिया लइया दखिलकार थाकिया मृत्यु हय, ताहारदिगेर ओयारिशान[1] आपनारदिगेर पैतृक हिस्या माफिक

१. ओयाविशान—व्यप०।

दखिलकार आछे, आर आपिलाण्ट चेतराम वासुदेवतेओारि हइते अष्टम पुरुष ओ जगतमनतेओारि हइते सप्तम पुरुषेर तफात, एवं वासुदेव हइते आशानाथ षष्टम पुरुष, ओ जगतमन हइते पञ्चम पुरुषेर तफात, आर सुमित्रार स्वामि गोदलराम वासुदेव हइते पञ्चम पुरुष ओ कृष्णमनतेओारि हइते चतुर्थ पुरुष तफात आछे, ओ गोविन्द नारायणतेओारि आशानाथते-ओारिर न्याय बासुदेव मजकुर हइते षष्टम पुरुष एवं जगतमन हइते पञ्चम पुरुषेर तफात। अतएव तरजमार केताब दृष्टे सपिण्डक अर्थात सप्तम पुरुष अष्टम पुरुषेर नाओयारिशी विष-येर हिस्याय कोनो स्वत्व राखे कि ना-सन्देह जन्मिल। एवं एतद्देशे एइ मोकद्दमार न्याय जे अष्टम पुरुषेर केह सगोत्र नाओारिशि विशये दखल पाइयाछे कि ना तर्त्त करा गेल। ताहाते केह कहिते ओ कोनो लिखित पठित पेष करिते पारिवेक ना। अतएव ए विशयेर व्यवस्था ज्ञातो हओा आविस्यक मते हुकुम हइल जे एइ रोवकारिर नकल ओ उभयेर कुरछिनामा इङ्गरेजी ओ फारशी ए वातरे इङ्गरेजी चिठी द्वारा सदर दओानि आदाल-तेर हाकिमानेर निकट एइ प्रार्थनाय प्रेरित हय जे साहेवान मोसुफिल मिताक्षरा हइते एइ विशयेर व्यवस्था जे गोदलराम-तेओारि अपुत्रकेर विषये के २ हिस्यार हक राखे—आदालतेर पण्डितेर स्थाने तलव करिया अनुग्रह पूर्व्वक आसल व्यवस्था मोलाहेजार कारण पाठान जे मोकद्दमा फयसल हय, आर व्यवस्था पौंछ पर्य्यन्त ए मोकद्दमा मुलतवि थाके इति—

प्रभुसमर्पितविचारपत्रं वंशावलीपत्रं च यदीशवीशब्दप्रतिपाद्यनिगम-गुणगजेन्दुमिताब्दीयापरेलमासीयपञ्चदशदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

गोदलरामत्रिवेदित्यक्तधनं यत् पुत्रपौत्रप्रपौत्राभावे सति तत्पत्न्या सुमित्रा-देव्या उत्तराधिकारित्वेन प्राप्तं तत्र धने यदि गोदलरामत्रिवेदिदौहित्रस्तत्पत्नी सुमित्रादेवीमरणोत्तरं विद्यमान आसीत्तदा तस्याधिकारस्तस्मिन् पुत्रपौत्र-

प्रपौत्ररहिते मृते सति तत्पत्न्या एव तद्धनाधिकारः । यदि च गोदलरामत्रिवेदिदौहित्रः स्वमातामह्यां विद्यमानायामेव मृतः स्यात्तदा तद्दौहित्रस्य तद्धने स्वत्वानुत्पादेन तत्पत्न्या अपि तद्धने नाधिकारः, किन्तु प्रभुसमर्पितविचारपत्रवंशावलीपत्रोभयलिखितवृत्तान्ते सति गोदलरामत्रिवेदिवृद्धप्रपितामहवासुदेवत्रिवेदिनोऽतिवृद्धप्रपौत्रयोराशानाथत्रिवेदिगोविन्दनारायणत्रिवेदिनोरेव सन्निकृष्टसपिण्डत्वेन समानाधिकारः, आशानाथत्रिवेदिगोविन्दनारायणत्रिवेदिनोः पूर्व्वं गोदलरामत्रिवेदित्यक्तधने ये उत्तराधिकारिणस्तेषां मध्ये कश्चिदिदानीं विद्यमानोऽस्ति न वेत्यस्य प्रभुसमर्पितविचारपत्रवंशावलीपत्राभ्यां स्पष्टतरतयाऽनवगमाद्, आशानाथत्रिवेदिगोविन्दनारायणत्रिवेदिनोर्विद्यमानयोर्वासुदेवत्रिवेदिवृद्धातिवृद्धप्रपौत्रस्य कमलनाथत्रिवेदिनो वासुदेवत्रिवेदिवृद्धातिवृद्धप्रपौत्राणां कलहारामत्रिवेदिहीरारामत्रिवेदिभवनरामत्रिवेदिचेतरामत्रिवेदिनां वासुदेवत्रिवेदिवृद्धातिवृद्धप्रपौत्रप्रपौत्रस्य वेचूरामत्रिवेदिनश्च नाधिकारः, सन्निकृष्टासन्निकृष्टसपिण्डयोस्समानोदकानां च विद्यमानतायां सन्निकृष्टसपिण्डस्यैवाधिकारस्य मनुमिताक्षरादिग्रन्थसम्मतत्वात्—इति मनुमिताक्षरादिग्रन्थानुसारिणी व्यवस्था ॥

इशवीशब्दप्रतिपाद्यनिगमगुणगजेन्दुमिताब्दीयसितम्बरमासीयमुनिनेत्रमितदिनसम्बन्धिशनिवासरे मया विचारपत्रवंशावलीपत्राभ्यां सहितेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

(४९)—मो० कलिकातार सदरदेओानि आदालतेर श्रीयुत ओलियमव्राडिन साहेब ऐ आदालतेर हाकिमेर बैठकेर सन १८३४ सालेर तारिख १२ माह जुन मोतावेक सन १२४१ सालेर ३१ ज्यैष्ट वृहस्पतिवारेर दिवसेर रोवकारि—

काशीचन्द्रमुस्तोफि छाएल

छाएलेर उकिल मुनशी शिवनारायण चट्टोपाध्याय हाजिर

छाएलेर उकिल सदासुखपण्डित हाजीर आइल। छाएलेर छओालात ओ ताहार सम्बलित कागजात, जे ए आदालतेर साबेक हाकिम रिचार्ड ओआलपाल साहेबेर वैठकेर मोतालक छिल, अद्य आमार वैठके दरपेप हइया पाठ करा गेल। कोन हुकुम देओनेर पूर्व्वे निचेर लिखित विषयेर प्रत्युतर ए आदालतेर पण्डितेर स्थाने लओा उचित बोध हइल, ए कारण हुकुम हइल जे एइ रोवकारिर नकल एइ हुकुमे जे निचेर लिखित विशयेर प्रत्युत्तर रोवकारि प्राप्तेर दिवसावधि पञ्च दिवसेर मध्ये लेखेन-ए आदालतेर पण्डितके अर्पन करा जाय। एइ हेतु जे श्रीमती तारिणी किछु टाका मृत कालीप्रसादरायेर पुत्रगण श्यामसुन्दर देओ प्रभृतिर स्थाने कर्ज्ज लय, ओ शेप ताहा परिशोध ना हओने ऐ श्यामसुन्दर प्रभृति आदालतेर डिगरि ऐ श्रीमतीतारिणीदेव्यार नामे हासील करिया चारि पाच वत्सर पर्य्यन्त, जे ऐ श्रीमती जीवद्दशाय छिल, ताहा जारि ना करिया उहार मृत्युर पर डिगरि जारिर दरखास्त छाएलेर नामे जे उत्तराधिकारि हेतुते मोट परगने भओालेर नय आनार मध्ये तिन आना ऐ श्रीमतीर तेज्य अंशेर पर दखलीकार हइयाछिल. जेलार आदालते गुजराय, ओ छाएल आपत्य करे जे ऐ श्रीमतीर स्वकीय ऋनेर टाकार जओाब देओन आमार पर नाइ। ए जन्य जिज्ञाशा करा जाइते-छे जे वङ्गदेशीय चलितशास्त्रानुसारे ऐ श्रीमतीर देना परिशोध करा छाएलके उचित हय कि ना-इति।—

श्रीर्जयतितराम्

प्रभुसमर्पितेशवीशब्दप्रतिपाद्येषुगुणगजेन्दुमिताब्दीयजुलाइमासीयवे-

देन्दुमितदिवसीयविचारपत्रं तत्प्रतिरूपसहितं च तदब्दीयागस्तिमासीय-दिङ्मितदिनसम्बन्धिचन्द्रवासरे मया व्यवस्थालिखनार्थं प्राप्तम्। किन्तु तद्विचारपत्रान्मृततारिणीदेवीत्यक्तं धनं तस्याः स्त्रीधनमासीत्, तत्पति-पुत्रादिपरित्यक्तं वा तत्संक्रान्तमासीदिति, किं वा तारिणीदेव्या एतद्दत्तं किमर्थं कृतमिति, तारिणीदेव्या सहैतद्धर्माधिकरणार्थिनः कः सम्बन्धः इति च त्रितयं ज्ञातुं न शक्यते। तत्त्रितयज्ञानं विना प्रभाराज्ञापितव्यवस्था भवितुं न शक्नोतीति। अतो निवेदयामि। यथा आज्ञा तथा कर्तव्यमिति निवेदनमिति।

ईशवीशब्दप्रतिपाद्येपुगुणगजेन्दुमिताब्दीयदिशम्बरमासीयगुणपक्षमित-दिनसम्बन्धिबुधवासरे मयैतन्निवेदनं कृतमिति ॥

श्रीर्जयतितराम्

प्रतिपाल्यतमश्रीवैद्यनाथमिश्रस्य निवेदनमिति।

श्रीर्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतश्रोलियमवेराडीनमाहेवधर्म्माधिकरण-लिखितेशवीशब्दप्रतिपाद्येपुगुणगजेन्दुमिताब्दीयजुलाइमासीयवेदेन्दुमितदि-वसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयागस्तमासीय दङ्मित-दिनसम्बन्धिचन्द्रवासरे तत्प्रभुधर्म्माधिकरणलिखितेशवीशब्दप्रतिपाद्यरस-गुणगजेन्दुमिताब्दीयफेब्रवरीमासीयवसुमितदिवसीयविचारपत्रान्तरं यत्तद-ब्दीयतन्मासीयवेदपक्षमितदिनसम्बन्धिबुधवासरे च मया प्राप्त तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रभुसमर्पितप्रश्नलिखितवृत्तान्ते सतीशवीशब्दप्रतिपाद्यरसगुणगजेन्दु-मिताब्दीयफेब्रवरीमासीयवसुमितदिवसीयप्रभुकृतविचारपत्रदृष्ट्या च तारि-णीदेवीकृतर्णपरिशोधनमर्थिना शास्त्रानुसारेण कर्त्तुमुचितं न भवति—इति वङ्गदेशचलितमनुदायभागादिग्रन्थानुसारिणी व्यवस्थेति।

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयफेब्ररवरीमासीयाङ्कपक्षमितदिनसम्बन्धिचन्द्रवासरे मया प्रभुसमर्पितविचारपत्रसहितेयं व्यवस्था दत्तेति ।

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

श्रीर्ज्जयतितराम्

प्रभुकृताज्ञानुसारेण निवेद्यते--

प्रभुसमर्पितेशवीशब्दप्रतिपाद्येषुगुणगजेन्दुमिताब्दीयजुलाइमासीयवेदेन्दुमितदिवसीयविचारपत्रं तदब्दीयागस्तिमासीयदिङ्मितदिनसम्बन्धिचन्द्रवासरे यद्यपि मया प्राप्तम्, किन्तु कर्म्मबाहुल्यवशात्तत्समये तदन्तर्गतप्रश्नाशयो नावगतो यदैतस्योत्तरं लेखनीयं तदैवैतस्य प्रश्नस्यार्थोऽपि सम्यग्ज्ञातव्य[1] इत्येव मनसि निधाय प्रभुसन्निधौ निवेदनं न कृतम् । एतस्मिन्नेवावसरे श्रीयुतहेनरीसिक्सिपीयरसाहेवाभिधानैतद्धर्म्माधिकरणप्राचीनाधिपतिभिराज्ञप्तं निवेदनलिखनार्थमेकमाज्ञापत्रमीशवीशब्दप्रतिपाद्येषुगुणगजेन्दुमिताब्दीयागस्तिमासीयेन्दुगुणमितदिनसम्बन्धिचन्द्रवासरे प्राप्तम्, तदनन्तरं तन्निवेदनलिखनमत्कर्त्तव्येतरेतरकार्य्यसमुदायव्यग्रेण प्रभुसमर्पितप्रश्नस्य प्रश्नान्तरजातस्य वा तत्पूर्व्वमपि प्राप्तस्योत्तरलिखने श्रीश्रीश्वरपूजार्थंधर्म्माधिकरणावकाशात् पूर्व्वमवकाशलेशोऽपि न प्राप्तः । अनन्तरं चेषुगुणमितदिनपरिमितो धर्म्माधिकरणस्यावकाशोपि श्रीश्रीश्वरपूजार्थमुपस्थितः । अत एव श्रीयुतहेनरीसिक्सिपीयरसाहेवाभिधानैतद्धर्म्माधिकरणप्राचीनाधिपतिभिराज्ञप्तं तन्निवेदनपत्रं लिखित्वेशवीशब्दप्रतिपाद्येषुगुणगजेन्दुमिताब्दीयनवम्वरमासीयरसेन्दुमितदिनसम्बन्धिचन्द्रवासरे दत्तम् । तदनन्तरं च यद्यत्प्रश्नजातं प्रभुसमर्पितप्रश्नात् पूर्व्वं परतो वा प्राप्तं तस्य तस्योत्तरलिखनप्रवृत्तेनापि यस्य व्यवस्थाजातस्य मत्कर्त्तव्येतरेतरकार्य्यस्य वा

---

१. सम्यक् ज्ञातव्यः---यप० ।

श्रीमतां प्रभूणामेतद्धर्म्माधिकरणाधिपतीनामवान्तरधर्म्माधिकरणपतीनां वा आज्ञावशात् शीघ्रता जाता, तद्व्यवस्थाजातं प्रथमतो लिखित्वा दत्तम्, तत्तत् कर्म्म च कृतम् । अनन्तरं प्रभुसमर्पितप्रश्नस्योत्तरलिखनप्रवृत्तेनापि यद्विषयत्रयं प्रभुसन्निधौ निवेदितं तस्य त्रितयस्य ज्ञानं प्रभुसमर्पितप्रश्नस्योत्तरलिखने अत्यावश्यकं जातम् । तस्य त्रितयस्य ज्ञानं विना प्रभुसमर्पितप्रश्नस्योत्तरं दातुमशक्तेनागत्य प्रभुसन्निधौ निवेदितमिति निवेदनमिति ॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयफेवरवरीमासीयाङ्कपक्षमितदिनसम्बन्धिचन्द्रवासरे मया प्रभुसमर्पितविचारपत्रसहितमिदं निवेदनपत्रं दत्तमिति ।

श्रीर्जयतितराम्

प्रतिपाल्यतमश्रीवैद्यनाथमिश्रेण

श्रीदुर्गा शरणम्

(८८)—जिला कटकेर दिमानि आदालतेर सदर आमिन आलार वैठकेर सवाल । मोकाम कलिकातार सदर दिमानि आदालतेर पण्डितानेर प्रति । प्रथम सवाल एइ ये, क्रय ओ विक्रय प्रभृति मोकद्दिमार विषयेते शास्त्रेर आज्ञासकल हिन्दुजातीर मध्ये वाङ्गला ओ ओडिस्या ओ वेहार ओ तैलङ्ग ओ महाराष्ट्र देशेर एक प्रकार वटे, कि पृथक पृथक इति ।—

द्वितीय सवाल एइ ये, हिन्दुजातीर मध्ये क्रय ओ विक्रयेर स्थले क्रेता ओ विक्रेतार स्वीकार कराते क्रय विक्रय सिद्ध हय, कि मूल्येर समस्त टाका दिले सिद्ध हय, कि किञ्चित मूल्य दिले ओ निलेओ सिद्ध हय इति ।—

तृतीय सओाल एइ ये, यद्यपि कोनो व्यक्ति हिन्दु जाति आपन स्त्री ओ अप्राप्त व्यवहार पुत्र विद्यमान थाकिते पैतृक कोनो स्थावर किम्वा स्वोपार्जित कोनो स्थावर काहारो निकट विक्रय करे, तवे ए प्रकार विक्रय शास्त्रानुसारे सिद्ध वटे कि ना इति ।—

श्रीर्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं विचारपत्रद्वयञ्च यदीशवीशब्दप्रतिपाद्येषुगुणगजेन्दुमिताब्दीयाकतूवरमासीयाङ्कपक्षमितदिनसम्बन्धिवृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशाबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

हिन्दुजातीयक्रयविक्रयप्रभृतिविवादविषयकशास्त्राज्ञा वङ्गदेशे उत्कलदेशे वेहारदेशे त्रैलिङ्गदेशे महाराष्ट्रदेशे च क्वचित् क्वचित् स्थलविशेषे एकाप्यस्तीति ॥

द्वितीयप्रश्नस्योत्तरम्—

क्रयविक्रयस्थले समस्तमूल्यग्रहणपूर्व्वकक्रेतृविक्रेत्रोः स्वीकारेण विक्रयस्य सिद्धिर्भवति । किञ्चिन्मूल्यग्रहणेन विक्रयस्य सिद्धिर्न भवतीति ।

अत्र प्रमाणम्—

मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा ।

अस्वतन्त्रेण मूढेन त्याज्यं तस्य पुनर्भवेत् ॥—इति वीरमित्रोदयादि (पृ० ४८१)ग्रन्थधृतवृहस्पति(पृ० १५५)वचनम् ॥१॥

तृतीयप्रश्नस्योत्तरम्—

यदि केनचित् पत्न्यां विद्यमानायामप्राप्तव्यवहारेषु पुत्रेष्वपि विद्यमानेषु क्रमागतं स्वोपार्जितं वा स्थावरं शास्त्रीयावश्यककार्य्यार्थव्यतिरेकेण विक्रीतं स्यात्तदा शास्त्रानुसारेण न सिद्ध्यति, शास्त्रीयावश्यककार्य्यार्थव्यतिरेकेण[१] विक्रीतं स्यात्तदा शास्त्रानुसारेण सिद्ध्यति—इति कटकप्रदेशचलितमनुमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्थेति ॥—

अत्र प्रमाणम्—

मणिमुक्ताप्रवालानां सर्व्वस्यैव पिता प्रभुः ।

स्थावरस्य तु सर्वस्य न पिता न पितामहः ॥—इति मिताक्षराप्रभृतिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥२॥

---

१. कार्य्यार्थव्यतिरेकेण – व्यप० ।

ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः।
वृत्तिं ते ऽप्यभिकांक्षन्ति न दानं न च विक्रयः॥—इति मिताक्षरादि-
(पृ० २०० ग्रन्थधृतमुनिवचनम्॥२॥

अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु चानुज्ञानादावसमर्थेषु भ्रातृषु वा तथा-विधेष्वविभक्तेष्वपि सर्व्वकुटुम्बव्यापिन्यामापदि तत्पोषणे चावश्यकर्त्तव्येषु पित्रादिश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोऽपि समर्थः कुर्य्याद्—इति मिताक्षरा(पृ० २००)ग्रन्थलिखनञ्चेति॥३॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयमार्च्चमासीयदिङ्मितदिन-सम्बन्धिबृहस्पतिवासरे मया प्रभुसमर्पितप्रश्नपत्रविचारपत्रैः सहितेयं व्यवस्था दत्तेति॥

श्रीउज्जयतितराम्—
श्रीवैद्यनाथमिश्रेण

---

(२९) मोकाम कलिकातार सदर देओानि आदालतेर इङ्गरेजी सन १८३६ सालेर ७ जानेर मोताबके वाङ्गला सन १२४२ सालेर २४ पौष बृहस्पतिवार दिवशेर ए आदालतेर हाकिम श्रीयुत ओलियम त्राडीन साहेबेर रोवकारि।—

काशीचन्द्रमुस्तोफि छायेल—

छाएलेर उकिल शिवनारायणचट्टोपाध्याय हाजीर आइल। सन १८३५ सालेर १९ दिशम्बरेर लिखित हुगलि जेलार आदालतेर एक केता रिटरण तथाकार एक केता रोवकारि ओ ओछिनामार नकल ओ गयरह ए रिटरणेर सम्वलित सन मजकुरेर ३१ आगष्टेर प्रकाशित ए आदालतेर हुकुमेर जओावे प्राप्त ओ अद्य दरपेप हइया छायेलेर छओाल ओ गरह ऐ छओालेर संक्रान्तेर कागजसकलेर सहित ओ ए आदालतेर पण्डितेर व्यवस्था दृष्टे आइल। ए आदालतेर पण्डितेर व्यवस्थार लिखित हइयाछे जे यदि एक व्यक्ति अविरा कन्यार स्वामि-कुलेर स्वामिर भ्रातार न्याय प्रभृति जे ताहा हइते ऐ अवीरा स्त्रीर धर्म्म ओ लज्जा

मानेर रक्षणावेक्षण हइते पारे थाके, तवे आपन स्वामीर गृहे अवीरा स्त्रीर जाओन कर्त्तव्य वटे, ओ यद्यपि ऐ प्रकार ना थाके, ओ ऐ कन्यार पितृकुलेर पिता ओ भ्राता प्रभृति थाके जे ताहादेर हइते ऐ कन्यार धर्म्म प्रभृति लज्जा मानेर रक्षणावेक्षण हइते पारे, तवे ताहा त्याग करिया कन्या मजकुरार आपन स्वामिर गृहे जाओन आविश्यक राखे ना; वरं स्वामिकुलेर एक व्यक्ति पुरुस रक्षणावेक्षणेर उपयुक्त ना थाकार सम्भवे ए स्त्रीर रक्षणापेक्षण ऐ स्त्रीर पितृकुलेर मनुष्यदिगेर पर उचित वटे। किन्तु व्यवस्था मजकुरा श्रीमती कमलकुमारिर स्वामि मृत रमेशचन्द्रेर लिखिया देओा ओछिनामा दिष्ट व्यतिरेक लिखित हइयाछे। ए कारण हुकुम हइल जे एइ रोवकारिर नकल ओ प्राप्त ओछिनामा एइ हुकुमे जे नकल रोवकारि प्राप्तेर दिवसावधि पञ्चदिवसेर मध्ये वङ्गदेशीय चलित शास्त्रानुसारे लेखेन जे ओछिनामा मजकुरार दिष्ट अप्राप्तव्यवहारा श्रीमतीकमलकुमारी स्वामीर ग्रहे आपन शाशुडिर निकट थाकन आविश्यक वटे, अथवा ताहार पितार निकट थाकिते पारे—ए आदालतेर पण्डितके अर्पन करा जाय इति।

श्रीकृष्णः शरणम्

परमपूजनीयश्रीमतीपद्माकुमारीदासी माता ठाकुराणी श्रीचरणाम्बुजेषु।

लिखितं श्रीरमेशचन्द्रदत्तकस्य ओछियतनामापत्रमिदम्। कार्य्यनञ्चागे[1] आमि सारिरिक पीडाय अत्यन्त पीडित, एवं जीवन संशय वोध हइतेछे। अतएव एक्षयने आमार होप वाहाल आछे, आपन स्त्री श्रीमतीकमलकुमारीदासीके पुष्यपुत्र लओनेर अनुमति पत्र लिखिया दिया आमार पैतृक ओ सोपार्जित मनकुला ओ गएर मनकुला दोरोवस्त विषयेर

१.—कार्य्य च। आगे-इति साधीयान् पाठः।

एवं आमार ऐ स्त्रीर ओ ताहार लओ। ऐ पुष्यपुत्रेर रक्षणा ओ हेफाजत कारण आपनाके ओछि मकरर करिया लिखिया दितेछि--जे आपने मालिक निचेर तपसील सकल कर्म्म करिवेन।

१ दफा। दोरवस्त एमलाक मनकुला ओ गयेर मनकुला, जे किछु आमार दखले आछे ओ जाहा आमार सरिकानेर निकट हइते बुझ समुझ करिया लइते वक्रो आछे,--ताहा बुझ समुझ करिया लइया तावत विषये दखिलकार थाकिया हेफाजत कारवेण, एवं देना ओ पाओना जाहा आछे ताहा बुझ समुझ करिया दिवेन ओ लइवेन ॥--

२ दफा। नित्य-नैमित्तिक क्रिया-कलाप ओ संसारेर खरच-पत्र अर्थात परिवारेर भरण पोषणादि समय मत करिवेन ॥--

३ दफा। आमार स्त्री आमार अनुमत्यानुसारे यथाशास्त्र जे पुष्यपुत्र लइवेक, ऐ पुष्यपुत्रेर एवं आमार ऐ स्त्रीर रक्षणा-पक्षन आपने करिवेन। जावत ऐ पुष्यपुत्र वयेप-प्राप्त ना हय तावत समुदाय विशय ओछि सुरत आपनकार दाखलकवजे थाकि-वेक। ऐ पुष्यपुत्र वयेप-प्राप्त हइले आपने ताहाके समजाइया दिवेन। यद्यपि पुष्यपुत्रेर वयस-प्राप्त हओनेर मध्ये आपने कोन पीडाय अथवा अन्य कोन कारणे जीवन संशय बुझेन, तवे आपन परिवर्त्ते अन्य काहाके खानिजेना मते ओछि मकरर कारिवार एक्तेयार आपनकार थाकिल ॥--

दाफा। आमार पैतृक ओ मोदार्जित कालेक्टरि माल-गुजारि समपर्कीय ओ पत्तनि ओ दरपत्तनि तालुकात जे आछे, ताहाते आमार एलागाएत खरच-पत्रेर वाहुल्यताय ओ अन्य देना परिशोधे सन हालेर सदर मालगुजारि आदायेर अनेक असंस्थान आछे। आपने ऐ तालुकातेर मध्ये कोना एक अथवा ततोधिक तालुक पत्तन करिया दरपत्तन दिया ताहार पन वाहाय ऐ असंस्थान मालगुजारिर सरवराह करिया विषय रक्षा करिवेन। इति सन १२३७ साल तारिख ६ कार्त्तिक--

	इशादी
श्रीरामदत्त	श्रीवैद्यनाथमित्र
सां० देवानन्दपुर ।	सां० हाजीपुर पं० चौमुहा ।
श्रीगोविन्दपाल	श्रीपाँचकडिघोष
सां० देवानन्दपुर ।	सां० गट्टु ।

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतश्रीलियमवेगाडीनसाहेबधर्म्माधिकरण-लिखितेशत्रीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयज्ञानवरीमासीयमुनिमित-दिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्र तत्समर्पितासीयन्नामाख्य पत्रं च यत्तदब्दीयफेबरवरीमासीयशिवमितदिनसम्बन्धिबृहस्पतिवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

प्रभुसमर्पितासीयन्नामाख्यपत्रदृष्ट्या अप्राप्तव्यवहारायाः श्रीमत्याः कमलकुमार्य्याः पतिगृहे श्वश्रूसन्निधानस्थितेः शास्त्रानुसारेणावश्यकता नास्ति स्त्रीत्वेन स्वतोऽस्वतन्त्रायाः स्त्र्यन्तररक्षकत्वस्याशास्त्रीयत्वेन तस्य पितृसन्निधाने स्थितिर्भवितुमर्हति—इति वङ्गदेशचलितमनुदायभागादि-ग्रन्थानुसारिणी व्यवस्थेति ।

अत्र प्रमाणम्—

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।

रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥—इति मनु(९।३)-वचनम् ॥१॥

भर्त्ता रक्षति यौवन इत्यादि प्रायिकम्, अभर्तृपुत्रायाः सन्निहितायाः पित्रादिभिरपि रक्षणात्—इति कुल्लूकभट्टकृतमन्वर्थमुक्तावलीग्रन्थ(पृ० ३४६)लिखनम् ॥२॥

मृते भर्त्तर्य्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः ।

विनियोगात्मरक्षासु भरणे च स ईश्वरः ॥

परिक्षीणे पतिकुले निर्म्मनुष्ये निराश्रये।
तत्सपिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः ॥—इति दायभागादि-
(पृ० १७३।१७४)ग्रन्थधृतनारद(१३।२८-२६)वचनञ्चेति ॥३॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयापरैल मासीयेषुमितदिन-सम्बन्धिमङ्गलवासरे मया प्रभुमर्षिनविचारपत्रासीयन्नामाख्यरत्राभ्यां पठितेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

(९०)—रुवकारि मिछिल मोकाम कलिकाता मदर देओ-यानी आदालतेर सन १८३६ सालेर मार्च्च मासेर स्याष्टादस दिवस बुधवारे डिवड इसमिट साहेब-कायेम मोकाम हाकिमेर बैठके ॥—

जगतचन्द्रअधिकारि— साएल

साएलेर उकिल निलमनिवन्द्योपाध्याय हाजीर हइल। सन १८३५ सालेर दिजम्बर दशम दिवसेर जिला वद्धमानेर जज साहेबेर आ जिलार पण्डितेर व्यवस्थानुसारे सायेलेर एवं मधूसूदनवडाल प्रतिवादिर पूर्व्वपुरुषेर स्थापित ओ प्रकाश करा श्रीश्रीश्वरठाकुर-ठाकुराणी सूद्रजाति सेवकेर दिगेर वाटिते लइया जाइवार अनुमतिते मकद्दमा निष्पत्य करियाछेन, ए कारण साएल ताहाते असम्मत हइया श्रीमन्दिर हइते ठाकुर-ठाकुराणी अन्यन्तरे लइया जाओया रहित हुकुम छादेर हओनेर प्रार्थनाय आपन सओाल आर उकिलेर नामेर ओकालतनामा ओ सन १८३५ सालेर दिजम्बरमासेर दशमदिवसेर ऐ जिला आदालतेर रुव-कारिर नकल आ साएलेर सन १८३२ सालेर आगष्टमासेर सप्तदशदिवसेर हुकुम देओया दरखास्तर नकल आर सन १८३५ सालेर जानेओरि मासेर चतुर्द्दश दिबसेर हुकुम देओया मधुसूदन

वडाल प्रतिवादिर दरखास्तर नकल आर ओ जिला आदालतेर पण्डितेर व्यवस्थार नकल सम्वलित एइ मासेर पञ्चम दिवसे सेरेस्ताय दाखिल हइयाछिल, अद्य तारिखे दरपेस हइया पडा-गेल इति। जिला मजकुरेर जज साहेवेर गतो सनेर दिजम्वर मासेर दशम दिवसेर रुवकारि द्वाराय प्रकाश हइल जे जिलार पण्डित सदर आमिनेर काछारिते उभय विवादीर जे सकल साक्षी गुजरियाछे तदनुसारे उभय विवादीर पूर्व्व पुरुसेर रीति अनुसारे ठाकुर-ठाकुराणीजीउके ताहारदिगेर शूद्रजाति सेवकेर वाटीते लइया जाओया प्रमाण हइयाछे। एवं ओ पण्डित सदर आमिनेर व्यवस्था द्वाराते ओ ठाकुर-ठाकुराणीजिउर शूद्रसेवकेर दिगेर वाटीते गमने देवत्त हानि हओया किछु वोध हय ना। ये हेतु एक वार तथाय गमन करियाछिलेन, ए कारण साएलेर प्रति किछु हुकुम छादेर करार पूर्व्वे ए आदालतेर पण्डितेर द्वाराय एइ व्यवस्था तलव करा उचित हइल जे यदि ब्राह्मणेर प्रकाशीत ठाकुर ओ ठाकुराणीजिउ एक वार शूद्रजाति सेवकेर दिगेर वाटीते गमन करिया थाकेन, तवे पुनराय पूर्व्वेर रीति अनुसारे ठाकुर-ठाकुराणी शूद्रसेवकेरदिगेर वाटीते गमन करिते पारेन कि ना। एवं यदि गमन करेन ताहाते ताँहार-दिगेर देवत्तर किछु हानि हय कि ना। एमते हुकुम हइल जे ए आदालतेर पण्डित वङ्गदेशेर चलित शास्त्रानुसारे उपरेर लिखित वित्तान्तेर व्यवस्था पञ्च दिवसेर मध्ये दाखिल करेण। व्यवस्था दाखिल करा पर्य्यन्त सओयाल स्थकिद थाकिल इति॥—

श्रीश्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिस्थानाभिषिक्तश्रीयुतडिविडइशमिटसाहेव-धर्म्माधिकरणलिखितेशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयमार्च्चमासी-यरसेन्दुमितदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीय-

द्विपक्षमितदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

ब्राह्मणजातिप्रकाशितदेवताविग्रहाभ्यामेकवारं केनचिन्निमित्तेन शूद्रजातिसेवकस्य गृहे गतं चेत्तदनुसारेण पुनरपि तन्निमित्तवशाच्छूद्रजातिसेवकस्य गृहे ताभ्यां विग्रहाभ्यां गन्तुं शक्यते। तद्धेतुवशाच्छूद्रजातिसेवकगृहगमनेन चैतादृशविग्रहयोर्देवत्वहानिर्न भवति–इति वङ्गदेशचलितमन्वादिधर्म्मशास्त्रानुसारिणी व्यवस्थेति।

अत्र प्रमाणम्—

जातिजानपदान् धर्म्मान् श्रेणीधर्मांश्च धर्म्मवित्।
समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपालयेत्॥ इति मनुवचनम् ॥१॥
देशजातिकुलानाञ्च ये धर्म्माः प्राक् प्रवर्त्तिताः।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा॥ इति बृहस्पतिवचनञ्चेति ॥२॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयापरेलमासीयाङ्कमितदिनसम्बन्धिशनिवासरे मया प्रभुसमर्पितविचारपत्रसहितेयं व्यवस्था दत्तेति॥

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

(९१)—तरजमा सवालात—

जिला तिरहुतेर कायेम मोकाम सदर आमीन आला सैयद अवदुल ओ आहिद खान वहादुरेर वैठकेर सवाल सदर दिमानी आदालतेर पण्डितानेर प्रति ओ वाराणसेर पाठशालार पण्डितानेर प्रति—

मदारीलालेर उत्तराधिकारि रामभञ्जनसिंह आपीलाण्ट ओ तालेवरसिंह रेस्पाण्डेण्टेर मोकद्दिमाते मैथिल देशेर चलित

शास्त्रानुसारे ओ वाराणस देशेर चलित शास्त्रानुसारे ओ नदियार चलित शास्त्रानुसारे यवाव लिखेन—इति।

प्रथम सवाल—एइ ये मैथिलदेशेर चलित शास्त्रानुसारे विभागेर अर्थ कि—इति।

द्वितीय सवाल—एइ ये मैथिलदेशर चलित शास्त्रानुसारे साधारण्य कय प्रकार वटे—इति।

तृतीय सवाल—एइ ये ए प्रकार कोन साधारण्य आछे, ये हिन्दुजातिर सन्तानहीन कन्यासकलेर अधिकार पितार मृत्युर पर पितामहेर सपिण्ड विद्यमान थाकिते पितृपितामहेर त्यक्त धने हय कि ना इति।

चतुर्थ सवाल—एइ ये यद्यपि कोनो व्यक्ति आपन पितामहेर पौत्रसकलेर सहित विवाद उपस्थित करिया आपन अंशेर डिगरि आदालत हइते पाइया ओइ डिगरी अनुसारे दखिलकार हइया आपन जीवन पर्य्यन्त पृथक् पृथक् असूल तहसील करिया मारिया थाके, तवे एमत विषयेर विभाग वला याइवेक कि ना इति।

पञ्चम सवाल एइ ये यद्यपि कोनो व्यक्ति हिन्दु आपन पितामहेर पौत्र सकलेर सहित पृथगन्न ओ कारोवार ओ दान ओ ग्रहण ओ आय ओ व्यय पृथक् पृथक् करिया ओ पितामहेर त्यक्त किञ्चित भूमि अविभक्त राखितो, ओ ओइ भ्रातासकल आपन आपन अंशेर परिमित असूल तहसील पृथक् पृथक् करितेछिलेन—ए प्रकारे ओइ पितामहेर त्यक्त स्थावर विभक्त जाना जाइवेक कि, अविभक्त जाना जाइवेक। ओ ए प्रकार साधारण्य कन्यार अनधिकारेर कारण हइते पारे कि ना इति।

षष्ठ सवाल—एइ ये यद्यपि पितामहेर पौत्रसकलेर मध्ये क्रमागत स्थावर विभक्त ना हइया थाके, ओ ओइ स्थावरेर उपस्वत्व अंशीसकल आपन आपन अंशेर अनुसारे पृथक पृथक असूल ओ तहसील करिते थाकेन—तवे ए प्रकारे ओइ स्थावर विभक्तेर मध्ये गणना हइवेक कि ना, ओ ओइ स्थावर विभक्त·

पदेर अर्थ हइवेक कि ना, ओ ओइ स्थावर विभक्त पदेर अर्थेर मध्ये गणित हइवेक कि, अविभक्त पदेर अर्थेर मध्ये गणित हइवेक इति ॥

श्रीरुर्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं विचारपत्रं च यदीशवीशब्दप्रतिपाद्येपुगुणगजेन्दुमताब्दीयसितस्वरमासीयगजेन्दुमितदिनसम्बन्धिभृगुवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुमारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तत्तदेकदेशे प्रादेशिकस्वत्वव्यवस्थापनं मिथिलादेशचलितशास्त्रानुसारेण विभाग इति ।

अत्र प्रमाणम् —

विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तत्तदेकदेशेषु व्यवस्थापनम् —इति मिताक्षरा(पृ० १६७)ग्रन्थलिखनम् ॥१॥

विभागशब्दस्त्वनेकस्वाम्यानां द्रव्यसमुदायविषयाणां तत्तदेकदेशे व्यवस्थापने शक्तः—इति वीरमित्रोदयादि(वी० मि० पृ० ५२२)ग्रन्थलिखनम् ॥२॥

एकदेशोपात्तस्यैव गोभूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः—इति दायभाग(पृ० ८)ग्रन्थलिखनम् ॥३॥

द्वितीयप्रश्नस्योत्तरम्—

मिथिलादेशचलितशास्त्रानुसारेण साधारण्यमनेकविधमस्ति । तत् सर्वमधोलिखितवचनजातेष्वेव स्पष्टमिति ॥

अत्र प्रमाणम् –

दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः ।

विभक्तानां पृथग् ज्ञेयाः पाकधर्मागमव्ययाः ॥—इति विवादरत्नाकर(पृ० ६०६)विवादचिन्तामणि(पृ० २५३)विवादचन्द्र(पृ० ८७) मिताक्षरावीरमित्रोदय(पृ० ७१६)दायभाग(पृ० २३०)दायतत्त्व(पृ०

१७६)विवादार्णवसेतु(पृ० ८२)विवादभङ्गार्णवादिग्रन्थधृतनारद(नामसं० पृ० १५६) वचनम् ॥१॥

साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च ।

विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः कथञ्चन ॥—इति तत्तद्ग्रन्थधृतनारद(नामसं० पृ० १५६)वचनम् ॥२॥

येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वऋक्थतः ।

विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् ॥ इति तत्तद्ग्रन्थधृतनारद(नामसं० पृ० १५७)वचनम् ॥३॥

तृतीयप्रश्नस्योत्तरम्—

मृते पितरि विद्यमानेषु पितामहसपिण्डेषु पितृपितामहत्यक्तधने येन साधारण्येन सन्तानरहितदुहितॄणामधिकारो न भवति, तत्साधारण्यञ्च भ्रातॄणां पितृव्यभ्रातृपुत्रादीनां वा सपिण्डानां परस्परमविभक्तधनानामेकपाकेन वसतामेकत्र पितृदेववृद्धिजार्च्चनमायव्ययादिकमपि कुर्वतां परस्परमृणप्रातिभाव्यसाक्ष्यादिकमप्य(पा)कुर्व्वतां[1] तत्तत्कर्म्मजातमेवेति ।

अत्र प्रमाणम्—

द्वितीयप्रश्नोत्तरलिखितप्रमाणत्रयमेवेति ।

चतुर्थप्रश्नस्योत्तरम्—

चतुर्थप्रश्नलिखितवृत्तान्ते सत्येतादृशं धनं विभक्तमध्ये गणितं भवितुं शक्नोतीति ।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणत्रयमेवेति ।

पञ्चमप्रश्नस्योत्तरम्—

पञ्चमप्रश्नलिखितवृत्तान्ते सत्येतत्प्रश्नलिखितपितामहत्यक्तं स्थावरं धनं विभक्तमध्ये गणितं भवितुं शक्नोति, एतादृशसाधारण्यञ्च कन्यानधिकारप्रयोजकं भवितुं न शक्नोतीति ।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणत्रयमेवेति ॥

---

१. °मप्यकुर्व्वताम्—व्यप० ।

षष्ठप्रश्नस्योत्तरम्—

षष्ठप्रश्नलिखितवृत्तान्ते सत्येतादृशं स्थावरं विभक्तमध्ये गणितं भविष्यति, एतादृशं स्थावरं विभक्तपदवाच्यं भविष्यत्येतादृशं स्थावरं विभक्तपदार्थान्तर्गतञ्च भवति ॥—इति मिथिलादेशचलितमनुविवादरत्नाकरविवादचिन्तामणिकल्पतरुपारिजातविवादचन्द्रप्रभृतिग्रन्थानुसारिणी वाराणसीप्रदेशचलितमिताक्षरावीरमित्रोदयव्यवहारमयूखव्यवहारमाधवव्यवहारकौस्तुभादिग्रन्थानुसारिणी नदियाप्रदेशचलितदायभागदायतत्त्वदायक्रमसंग्रहविवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थानुसारिणी च व्यवस्थेति ।

अत्र प्रमाणम्—

प्रथमप्रश्नोत्तरलिखितप्रमाणत्रयमेवेति ।

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयापरेलमासीयरसेन्दुमितदिनसम्बन्धिशनिवासरे मया प्रभुसमर्पितप्रश्नपत्रविचारपत्राभ्यां सहितेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

१०१ लं जारि—

(९२)—जेला चब्विस परगनार मोतालक चौकि नवावगञ्जेर मोनछफी काछारि हइते सदर देमानि आदालतेर श्रीयुत पण्डितेर निकट व्यवस्थाकारण सओयाल पाठान जाय ।

श्रीमतीपार्व्वतीदासी साकिन नैहाटी प० हाविलीसहर—

डिगरिदार

श्रीमतीठाकुराणीदासी ओ रामनारायणमित्र— देनदार

कालीप्रसादमित्र ओ वेनिमाधवमित्र ओ मधुसूदनमित्र—

नावालगदिगेर माता श्रीमतीकरुणामयीदासी—मोजाहेम ।

गोविन्दचन्द्रमित्र सा० गैहाटी प० कलिकाता—

दोसरा मोजाहेम

दा० २७३।।।.।। टाका माय खरचा—

यद्यपि कमललोचनदे आपन स्थावर ओ अस्थावर विषये ओ आपन स्त्री श्रीमतीठाकुराणीदासी ओ दुइ कन्या श्रीमती-करुणामयीदासी ओ आनन्दमयीके राखिया परलोक हय आर करुणामयीदासीर गर्भजातक सन्तान श्रीयुतमधुसूदनमित्र ओ वेनिमाधवमित्र ओ कालीदासमित्र नाबालग वर्त्तमान थाके— एमत दशाय ऐ करुणामयीर माता श्रीमतीठाकुराणी कमललोचन-देर स्त्री ऐ करुणामयीर स्वामी रामनारायनमित्रेर सम्वलित कमललोचन मजकुरेर खरिदा ब्रह्मोत्तर ॥१ जमि वन्धकेर द्वाराय टाका कर्ज्ज लइया थाके, आर डिगरि हओनेर पर डिगरि जारिर द्वाराय प्रविनामार लिखित जमि ऐ कमललोचनेर त्यागी वस्तु क्रोक हइया थाके, तवे कमललोचनदेर दौहित्र लोक थाकिते ताहार त्यागी वस्तु ऐ ठाकुराणीदासी ओ रामनारायण मजकुरेर देनाय विक्री हइते पारे कि ना। यदि ठाकुराणी मजकुरा ऐ टाका आपन निज खरच किम्वा आपन स्वामीर गयातीर्थे पिण्डदान किम्वा आपन द्वितीय कन्यार विवाहेर कारण लइया थाके—एमत तृतीय हेतुते कमललोचन मजकुरेर त्यागी वस्तु हइते ठाकुराणीदासीर देना परिशोध हइते पारे कि ना इति।

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं विचारपत्रं च यदीशाब्दीशब्दप्रतिपाद्येषुगुणगजेन्दु-मिताब्दीयदिशम्बरमासीयगुणपक्षमितदिनसम्बन्धिबुधवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रश्नलिखितवृत्तान्ते सति मृतस्य मूलधनिनः कमललोचनदेनाम्नो दौहित्रेषु विद्यमानेषु कमललोचनत्यक्तधने पत्नीत्वेन जाताधिकारया ठाकुराणीदास्या मृतधनिपत्न्या प्रश्नलिखिततदृणं यदि शास्त्रीयावश्यक-कार्य्यार्थव्यतिरेकेणार्थात् स्वेच्छया स्वाभिप्रायेण वा कृतं स्यात्तदा तदृण-परिशोधनार्थं कमललोचनत्यक्तधनस्य विक्रयो भवितुं न शक्नोति; यदि

च ठाकुराणीदासी तदेव ऋणं शास्त्रीयावश्यककार्य्यार्थमर्थात् स्वकीयभरणपोषणाद्यर्थं स्वपत्युः श्राद्धाद्यर्थं द्वितीयकन्याविवाहाद्यर्थं वा कृतवती स्यात्तदा कमललोचनत्यक्तधनात् ठाकुराणीदासीकृतर्णपरिशोधनं भवितुं शक्नोति—इति वङ्गदेशचलितमनुदायभागादिग्रन्थानुसारिणी व्यवस्थेति ॥—

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्य वचनम् ॥१॥

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः ॥ इति दायभागादिग्रन्थधृतकात्यायनवचनम् ॥२॥

भर्त्तरौर्द्ध्वदैहिकक्रियार्थं दानादिकमप्यनुमतमिति । वर्त्तनाशक्ताबाधानमप्यनुमतम् । तत्राप्यशक्तौ विक्रयणमपीति च—दायभागग्रन्थलिखनम् ॥३॥

कन्या वैवाहिकञ्चैव प्रेतकार्य्येषु यत् कृतम् ।

एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥ इति व्यवहारतत्त्वादिग्रन्थधृतकात्यायन(कास्मृ० ५४३ पृ० ६८)वचनञ्चेति ॥४॥

ईशवीशब्दप्रतिपाद्य रसगुणगजेन्दुमिताब्दीयमैमासीयशिवमितदिनसम्बन्धिबुधवासरे मया प्रभुसमर्पितप्रश्नपत्रविचारपत्राभ्यां सहितेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

(९३)—नं० ६७० सदर—

इ० सन १८३६ सालेर १९ मार्च मो० वा० सन १२४२ सालेर ८ चैत्र शनिवारेर श्रीयुत जार्ज्ज इष्टाकोएल साहेव विचाराद्‌ध्यक्षेर आधिपत्येर मोकाम कलिकातार सदर देओयानी आदालतेर मिछिलेर रुवकारि—

राणीजयदुर्गा आपीलाण्ट—
राणीकृष्णमणी रेष्पाडण्ट—

आपीलाण्टेर उकिल वर्ग सदासुखपण्डित ओ वंशीवदन मित्र ओ रामना(रा)यण उपस्थित हइल। रेष्पाडेण्ट एयानाम नामा ओ एस्तहारनामा जारि हओनेओ स्वततः वा उकिलतः उपस्थित हइल ना। अद्य एइ मकद्दमा संख्यार शृङ्खलामते आमार आधिपत्ये समग्र हइया मिछिलेर कागजसकल पठित हइल। अवधारित हइल ये मोद्दाइया अर्थात् वादी उभयेर स्वीकृत विमलादास्यार स्वोपार्जित सामुदाइक अर्द्धेक मौजे राणी ग्रामेर अर्द्धेक अर्थात उक्त मौजेर।) चारि आना अंश पाओनेर दावि उपस्थित करे। मोद्दालेहा अर्थात् प्रतिवादी राणीजयदुर्गा विमलादास्या कर्त्तृक विक्रयेर आपत्य उत्थापन करिलेक। जेलार सदर आमीन सेइ विक्रयके अवीरा ओर पक्ष हइते अशीद्ध विवेचना करिया वादीके डिक्री देन। ए डिक्री आपीले जेला रङ्गपुरेर जजसाहेबेर अग्रे अङ्गिकार पत्र विक्रीर न्याय साव्यस्थ ना हओनेर बोधे स्थिरतर रहिल, एवं विषय हस्तान्तर हओन सिद्ध वाक्येर विशेष हओनेर निमित्त आपील खास ग्राह्य हइल। अतएव उपरोक्त विक्रयपत्र साव्यस्थ कि असाव्यस्थ-अनुसन्धाने साक्षिगणेर उक्तिसकल दृष्टि करणेर पूर्व्वेइ उचित हइल जे आदालतेर पण्डितके जिज्ञासा जाय जे। विधवा स्त्री, जाहार सन्तान सन्तत्यादि जीवद्दशाय नाइ, एवं स्वहस्ते विषय उपार्ज्जन करे, से विषय हस्तान्तर करणेर क्षमता राखे कि ना। हुकुम हइल जे एइ रुबकारिर नकल एइ आज्ञाय जे आदालतेर पण्डित लिखित प्रश्नेर उत्तर २ दुइ सप्ताहेर मध्ये दाखिल करेण आदालतेर पण्डितेर निकट प्रेरित हय—इति॥

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतजार्ज्जइष्टाकोएलसाहेवधर्म्माधिकरण-

लिखितेशवोशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयमार्च्चमासीयाङ्केन्दुमितदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्रं तत्तदब्दीयतन्मासीयगजपक्षमितदिनसम्बन्धिचन्द्रवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते ॥—

मृतसन्तानया विधवया स्त्रिया यदि स्वयमेव धनमुपार्जितं स्यात्तदा तस्या विधवायास्तद्धनहस्तान्तरकरणक्षमतास्त्येव—इति वङ्गदेशचलितमनुदायभागादिग्रन्थानुसारिणी व्यवस्थेति ।

अत्र प्रमाणम्—

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् ।

विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥—इति दायभागादि-(पृ० ७६ ग्रन्थधृतकात्यायन(कास्मृ० ६०६।पृ० ११०)वचनम् ॥१॥

पतिमरणोत्तरं च विधवाया न कश्चित् स्वामी, किन्तु भरणादिकर्त्ता गुरुरेव श्वशुरादिः, अतस्तदानीमर्जिते स्वातन्त्र्यमेव—इति विवादभङ्गार्णव(२, पृ० ३६४ क)ग्रन्थलिखनञ्चेति ॥२॥

ईशर्वाशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयमैमासीयरसेन्दुमितदिनसम्बन्धिचन्द्रवासरे मया प्रभुसमर्पितविचारपत्रसहितेयं व्यवस्था दत्तेति ॥

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

---

(६४) सर्व्वशास्त्राध्यापक पण्डित आदालत देओानि सदर मोकाम कलिकाता मतचरित्रेषु—

प्रथम प्रश्नमिदम्—

यद्यपि कोन स्त्रीलोक किछु दिव्यादि राखिया निःसन्तान मृत्यु हय। ततपरे ताहार त्यज्य धनेर उपर ताहार स्वामीर पितामहेर सधवा एक कन्या एवं ऐ कन्यार एक दत्तक पुत्र एवं ऐ मृता स्त्रीर स्वामीर प्रपितामहेर भ्रातुपौत्र राधागोविन्दनामक एक जना आर ऐ मृता स्त्रीर स्वामीर प्रपितामहेर भ्रातुपुत्रवधु श्रीमतीलक्ष्मीप्रियानाम्नी एक जना एवं तस्य दत्तकपुत्र गोविन्दकीशोर

नामक दाविदार हय; तवे यथाशास्त्र ऐ सकल दाविदारगनेर मध्ये कोन व्यक्ति ऐ मृतार त्यज्य धनाधिकारि हइवेक, एवं दत्तक पुत्रेर माता वर्त्तमान थाकिले दत्तक पुत्रके धन पौछिते पारे कि ना— एहार यथाशास्त्र उत्तर लिखिवा। परन्तु दुइ किता वंशावली-पत्रिर नकल तोमार ज्ञातार्थे प्रश्नपत्र सम्वलित पाठान जाइतेछे इति। १ माहे मार्च्च सन १८३६ इङ्गरेजी मतावक सन १२४२ वा० तारिख १९ माहे फाल्गुन॥

प्रभुसमर्पितप्रश्नपत्रं विचारपत्रं वंशावलीपत्रद्वयं च यदीशवीशब्द-प्रतिपाद्यरसगुणगजेन्दुमिताब्दीयमार्च्चमासीयद्विपक्षमितदिनसम्बन्धिमङ्गल-वासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रभुसमर्पितप्रश्नलिखितवृत्तान्ते सति हरिश्चन्द्ररायत्यक्ततत्पत्नीसंक्रान्त-धने मृतायाः स्त्रियाः पत्युः पितामहस्य सधवाकन्याया दत्तकपुत्रस्यार्था-न्मृतधनिहरिश्चन्द्ररायपितामहदौहित्रस्यैवाधिकारः—इति; एवं दत्तकपुत्रस्य मातरि विद्यमानायामपि दत्तकपुत्रस्यैवाधिकारः—इति वङ्गदेशचलितमनु-दायभागादिग्रन्थानुसारिणी व्यवस्थेति॥

अत्र प्रमाणम्—

पत्नी दुहितरश्चैव—इत्यादि दायभागादिग्रन्थधृतयाज्ञवल्क्य-वचनम्॥१॥

पितामहप्रपितामहसन्ततेरपि दौहित्रान्तायाः पिण्डप्रत्यासत्तिक्रमेणाधिकारो बोद्धव्यः—इति दायभागग्रन्थलिखनम्॥२॥

पितृव्यपौत्राभावे पितामहदौहित्रस्याधिकारः—इति दायभागटीका-(पृ० २१८)दायक्रमसंग्रह(पृ० ८)प्रभृतिग्रन्थलिखनञ्चेति॥३॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजूनमासीयाङ्कमितदिनसम्ब-न्धिबृहस्पतिवासरे मया प्रभुसमर्पितप्रश्नपत्रविचारवंशावलीपत्राभ्याञ्च सहितेयं व्यवस्था दत्तेति॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

———

(९५) यदि कश्चिन्निरपत्यो ब्राह्मणः स्वभार्य्यां समीपवर्त्तिनः सपिण्डांश्च त्यक्त्वा मृतस्तदा तत्समीपवर्त्तिनि सपिण्डे विद्यमाने लब्ध-पतिधना तत्पत्नी स्वभर्त्तुः स्थावरधनं पत्रकरणपूर्व्वकं कस्मैचिद्दत्तवती चेत्, तत्स्त्रीकृत दानमप्रामाणिकम् ।

स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदि ।

विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥ —इति विवादचन्द्रग्रन्थस्थ-कृतनिवृत्तिप्रकरणधृतार्षवचनादिति ॥ —

सही—कल्याणमिश्रपण्डित
आदालत दिमानी जिले तिरहुत वकलम
रामनाथमिश्र पण्डित ।

शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा ।
यस्य नोपरता भार्य्या देहार्द्धं तस्य जीवति ।
जीवत्यर्द्धशरीरेऽर्थं कथमन्यः समाप्नुयात् ॥
अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदि ॥

विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥—इति दायभागविवादचन्द्र-स्थकात्यायनबृहस्पति (पृ० २११) वचनादिति ॥—

सही—कल्याणमिश्र पण्डित आदालत दिवानी
जिले तिरहुत वकलम
रामनाथमिश्रपण्डित ।

ल० ३५९ सदर—

इ० सन १८३६ सालेर १७ मे मोतावक सन १२४३ सालेर ५ ज्यैष्ठी मङ्गलवारेर प्रकाश्य मोकाम कलिकातार सदर देओयानि आदालतेर मिछिलेर रोवकारि उक्त आदालतेर हाकिम श्रीयुत जार्ज इष्टाकोयेल साहेबेर नेसस्ते—

गम्भिरराय, ताहार मृत्युर पर विजयराय ओ गायरह—

আপীলাণ্টান

মোছম্মাত ধনেশ্বরী ও গয়েরহ রেস্পানডেণ্টান

আপীলাণ্টানের উকিল বজরঙ্গীলাল ও রেস্পানডাণ্টানের উকিল মুনশী দাদারবকস হাজীর হইল। এই মোকদ্দমা অদ্য তরতিব নম্বর মতে আমার নেশস্তে রোবকার হইয়া মিছিলের কাগজাত পঠীত হইল। তাহার মধ্যে যে জেলা তিরাহুতের আদালতের পণ্ডিতের দুই ব্যবস্থা মোলাহেজা হইল। যদি স্যাৎ উক্ত দুই ব্যবস্থার মধ্যে রেজেষ্টর সাহেবের সওয়াল ও জজসাহেবের সওয়ালের মধ্যে বিভিন্নতার প্রতি দৃষ্টিতে আমার নিকট কোনো প্রভেদ প্রকাশ নাই। কিন্তু যে হেতুক প্রকাশ আছে-যে এই মকদ্দমার খাশ আপীল লিখিত ব্যবস্থাসকলের লেহাজে মন্জুর হইয়াছে, এ জন্য এ আদালতের পণ্ডিতকে উক্ত ব্যবস্থাসকলের লিখিত জওয়াবের যথার্থতা তিরহুতের চলিত শাস্ত্র অর্থাৎ মৈথিল অনুসারে জিজ্ঞাসা জন্য তাহা সমর্পন উচিত বিবেচনা হইয়া হুকুম হইল যে এই রোবকারির নকল মোকদ্দমার নথির গ্রন্থিতো আসল দুই ব্যবস্থা সমেত এই আদালতের পণ্ডিতের নিকট পাঠান যায়। এই হুকুম, যে উক্ত পণ্ডিত দুই ব্যবস্থা দৃষ্টের পর এই বিষয়ের জওয়াব যে লিখিত ব্যবস্থাসকল তিরহুত জেলার চলিত শাস্ত্র অনুসারে যথার্থ বটে কি না—এক সমাহ মেয়াদ মধ্যে দাখিল করেন ইতি ॥

শ্রীর্জ্জয়তিতরাম্

এতদ্ধর্ম্মাধিকরণাধিপতিশ্রীযুতজার্জ্জইষ্টাকোএলসাহেবধর্ম্মাধিকরণ-লিখিতেশবীশব্দপ্রতিপাদ্যরসগুণগজেন্দুমিতাব্দীয়মৈমাসীয়মুনীন্দুমিতদিব-সীয়বিচারপত্রান্তর্গতপ্রশ্নপ্রতিরূপত্রমেবং তৎসমর্পিততীরভুক্তিজিলাখ্যান্তর-ধর্ম্মাধিকরণনিযুক্তপণ্ডিতলিখিতব্যবস্থাদ্বয়ং চ যত্তদব্দীয়তন্মাসীয়-গজপক্ষমিতদিনসম্বন্ধিশনিবাসরে ময়া প্রাপ্তং তদবলোক্য যাদৃশবোধো জাতস্তদনুসারেণোত্তরং লিখ্যতে ॥—

प्रभुसमर्पितव्यवस्थाद्वयोस्तात्पर्यार्थस्त्वयमेव—कस्यचिदनपत्यस्य मृतस्य ब्राह्मणस्य पत्न्याः स्वसंक्रान्तपतिस्थावरादिधनस्य पतिसपिण्डेषु विद्यमानेष्वन्यस्मै हस्तान्तरकरणे क्षमता नास्ति, किन्तु यावज्जीवं भोगाधिकार इति। तत्प्रभुसमर्पितव्यवस्थाद्वयोपरिलिखितप्रश्नद्वयलिखितवृत्तान्ते सति मिथिलादेशचलितशास्त्रानुसारेण यथार्थमेव भवति प्रभुसमर्पितव्यवस्थाभ्यां तद्व्यवस्थाद्वयोपरिलिखितप्रश्नाभ्यां चैतद्विवादे पत्न्याः स्वसंक्रान्तपतिस्थावरादिधनस्य हस्तान्तरकरणक्षमताबोधकशास्त्रीयावश्यकहेत्वनवगमादिति ॥—

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुनमासीयद्वाविंशतितमदिनसम्बन्धिबुधवासरे मया प्रभुसमर्पितविचारपत्राभ्यां व्यवस्थापत्राभ्यां च निवेदनपत्रेण च सहितेयं व्यवस्था दत्तेति ॥—

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

(९६)—९३ नं० सदर—

इं० सन १८३६ सालेर ६ एफरेल मोताबक सन १२४२ सालेर २६ चैत्र तारिख बुधवारेर प्रकाश्य मोकाम कलिकातार सदर देओयाणी आदालतेर रोबकारि उक्त आदालतेर हाकिम श्रीयुत जार्ज्ज इष्टाकोयेल साहेबेर एजलासे—

रामनाथसिंह— आपीलाण्ट—
राजारूपसिंह ओ राधेकृष्ण— रेष्पाडेण्टान—

आपीलाण्टेर उकिल मुनशी दादारबकस ओ रेष्पाडेण्टानेर उकिल मुनशी अलीउल्ला उपस्थित हइलो। एइ मोकद्दमा अद्य तरतिब नम्बर मते आमार नेसस्ते रोबकार हइया मिछिलेर कागजसकल विवेचनाय जाना गेलो जे मुद्दइआन अर्थात रेष्पाडेण्टान राजरूपसिंह ओ राधेकृष्णइ नओयान परगनार दत्तेट ओ गयरहे मौजाहायेर पर हक-सफा सुरते दखल करणेर दाविते

বিক্রেতা ধুরমলসিংহ ও খরিদার রামনাথসিংহের নামে জেলা সাহাবাদের দেওয়াণী আদালতে নালিস করিলেক। জেলার জজ সাহেবের তজবিজে আদালতের মৌলবির স্থানে ফতওয়া অর্থাৎ ব্যবস্থা লইয়া সফা অনুসারে বিরোধীয় বস্তুর প্রতি মুদ্দাইআনের দাবি যথার্থ হওনের বিষয় ডিক্রী করিলেন ও সেই ডিক্রী দ্বিতীয় নিষ্পত্যর্থ স্থানে এলাকা আজিমাবাদের প্রোবিনশীয়ল কোর্টে বহাল করিল, যে বর্ত্তমান আপীলাণ্ট তাহাতে নারাজ হইয়া এ আদালতে আপীল খাস উপস্থিত করিলেক। সন ১৮৩৩ সালের ২৩ জুলাই তারিখের রোবকারি মতে এই আদালতের হাকিম গারট হালডন রাটরি সাহেবের নেসস্ত হইতে মঞ্জুর হইলো। যে হেতুক প্রকাশ যে আপীল খাস মঞ্জুরির কারণ—যে যাহার উভয় পক্ষ হিন্দু জাতি, সে মকদ্দমা তজবিজ হওয়ায় শরা অর্থাৎ জবনীয় ধর্ম্মশাস্ত্রের অধিকারিকে জিজ্ঞাস্যমতে। অতএব অন্য বিষয়সকল তজবিজের পূর্ব্বে আদালতের পণ্ডিতকে ব্যাওরা জিজ্ঞাসা উচিত। যথা উভয় পক্ষের উকিল প্রকাশ করিলেক যে যদি জজসাহেবের ফয়শালার লিখিত সওয়ালসকলের জওয়াব বেহারদেশের চলিত শাস্ত্রানুসারে এ আদালতের পণ্ডিতের স্থানে লওয়া যায় লভ্যজনক হইবেক। অতএব হুকুম হইলো যে এই আদালতের পণ্ডিত নিচের লিখিত সওয়ালসকলের জওয়াব দুই সপ্তাহের মধ্যে দাখিল করেণ, ও রোবকারির নকল বাঙ্গলা তরজমার সহিত আদালতের পণ্ডিতের নিকট প্রেরিত হয় ॥—

১ প্রথম সওয়াল—

দেওট তালুকের হিস্যাদার ধূরমলসিংহ বিক্রেতা, বাবু রামনাথসিংহ খরিদার, রাজরূপসিংহ ও রাধেকৃষ্ণসিংহ হক-সফা তলবির ওজরদার, আর মৌরাশী তালুক মজকুরার হিস্যাদারান, এবং চতুর্থ পট্টী, যাহাতে বিক্রেতা বেসরিক আছে, তাহারো হিস্যাদার রাজরূপসিংহ ও রাধেকৃষ্ণ ওজরদারের দাওট তালুকের

मध्ये अन्य एक मौजार खरिदार उक्त वावुरामनाथसिँह । यदि-स्यात् विक्रेता आपन अंश वावुरामनाथसिंहेर निकट विक्री करे, उपरेर लिखितेर प्रति विवेचनाय राजरूपसिंह ओ राधेकृष्णेर हक-सफा अर्शे कि ना ॥—

द्वितीय सओयाल—

धूरमलसिंह विक्रेता वावु रामनाथसिंह खरिदारके सन १२३५ फछलीर लेखा एक केता बयनामा सवलगे तिन सत टाकार (ये देय), ओ वायनार तारिख हइते एक मासेर मध्ये कवाला लिखिया दिवार ओ तत्कालीन पानेर वाकि सवलगे एक हाजार [illegible]श टाका लइवार एकरारे लिखिया देय । इहार मध्ये राजरूप-सिंह ओ राधेकृष्ण एक मास गत हओनेर पूर्व्वे अर्थात् सन १२३८ सालेर १८ मे तारिखे तिन सत टाका उपस्थित करिया लवे लओया सुरत अर्थात् तत्परता चेष्टा करिलेक, फलितार्थ आदालते दाखिल करिलेक । ए प्रकार विषय एमत् आनामत हक-शफा रक्षा करणार्थे फलदायक हय कि ना ॥—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतजार्ज्जइष्टाकोप्लसाहेवधर्म्माधिकरण-लिखितेशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयापरेलमासीयविचारपत्रा-न्तर्गतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयरसेन्दुमितदिनसम्बन्धिशनिवा-सरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

प्रथमप्रश्नस्योत्तरम्—

प्रभुसमर्पितप्रथमप्रश्नलिखितविवेचनया धर्म्मशास्त्रानुसारेण राजरूप-सिंहराधेकृष्णयोर्हकशफाशब्दप्रतिपाद्यं भवितुं न शक्नोतीति ॥

अत्र प्रमाणम्—

व्यवहारान् नृपः पश्येद्विद्वद्भिः ब्राह्मणैः सह ।

धर्म्मशास्त्रानुसारेण—इत्यादि मिताक्षरादिग्रन्थधृतयाज्ञवल्क्य(२।१)वचनम् ॥१॥

यद्येकजाता बहवः पृथग्धर्म्माः पृथक्क्रियाः ।
पृथक्कर्म्मगुणोपेता न तत्कार्य्येषु सम्मताः ॥२॥
स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥ इति वीरमित्रोदयादिग्रन्थधृतनारदवचनद्वयम् ॥३॥—

द्वितीयप्रश्नस्योत्तरम्—

प्रभुसमर्पितद्वितीयप्रश्नलिखितवृत्तान्ते सति एतादृशमूल्यस्थापनं हकसफाशब्दप्रतिपाद्यस्य रक्षणार्थं धर्म्मशास्त्रानुसारेण फलदायकं न भवति —इति वेहारदेशचलितमनुमिताक्षरावीरमित्रोदयादिग्रन्थानुसारिणी व्यवस्थेति ।

अत्र प्रमाणम् —

प्रथमप्रश्नोत्तरलिखितप्रमाणत्रयमेवेति ॥३॥—

यद्यपि महानिर्व्वाणतन्त्रग्रन्थे हकसफाशब्दप्रतिपाद्यविषये उपरिलिखितव्यवस्थाया विरुद्धमपि लिखितमस्ति, किन्तु महानिर्व्वाणतन्त्रग्रन्थो धर्म्मशास्त्रान्तर्गतो न भवति। अत एव तद्ग्रन्थानुसारेण व्यवस्था न लिखिता इति निवेदनमिति ॥—

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुनमासायद्वाविंशतितमदिनसम्बन्धिबुधवासरे मया प्रभुसमर्पितविचारपत्रसहितेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

(९७)—नम्बर—११६

मोकाम कलिकातार सदर देओयानि आदालतेर पण्डित समीपे प्रश्न एइ –

कालीकान्तवल	**आपीलाण्ट**
पार्व्वतीदास्या	**रेष्पाण्डण्ट**

यदि कोन व्यक्ति तिन पुत्र ओ एक स्त्री राखिया मृत्यु हय, ओ ताहार स्त्री ओ पुत्र दिगेर अनैक्यताभाव अर्थे. तवे एतद्देशीय

चलित शास्त्रानुसारे ऐ मृत व्यक्तिर स्त्री पुत्रदिगेर समक्षे पतिर वित्तेर अंश पुत्रदिगेर समांस मते पाइते पारे कि ना । यदि पुत्रदिगेर समांसे वित्तांसि ना हय, तवे कि परिमाणे वित्तांसि हय—एहार उत्तर लिखिवेन इति । १८३६ ता-८ फेव्रुअोरी मोतावेक वङ्गला सन १२४२ तारिख २७ माघ ॥—

श्रीर्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं विचारपत्रं च यदीशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयमार्च्चमासीयद्विपक्षमितदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

यदि कश्चिद्व्यक्तिविशेषस्त्रीन् पुत्रानेकां पत्नीं च विहाय मृतः स्यात्, अथ च मृतस्य पत्न्या सह मृतस्य पुत्राणामर्थान्मातृपुत्राणां मध्ये पुत्रकृतपितृधनविभागद्वारेणानैक्ये सति अर्थात् त्रिभिः पुत्रैर्म्मात्रे भागमदत्त्वा पितृधनं समांशेन विभज्यते, तदा मातापि पुत्रसमांशं ग्रहीतुमर्हति, पुत्रकृतपितृत्यक्तधनविभागोपक्रमं विनैव मात्रा स्वेच्छयैव विभागं कृत्वा पतित्यक्तधनांशयाचनेन अनैक्ये सति माता विद्यमानेषु पुत्रेषु पतित्यक्तधनांशं पुत्रांशं समांशानुसारेण प्राप्तुं नार्हति, किन्तु यावज्जीवं स्वपतिकुलोचितग्रासाच्छादनोपयुक्तधनावश्यकविधवाधर्म्माद्याचरणोपयुक्तधनस्य चाधिकारिणी भवति—इति वङ्गदेशचलितमनुदायभागादिग्रन्थानुसारिणी व्यवस्थेति ॥

अत्र प्रमाणम् —

पितरि चोपरते सोदरभ्रातृभिर्विभागे क्रियमाणे मात्रे पुत्रसमांशो दातव्यः—इतिदायभाग(पृ० ६७)ग्रन्थलिखनम् ॥१॥

भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्
नरकं पीडने चास्य तस्माद् यत्नेन तं भरेत् ॥ इति दायभागादिग्रन्थधृतमनुवचनम् ॥२॥

पिता माता गुरुर्भार्य्या प्रजा दीनाः समाश्रिताः ।
अभ्यागतोऽतिथिश्चैव पोष्यवर्ग उदाहृतः ॥ इति दायभागटीका(पृ० ३४)धृतमनुवचनञ्चेति[1] ॥३॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुलाइमासीयगुणेन्दुमितदिनसम्बन्धिबुधवासरे मया प्रभुसमर्पितप्रश्नपत्रविचारपत्राभ्यां इङ्गरेजीपत्राभ्यां च सहितेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्
श्रीवैद्यनाथमिश्रेण

---

(९८) नं० २०२ सन १८३३ ।—

मोकाम कलिकातार सदर देओयानी आदालतेर मिछिलेर रुवकारि उक्त आदालतेर हाकिम श्रीयुत जार्ज्ज इष्टाकोयेल साहेवेर नेसस्ते इंराजी सन १८३६ सालेर १६ आपरेल मोतावक वाङ्गला सन १२४३ सालेर ५ वैशाख शनिवार प्रकाश्य—

शिवनारायणचौधुरि	आपीलाण्ट
राधाप्यारीदासी ओ गयरह्	रेष्पाण्डेण्टान
राधामोहनमित्र	जेलार मोजाहेम
मधुसूदनदास	एइ आदालतेर छायेल

आपीलाण्टेर उकिलवर्ग जेमेष कोलब्रोक सदरलेण्ड साहेव ओ सदासुखपण्डित ओ रेष्पाण्डेण्टानेर उकिल ताराचाँदवन्द्योपाध्याय ओ राधामोहनमित्रेर उकिल गौरहरिवन्द्योपाध्याय ओ मधुसूदनदासेर उकिल शिवनारायणचट्टोपाध्याय उपस्थित हइल । एइ मकद्दमा अपरिमित तारिखे आमार नेसस्ते रुवकार हइया मिछिलेर कागजसकल पठित हइल । वोध हइल जे मोद्दइ आपीलाण्ट लाट राधानगर आपन खरिदा पर्त्तनिर हकियते

१. मनुस्मृतौ नोपलभ्यते ।

दखल पाओनेर दाविते वयनामार लिखित मूल्य ओ तालुकेर उपस्वत्त्व मवलेग ७०५१ टाकार तायदादे राधाप्यारिदासी ओ कृष्णदासदत्त ओ तिलकरामदत्त आसामीयानेर नामे हुगलि-जेलार देओयानि आदालते एइ एजहारे नालिश करे जे रामगोपालदत्त उहार भ्रातृगण तिलकरामदत्त ओ रघुनाथदत्तेर सहित अन्न प्रथक हओनेर परे सन १२२१ साले आपन उपार्जन हइते नाट राधानगर तालुक पत्तनी सुरते खरिद करिया दखिल ओ कावेज हइया लोकान्तर हय। ताहार मृत्युर पर ताहार वनिता राधाप्यारीदासी आपन स्वामीर ज्येष्ठ भ्राता तिलकरामदत्त ओ पोष्य पुत्र ओ दौहित्र कृष्णरामदत्तेर सरवराहकारिर द्वारा दखिलकार हइया सदर जमिदारेर जमिदारि सेरेस्ताय आपन नामे दाखिल कराइया नाम जारिर लिपि हासिल करिया स्वामिर ऋण परिशोध ओ मालगुजारिर वाकि निमित्त उक्त तालुकेर सामुदाइक हकुक सन १२३८ सालेर २३ फाल्गुण तारिखे मवलगे पाँच हाजार टाका पने फरियादिर हस्ते विक्रय करिया, ताहार वयनामा साक्षिगणेर साइदीते ओ रेजेष्टरी निशानीते लिखिया दिया, खारिज ओ दाखिल कराइया फरियादिके ओ दखीलकार करार परे उक्ता राधाप्यारि अन्य प्रतिवादिगणेर कुपरामर्शे फरियादिर हस्ते विक्रय करा अस्वीकार सम्वलित फौजदारिते दरखास्त गोजराय ओ उक्ता राधाप्यारी ओ तिलकरामदत्त ओ रघुनाथदत्तेर पत्तनी दावि सुरते ओ जगमोहनमिश्रेर ओयारिश राधामोहनमिश्रेर उक्त नाटेर चारि आना रकमे दरपत्तनीदारि पदे दखल थाकनेर हुकुम ओ लम्वरि नालिसेर अनुमति फरियादिर प्रति छादेर कराय। आसामीयान ताहार जओयावे पष्ट अस्वीकारी हइया विरोधीय तालुक जे राधाप्यारीर स्वामी रामगोपालदत्तेर सोपार्जित ओ ताहार भ्रातृवर्गेर सहित प्रथकान्ने थाका मुनकीर, वरं ए काल पर्य्यन्त ताहारदिगेर तावत कारवार साधारणे ओ एजमालीते थाका प्रकाश

করে, এবং ফরিয়াদির দরপেশ করা কবালা জাল ও কিত্রিম করার দিয়া শাস্ত্র মতে উক্তা রাধাপ্যারির কন্যা ও দৌহিত্র বর্ত্তমানে দান আ বিক্রয় অশোধ্য বয়ান করে। জেলার জজ সাহেব জুরিরদিগের রায়, এ বিষয়ের বিশেষ তহকীকাতে জে বিরোধীয় তালুক রামগোপাল দত্তের স্বোপার্জ্জিত কি তিন সরিকের অংশ আছে, লইয়া আপন রায়ের ঐক্যতায় তদানুসারে সন ১২৩৪ সালের ৩ মার্চ্চ তারিখে লিখিত ফয়সলার কারণসকলে ফরিয়াদির দাবী ডিসমিস করিলেন। এই প্রকারে জে ফরিয়াদী, যদি রাধাপ্যারিদাস্যার হিস্যার প্রতি কোন দাবি রাখে. পৃথক নালিশ উত্থাপন করণের ক্ষমতা আছে। মোদ্দই তাহাতে নারাজ হইয়া এই আদালতে আপিল করিয়াছে—জে হেতুক আমার নিকট রাধামোহনমিশ্রের মোজাহেমা সওয়ালের প্রতি, জে আপনাকে বিরোধীয় তালুকের চতুর্থাংশের দরপত্তনীদার করার দেয়, এই বিবেচনায় জে সে এ মকদ্দমার আসামিয়ানের মধ্যে নহে। কেবল দরপত্তনীদার মাত্র, কোন হুকুম ছাদের করা আবিশ্বক নাই, ও মধুসূদনদাসের অর্পিত দরখাস্তের প্রতি ও জে সে আপন খরিদ করিয়া এ আদালতে দাখিল করিয়াছে, কোন হুকুম উপযুক্ত বোধ হয় না। জখন এ মকদ্দমা নিষ্পত্য হইবেক এবং বিরোধীয় বস্তু, আপীলাণ্ট কিম্বা রেস্পাণ্ডেণ্ট, জাহার হক হইবেক, তাহার পর দাবি উপস্থিত করা ব্যতিরেকে উহার দখলের হুকুম হইতে পারে না। অতএব তাহা পরিত্যাগ করিয়া এ মকদ্দমার আসল অবস্থার প্রতি মোহনলালখাঁ আপীলাণ্টের মকদ্দমার প্রসঙ্গ জাহা রাণী সিরোমণী রেস্পাণ্ডেণ্টের নামে সন ১৮১২ সালের ৩১ আগষ্ট তারিখে এই আদালত হইতে নিষ্পত্য পাইয়াছে। এবং আমার অনুমানে তাহার লিখিত হেতুসকল জাবদীয় উত্তরাধিকারী জাহারা হস্তান্তরের সময় জীবতমান থাকে তাহারদিগের সম্মতি ও অনুমতি ভিন্য স্বামীর ত্যার্থ্যে সামুদাইক বিষয় হস্তান্তর করণের বিষয়ে অশীদ্ধ বোধ হয়। অনুষ্ঠান করা গেল। তাহাতে

आपीलएण्टेर उकिल कहिलेक जे आमि अनुमान करि से मकद्दमा दान विषयक, ताहाते पण्डितवर्गेर लिखित जे व्यवस्था ताहा एइ विक्री विषयक, मकद्दमार सहित कोन सम्पर्क नाइ। ए जन्य ए विषय शास्त्रवेत्ताके जिज्ञाशा करा उचित बोध हइल। अर्थात् एइ आदालतेर पण्डितके जिज्ञाशा करा जाय जे से उपरेर लिखित फयसला दृष्टा करणेर परे सकल उत्तराधिकारि, जाहारा विक्रयपत्र लेखा हइवार समय जीवद्दशाय छिल, ताहारदिगेर अनुमति भिन्न टाकार परिवर्त्ते स्वामीर त्याज्य मामुदाइक भूम्यादि विक्रयेर प्रति विधवा स्त्रीर क्षमता विषये शास्त्रेर आज्ञा वयान करे, ओ ए विषये स्वामिर ऋण थाकुक वा ना थाकुक कोन प्रभेद आछे कि ना; एवं यदि स्यात् स्वामीर त्याज्य सामुदाइक भूम्यादि विक्रय करिते ना पारे, तवे तन्मध्ये कि परिमान विक्रय करिवार क्षमता राखे—पष्ट करे। अतएव हुकुम हइल जे मकद्दमा अद्य मोलतवी थाके, एवं उपरेर लिखित विषयसकलेर जिज्ञाशा करेण। एइ रुवकारिर नकल एइ आदालतेर पण्डितेर निकट प्रेरित हय इति॥

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिश्रीयुतजार्ज्जइष्टाकोएलमाहेवधर्म्माधिकरणलिखितेशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयापरेलमासायरसेन्दुमितदिवसीयविचारपत्रान्तर्गतप्रश्नप्रतिरूपपत्र यत्तदब्दीयमेइमासीयशिवमितदिनसम्बन्धिबुधवासरे तत्समर्पितरसगुणगजेन्दुमिताब्दीयजुलाइमासीयमुनिमितदिवसीयविचारपत्रान्तरञ्च यत्तदब्दीयतन्मासीयगुणेन्दुमितदिनसम्बन्धिबुधवासरे च मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेण प्रभुसमर्पितविचारपत्रलिखितजयपत्रावलोकनेन चोत्तरं लिख्यते—

विक्रयपत्रलिखनकालीनविद्यमानोत्तराधिकारिसमुदायानुमतिमन्तरेण राजतमुद्राविनिमये पत्न्याः स्वसंक्रान्तसमस्तपतिस्थावरादिधनस्य विक्रयकरण-

क्षमता शास्त्रीयावश्यककार्य्यार्थमर्थात् पतिकृतर्णपरिशोधनार्थं पत्योर्द्ध्वदैहिकक्रियाद्यर्थं पतिकुटुम्बभरणार्थं स्वभरणपोषणाद्यर्थं चास्त्येव । पत्नी शास्त्रीयावश्यककार्य्यार्थव्यतिरिक्तस्वेच्छया स्वमरणानन्तरं विद्यमानपत्युत्तराधिकारिस्वत्वनाशकविक्रयकरणक्षमतां न लभतीत्येवात्र विशेषः । एवञ्च सति पतित्यक्तस्थावरादिधनान्तर्गतेन यावता धनेन पतिकृतर्णपरिशोधनस्योपरिलिखितावश्यककार्य्यान्तरस्य वा निर्व्वाहो भवति विधवायास्तत्परिमितपतित्यक्तस्थावरादिधनस्य विक्रयकरणक्षमतायाः शास्त्रीयत्वमेव । यदि च पतित्यक्तस्थावरादिसमुदायधनस्य विक्रयमन्तरेण पत्नीकर्त्तव्यशास्त्रीयावश्यककार्य्यजातस्य तदन्तर्गतस्य कस्यचिदपि कार्य्यस्य वा निर्व्वाहो भवितुं न शक्यते, तदा तत्तत्कार्य्यस्य निर्व्वाहार्थं पत्न्याः पतित्यक्तस्थावरादिसमुदायधनस्य विक्रयकरणक्षमतायाः शास्त्रीयत्वमेव—इति वङ्गदेशचलितदायभागादिग्रन्थानुसारिणी व्यवस्थेति ॥

अत्र प्रमाणम्—

ऋक्थग्राही ऋणं दाप्यः—इति विवादभङ्गार्णवादिग्रन्थधृतयाज्ञवल्क्यवचनम् ॥१॥

भर्त्तृकामेन वा भर्त्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नापि सा दाप्या धनं यद्याश्रितं स्त्रिया ॥ इति विवादार्णवसेतुविवादभङ्गार्णवादिग्रन्थधृतकात्यायनवचनम् ॥२॥

भर्त्त्रा जीवन् यथा यस्य पोषणादिकं यद्वा कर्म्म करोति मृतभर्त्तृकापि स्वशक्त्यनुसारेण तथैव तस्य पोषणं तच्च कर्म्म कुर्व्वीत—इति विवादभङ्गार्णवग्रन्थलिखनम् ॥३॥

भर्त्तुरौर्द्ध्वदैहिकक्रियाद्यर्थं दानादिकमप्यनुमतमिति । वर्त्तनाशक्ताबाधानमप्यनुमतम् । तत्राप्यशक्तौ विक्रयणमपि च—इति दायभागग्रन्थलिखनञ्चेति ॥४॥

ईशवीशब्दप्रतिभाग्यरसगुणगजेन्दुमिताब्दीयजुलाइमासीयइन्दुपक्षमित-

दिनसम्बन्धिगुरुवासरे मया प्रभुसमर्पितविचारपत्राभ्यां सहितेयं व्यवस्था दत्तेति ॥—

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

श्रीर्ज्जयतितराम्

(९९) एतद्धर्म्माधिकरणाधिपतिश्रीयुतजार्ज्जइष्टाकोएलसाहेबधर्म्माधिकरणलिखितेशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुनमासीयगुणपक्षमितदिवसीयविचारपत्रान्तर्गतप्रश्नपत्रं तत्समर्पितैतद्धर्म्माधिकरणीयैतद्विवादविषयनिविष्टव्यवस्थापत्रं तीरभुक्तिजिलाख्यधर्म्माधिकरणीयव्यवस्थात्रयं च यत्तदब्दीयतन्मासीयगजपक्षमितदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

पूर्व्वसमर्पितव्यवस्थाद्वयमीशवीशब्दप्रतिपाद्याङ्कपक्षगजेन्दुमिताब्दीयजुनमासीयदिङ्मितदिनलिखिततीरभुक्तिजिलाख्यावान्तरधर्म्माधिकरणाधिपतिजजपदाभिषिक्तसाहेबाज्ञप्तप्रश्नोत्तरव्यवस्था च। एतासु ति(सृ)षु व्यवस्थासु तज्जिलाख्यधर्म्माधिकरणाधिपतिजजपदाभिषिक्तसाहेबाज्ञप्तप्रश्नोत्तरव्यवस्था मिथिलादेशचलितशास्त्रानुसारिणी न भवति, पत्नीकृतपतित्यक्तस्थावरादिधनविषयकदानसिद्धिसम्पादकशास्त्रीयावश्यकहेतोस्तद्व्यवस्थापत्रलिखितप्रश्नतद्व्यवस्थाभ्यामप्राप्तत्वात्। पूर्व्वसमर्पितव्यवस्थाद्वयं चार्थादीशवीशब्दप्रतिपाद्याङ्केन्दुगजेन्दुमिताब्दीयजुनमासीयशिववक्त्रेन्दुमितदिवसीयतीरभुक्तिजिलाख्यधर्म्माधिकरणाधिपतिराजिस्तरपदाभिषिक्तसाहेबाज्ञप्तप्रश्नोत्तरव्यवस्था तदब्दीयतन्मासीयेषुपक्षमितदिनलिखिततत्प्रभुकृतप्रश्नोत्तरव्यवस्था च तत्तद्व्यवस्थापत्रलिखितप्रश्नद्वयलिखितावस्थायां मिथिलादेशचलितशास्त्रानुसारिणी भवति इत्येतद्विषयिणी व्यवस्था चैतदब्दीयजुनमासीयाद्रिपक्षमितदिनसम्बन्धिबुधवासरे दत्तास्तीति ॥

इशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुलाइमासीयमुनिपक्षमित-

दिनसम्बन्धिबुधवासरे मया प्रभुसमर्पितविचारपत्रेण चतुर्भिर्व्यवस्थापत्रैः सहितेयं व्यवस्था दत्तेति ॥

श्रीर्जयतितराम्

श्रीवैद्यनाथमिश्रेण

अत्र प्रमाणम्—

पश्यन्नन्यस्य ददतः क्षितिं यो न निवारयेत् ।

स्वामी सतापि लेख्येन पुनस्तान्न समाप्नुयात् ॥ इति बृहस्पति(पृ० ७५)वचनादिति—

सही रामनाथमिश्र, पण्डित अदालत दिवानी जिले—तिरहुत ॥

श्रीश्रीदुर्गा

(१००)—नं० ५६४

मोतफरका सन १८३६ इ०—

रोवकारि मिछिल आदालत देओानि सदर मोकाम कलिकाता श्रीयुत डेविड इशमितसाहेब कायेम-मोकाम हाकिम आदालय मजकुरार बैठके । तारिख १८ जून सन १८३६ इ० मोतावक ६ आषाढ सन १२४३ बाङ्गला रोज शनिवार ॥—

मोछमात रुकमन— शाएला—

साएलार उकिल तारकचन्द्रराय हाजिर हइलो, गत रोजेर हुकुमानुसारे जिला भागलपुरेर जजसाहेबेर गत २८ माइ माहार लिखित रोवकारि ओ रिटरण जाहा एइ आदालतेर हाल सनेर २४ मार्च्च माहार लिखित रोवकारिर जवावे एइ मकद्दमार कागजात ओ ताहार इंजेरि तरजमा सम्वलित पौछियाछिल, अद्य साएलार सओाल ओ गयरह कागजात सहित उपस्थित हइया विवेचना हइल । जे हेतुक साएलार सओाल प्रति नातक

हुकुम हइवार पूर्व्वे एइ आदालतेर पण्डितेर स्थाने एइ रूप व्यवस्था जे कोन एक दयप्र वेक्तिर एक विमाता ओ स्त्री थाकिले शास्त्र मते दयप्र वेक्तिर विमाता ऐ दयप्र पुत्रेर सरिर ओ विशय रक्षा करणेर स्वत्व राखिवेक, अथवा ताहार पत्नी रक्षक हइवेक-तलव करा आविश्यक। एमते हुकुम हइल जे प्रथमत एइ आदालतेर पण्डित उपरेर लिखित विवरणेर व्यवस्था ४ चारि दिवसेर मध्ये दाखिल करेण। तत्परे जे हुकुम उपयुक्त प्रकाश पाइवेक इति ॥—

श्रीर्ज्जयतितराम्

एतद्धर्म्माधिकरणाधिपतिस्थानाभिषिक्तश्रीयुतडेविडइशमितसाहेवधर्म्माधिकरणलिखितेशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुनमासीयगजेन्दुमितदिवसीयविचारपत्रान्तगतप्रश्नप्रतिरूपपत्रं यत्तदब्दीयतन्मासीयगजपक्षमितदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

धर्म्माधिकरणाधिपतिविवेचनया विप्तिसमुद्धृतरत्वस्य विप्तिसस्वत्वास्पदीभूतशरीरधनयोः संरक्षणकरणयोग्यतायाश्च निश्चयो विप्तिसविमातृपत्न्योर्म्मध्ये यस्यां भवति तस्या एव विप्तिसस्वत्वास्पदीभूतशरीरधनयोः संरक्षणकर्त्तृत्वं शास्त्रानुमतं भवति—इति मन्वादिधर्म्मशास्त्रानुसारिणी व्यवस्थेति ॥—

अत्र प्रमाणम्—

अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् ।

न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च ॥—इति कात्यायनवचनम् ॥१॥

ईशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयागस्तिमासीयाङ्कमितदिनसम्बन्धिमङ्गलवासरे मया प्रभुसमर्पितविचारपत्रसहितेयं व्यवस्था दत्तेति। —

श्रीर्ज्जयतितराम्

श्रीवैद्यनाथमिश्रेण

(१०१)—पण्डितेर पर सओोल—

श्रीरामरामुखोपाध्याय नामे एक जन छिल। ताहार चारि पुत्र। ज्येष्ठ श्रीरामलोचनमुखोपाध्याय, द्वितीय श्रीराममोहनमुखोपाध्याय, तृतीय श्रीरामतनुमुखोपाध्याय, चतुर्थ श्रीताराचाँदमुखोपाध्याय। ताहार मध्ये राममोहनमुखोपाध्याय निःसन्तान फौत करियाछे। आर बाकी तिन जनार ओयारिस वर्त्तमान आछे। ऐ रामरामुखोपाध्याय आपन ब्रह्मोत्तर देड विघा जमि वागान आपन एक कन्या करुणामयीदेवीके दान करे। ताहार दानपत्र एक केता सन ११७४ सालेर २५ वैशाख तारिखेर लिखित दाखिल हइयाछे। ऐ दानपत्रेर शाइद हय नाइ। अतएव जिज्ञास्य एइ ऐ दानपत्रे दानदत्तार ओयारिसान अर्थात ताहार पुत्रसकल सत्ते यदि दान हइया थाके, आर ऐ दानदत्तार पुत्रेरा सेइ दानपत्रे यदि साक्षि ना हइया थाके, आर दानदात्तार अयारिशानेर अनुमति व्यतिरेके ऐ दान यदि हइया थाके, तवे एमत दान सिद्ध हय कि ना—यथाशास्त्र इहार व्यवस्था, जाहा हये, लिखिवेन इति। सन १८३६ साल तारिख १२मे॥—

श्रीर्ज्जयतितराम्

प्रभुसमर्पितप्रश्नपत्रं विचारपत्रद्वयञ्च यदीशवीशब्दप्रतिपाद्यरसगुणगजेन्दुमिताब्दीयजुनमासीयवेदेन्दुमितदिनसम्बन्धिमङ्गलवासरे मया प्राप्तं तदवलोक्य यादृशबोधो जातस्तदनुसारेणोत्तरं लिख्यते—

